आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ६४

बृहदारण्यकोपनिषत्

रङ्गरामानुजविरचितप्रकाशिकोपेता ।

वे० शा० मं० रा० 'शंकरशास्त्री वेणेगावकर' इत्येतैः संशोधिता ।

सा

हरि नारायण आपटे

इत्येतैः

पुण्याख्यपत्तने

आनन्दाश्रममुद्रणालये

आयसाक्षरैर्मुद्रयित्वा

प्रकाशिता ।

शालिवाहनशकाब्दाः १८३२

खिस्ताब्दाः १९११

मूल्यं सपादरूपकत्रयम् । (३।)

बृहदारण्यकोपनिषद्विषयसूचीपत्रकम् । (अं० ६४)

अथ प्रथमोऽध्यायः ।

विषयाः ।	ब्रा० ।	क० ।	पृ० ।
मङ्गलाचरणमुपोद्घातश्च ...	०	०	१
अश्वमेधविज्ञानायाश्वमेधीयाश्वस्य शिरआद्यङ्गेषु कालादिदृष्टिविधानम् ...	१	१	२
अश्वादिदर्शनोक्तिः ...	१	२	४
अग्नेरुत्पत्तिपूर्वकमश्वमेधाङ्गभूते चित्याग्नौ तदङ्गभूतसंवत्सरकाले च ब्रह्मदृष्टिविधानम् ...	२	१	५
अश्वस्य सृष्टिप्रकारोऽश्वमेधनिर्वचनमेतद्विज्ञानस्याश्वमेधविज्ञानप्रयोजनकथनं च ...	२	६	१३
कर्माङ्गभूतोद्गातरि मुख्यप्राणदृष्टिं विधातुमाख्यायिकाकथनम् ...	३	१	१६
प्राणविदमुद्गातारं प्रति प्रार्थनारूपाणां मन्त्राणां प्रयोगकालकथनपूर्वकं मन्त्रार्थनिरूपणम् ...	३	२८	२९
नारायणतदुपासनतत्प्रार्थनानां परमतत्त्वाद्भितपुरुषरूपत्वकथनं सनत्कुमारसनन्दादियोगीश्वरविषयत्वकथनमतिसृष्टेः सृष्टिविसृष्ट्यपेक्षयाऽसिद्धाविभत्वकथनं च ...	४	१	३१
प्रजापतेर्मनुशतरूपादिमिथुनभवनद्वारा मनुष्यादिसृष्टिः	४	३	३३
अग्नीषोमसृष्टिकथनं ब्राह्मणादिवर्णनियन्तृदेवतासृष्टिकथनं च ...	४	६	३६
प्रजापत्यतिसृष्टिज्ञानवतः प्रजापतिवत्स्रष्टृत्वप्राप्तिफलकथनम् ...	४	६	३७
अव्याकृतस्य जगतो नामरूपाभ्यां व्याकरणम् ...	४	७	३७
आत्मनः शरीरे क्षुरकोशस्थक्षुरवद्व्यवस्थितेः कथनम् ...	४	७	३८
प्राणनाद्येकैकक्रियाविशिष्टस्याऽऽत्मनोऽकृत्स्नत्वात्तदुपासकस्याऽऽत्मोपासकत्वाभावकथनपुरःसरं कृत्स्नब्रह्मण एवोपास्यत्वकथनम् ...	४	७	३९
आत्मनः पुत्रादेः सर्वस्मात्प्रेयस्त्वज्ञानेनाऽऽत्मोपासकस्य प्रियहान्यभावः ...	४	८	४३

विषयाः ।	ब्राह्म०	क०	पृ०
कीदृग्विज्ञानेन सर्वमभवदिति प्रश्नस्याहं ब्रह्मास्मीत्युत्तरम् ...	४	९	४४
देवर्षिमनुष्याणां मध्ये यो यः प्रत्यबुध्यत स एव तद्ब्रह्माभवदित्येतदर्थस्य दार्ढ्याय मन्त्रोदाहरणम् ...	४	१०	४५
अहं ब्रह्मास्मीति विज्ञातुर्देवा अपि मुक्त्यैश्वर्यविघाताय नेशते किमुतान्य इत्यत्र हेतुकथनम् ...	४	१०	४५
यः पुमान्धारकत्वादिना स्वस्मादात्मत्वेन भिन्ना देवताऽऽत्मभूताद्भिन्नोऽहं चेत्युपास्ते तस्याज्ञत्वात्पशुत्वम् ...	४	१०	४५
अब्रह्मविदं पुरुषं विघ्नं कर्तुमनुग्रहं चेशते देवा इत्यत्र पशुदृष्टान्तप्रदर्शनपूर्वकं विद्याप्राप्तौ श्रद्धाभक्तिपरः प्रणयोऽप्रमादी स्यादिति कथनम् ...	४	१०	४६
चातुर्वर्ण्यसृष्टिः ...	४	११	४७
स्वात्मानमदृष्ट्वा मृतस्याऽऽत्मनः सकाशाद्रक्षणाभावे वेददृष्टान्तकथनपुरःसरमात्माज्ञानिकृतकर्मणः क्षयिष्णुत्वादात्मलोकस्यैवोपासनम् ...	४	१५	५१
आत्मलोकोपासकस्य कर्मक्षयाभावनिरूपणमात्मलोकं स्तोतुं फलकथनं च ...	४	१५	५२
कर्माधिकृताविदुषः कर्मभिः पशुवत्सर्वदेवादिपिपीलिकान्तभूतोपकारकर्तृत्वेन सर्वभूतभोग्यत्वप्रतिपादनपूर्वकं सर्वभूतभोग्यत्वादेव स्वदेहरक्षणवत्सर्वभूतानि तं सर्वतः संरक्षन्तीति कथनम् ...	४	१६	५२
पाङ्क्तयज्ञादिकथनम् ...	४	१७	५४
सविनियोगसप्तान्नसूत्रभूतमन्त्रविवरणम् ...	५	१	५६
पुत्रादिसाधनानां साध्यविशेषसंबन्धवचनम् ...	५	१६	६७
संप्रत्तिकर्मकथनम् ...	५	१७	६८
कृतसंप्रत्तिके दैववागादिप्राणावेशप्रकारकथनम् ...	५	१८	६९
व्रतमीमांसाकथनम् ...	५	२१	७१
प्रपञ्चिताविद्याकार्यस्य संक्षेपेणोपसंहारः ...	६	१	७५

विषयाः । ब्राह्म० । कं० । पृ० ।

अथ द्वितीयोऽध्यायः ॥ २ ॥

विषयाः	ब्राह्म०	कं०	पृ०
गार्ग्याजातशत्रुसंवादः	१	१	७७
कार्यकारणात्मकभूतस्वरूपनिर्धारणम्	२	१	९१
मूर्तामूर्तब्रह्मकथनम्	३	१	९५
याज्ञवल्क्यमैत्रेयीसंवादः	४	१	१०३
आत्मैवेदं सर्वमिति प्रतिज्ञातस्याऽऽत्मोत्पत्तिस्थितिलयत्वं हेतुमुक्त्वा पुनरागमप्रधानेन मधुब्राह्मणेन प्रतिज्ञातार्थस्य निगमनम्	५	१	११९
विद्याप्रवर्तकाचार्यवंशकथनम्	६	१	१२८

अथ तृतीयोऽध्यायः ॥ ३ ॥

विषयाः	ब्राह्म०	कं०	पृ०
मधुकाण्डसिद्धसर्वान्तर्यामित्वोपपादकयाज्ञवल्कीयकाण्डारम्भे जनकयज्ञे मिलितेषु द्विजेषु मध्ये कोऽनूचानतम इति जिज्ञासया जनककृतो गोष्ठे गोसहस्रावरोधः	१	१	१३०
ब्रह्मिष्ठेन गोसहस्रं नेयमिति वैदेहेनोक्ते द्विजानां गोग्रहणासामर्थ्यं वीक्ष्य सहस्रगवं स्वाश्रमं कालयेति याज्ञवल्क्यविहितस्वच्छात्रानुशासनानन्तरं द्विजेषु कुपितेषु भर्त्सनपूर्वकं याज्ञवल्क्यं प्रति ब्रह्मिष्ठाभिमान्यश्वलकृतभाषणम्	१	२	१३१
याज्ञवल्क्याश्वलसंवादः	१	३	१३२
याज्ञवल्क्यार्तभागसंवादः...	२	१	१३७
याज्ञवल्क्यभुज्युसंवादः	३	१	१४३
याज्ञवल्क्योषस्तसंवादः	४	१	१४५
याज्ञवल्क्यकहोलसंवादः	५	१	१४८
याज्ञवल्क्यगार्गीसंवादः	६	१	१५३
याज्ञवल्क्योद्दालकसंवादः	७	१	१५५
गार्गीकृतप्रश्नयोरुत्तरम्	८	१	१६६
याज्ञवल्क्यशाकल्यसंवादः	९	१	१७४
याज्ञवल्क्यशापाच्छाकल्यमूर्धपतनम्	९	२६	१८५

विषयाः।	ब्राह्म०।	क०।	पृ०।
शाकल्यमूर्धपातभयात्तूष्णींभूतेषु ब्राह्मणेषु याज्ञवल्क्योक्त्यनन्तरं ब्राह्मणानां प्रत्युत्तरदानासामर्थ्यप्रतिपादनम्	९	२७	१९२
अप्रगल्भभूतेषु ब्राह्मणेषु याज्ञवल्क्यकृतप्रश्नप्रतिपादकाः श्लोकाः	९	२८	१९२

अथ चतुर्थोऽध्यायः॥ ४॥

सभायामास्थितो जनको याज्ञवल्क्यमागतं दृष्ट्वा पुनरपि किमर्थमागतोऽसि पशूनिच्छन्नाहोस्वित्सूक्ष्मवस्तु निर्णेतुमिच्छन्नपि तत्र 'उभयमेव सम्राट्' इति याज्ञवल्क्योक्तिः	१	१	१९४
ज्ञानसाधनानि [illegible]ोपासनानि	१	२	१९५
जागरादिद्वारा तत्त्वनिर्धारणम्	२	१	२०१
याज्ञवल्क्यस्य न वदिष्य इति मतस्य भङ्गे कामप्रश्नाख्यस्य वरस्य याज्ञवल्क्येन [illegible] दत्तत्वादिति हेतूक्तिः	३	१	२०५
किंज्योतिरयं पुरुष इत्यादिजनककृतप्रश्नानामादित्यज्योतिरित्यादीनि याज्ञवल्क्यकृतोत्तराणि	३	२	२०५
जनककृतस्य कतम आत्मेति प्रश्नस्य योऽयं विज्ञानमय इत्याद्युत्तरम्	३	७	२०७
जागरे आत्मनः स्वयंज्योतिषो मुञ्जादिषीकावन्निष्कृष्य दर्शयितुमशक्यत्वात्स्वप्ने स्वयंज्योतिष्ट्वादिप्रतिपादनम्...	३	७	२१०
स्वयंज्योतिष्ट्वाद्युक्तार्थप्रतिपादकाः श्लोकाः	३	११	२१५
स्वप्ने मोक्षभयादिदर्शनात्त्वयं मृत्युमतिक्रामतीत्यतो विमोक्षायैव ब्रूहीति जनकेन पर्यनुयुक्तयाज्ञवल्क्यस्य सुषुप्त आत्मनो मोक्षासाङ्गित्यप्रतिपादनपूर्वकमसङ्गत्वादिप्रतिपादनम्	३	१५	२१७
कार्यकारणात्मत्वेन कर्तृत्वोपपत्तेः स्वतःकर्तृत्वाभावा[illegible]प्रतिपादनम्	३	१७	२१९
एतस्यैव पुरुषस्योभयत्र संचारे दृष्टान्तः	३	१८	२१९

विषयाः ।	ब्राह्म० ।	कं० ।	पृ० ।
स्थानद्वयसंचारं प्रदर्श्य सुषुप्तिदशाप्रकाशनम्	३	१९	२१९
नाडीखण्डेन सर्वानर्थबीजभूताविद्यासत्त्वावधारणम् ...	३	२०	२१९
सर्वात्मभावरूपमोक्षस्य प्रत्यक्षतो निर्देशः	३	२१	२२०
जीवस्य परेणाऽऽत्मनैकत्वाद्बाह्याभ्यन्तरज्ञानाभावे दृष्टान्तः	३	२१	२२०
सुषुप्ते पित्रादीनां पितृत्वाद्यभावकथनम्	३	२२	२२१
द्रष्ट्रादीनां दृष्ट्यादेर्विपरिलोपाभावप्रतिपादनम् ...	३	२३	२२२
स्वप्नस्थानादौ नैवमिति प्रतिपादनम्	३	३१	२२३
पूर्वोक्तवस्तूपसंहारार्थं सलिलवाक्यम्	३	३२	२२३
इदं मनुष्यानन्दं प्रभृति शतगुणोत्तरक्रमेण परमानन्दप्रदर्शनम्	३	३३	२२४
स्वप्नान्तेऽवस्थितस्य जीवस्य बुद्धान्तसंचरणविवरणम्	३	३४	२२६
आत्मनो देहाद्देहान्तरप्राप्तौ शकटदृष्टान्तः	३	३५	२२६
आत्मन ऊर्ध्वोच्छ्वासित्व आम्रादिदृष्टान्तेनोक्तम् ...	३	३६	२२७
शरीरं परित्यज्य गच्छत आत्मनो देहान्तरोपादाने सामर्थ्याभावशङ्कायां राजभृत्यदृष्टान्तेन सर्वभूतान्यादित्यादीनि तत्कर्मप्रयुक्तानि भूतैरेव कर्मफलोपभोगसाधनैः कर्मफलयितारं प्रतीक्षन्त इत्यादिकथनम्	३	३७	२२७
प्रयियासद्राजदृष्टान्तेनाऽऽत्मानं मरणकाले सर्वे प्राणा अभिसमायन्तीत्येतत्कथनम्	३	३८	२२८
एभ्योऽङ्गेभ्यः संप्रमुच्येत्युक्तस्य संप्रमोक्षणस्य विस्तरेण वर्णनम्	४	१	२२८
अकामस्य मोक्षप्रतिपादनम्	४	६	२३३
उक्तमोक्षसाधनप्रतिपादकः श्लोकः	४	७	२३६
आत्मकामस्य ब्रह्मविदो मोक्ष इत्यर्थे मन्त्रब्राह्मणोक्ते विस्तरप्रतिपादकाः श्लोकाः	४	८	२३७
प्रस्तुतज्ञानमार्गस्तुत्यर्थं मार्गान्तरनिन्दा	४	१०	२३७
उक्तात्मज्ञानस्तुत्यर्थमेव तन्निष्ठस्य कायक्लेशराहित्यादिप्रतिपादनम्	४	१२	२३८

विषयाः ।	ब्राह्म० ।	क० ।	पृ० ।
ब्रह्मविदो विद्यया कृतकृत्यत्वे स्वानुभवसंप्रतिपत्तिवर्णनम् ...	४	१४	२३९
विद्यास्तुत्यर्थं विदुषो विहिताकरणादिप्रयुक्तभयाभावादिप्रतिपादनम् ...	४	१५	२३९
परमार्थज्ञानसंस्कृतमनसैव ब्रह्मदर्शनमित्यादिप्रतिपादनम् ...	४	१९	२४१
ब्रह्मात्मनि सर्ववेदविनियोगप्रदर्शनम् ...	४	२२	२४५
उक्तविद्याफलकथनपूर्वकं याज्ञवल्क्याय गुरवे कृतकृत्यजनककृतस्वनिवेदनप्रतिपादनम् ...	४	२३	२५५
सोपाधिकब्रह्मध्यानादभ्युदयकथनम् ...	४	२४	२५७
समस्तारण्यकार्थस्य समुच्चित्य निर्देशः ...	४	२५	२५८
उक्तस्य सर्वार्थस्य मैत्रेयीब्राह्मणेन निगमनम् ...	५	१	२५८
याज्ञवल्कीयकाण्डस्य वंशः ...	६	१	२६३

अथ पञ्चमोऽध्यायः ॥ ५ ॥

सर्वोपनिषदर्थब्रह्मानुवादः ...	१	१	२६५
ॐशब्दवाच्यब्रह्मोपासनम् ...	१	१	२६५
सर्वोपास्तिशेषत्वेन दमादिसाधनत्रयविधानम् ...	२	१	२६६
ब्रह्मोपासनाङ्गभूतं हृदयोपासनम् ...	३	१	२६८
हृदयस्य सत्यत्वेनोपासनम् ...	४	१	२६९
सत्यस्य ब्रह्मणः स्तुत्यर्थमुक्तप्रथमजत्वविवरणम् ...	५	१	२७०
मनउपाधिविशिष्टस्य ब्रह्मण उपासनम् ...	६	१	२७४
विद्युद्ब्रह्मोपासनम् ...	७	१	२७४
वाग्धेनुब्रह्मोपास्तिः ...	८	१	२७५
वैश्वानराग्निब्रह्मण उपासनम् ...	९	१	२७६
एतत्प्रकरणस्थसर्वोपासनविदो गतिकथनमश्रुतफलोपासनफलकथनं च ...	१०	१	२७७
तपउपासनम् ...	११	१	२७८
गुणद्वयविशिष्टयोर्मिलितयोरन्नप्राणयोर्ब्रह्मत्वेनोपासनम्	१२	१	२७९
उक्थदृष्ट्या प्राणोपासनम् ...	१३	१	२८०

विषयाः ।	ब्राह्म० ।	कं० ।	पृ० ।
यजुर्दृष्ट्या प्राणोपासनम्...	१३	२	२८१
सामदृष्ट्या प्राणोपासनम्	१३	३	२८१
क्षत्रदृष्ट्या प्राणोपासनम्...	१३	४	२८१
गायत्र्युपाधिविशिष्टस्य ब्रह्मण उपासनम्	१४	१	२८२
गायत्र्युदस्थानम्	१४	७	२८६
गायत्र्या मुखविधानायार्थवादो मुखविधानं च ...	१४	८	२८६
अर्चिरादयातिवाहिकानुप्रविष्टादित्यप्रार्थनामन्त्रः ...	१५	१	२८७
अर्चिरादिगधमपर्वाग्निप्रार्थनामन्त्रः	१५	१	२८८
अथ षष्ठोऽध्यायः ॥ ६ ॥			
प्राणविषयकविद्याप्रस्तावः	१	१	२८९
वसिष्ठत्वगुणकवागात्मकप्राणोपासनम्....	१	२	२८९
प्रतिष्ठागुणकचक्षुरात्मकप्राणोपासनम्	१	३	२९०
संपद्गुणकश्रोत्रात्मकप्राणोपासनम्	१	४	२९०
आयतनगुणकमनआत्मकप्राणोपासनम्	१	५	२९०
प्रजापतिगुणकरेतआत्मकप्राणोपासनम्	१	६	२९०
वागादयः प्राणा आत्मनः श्रेयसे विवदमाना चतुर्मुखं गत्वा प्रोचुरस्माकं मध्ये कः श्रेयानिति तत्र प्रजापत्युत्तरम्...	१	७	२९०
वागुत्क्रमणप्रवेशप्रतिपादनम्	१	८	२९१
चक्षुरुत्क्रमणप्रवेशप्रतिपादनम्	१	९	२९१
श्रोत्रोत्क्रमणप्रवेशप्रतिपादनम्	१	१०	२९१
मनउत्क्रमणप्रवेशप्रतिपादनम्	१	११	२९२
रेतउत्क्रमणप्रवेशप्रतिपादनम्	१	१२	२९२
प्राण उत्क्रामति सति प्रचलितवागादिकृतप्राणप्रार्थनं प्राणस्यान्नवस्त्रप्रतिपादनं च	१	१३	२९२
श्वेतकेतोः पञ्चालराजप्रवाहणपरिषद्गमनम्	२	१	२९४
प्रवाहणकृतपञ्चप्रश्नानां श्वेतकेतोरुत्तरदानसामर्थ्याभावप्रतिपादनम्	२	२	२९४
उत्तरदानासामर्थ्याद्राजकृतसत्कारमनादृत्य पितरमागत्य श्वेतकेतुकृतपञ्चप्रश्ननिवेदनम्	२	३	२९६

विषयाः ।	ब्राह्म०	क०	पृ०
पुत्रेण सहाऽऽगताय गौतमाय प्रवाहणकृतमासनादि-पूजापूर्वकं वरदानम्	२	४	२९७
वरदानप्रतिज्ञानन्तरं पञ्चप्रश्नोत्तराणि ब्रूहीति गौतम-वचनम्	२	५	२९८
मानुषाणां वराणां मध्ये किंचिद्वृणुष्वेति प्रवाहण-वचनम्	२	६	२९८
मानुषवरा ममापि सन्तीति दैववरप्रदानेन स्वप्रतिज्ञा रक्षणीयेतिगौतमवचनानन्तरं मत्तो विद्यां शिष्यत्वे-नेच्छाऽऽप्तुमिति प्रवाहणेनोक्ते गौतमस्य वाचैव पूर्वे ब्राह्मणा आपदि क्षत्रियाञ्छिष्यवृत्त्या ह्युपगच्छन्ति नोपायनशुश्रूषादिभिरतः पादोपसर्पणमकृत्वैवोपग-मनकीर्तनमात्रेण प्रवाहणसमीपे वासः	२	७	२९८
पीडितगौतमक्षमापनपुरःसरं वदामीति प्रवाहणवचनम्	२	८	२९९
पञ्चाग्निविद्याकथनम्	२	९	२९९
मृतस्याग्निहुतत्वादिकथनम्	२	१४	३०२
पञ्चाग्निविदुत्तरगतिप्रतिपादनम्	२	१५	३०२
पञ्चाग्निविद्यानभिज्ञानां केवलकर्मिणां दक्षिणमार्गकथनम्	२	१६	३०४
वित्तार्जनोपायभूतमहत्त्वप्राप्तिफलकमन्थाख्यकर्मकथनम्	३	१	३०६
श्रीमन्थपूर्वकपुत्रमन्थविधानम्	४	१	३१२
मैथुनकर्मणि वाजपेयत्वसंपादनम्	४	२	३१२
वाजपेयत्वसंपादनेन पशुकर्म कुर्वतः फलकथनपूर्वकम-विदुषः प्रत्यवायप्रदर्शनम्	४	३	३१२
अविदुषामतिगर्हितं कर्मेत्यत्राऽऽचार्यपरम्परासंमतिक-थनम्	४	४	३१३
सुप्तस्य जाग्रतो वा रेतस्खलने प्रायश्चित्तम्	४	५	३१३
उदके छायादर्शने प्रायश्चित्तम्	४	६	३१४
प्रकृतेन रेतःसिचा यस्यां पुत्रो जनयितव्यस्तत्स्त्रीस्तुतिः	४	६	३१४
भार्यावशीकरणम्	४	७	३१४
पुरुषद्वेषिण्याः प्रीतिसंपादनप्रक्रिया	४	९	३१४
गर्भिणी मा भूदितीच्छायां कर्तव्यप्रतिपादनम् ...	४	१०	३१५

विषयाः ।	ब्राह्म० ।	क० ।	पृ० ।
गर्भिणी भवत्वितीच्छायां कर्तव्यकथनम्	४	११	३१५
जायाजाराभिचारकर्मकथनम्	४	१२	४१५
रजस्वलानियमाः	४	१३	३१६
शुक्लत्वादिविशिष्टपुत्रेच्छायां कर्तव्यकथनम्	४	१४	३१६
कपिलत्वादिविशिष्टपुत्रेच्छायां कर्तव्यकथनम्.	४	१५	३१६
श्यामत्वादिविशिष्टपुत्रेच्छायां कर्तव्यकथनम्	४	१६	३१७
पण्डितत्वविशिष्टदुहित्रिच्छायां कर्तव्यकथनम् ...	४	१७	३१७
पण्डितत्वादिविशिष्टपुत्रेच्छायां कर्तव्यकथनम् ...	४	१८	३१७
ओदनपाकादिकरणकालादिकथनम्	४	१९	३१७
जातकर्मकथनम्	४	२४	३१९
नामकरणम्	४	२६	३१९
पुत्रस्य मात्रे प्रदानपूर्वकं स्तनप्रदानमन्त्रः	४	२७	३१९
मात्रभिमन्त्रणमन्त्रः	४	२८	३२०
यथोक्तपुत्रसंपन्नपितुः पुत्रस्य च स्तुतिः	४	२८	३२०
खिलकाण्डवंशः	५	१	३२०

समाप्तमिदं बृहदारण्यकोपनिषद्विषयसूची-

पत्रकम् ।

ॐ तत्सद्ब्रह्मणे नमः ।

रङ्गरामानुजविरचितप्रकाशिकोपेता

बृहदारण्यकोपनिषत् ।

अतसीगुच्छसच्छायमञ्चितोरःस्थलं श्रिया ।
अञ्जनाचलशृङ्गाभमञ्जलिर्मम गाहताम् ॥ १ ॥
व्यासं लक्ष्मणयोगीन्द्रं प्रणम्यान्यान्गुरूनपि ।
बृहदारण्यकव्याख्यां रचयेऽहं यथामति ॥ २ ॥

अष्टाध्यायात्मके बृहदारण्यके प्रवर्ग्योपसत्प्रतिपादकप्रथमद्वितीयाध्यायावुपेक्ष्योत्तराध्यायगणो व्याख्यायते यद्यप्युषा वा अश्वस्येत्यादिकमश्वमेधादिकर्मविषयकमेव तथाऽपि ब्रह्मदृष्टिविधिरूपतया ब्रह्मात्मकत्वप्रतिपादनपरतया च यथाकथंचिद्ब्रह्मसंबन्धित्वेन तद्व्याख्यानस्योचितत्वात् । अत एवाश्वमेधब्राह्मणादेर्ब्रह्मपरोपनिषद्भागसंगतिरुपपद्यते । न च प्रवर्ग्योपसत्पराध्यायद्विकस्य ब्रह्मपरारण्यकमध्ये विद्यासंनिधौ पाठाद्विद्यार्थत्वं शङ्क्यम् । 'वेधाद्यर्थभेदात्' [ब्र० सू० ३ । ३ । २५] इत्यधिकरणे शुक्रं प्रविध्य हृदयं प्रविध्य 'तेजस्विनावधीतमस्तु' [कठशान्तिः] इत्यादिना शत्रुहृदयवेधाध्ययनादिप्रकाशकानां मन्त्राणां 'देवा ह वै सत्रं निषेदुः' [शत० १४ । १ । १ । १] इति बृहदारण्यकारम्भपठितब्राह्मणप्रतिपादितप्रवर्ग्यादेश्च कर्मणो लिङ्गादिबलेनान्यत्र विनियुक्तत्वेऽपि विद्यासंनिधिपाठानर्थक[त्व]परिहाराय विद्यार्थत्वमिति पूर्वपक्षे विद्यासंनिधिपाठस्य दी(दि)वाकीर्त्यत्वारण्यपाठत्वादिसौकर्यार्थतयाऽप्युपपत्तेर्बलवद्भिर्लिङ्गादिभिरभिचाराध्ययनं ज्योतिष्टोमार्थमिति 'वेधाद्यर्थभेदात्' [ब्र० सू० ३ । ३ । २५] इति सूत्रेण सिद्धान्तितम् । तस्य चायमर्थः—प्रतिपाद्यस्य वेधाद्यर्थस्य विद्यार्थत्वाभावेन विद्यार्थाद्भेदान्न तत्प्रकाशनद्वारा विद्याविशेषत्वमपि त्वभिचारादिविशेषत्वमिति । ततश्च न विद्यार्थत्वमिति शङ्काया अवकाशः । सर्वकर्मश्रेष्ठाश्वमेधाङ्गभूतेऽश्वे यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति कर्मवीर्यवत्त्वापादिका विश्वरूपत्वोपासनोपदिश्यते ।

ॐ उषा वा अश्वस्य मेध्यस्य शिरः ।

मेधो यज्ञस्तमर्हतीति मेध्यः । यज्ञसाधनस्य पशोर्यच्छिरः स उषा ब्राह्मो मुहूर्तः । लिङ्गव्यत्ययश्छान्दसः । उषसोऽहर्मुखत्वेनाहःशिरस्त्वात्पशोः शिरसि तद्बुद्धिरुपपद्यत इति द्रष्टव्यम् । 'आदित्यादिमतयश्चाङ्ग उपपत्तेः' [ब्र० सू० ४ । १ । ६] इत्यधिकरणे 'य एवासौ तपति तमुद्गीथमुपासीत' [छा० १ । ३ । १] इत्यत्र कर्माङ्गभूत उद्गीथ आदित्यदृष्टिः कर्तव्योताऽऽदित्य उद्गीथदृष्टिरिति विशये 'ब्रह्मदृष्टिरुत्कर्षात्' [ब्र० सू० ४ । १ । ५] इति सूत्रोक्तन्यायेनोत्कृष्टदृष्टेरेवापकृष्टे कर्तव्यत्वात्कर्माङ्गस्योद्गीथस्य कर्मोपकारत्वेनोत्कृष्टतया तद्बुद्धिरेवाऽऽदित्य इति पूर्वपक्षे प्राप्ते 'आदित्यादिमतयश्चाङ्ग उपपत्तेः' [ब्र० सू० ४ । १ । ६] इति सूत्रेण सिद्धान्तितम् । अत्र चशब्दोऽवधारणे । अङ्ग एवाऽऽदित्यादिमतयः कार्याः कर्माराध्यतयाऽऽदित्यादीनामेवोत्कृष्टत्वस्योपपत्तेरिति । ततश्चाश्वस्य शिरःप्रभृत्यवयवेषु कर्माङ्गभूतेष्वेवोष आदिबुद्धिः कार्या न तूषआदौ शिरआदिबुद्धिः ।

सूर्यश्चक्षुर्वातः प्राणः ।

अश्वस्य चक्षुः सूर्यश्चक्षुरधिष्ठातृत्वात्तद्बुद्धिस्तत्र कार्येत्यर्थः । वातः प्राणोऽश्वस्य प्राण एव वातः । पायूपस्थादिभेदत्वात्प्राणस्य तद्बुद्धिस्तत्र कार्येत्यर्थः ।

व्यात्तमग्निर्वैश्वानरः ।

विवृतं मुखमेव वैश्वानरोऽग्निः । 'अग्निर्वाग्भूत्वा मुखं प्राविशत्' [ऐ० २ । ४] इति[श्रुतेर]ग्नेर्मुखाधिष्ठातृत्वात्तद्बुद्धिस्तत्र कार्येत्यर्थः ।

संवत्सर आत्माऽश्वस्य मेध्यस्य ।

आत्मा स्वरूपमित्यर्थः । ऋतवोऽङ्गानीत्यादिना संवत्सरावयवऋतुमासादीनामवयवतदवयवत्वेन निरूपयिष्यमाणत्वात्संवत्सरस्यावयविशरीरात्मकत्वम् । अश्वस्य मेध्यस्येति सर्वानुषङ्गार्थं पुनर्वचनम् । संवत्सरशब्देन संवत्सराभिमानी प्रजापतिर्वा विवक्षितः ।

द्यौः पृष्ठम् ।

ऊर्ध्वत्वसामान्यात् ।

अन्तरिक्षमुदरम् ।

अवकाशत्वसामान्यात् ।

पृथिवी पाजस्यम् ।

भुजान्तरमित्यर्थः । इयमुदर इत्यग्नौ पृथिवीत्वदृष्टिदर्शनात् ।

दिशः पार्श्वे ।

दिशो दक्षिणोत्तरत्वाद्याश्रयत्वात् ।

अवान्तरदिशः पर्शवः ।

वायव्याद्या अवान्तरदिशः पार्श्वास्थीनि ।

ऋतवोऽङ्गानि ।

स्पष्टोऽर्थः ।

मासाश्चार्धमासाश्च पर्वाणि ।

अङ्गसंधयः समविभागसाम्यात् ।

अहोरात्राणि प्रतिष्ठा ।

पादावित्यर्थः ।

नक्षत्राण्यस्थीनि ।

शुद्धत्वसाम्यात् ।

नभो मा॰ंसानि ।

अस्थ्यात्मकनक्षत्रसंपृक्तत्वात् ।

ऊवध्य॰ं सिकताः ।

अर्धजीर्णं घासाद्यशनं सिकताः । विश्लिष्टावयवत्वसाम्यात् ।

सिन्धवो गुदाः ।

गुदा इत्यवयवाभिप्रायेण बहुवचननिर्देशः । सिन्धवो नद्य इत्यर्थः ।

यकृच्च क्लोमानश्च पर्वताः ।

हृदयस्याधःप्रदेशवर्तिदक्षिणोत्तरमांसखण्डौ यकृत्क्लोमशब्दवाच्यौ । क्लोमान इत्येकस्मिन्व्यत्ययाद्बहुवचनम् । पर्वताः । काठिन्योन्नतत्वपिण्डाकारत्वसाम्यात् ।

ओषधयश्च वनस्पतयश्च लोमानि ।

सूक्ष्मत्वसाम्यात् ।

उद्यन्पूर्वार्धः ।

सूर्य इति शेषः ।

निम्लोचन्नपरार्धः[1] ।

निम्लोचन्नस्तं गच्छन्सूर्योऽपरार्धः । पूर्वापरत्वसाम्यात् ।

यद्विजृम्भते तद्विद्योतते ।

मुखव्यादानमेवान्तरप्रकाशहेतुत्वाद्विद्युत् ।

यद्विधूनुते तत्स्तनयति ।

रोमविधूननमेव सच्छब्दत्वान्मेघनिर्घोषः ।

यन्मेहति तद्वर्षति ।

मूत्रोत्सर्जनमेव सेचनत्वसाम्याद्वर्षणम् ।

वागेवास्य वाक् ॥ १ ॥

नात्र कल्पनापेक्षा ॥ १ ॥

अहर्वा अश्वं पुरस्तान्महिमाऽन्वजायत ।

अश्वस्याग्रतः पृष्ठतश्च सौवर्णराजतौ महिमाख्यौ शृङ्गौ पात्रविशेषौ स्तः । तयोर्मध्येऽश्वं पुरस्तादश्वस्य पुरस्ताद्यो महिमा महिमाख्यो ग्रहविशेषोऽहरेवान्वजायत समपद्यत तत्राहर्भावना कर्तव्येति यावत् । अह्न इव सौवर्णपात्रस्यापि पीतप्रभत्वात् ।

तस्य पूर्वे समुद्रे योनिः ।

पूर्वः समुद्रो योनिः । योनिरित्यासादनस्थानम् । सौवर्णपात्रग्रहासादनस्थाने पूर्वसमुद्रबुद्धिः कार्येत्यर्थः । यद्वा महिमाऽन्वजायतेत्यत्रानुर्लक्षणार्थः । कर्मप्रवचनीयत्वात्तद्योगेऽश्वमिति द्वितीया ।

रात्रिरेनं पश्चान्महिमाऽन्वजायत ।

अश्वस्य पश्चाद्यो राजतो महिमाख्यो ग्रहविशेषः सा रात्रिरन्वजायत रात्रिः समपद्यतेत्यर्थः । चन्द्रिकाधवलत्वसाम्यात् ।

---

१ जघनार्धः । अत्रत्यमद्रित पुस्तके वर्तते ।

तस्यापरे समुद्रे योनिः ।

पश्चिमसमुद्रस्तदासादनस्थानमित्यर्थः ।

एतौ वै महिमानावश्वमभितः संबभूवतुः ।

एतौ महिमाख्यौ ग्रहावश्वस्य पूर्वोत्तरपार्श्वयोः प्रतिष्ठितावित्यर्थः ।

अतः सर्वथा महिमशाल्यर्थ(श्व) इति स्तुत्वा हयवाज्यर्वाश्वरूपैश्चतुर्भिर्जातिविशेषैर्देवगन्धर्वासुरमनुष्यवोढृत्वेनाश्वं स्तौति—

हयो भूत्वा देवानवहद्वाजी गन्धर्वानर्वाऽसुरानश्वो मनुष्यान् ।

उक्तोऽर्थः ।

समुद्र एवास्य बन्धुः ।

अस्याश्वस्य समुद्रो बन्धुः । तत्र बन्धुदृष्टिः कर्तव्येत्यर्थः ।

तत्र हेतुमाह—

समुद्रो योनिः ॥ २ ॥

इति बृहदारण्यकोपनिषदि प्रथमाध्यायस्य

प्रथमं ब्राह्मणम् ॥ १ ॥

उच्चैःश्रवसोऽश्वस्य वारुणाश्वानां च त[त्रो]त्पत्तिदर्शनात्समुद्रो योनित्वेन ध्यातव्यः ॥ २ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां प्रथमाध्यायस्य

प्रथमं ब्राह्मणम् ॥ १ ॥

अश्वमेधाङ्गभूते चित्याग्नौ तदङ्गभूतसंवत्सरकाले च ब्रह्मदृष्टिं विधित्सन्प्रथमतोऽग्न्युत्पत्तिप्रकारमाह—

नैवेह किंचनाग्र आसीत् ।

केचित्तु नात्र ब्रह्मदृष्टिर्विधीयतेऽपि तु तात्त्विकतदात्मकत्वानुसंधानसिद्धये परमात्मन उत्पत्त्यादिकमाम्नायत इत्याहुः । नोभयथाऽपि विरोधं पश्यामः । इह जगति किंचन परिदृश्यमानं स्थूलावस्थं वस्तु अग्रे सृष्टेः प्राङ्नैवाऽऽसीत् । अत्राग्रे नाऽऽसीदित्यनेन न शून्यत्वमुच्यतेऽसत्कार्या-

नभ्युपगमात् । तथा हि सति शशविषाणादेरप्युत्पत्तिप्रसङ्गात् । घटः प्राङ्नाऽऽसीदिति प्रतीतौ घटत्वावस्थापूर्वभाविपिण्डत्वावस्थाविषयकत्वदर्शनेनेहापि नाग्र आसीदिति प्रतीतेः परिदृश्यमानस्थूलावस्थाविरोध्यवस्थावत्त्वमेवार्थः ।

ननु परिदृश्यमानमिदं जगद्दृश्यमानस्थूलावस्थाविरोधिनीं कामवस्थामभजदित्यत आह—

मृत्युनैवेदमावृतमासीदशनायया ।

कारणवाक्यत्वादत्र मृत्युशब्देन मृत्युसंज्ञकाचिच्छरीरः परमात्मोच्यते । 'यस्याव्यक्तं शरीरं यस्याक्षरं शरीरं यस्य मृत्युः शरीरमपहतपाप्मा दिव्यो देव एको नारायणः' इति सुबालश्रुतौ मृत्युशब्दस्य तमसि प्रयुक्तत्वात् । अत्राशनाया नाम संजिहीर्षा । 'अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु' [पा०७।४।३४] इति बुभुक्षार्थे निपातितोऽशनायाशब्दः संजिहीर्षां लक्षयित्वा तद्वति लक्षितलक्षणया वर्तते । ततश्चायमर्थः—संजिहीर्षुणा तमःशरीरेण परमात्मना परिदृश्यमानं स्थूलावस्थं जगदावृतमासीत्तिरोहितस्थूलावस्थमासीत् । स्थूलावस्थां विहाय तमःशरीरकपरमात्मावस्थमासीदित्यर्थः ।

अशनायाशब्दस्य मृत्युशब्दिते परमात्मनि प्रयोगे हेतुमाह—

अशनाया हि मृत्युः ।

लोके बुभुक्षाविशिष्टो हि पुरुषो जन्तून्हिनस्ति अतो बुभुक्षाया मरणहेतुत्वेन मृत्युत्वं प्रसिद्धमित्यर्थः । यद्यपि तत्रत्याशनायामृत्युशब्दयोर्भिन्नत्वात्प्रकृते मृत्युशब्दस्य प्रतिपाद्यस्य तमःशरीरकपरमात्मनः संजिहीर्षावाच्याशनायाशब्दप्रयोगविषयतायां न तदुपपादकं तथाऽप्येकशब्दरूपितत्वेनार्थद्वयैकीकरणेन श्रुतिप्रवृत्तिरुपपद्यत इति द्रष्टव्यम् ।

तन्मनोऽकुरुताऽऽत्मन्वी स्यामिति ।

तदिति लिङ्गव्यत्ययश्छान्दसः । स मृत्युस्तमःशरीरकः परमात्माऽहमात्मन्वी शरीरी चेतनाचेतनशरीरकः स्यामिति संकल्प्य मनः कृतवानित्यर्थः । न च संजिहीर्षाः सिसृक्षाकार्यमनःसृष्टिर्विरुद्धेति वाच्यम् । सृष्ट्वा संहरिष्यामीत्येवंभूतसृष्टिसंहारलक्षणविहारेच्छाया एवाशनायाशब्देन विवक्षितत्वात् । अत्र मनःशब्देन मनो महान्मतिर्ब्रह्मेति नामपा-

ठान्महत्तत्त्वमुच्यते । तच्चोपलक्षणमहंकारादिभूतावधिकसृष्टेरपि । मनःशब्दस्यान्तःकरणार्थत्वेऽपि मनःशब्दः स्वपूर्वभाविमहदादीनामप्युपलक्षकः । महदादिसृष्ट्यभावे मनःसृष्ट्यभावात् । अन्यत्सर्वं पूर्ववत् । आत्मन्शब्दात्तदस्यास्त्यस्मिन्नित्यर्थे विनिप्रत्ययश्छान्दसः ।

सोऽर्चन्नचरत् ।

अर्चन्प्रीणयन् । आत्मानमिति शेषः । कर्मकारकं च स्वयमेव । अश्रुताध्याहारादपि प्रकृतस्यैव कर्मत्वोपपत्तेः । 'लक्षणहेत्वोः क्रियायाः [पा० सू० ३ । २ । १२६] इति हेतौ शतृप्रत्ययः । जगद्व्यापारलीलया स्वात्मानं प्रीणयितुमचरदित्यर्थः । उक्तं हि भगवता बादरायणेन जगत्सृष्टेर्लीलारस एव प्रयोजनमिति । तथा हि द्वितीयाध्याये तृतीयपादे जन्मजरामरणादिदुःखबहुलं जगत्सृजतोऽवाप्तसमस्तकामस्य परमात्मनः प्रवृत्तेः स्वार्थत्वपरार्थत्वासंभवात्प्रयोजनानुद्देशेन प्रेक्षावत्प्रवृत्तेरयोगात्प्रवृत्तिर्नोपपद्यत इति 'न प्रयोजनवत्त्वात् [ब्र० सू० २ । १ ३२] इति सूत्रेण पूर्वपक्षं कृत्वा 'लोकवत्तु लीलाकैवल्यम्' 'वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति' 'न कर्माविभागादिति चेन्नानादित्वात्' 'उपपद्यते चाप्युपलभ्यते च' 'सर्वधर्मोपपत्तेश्च' [ब्र० सू० २ । १ । ३३–३७] इतिचतुर्भिः सूत्रैः सिद्धान्तितम् । तेषां चायमर्थः—यथा महाराजस्यापि केवलं लीलाप्रयोजनाः कन्दुकादिक्रीडा एवं परमात्मनोऽपि केवलं लीलार्था जगत्सृष्ट्यादिप्रवृत्तिरिति लोकवदिति सूत्रस्यार्थः । ननु विषमं देवतिर्यङ्मनुष्यादि सृजतः परमात्मनो वैषम्यं प्रसजेत । अतिघोरनरकादिसृष्ट्या निर्घृणत्वं च प्रसजेदिति चेन्न । तत्तत्कर्मानुसारेण कर्मसापेक्षतया सृजतो न पक्षपातादिप्रसक्तिः । 'साधुकारी साधुर्भवति पापकारी पापो भवति' ।

> निमित्तमात्रमेवासौ सृज्यानां सर्गकर्मणि ।
> प्रधानकारणीभूता यतो वै सृज्यशक्तयः ॥

निमित्तमात्रं साधारणमित्यर्थः । सृज्यशक्तयः कर्माणीत्यर्थः । इति श्रुतिस्मृतिलक्षणं प्रमाणं दर्शयति । अतो वैषम्यनैर्घृण्ये नेति सूत्रस्य चार्थ उक्तः । ननु प्रलये जीवस्य ब्रह्मणाऽ(णोऽ)विभागेन तदाश्रितानां च कर्मणामभावात्सर्गाद्यसृष्टौ स्वेच्छया तरतमभावापन्नं जगत्सृजतो वैषम्यादिकमपरिहार्यमिति 'न कर्माविभागादिति' सूत्रखण्डेन परि-

चोद्य 'नानादित्वात्' 'उपपद्यते चाप्युपलभ्यते च' इति सूत्रखण्डेन परिहृतम्। जीवानामनादित्वात्तदानीं कर्मणामपि सत्त्वान्न वैषम्यादिप्रसङ्गः। न च जीवानामनादित्वे प्रलये 'सदेव सौम्येदमग्र आसीत्' इत्यविभागो नोपपद्यत इति वाच्यम्। अविभक्तनामरूपतयाऽभेदकाकारस्फुरणमात्रेणाविभागव्यवहारोपपत्तेः। तदनादित्वं च श्रुतिस्मृतिषूपलभ्यते—'न जायते म्रियते वा विपश्चित्'। प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि [गी० १३।१९] इति सूत्रार्थः। 'सर्वधर्मोपपत्तेश्च' [ब्र० सू० २।१।३७] प्रधानादिष्वसंभावितानामपि सृष्ट्युपयुक्तसार्वज्ञ्यसर्वशक्तित्वादिसकलधर्माणां परमात्मन्येवोपपत्तेश्च परमात्मैव जगत्कारणमिति सृष्टेर्लीलाप्रयोजनत्वं स्थितम्। अतः सोऽर्चन्नचरदित्यस्योक्त एवार्थः।

तस्यार्चत आपोऽजायन्त।

अर्चतः प्रीणनाय प्रवृत्तस्य परमात्मनः सकाशादाप उत्पन्ना इत्यर्थः। तत्र चापां प्राधान्यादप्शब्दप्रयोगः। सृष्टिश्च स्रष्टुर्नारायणत्वे लिङ्गम्। 'एको ह वै नारायणः' इत्युपक्रम्य ता इमा आप इति श्रुतेः।

अर्चते वै मे कमभूदिति।

वैशब्दोऽवधारणे। अर्चनप्रवृत्ताय मह्यं कं जलमभूदिति स परमात्माऽमन्यतेत्यर्थः।

तदेवार्कस्यार्कत्वम्।

यस्माद्धेतोरेवममन्यतात एतादृशमननमेवार्कशब्दितस्य परमात्मनोऽर्कशब्दप्रवृत्तौ निमित्तमित्यर्थः। अर्कशब्दितत्वं च परमात्मनोऽर्को वाजसनः शृङ्गीति भगवन्नामसहस्रपाठादिति द्रष्टव्यम्। एतत्सर्वं व्याख्यानाधिकरणे व्यासार्यैः स्पष्टमुक्तम्।

नामनिरुक्तिज्ञानस्य फलमाह—

कं ह वा अस्मै भवति य एवमेतदर्कस्यार्कत्वं वेद॥ १॥

कं सुखम्। वैशब्दोऽवधारणे सुखमेवेत्यर्थः। शिष्टं स्पष्टम्॥ १॥

अण्डस्य भगवदात्मकभूतपरिणामत्वं वक्तुमपां भगवदात्मकत्वमाह—

आपो वा अर्कः।

आपोऽर्कशब्दितभगवदात्मिका इत्यर्थः।

तद्यदपां शर आसीत् ।

दध्नो मण्डांश इव भूतान्तरसंसृष्टानामपां यः शरः सारांश आसीत् ।

तत्समहन्यत ।

बाह्येन तेजसा पच्यमानं सत्संघातभावमापद्यत ।

सा पृथिव्यभवत् ।

तत इति शेषः । संहन्यमानेभ्यो भूतेभ्यः सा पृथिवीरूपाऽभवत् ।

तस्यामश्राम्यत् ।

तस्यामण्डाकारेण परिणतायां पृथिव्यां सत्यामिति शेषः । मृत्युशब्दितः परमात्माऽश्राम्यत् । अत्र श्रान्तिशब्दः कारणलक्षणया यत्नपरः । अयततेत्यर्थः ।

तस्य श्रान्तस्य तप्तस्य तेजोरसो निरवर्तताग्निः ॥ २ ॥

परमात्मनः श्रान्तस्य कृतयत्नस्य तप्तस्य सृज्यवर्गं पर्यालोचनवतः शरीरात्तेजःसारभूतोऽग्निर्निरवर्तत । एवमेव व्यासार्यैरुक्तम् ॥ २ ॥

स त्रेधाऽऽत्मानं व्यकुरुत ।

सोऽग्निरात्मानं त्रेधा व्यभजत् ।

आदित्यं तृतीयं वायुं तृतीयम् ।

अग्न्यादित्यवाय्वात्मना त्रेधा विभक्त इत्यर्थः । त्रयाणां मध्ये चित्याग्निरंशी वाय्वादित्यावंशाविति भावः । अग्निवाय्वपेक्षयाऽऽदित्यस्य तृतीयत्वम् । अग्न्यादित्यापेक्षया वायोस्तृतीयत्वम् ।

स एष प्राणस्त्रेधा विहितः ।

यस्त्रेधा विभक्तोऽग्निवाय्वादित्यात्मना वाय्वादित्यांशक एषोऽग्निः स एष प्राणः परमात्मेत्यर्थः । तत्र तद्दृष्टिः कर्तव्येति यावत् । य एषोऽग्निरर्क इत्युत्तरत्राग्नावर्कशब्दितपरमात्माध्यासस्य वक्ष्यमाणत्वादिति द्रष्टव्यम् ।

तस्य प्राची दिक्शिरः ।

तस्याग्नेः शिरआदौ प्रागादिबुद्धिः कर्तव्येत्यर्थः । शिरसः प्राचीसंबन्धित्वात्तद्बुद्धिः कर्तव्या । एवमुत्तरत्रापि द्रष्टव्यम् ।

असौ चासौ चेर्मौ ।

ऐशान्याग्नेय्यावीर्मौ बाहू ।

अथास्य प्रतीची दिक्पुच्छम् ।

पुच्छे प्रतीचीत्वबुद्धिः कर्तव्या । तत्संबंधित्वादिति भावः ।

असौ चासौ च सक्थ्यौ ।

वायव्यनैर्ऋत्यौ सक्थिनी ऊरू इति यावत् । सक्थ्याविति च्छान्दसः प्रयोगः ।

दक्षिणा चोदीची च पार्श्वे ।

दक्षिणोत्तरपार्श्वे अपि दक्षिणोत्तरदिग्द्वयम् । तद्दिग्वर्तित्वादिति भावः ।

द्यौः पृष्ठमन्तरिक्षमुदरमियमुरः ।

इयं पृथिवीत्यर्थः । शिष्टं स्पष्टम् ।

स एषोऽप्सु प्रतिष्ठितः ।

स एषोऽग्निरप्सु प्रतिष्ठितः । अप्प्रतिष्ठितत्वं चोक्तरीत्या तन्मूलोत्पत्तिकत्वादिति द्रष्टव्यम् ।

यत्र क्वचैति तदेव प्रतितिष्ठति य एवं विद्वान् ॥३॥

एवं विद्वान्यत्र यत्र प्रदेशे तत्तत्र प्रतितिष्ठति प्रतिष्ठां लभत इत्यर्थः ॥ ३ ॥

एवमर्कप्राणशब्दितपरमात्मदृष्टिविशिष्टमश्वमेधाङ्गभूतचित्याग्निमुत्पत्त्यादिप्रकारोपेतमुपवर्ण्याश्वमेधाङ्गभूतसंवत्सरकालं मृत्युशब्दितपरमात्मदृष्टिविशिष्टं प्रतिपादयितुमुपक्रमते—

सोऽकामयत द्वितीयो म आत्मा जायेतेति स
मनसा वाचं मिथुनꣳ समभवदशनाया मृत्युः ।

पूर्वोक्तः संजिहीर्षुर्मृत्युः पूर्वसृष्टाग्निरूपापेक्षयाऽऽत्मान्तरं जायतामिति संकल्पं कृतवान् । संकल्प्य च त्रयीलक्षणां वाचं मनसा मिथुनं द्वंद्वभावं समभवत्संभावितवान् । स्रक्ष्यमाणप्रपञ्चपरिज्ञानाय ।

नाम रूपं च भूतानां कृत्यानां च प्रपञ्चनम् ।
वेदशब्देभ्य एवाऽऽदौ देवादीनां चकार सः ॥

इति न्यायेन साक्षाद्वा चतुर्मुखशरीरकतया मनसा त्रयीं पर्यालोचितवानित्यर्थः ।

तद्यद्रेत आसीत्स संवत्सरोऽभवत् ।

मनसा त्रयीपर्यालोचनलक्षणसंभोगे यद्रेतो बीजं कारणमुत्पन्नमिदमित्थं कर्तव्यमिति निश्चयात्मकं तेन संवत्सरलक्षणकालशरीरकः संवत्सरो विश्वकर्मा संवत्सरः प्रजापतिः प्रजापतिः संवत्सर इति संवत्सराभिमानितया द्वितीय आत्माऽभवदित्यर्थः । यद्यपि संवत्सरकालस्यैवाश्वमेधाङ्गत्वं न तदभिमानिप्रजापतेस्तथाऽपि तयोरभेदोपचारेण श्रुतिप्रवृत्त्युपपत्तिरिति द्रष्टव्यम् ।

न ह पुरा ततः संवत्सर आस ।

ततस्तस्मादिदमित्थं कर्तव्यमिति निश्चयरूपाद्रेतःशब्दितात्कारणात्पुरा प्रथमतः सद्य इति यावत् । सद्य एव संवत्सररूप आत्मा न बभूव द्वादशमासपरिमाणस्य संवत्सरस्य सद्योनिष्पत्त्यसंभवादिति भावः ।

तमेतावन्तं कालमबिभर्यावान्संवत्सरः ।

यावता कालेन संवत्सरः पूर्णोऽभवत् । तावन्तं कालं रेतःशब्दितकारणाकारेणाबिभर्भरणं कृतवानित्यर्थः । अबिभरिति डुभृञ् धारणपोषणयोरिति धातोर्लङि रूपम् ।

तमेतावतः कालस्य परस्तादसृजत ।

द्वादशमासेषु पूर्णेषु संवत्सररूपं द्वितीयमात्मानमसृजत ।

तं जातमभिव्याददात् ।

जातं संवत्सरमभिमुखीकृत्य व्याददात् । विशिष्य पुत्रत्वेन परिजग्राह ।

स भाणमकरोत् ।

स संवत्सर आत्मा बालस्वभावत्वाद्भाणिति शब्दमकरोत् ।

सैव वागभवत् ॥ ४ ॥

भूरादिभिर्व्याहृतिरूपा वागभवदित्यर्थः ॥ ४ ॥

स ऐक्षत ।

स मृत्युरचिन्तयत् ।

यदि वा इममभिमꣳस्ये कनीयोऽन्नं करिष्य इति ।

यद्यहमिमं संवत्सरं सृष्ट्वाऽऽत्मानं कृतकृत्यतयाऽभिमंस्ये तदाऽन्नमल्पीय एव स्यात् । अत्तव्यस्य भूयसोऽर्थस्याभावात् ।

स तया वाचा तेनाऽऽत्मनेदꣳ सर्वमसृजत यदिदं किं च ।

स मृत्युस्तया वाचा संवत्सरात्मनिष्पादितया भूरादिलक्षणया वाचा तेनाऽऽत्मना संवत्सररूपेणाऽऽत्मना च निमित्तभूतेन यदिदं किं च तत्सर्वमसृजतेत्यर्थः । स भूरिति व्याहरत् ।

आदौ वेदमयी दिव्या यतः सर्वाः प्रसूतयः ।

इत्यादिना भूरादिशब्दस्य सृज्यमानप्रपञ्चहेतुत्वावगमात् । संवत्सराख्यकालस्यापि कार्यमात्रहेतुत्वाच्चेति भावः ।

यदिदं किं चेत्येतत्प्रपञ्चयति—

ऋचो यजूꣳषि सामानि च्छन्दांसि यज्ञान्प्रजाः पशून् ।

छन्दांसि गायत्र्यादीनि शिष्टं स्पष्टम् । ननु त्रय्या [मिथुनी]-भूतया कथमृगादीनां सृष्टिस्तेषां तदभिन्नत्वादिति चेन्न । कर्मविनियुक्तत्वावस्थाविशिष्टतय ऋगादीनामुत्पत्तिसंभवात् । सर्वप्रत्यक्षगोचरतया वा ।

स यद्यदेवासृजत तत्तदत्तुमध्रियत ।

सृष्टं सर्वं संहर्तुमैच्छदित्यर्थः ।

सर्वं वा अत्तीति तददितेरदितित्वम् ।

अदितिशब्दवाच्यस्य परमात्मनः सर्वात्तृत्वादेवादितिशब्दप्रवृत्तिनिमित्तमदितित्वमित्यर्थः ।

नामनिरुक्तिज्ञानस्य फलमाह—

सर्वस्यैतस्यात्ता भवति ।

अनुभविता भवति ।

सर्वमस्यान्नं भवति ।

अनुभाव्यं भवति ।

य एवमेतददितेरदितित्वं वेद ॥ ५ ॥

न च भोक्तृत्वोक्तौ तत्प्रतिसंबन्धिन इतरस्य भोग्यत्वं सिद्धमिति तत्कथनवैयर्थ्यं शङ्कनीयम् । तद्दार्ढ्यार्थतया तत्प्रपञ्चनरूपत्वेनादोषात् ।

एवमश्वमेधाङ्गभूतयोरग्निसंवत्सरयोः सृष्टिप्रकारादिकमुक्त्वाऽश्वस्य सृष्टिप्रकारमश्वमेधनिर्वचनमश्वमेधो(ध) आदित्यदृष्टिं च वक्तुमारभते—

सोऽकामयत ।

प्रजापतिशरीरकः परमात्माऽकामयत ।

भूयसा यज्ञेन भूयो यजेयेति ।

भूयसा महता यज्ञेन परमात्मानं भूयो मुहुर्मुहुर्यजेय । यद्वा भूयः-शब्दो भूमवाची । भूमानं परमात्मानं यजेयेत्यर्थः ।

सोऽश्राम्यत् ।

महायज्ञसामग्र्यसंपत्त्या श्रान्त इवाभवत् ।

स तपोऽप्यत ।

परमात्मानमुद्दिश्य तपश्चकारेत्यर्थः ।

तस्य श्रान्तस्य तप्तस्य यशोवीर्यमुदक्रामत् ।

यशश्च वीर्यं च यशोवीर्यम् । यशोवीर्यशब्दार्थमाह—

प्राणा वै यशोवीर्यम् ।

यशसो वीर्यस्य च प्राणायत्तत्वात्प्राणा एव यशोवीर्यमित्यर्थः । ततश्च यशोवीर्यमुदक्रामदित्यस्य प्राणा उदक्रामन्नित्यर्थः ।

तत्प्राणेषूत्क्रान्तेषु शरीरꣳ श्वयितुमध्रियत ।

उत्क्रान्तेषु प्राणेषु तत्प्रजापतेः शरीरमुच्छूनतां गन्तुं प्रवृत्तम् ।

तस्य शरीर एव मन आसीत् ॥ ६ ॥

तस्य प्रजापतेः शरीरान्निर्गतस्यापि तस्मिन्नेव शरीरे मन आसीत् । मया त्यक्तं स्थूलं शरीरमुच्छूनं हेयमासीदिति शरीरविषय एव चिन्ता सर्वदा संवृत्तेत्यर्थः ।

सोऽकामयत ।

एवंचिन्ताविशिष्टः प्रजापतिरैच्छत् ।

मेध्यं म इद॰ स्यादात्मन्व्यनेन स्यामिति ।

मदीयमिदं शरीरं यज्ञार्हं स्यात् । अनेन च शरीरेणाहमात्मन्वी शरीरी स्यामिति । एवं संकल्प्य पुनरपि स प्राणः सन्प्रजापतिः पुनस्तत्र प्रविष्ट इति भावः ।

ततोऽश्वः समभवत् ।

प्रजापतिना पुनरनुप्रविष्टात्स्थूलशरीरादुपादानभूतादश्वरूपः सन्प्रजापतिरुत्पन्न इत्यर्थः ।

यदश्वत्तन्मेध्यमभूदिति तदेवाश्वमेधस्याश्वमेधत्वम् ।

यस्मात्कारणात्प्रजापतेः शरीरमुत्क्रान्तेषु अश्वयदुच्छूनं तत एवामेध्यं चाभवत्तदेव पश्चादश्वरूपं सन्मेध्यमभूत् । तत एवास्याश्वरूपस्य प्रजापतेरश्वमेधत्वम् । अश्वयदित्यश्वः । मेधार्हत्वान्मेधः । यद्यप्यश्वमेधशब्दो यागनाम तथाऽपि यागद्रव्ययोरभेदोपचारात्तथोक्तिरुपपद्यत इति द्रष्टव्यम् । यागपरत्वेऽपि न दोषः । यज्ञार्थकमेधशब्दस्वारस्यादिति वदन्ति ।

एष ह वा अश्वमेधं वेद य एनमेवं वेद ।

य एनं पशुं यथोक्तनिर्वचनं वेद स एवाश्वमेधवेत्ता नान्य इत्यर्थः ।

तमनवरुध्यैवामन्यत ।

तमश्वरूपं पशुमनवरुध्यावरोधनमकृत्वा संवत्सरमात्रमुत्सृष्टबन्धनमेव कृत्वा परमात्मानमनेन यक्ष्य इत्यमन्यतेत्यर्थः ।

त॰ संवत्सरस्य परस्तादात्मन आलभत ।

पशून्देवताभ्यः प्रत्यौहत् ।

पूर्णे संवत्सरे प्रजापतिः स्वान्तर्यामिणे परमात्मनेऽश्वालम्भं कृतवान् । इतरान्ग्राम्यारण्यपशूनग्नीन्द्रादिदेवताभ्यः प्रतिविभज्याऽऽलभतेत्यर्थः ।

तस्मात्सार्वदेवत्यं प्रोक्षितं प्राजापत्यमालभन्ते ।

तस्माद्धेतोरिदानींतना अपि यजमानाः सर्वदेवतासमष्टिभूतप्रजापतिरूपपरमात्मदेवताकत्वेन सर्वदेवताकं प्रोक्षणपर्यग्निकरणादिसंस्कृतं प्रजापतिदेवताकमश्वमालभन्ते ।

एष ह वा अश्वमेधो य एष तपति ।

तपत आदित्यस्य दृष्टिरश्वमेधे कर्तव्येत्यर्थः ।

तत्र युक्तिमाह—

तस्य संवत्सर आत्मा ।

अश्वमेधशब्दितस्याश्वस्य संवत्सर आत्मा । अश्वस्य मेध्यस्येति पूर्वब्राह्मण उक्तत्वात्संवत्सरात्मकत्वं सिद्धम् । संवत्सरादिकालचक्रप्रवर्तकस्याप्यादित्यस्य संवत्सरात्मकत्वात्संवत्सरात्मके मेध्येऽश्वे संवत्सरात्मकादित्याध्यासो युज्यत इत्यर्थः ।

अयमग्निरर्कः ।

अयं चित्याग्निरर्कः पूर्वमर्कशब्दनिर्दिष्टः परमात्मेत्यर्थः । तत्र तदध्यासः कर्तव्य इति यावत् ।

तत्र युक्तिं वक्ति—

तस्येमे लोका आत्मानः ।

तस्याध्यस्यमानस्य परमात्मनः स्वर्गाद्यालोका आत्मान इत्यर्थः । द्यौः पृष्ठमन्तरिक्षमुदरमित्यादिना चित्याग्नेः सर्वलोकशरीरकत्वस्य प्रतिपादितत्वा[द्द्यु] लोकादिशरीरके चित्याग्नौ प्रतीके तादृशस्य परमात्मनोऽध्यसनमश्वस्य च ‘ संवत्सर आत्मा ’ इत्युक्तत्वात्तस्मिन्नश्वमेधे संवत्सरात्मकादित्याध्यसनं च युज्यत इति भावः ।

तावेतावर्काश्वमेधौ ।

अर्कशब्देनायमग्निरर्क इत्यर्कशब्दितश्चित्याग्निरुच्यते । तावेतौ चित्याग्न्यश्वमेधौ प्रागुक्तैतादृशमहिमशालिनावित्यर्थः ।

सो पुनरेकैव देवता भवति ।

अग्न्यश्वमेधाभ्यामेतादृशदृष्टिविशिष्टाभ्यां प्रीणनीया देवतैकैव भवति ।

सा केत्याशङ्कयाऽऽह—

मृत्युरेव ।

परमात्मैवेत्यर्थः । यद्वा तावेतावग्न्यश्वमेधावप्ययकाले मृत्युशब्दितः परमात्मैवेत्यर्थः ।

एतादृशानुसंधानविशिष्टाग्न्यश्वमेधयोः प्रयोजनमाह—

अप पुनर्मृत्युं जयति ।

अपमृत्युं जयतीत्यर्थः ।

नैनं मृत्युराप्नोति ।

एनं संसारो नाऽऽप्नोतीत्यर्थः । ननु ब्रह्मज्ञानसाध्यायाः संसारनिवृत्तेः कथं दृष्टिविशिष्टचित्याग्न्यश्वमेधसाध्य[त्व]मित्यत्राऽऽह—

मृत्युरस्याऽऽत्मा भवति ।

मृत्युः परमात्माऽस्याश्वमेधस्यानुष्ठातुरात्मा भवति । आत्मत्वेनावगतो भवतीत्यर्थः । नित्यसिद्धस्याऽऽत्मत्वसाध्यत्वात् । ततश्चाग्न्यश्वमेधयोर्ब्रह्मात्मकत्वावगमद्वारा संसारनिवृत्तिहेतुत्वमुपपद्यत इति भावः ।

एतासां देवतानामेको भवति ॥ ७ ॥

इति बृहदारण्यकोपनिषदि प्रथमाध्यायस्य द्वितीयं ब्राह्मणम् ॥ २ ॥

अग्नीन्द्रादिसायुज्यकामस्य तदपि भवतीत्यर्थः ॥ ७ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां प्रथमाध्यायस्य द्वितीयं ब्राह्मणम् ॥ २ ॥

कर्माङ्गभूतोद्गातरि मुख्यप्राणदृष्टिं विधातुमाख्यायिकामाह—

द्वया ह वै प्राजापत्या देवाश्चासुराश्च ।

हशब्दो वृत्तार्थस्मरणे । प्रजापतेरपत्यानि प्राजापत्याः । दित्यदित्यादित्य०[पा० सू० ४ । १ । ८५] इत्यादिनाऽपत्यार्थे ण्यप्रत्ययः । द्वया द्विविधा द्विप्रकारा इत्यर्थः । 'द्वित्रिभ्यां तयस्यायज्वा' [पा० सू० ५ । २ । ४३] इत्ययच्प्रत्ययः । के ते देवाश्चासुराश्च ।

ततः कानीयसा एव देवा ज्यायसा असुराः ।

ततस्तत्रेत्यर्थः । देवाः कनीयांसोऽल्पीयांसः । कानीयसा इति स्वार्थेऽण् । ज्यायसा असुरा ज्यायांसो भूयांसः । 'भूयांसोऽसुरा' इति श्रुत्यन्तरात् ।

त एषु लोकेष्वस्पर्धन्त ।

परस्परविजिगीषां कृतवन्तः ।

ते ह देवा ऊचुः ।

स्पष्टोऽर्थः ।

हन्तासुरान्यज्ञ उद्गीथेनात्ययामेति ॥ १ ॥

हन्तेत्यसुरविजयोपायदर्शनजहर्षे । अत्रोद्गीथशब्द उद्गातृपरः । उत्तरत्रोद्गातुरेवाध्यस्तप्राणभावस्योपास्यत्वप्रतीतेः । 'त्वं न उद्गाय' उद्गात्राऽत्येष्यन्तीत्युत्तरत्र बहुकृत्व उद्गातृशब्दस्याभ्यसिष्यमाणतया तदनुरोधेन प्रक्रमस्थस्यास्याप्युद्गीथशब्दस्य लक्षणयोद्गातृपरत्वस्य वक्तव्यत्वात् । सति बाधके कर्मवाचिशब्दस्य लक्षणया कर्तृपरत्वस्य युक्तत्वात् । यद्वा भगवता भाष्यकृता, 'अन्यथात्वं शब्दात् ।' [ब्र० सू० ३ । ३ । ६] इत्यधिरणे नचोद्गातुरुपास्यत्व उद्गीथेनेत्युपक्रमविरोधः शङ्कनीयः । उद्गीथस्योद्गानकर्मभूतस्यावश्यापेक्षितत्वात्तस्यापि परपरिभवाख्यफलं प्रति हेतुत्वादिति भाषितत्वाच्छ्रुतप्रकाशिकायां बृहदारण्यकेऽध्यस्तप्राणभावस्योद्गातुरुपास्यत्व उपक्रमविरोध इत्याशङ्क्य न ह्युपक्रमाधिकरण उपक्रमानवगतमुपसंहारावगतं त्याज्यमित्युक्तं किं तूपक्रमावगतस्य भङ्गो न कार्य इति । अत्र तूपक्रमावगतमधिकं च स्वी क्रियते । उद्गीथेनात्ययामेत्युद्गातृगीयमानोद्गीथे तात्पर्यमित्युक्तत्वाच्च नोद्गीथशब्दस्याद्गातृलक्षकत्वम् । अपि तूद्गीथ उद्गातृविशेषणभूतोद्गीथपरः । न तु 'तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभविष्यामः' [छा० १ । २ । १] इति च्छान्दोग्यगतोद्गीथशब्दवत्स्वतन्त्रोद्गीथपर इति वदन्ति ॥ १ ॥

ते ह वाचमूचुस्त्वं न उद्गायेति ।

त्वं न उद्गाता भवेति वागभिमानिनीं देवतां प्रार्थितवन्तः ।

तथेति तेभ्यो वागुदगायत् ।

तथेत्यङ्गीकृत्य तेभ्यो देवेभ्यो वागुद्गानं कृतवती । दृष्टिविधिप्रकरणत्वात्, 'आदित्यादिमतयश्चाङ्ग उपपत्तेः । [ब्र० सू० ४ । १ । ६] इति न्यायेन क्रत्वङ्गभूतोद्गातरि वाग्दृष्टिं कृतवन्त इत्यर्थः ।

यो वाचि भोगस्तं देवेभ्य आगा-
यद्यत्कल्याणं वदति तदात्मने ।

वाचि निमित्त यो भोगो गानादिजन्मा यः सुखानुभवस्तं भोगं देवेभ्य आगायत् । देवानां भोगमुद्दिश्याऽऽगायत् । गानं कृतवती । गानेन देवानां भोगं संपादितवतीति यावत् । यत्कल्याणवार्ताभिलपनरूपं वागिन्द्रियकार्यं तदप्यात्मने वाक्संपादितवती ।

ते विदुरनेन वै न उद्गात्राऽत्येष्यन्तीति ।

असुरा अविदुर्ज्ञातवन्त इत्यर्थः । किमिति । अनेन वाग्रूपेणोद्गात्रा नोऽस्मानत्येष्यन्ति जेष्यन्ति ।

तमभिद्रुत्य पाप्मनाऽविध्यन् ।

तमुद्गातारमभिद्रुत्य शीघ्रं प्राप्य पाप्मनाऽविध्यन्पापेन संयोजितवन्तः ।

स यः स पाप्मा यदेवेदमप्रतिरूपं
वदति स एव स पाप्मा ॥ २ ॥

यः स पाप्मा तदेव त्वनृतवदनसाधनभूतः स तु यदेवेदमप्रतिरूपमनुचितम[श्ली]लानृतपैशुन्यादि वदति स एव तद्रूप एव स पाप्मेत्यर्थः । अयं भावः—असुरा वागिन्द्रियं क्रोधोत्पादनद्वारा परुषातिवादपैशुन्यादिदूषितमकुर्वन्नित्यर्थः ॥ २ ॥

अथ ह प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्यः प्राण उदगायद्यः प्राणे भोगस्तं देवेभ्य आगायद्यत्कल्याणं जिघ्रति तदात्मने । ते विदुरनेन वै न उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मनाऽविध्यन्स यः स पाप्मा यदेवेदमप्रतिरूपं जिघ्रति स एव स पाप्मा ॥ ३ ॥

अथ ह चक्षुरूचुस्त्वं न उद्गायेति तथेति तेभ्यश्चक्षुरुदगायत् । यश्चक्षुषि भोगस्तं देवेभ्य उदगायद्यत्कल्याणं पश्यति तदात्मने । ते विदु-

रनेन वै न उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मनाऽविध्यन्स यः स पाप्मा यदेवेदमप्रतिरूपं पश्यति स एव स पाप्मा ॥ ४ ॥

अथ ह श्रोत्रमूचुस्त्वं न उद्गायेति तथेति तेभ्यः श्रोत्रमुदगायद्यः श्रोत्रे भोगस्तं देवेभ्य आगायद्यत्कल्याणं शृणोति तदात्मने । ते विदुरनेन वै न उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मनाऽविध्यन्स यः स पाप्मा यदेवेदमप्रतिरूपं शृणोति स एव स पाप्मा ॥ ५ ॥

अथ ह मन ऊचुस्त्वं न उद्गायेति तथेति तेभ्यो मन उदगायद्यो मनसि भोगस्तं देवेभ्य आगायद्यत्कल्याणꣳ संकल्पयति तदात्मने । ते विदुरनेन वै उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मनाऽविध्यन्स यः स पाप्मा यदेवेदमप्रतिरूपꣳ संकल्पयति स एव स पाप्मा ।

पूर्ववदर्थः ।

उक्तमर्थं निगमयति—

एवमु खल्वेता देवताः पाप्मभिरुपासृजन् ।

एवमेव खलूक्तरीत्यैता देवताः पाप्मभिरनृतवदनादिलक्षणैरुपासृजन्नुपगतवन्तः ।

एवमेताः[1] पाप्मनाऽविध्यन् ॥ ६ ॥

एवमुक्तया रीत्याऽसुरा एता वागादिदेवताः पाप्मनाऽविध्यन् । अनृतादिपाप्मना वेधनं कृतवन्तः ॥ ६ ॥

---

१ आनन्दाश्रमस्थपुस्तके–मेनाः ।

अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति ।

आसन्यमासन्नं मुख्यमित्यर्थः । यद्वाऽऽस्ये भव आसन्यः । आस्य-शब्दस्य पद्दन्नित्यादिनाऽऽसन्नादेशः । मुख्यमिति यावत्तं प्राणं देवा उक्तवन्तः । त्वं न उद्गायेति । स्पष्टोऽर्थः ।

तेभ्य एष प्राण उदगायत् ।

उद्गातरि मुख्यप्राणदृष्टिं कृतवन्त इत्यर्थः । तथैव हि व्याख्यातं व्यासार्यैः 'अन्यथात्वं शब्दात्' [ब्र०सू० ३ । ३ । ६] इत्यधिकरणे ।

ते विदुरनेन वै न उद्गात्राऽत्येष्य-
न्तीति तमभिद्रुत्य पाप्मनाऽविव्यत्सन् ।

व्यद्धुमैच्छन् । व्यध ताडने तस्मात्सनि नेट् । अकित्वान्न संप्रसारणम् ।

स यथाऽश्मानमृत्वा लोष्टो विध्वꣳसेतवं
हैते विध्वꣳसमाना विष्वञ्चो विनेशुः ।

यथाऽश्मचूर्णनाय प्रक्षिप्तो लोष्टः पांसुपिण्डोऽश्मानं पाषाणमृत्वा प्राप्य विध्वंसेत चूर्णी भवेत्स दृष्टान्तो यथा तथाऽध्यस्तमुख्यप्राणभावोद्गात्रुपासनानिष्ठान्देवान्प्राप्य विध्वंसमानाश्चूर्णीभवन्तो विष्वञ्चो नानागतयो विनष्टा अभवन्नित्यर्थः ।

ततो देवा अभवन्पराऽसुराः ।

ततः परं देवा देवा जाता द्योतमाना अभवन्नित्यर्थः । यद्वा देवा अभवन्सत्तामलभन्तेत्यर्थः । विजयिनोऽभवन्निति वाऽर्थः । असुरास्तु पराऽभवन्पराभूता अभवन् ।

भवत्यात्मना पराऽस्य द्विषन् ।

द्विषः शतुर्वा वचनम् । [वार्ति०]इति कर्मणि षष्ठी । एनं प्रति द्वेषं कुर्व-ञ्छत्रुः पाप्मा च पराभूतो भवतीत्यर्थः ।

भ्रातृव्यो भवति य एवं वेद ॥ ७ ॥

भवत्यात्मना पराऽस्य द्विषन्भ्रातृव्यो भवति य एवं वेदेति शत्रुपराजय-फलायोद्गीथे प्राणदृष्टिर्विहितेति भाष्यस्योपलक्षणतया पाप्मपराभव-स्याऽऽत्मना भवनस्य च फलस्य प्रतिपादनस्य न विरोध इति द्रष्टव्यम् ।

यद्वाऽस्य द्विषन्भ्रातृव्य आत्मना स्वत एव पराभवति पाप्मा च भवति निन्दादियुक्तश्च भवतीत्यर्थः ॥ ७ ॥

ते होचुः क्व नु सोऽभूद्यो न इत्थमसक्तेति ।

ते ह देवा ऊचुः । यो मुख्यप्राणो नोऽस्माकमित्थमुक्तरूपं शत्रुपराजयमसक्त संयोजितवान् । षञ्जेः सिचि व्यत्ययेनाऽऽत्मनेपदे 'झलो झलि' [पा०सू०८।२।२५] इति सिज्लोपे तस्य च्छान्दसेन सिद्धत्वेनानिदितामित्यनुनासिकलोपः कुत्वम् । यः संयोजितवान्स क्व नु कस्मिन्देशे प्रतिष्ठित इत्यूचुः संमन्त्रयांचक्रुरिति यावत् । एवं संमन्त्र्य ददृशुः ।

अयमास्येऽन्तरिति सोऽयास्यः ।

अन्तरास्येऽयमिति प्रत्यक्षतो दृष्टो यः प्राणः सोऽयास्यः ।

आङ्गिरसोऽङ्गाना॰हि रसः ॥ ८ ॥

अत आङ्गिरसः ॥ ८ ॥

सा वा एषा देवता दूर्नाम दूर॰ ह्यस्या मृत्युः ।

यस्मात्कारणादस्या मुख्यप्राणरूपाया देवताया मृत्युर्दूरं भवति तस्मात्प्राणस्य दूर्नामत्वमित्यर्थः ।

दूर्नामकत्वेन प्राणविद्यायाः फलमाह—

दूर॰ ह वा अस्मान्मृत्युर्भवति य एवं वेद ॥ ९ ॥

स्पष्टोऽर्थः ॥ ९ ॥

सा वा एषा देवतैतासां देवतानां पाप्मानं मृत्युमपहत्य यत्राऽऽसां दिशामन्तस्तद्गमयांचकार ।

उद्गातर्यध्यस्वो(स्यो)पासिता मृत्युर्दूरत्वेन दूर्नामिकैषा मुख्यप्राणरूपा देवता पूर्वमसुरैरनृतादिपाप्मभिः संयोजितानां वागादिदेवतानां मृत्युं मरणादिदुःखहेतुतया मृत्युशब्दितं पाप्मानमपहत्य वागादिदेवताभ्य आच्छिद्य यत्राऽऽसां दिशामन्तर्दिगन्तप्रदेशस्तत्र गमयांचकार दूर्नामत्वाद्दूरं मृत्युं निनायेत्यर्थः ।

तदासां पाप्मनो विन्यदधात् ।

आसां वागादिदेवतानां पाप्मनः पापानि विन्यदधाद्विशिष्य ति(नि)धानं कृतवतीत्यर्थः ।

तस्मान्न जनमियान्नान्तमियात् ।

यस्मात्कारणात्प्रत्यन्तदेशानां वागादिदेवताविनिर्मुक्तानृतादिलक्षण-पापनिधानाश्रयतया म्लेच्छदेशत्वम् । अत एव तत्र जनं जननमुत्पत्ति-मिति यावत् । अन्तं मरणं च नेयान्न प्राप्नुयात् । तत्र देश उत्पत्ति-मरणे अशोभने इति यावत् ।

नेत्पाप्मानं मृत्युमन्ववायानीति ॥ १० ॥

नेन्नैवेत्यर्थः । पाप्मानं मृत्युमन्ववायानि नानुगच्छेयमिति भीतः सन्नु-त्पत्तिमरणे तत्र न प्राप्नुयात् । उत्पत्तिमरणे तादृशदेशे यथा न भवत-स्तथा यतेतेति यावत् ॥ १० ॥

सा वा एषा देवतैतासां देवतानां पाप्मानं

मृत्युमपहत्याथैना मृत्युमत्यवहत् ॥ ११ ॥

एषा मुख्यप्राणदेवताऽऽसां वागादिदेवतानां पाप्मानं मृत्युं तत आच्छिद्य तदनन्तरमेना वागादिदेवता मृत्युमतीत्यावहत् । मृत्य्वति-क्रान्तं स्वरूपं प्रापयति स्म ॥ ११ ॥

तदेव प्रपञ्चयति—

स वै वाचमेव प्रथमामत्यवहत् ।

स प्राणः प्रथमामितरदेवतासु प्रधानभूतां वाचमत्यवहत् । मृत्युमत्य-क्रामयदित्यर्थः ।

सा यदा मृत्युमत्यमुच्यत ।

मृत्योरतिमुक्ताऽत्यन्तमुक्ताऽऽसीत् ।

सोऽग्निरभवत् ।

तदेति शेषः । स इत्यग्न्यपेक्षया पुंलिङ्गनिर्देशः । यद्यपि वागभि-मानिनी देवता सर्वदाऽग्निरेव तथाऽप्यवगतदोषतयाऽग्रत[:] परादिप्रवृ-त्तिनिमित्तपौष्कल्यशालितयाऽग्निरभवत् । अद्य रामस्य रामत्वमित्यादि-वदिति भावः । तदेवाऽऽह—

सोऽयमग्निः परेण मृत्युमतिक्रान्तो दीप्यते ।

एवं मृत्युमतिक्रान्तोऽग्निर्निरस्तपापरूपमलतया मृत्युं परेण मृत्योः परस्ताद्दीप्यत इत्यर्थः । एवमुत्तरत्रापि द्रष्टव्यम् ॥ १२ ॥

अथ प्राणमत्यवहत्स यदा मृत्युमत्य-
मुच्यत स वायुरभवत्सोऽयं वायुः
परेण मृत्युमतिक्रान्तः पवते ॥१३॥

अथ चक्षुरत्यवहत्तद्यदा मृत्युमत्यमुच्यत
स आदित्योऽभवत्सोऽसावादित्यः परेण
मृत्युमतिक्रान्तस्तपति ॥ १४ ॥

अथ श्रोत्रमत्यवहत्तद्यदा मृत्युमत्यमुच्यत ता दिशोऽ-
भवꣳस्ता इमा दिशः परेण मृत्युमतिक्रान्ताः ॥ १५ ॥

अत्र भान्तीति शेषः । दिक्शब्दो देवतापरः ॥ १५ ॥

अथ मनोऽत्यवहत्तद्यदा मृत्युमत्यमुच्यत स चन्द्रमा
अभवत्सोऽसौ चन्द्रमाः परेण मृत्युमतिक्रान्तो भात्येवꣳ
ह वा एनमेषा देवता मृत्युमतिवहति य एवं वेद॥१६॥

यः पुमान्वागाद्यभिमान्यग्न्यादिदेवतानामत्यवहनक्रमं वेद तमेनमेषा प्राणदेवता मृत्युमतिक्रामयतीत्यर्थः ॥ १६ ॥

अथाऽऽत्मनेऽन्नाद्यमागायत् ।

यो वाचि भोगस्तं देवेभ्य आगायत् । यत्कल्याणं वदति तदात्मन इति यजमानगामिफलव्यतिरिक्तं कल्याणवदनादिकं यथा वागाद्या देवता आगायंस्तथा प्राणोऽप्यात्मनेऽन्नाद्यमागायत् । अन्नमत्तीत्यन्नादः । तस्य भावोऽन्नाद्यम् । आदिवृद्ध्यभावश्छान्दसः । अथवाऽन्नं च तदाद्यं चान्नाद्यम् । आद्यमदनार्हं भक्षणार्हमित्यर्थः । आगायद्गानसामर्थ्येनाऽऽप-यत् । संपादितवानित्यर्थः ।

यद्धि किंचान्नमद्यतेऽनेनैव तदद्यते ।

अत्रान्नशब्दः प्राणवाची । अद्यमानं सर्वं प्राणेनैवाद्यत इत्यर्थः ।

इह प्रतितिष्ठति ॥ १७ ॥

इहान्ने सत्येव प्राणः प्रतिष्ठितो भवतीत्यर्थः। तस्मादन्नस्य प्राणाहारत्वादन्नादत्वं सिद्धमिति भावः॥ १७ ॥

ते देवा अब्रुवन्।

वागाद्यास्ते देवाः प्राणमब्रुवन्।

एतावद्वा इद॑ँ सर्वं यदन्नं तदात्मन आगासीरनु नोऽस्मिन्नन्न आभजस्वेति।

यदिदमन्नमस्ति एतावद्धै सर्वमिदं तत्तादृशमन्नमात्मने स्वार्थमागासीः। वयं चान्नार्थिनोऽन्नं विना स्थातुमशक्यत्वात्। तस्मात्तस्मिन्नन्नेऽनु त्वद्भोगानन्तरं नोऽस्मानाभजस्व। आङीषदर्थे। अन्तर्भावितण्यर्थोऽयं भाजिः मां जय। (आभाजयस्व) अल्पभागवतः कुर्वित्यर्थः।

एवमुक्तः प्राणः प्रत्याह—

ते वै माऽभिसंविशतेति।

ते वै तादृशा अन्नार्थिनो यूयं मा मामभि अभितः संविशतोपविशतेत्यब्रवीत्।

तथेति त॑ँ समन्तं परिण्यविशन्त।

वागाद्या देवतास्तथेति प्रतिश्रुत्य समन्तात्परितो न्यविशन्त निविष्टा इत्यर्थः। भागिनश्चाभवन्निति भावः।

तस्माद्यदनेनान्नमत्ति तेनैतास्तृप्यन्ति।

तस्माद्धेतोरनेन प्राणेन सहितः सञ्जीवो यदन्नमत्ति तेनैवान्नेन वागाद्यास्तृप्यन्ति। प्राणेऽन्नेनाऽऽप्यायिते वागाद्याः प्राणा अन्नेनाऽऽप्यायिता भवन्तीत्यर्थः।

एतद्वेदनस्य फलमाह—

एव॑ँ ह वा एन॑ँ स्वा अभिसंविशन्ति भर्ता स्वाना॑ँ श्रेष्ठः पुर एता भवत्यन्नादोऽधिपतिर्य एवं वेद।

यस्त्वेवमुपास्ते तादृशमेनं विद्वांसं यथा वागाद्याः प्राणस्य परितो निविष्टा एवं स्वा ज्ञातयोऽभितः संविशन्ति परित उपासते स्वानां

ज्ञातीनां भर्ता पोषकः श्रेष्ठश्च पुर एताऽग्रेसरोऽन्नादोऽरोगदृढगात्रतयाऽमि(भि)मना(ता)न्नभोक्ताऽन्येषामधिपतिश्च भवतीत्यर्थः ।

य उ हैवंविद॰ स्वेषु प्रति प्रति बुभूषति न हैवालं भार्येभ्यो भवति ।

एवंविदमेतादृशप्राणविद्यानिष्ठं प्रति स्वेषु प्रति प्रतिभटः । छान्दसः सुलोपः । बुभूषति यावन्नालं भवति पुत्रकलत्रादिभरणेऽप्यसमर्थो भवतीत्यर्थः ।

अथ य एवैतमनुभवति यो वैतमनु भार्यान्बुभूर्षति स एवालं भार्येभ्यो भवति ॥१८॥

अथशब्दः प्रकृतिमपेक्ष्यार्थान्तरपरत्वे । ज्ञातीनां मध्ये य एतं प्राणविदमनुगतो भवति । यो वा एतं प्राणविदमनुसृत्य भार्यान्भर्तव्यान्पुत्रकलत्रादीन्बुभूर्षति भर्तुमिच्छति । भृञः सनि, 'उदोष्ठ्यपूर्वस्य' [पा० सू० ७।१।१०२] इत्युत्वम् । स एवालं भार्येभ्यो भवति ॥ १८ ॥

पूर्वमुक्तमेवायास्यत्वमाङ्गिरसत्वं च विद्याभेदभ्रमापनुत्तये पुनराह—

सोऽयास्य आङ्गिरसोऽङ्गाना॰ हि रसः प्राणो वा अङ्गाना॰ रसः ।

उक्त एवार्थः स्मारितः ।

पुनस्तमेवार्थं प्रसिद्ध्योपपादयति—

प्राणो हि वा अङ्गाना॰ रसस्तस्माद्यस्मात्कस्माच्चाङ्गात्प्राण उत्क्रामति तदेव तच्छुष्यत्येष हि वा अङ्गाना॰ रसः॥१९॥

यस्मात्प्राणानामङ्गरसत्वं तस्माद्यस्मात्कस्माच्चिदङ्गात्प्राण उत्क्रामति तदेव तदङ्गं शुष्यति नीरसत्वादिति भावः ॥ १९ ॥

एष उ एव बृहस्पतिर्वाग्वै बृहती तस्या एष पतिस्तस्मादु बृहस्पतिः ॥ २० ॥

उश्चार्थे । बृहस्पतिश्चैष एवेत्यर्थः । तत्र हेतुः—वाग्वै बृहती । बृह-

---

१ अन्यत्रमुद्रितपुस्तके-हैवालं ।

त्याख्यच्छन्दसो वाग्रूपत्वादिति भावः। तादृश्या वाच एष प्राणः पतिरिति रक्षक इत्यर्थः। वागादिसत्तायास्तदधीनत्वादिति भावः ॥ २० ॥

एष उ एव ब्रह्मणस्पतिर्वाग्वै ब्रह्म तस्या
एष पतिस्तस्मादु ब्रह्मणस्पतिः ॥ २१ ॥

ब्रह्मशब्दो वेदपरः। शिष्टं पूर्ववत् ॥ २१ ॥

एष उ एव साम वाग्वै सामैष सा
चामश्चेति तत्साम्नः सामत्वम् ।

एष उ एव वाग्विशिष्टो मुख्यप्राण एव साम सा चामश्चेति सामशब्दनिर्वचनात्। सेति स्त्रीलिङ्गेन तच्छब्देन वाक्परामृश्यते। अम गत्यादिष्विति गमनार्थादमतेः। अमति गच्छतीत्यमः प्राणः। तदुपपादयति—वाग्वै सामैष इति।

प्रकारान्तरेण सामशब्दनिर्वचनमाह—

यद्वेव समः प्लुषिणा समो मशकेन समो नागेन सम
एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण तस्माद्वेव साम ।

यद्वेव यत्, उ एवेति च्छेदः। उशब्दो वार्थः। यस्मादेव वा प्लुषिणा पुत्तिकाशरीरेण समो मशकशरीरेण समो हस्तिशरीरेण समष्टिजीवभूतत्रैलोक्यशरीरकब्रह्मणः शरीरेणापि समो देवमनुष्यादिसर्वशरीरेणापि समः। यथा घटप्रदीपप्रभा तावन्मात्रव्यापिनी प्रासादप्रदीपप्रभा च प्रासादव्यापिनि एवं प्राणोऽपि ब्रह्मादिपिपीलिकान्तशरीरेषु तत्तच्छरीरानुरूपव्याप्तिमत्त्वेन समः। तस्मादेव वा सामेत्यर्थः। एतदेव वाक्यमवलम्ब्य मुख्यप्राणस्य विभुत्वं पूर्वपक्षीकृत्येन्द्रियाणामिव मुख्यप्राणस्याप्युत्क्रान्त्यादिश्रवणादणुत्वमिति प्राणपादे 'अणुश्च' [ब्र० सू० २।४।१३] इति सूत्रेण सिद्धान्तितम्।

एतज्ज्ञानस्य फलमाह—

अश्नुते साम्नः सायुज्यꣳ सलोकतां
जयति य एवमेतत्साम वेद ॥२२॥

साम्नः सामशब्दितस्य प्राणस्य सायुज्यं प्राणदेवतासमानलोकतामश्नुते सलोकतां जयति सालोक्यं प्राप्नोति। य एवं वेद सामशब्दनिरुक्तिं सर्वदाऽनुसंधत्ते ॥ २२ ॥

एष उ वा उद्गीथः प्राणो वा उत्प्राणेन हीद९ँ सर्व-
मुत्तब्धं वागेव गीथोच्च गीथा चेति स उद्गीथः॥२३॥

एष उ वा एष एव वाक्प्राणसमुदाय उद्गीथ उद्गीथाख्यसामभक्ति-रित्यर्थः। तदुपपादयति—प्राणो वा उत्प्राणेन हीदं सर्वमुत्तब्धं धृत-मित्यर्थः ॥ २३ ॥

तद्धापि ब्रह्मदत्तश्चैकितायनेयो[1] राजानं भक्षयन्नुवाच ।

तत्तत्र आख्यायिकेति शेषः। हशब्दः प्रसिद्धौ। आख्यायिकाऽपि प्रसिद्धा हीत्यर्थः। चैकितायनेयः। चिकितस्य [गोत्रा]पत्यं चैकितिः। 'अत इञ्' [पा०सू० ४ । १ । ९५] तस्यापत्यं युवा 'यञिञोश्च' [पा० सू० ४ । १ । १०१] इति फक् । तस्याऽऽयनादेशः। चैकि-तायनस्यापत्यं चैकितायनेयः । चैकितायनेयो ब्रह्मदत्तनामकऋषिः। राजानं सोमं भक्षयन्नुवाच ।

अ[2]न्यस्यायं राजा मूर्धानं विपातयतात् ।

अयं भक्ष्यमाणो राजाऽन्यस्य शिरः पातयतु ।

ननु किं तेनापराद्धमित्याशङ्क्याऽऽह—

यदितोऽयास्याङ्गिरसोऽन्येनोदगायदिति ।

यस्मात्कारणादितोऽस्मादयास्याङ्गिरसो मुख्यप्राणादन्येन देवतान्त-रेणोदगायदुद्गानं कृतवान् । अयास्याङ्गिरसशब्दितमुख्यप्राणवेदनम-न्तरेण देवतान्तरदृष्टिं कृत्वा यस्तूद्गायति तस्य सोमं पिबतो मूर्धा पतत्वित्यर्थः। इतिशब्दो ब्रह्मदत्तवचःसमाप्तौ ।

वाचा चैव[3] स प्राणेन चोदगाय[4]दिति ॥ २४ ॥

यस्माद्धेतोः सोमं पिबञ्छपथं कृतवांस्तस्माद्ब्रह्मदत्तोऽयास्याङ्गिरस-शब्दितवाक्सहितप्राणवेदनमेव कृत्वोद्गानं कृतवानित्यर्थः ॥ २४ ॥

तस्य हैतस्य साम्नो यः स्वं वेद भवति हास्य स्वम् ।

एतस्य प्रकृतस्य सामशब्दवाच्यस्य प्राणस्य यः स्वं वेद तस्य स्वं धनं भवति ।

---

१ अत्रत्यमुद्रितपुस्तके—श्चैकितानेयो । २ अयं त्यस्य रा० । ३ च ह्येव । ४ यदिति ।

इति प्रथमतः प्रलोभ्य शुश्रूषामुत्पाद्याऽऽह—

तस्य वै स्वर एव स्वम् ।

स्वरः कण्ठध्वनिः ।

तस्मादार्त्विज्यं करिष्यन्वाचि स्वरमिच्छेत ।

ऋत्विजः कर्माऽऽर्त्विज्यम् । औद्गात्रादिकं करिष्यन्वाचि स्वरं कण्ठध्वनिमिच्छेत । इच्छेतेति पदव्यत्ययश्छान्दसः । यथा कण्ठध्वनिर्भवति तदुपायं मधुपिप्पलीसेवादिलक्षणं कुर्यादित्यर्थः ।

स तथा वाचा स्वरसंपन्नयाऽऽर्त्विज्यं
कुर्यात्तस्माद्यज्ञे स्वरवन्तं दिदृक्षन्त एव ।

तस्मात्स्वर एव साम्नः स्वं तस्माद्यज्ञे स्वरवन्तमेव स्तोतारं दिदृक्षन्ते जना इति शेषः ।

अथो यस्य स्वं भवति ।

यस्य स्वं धनमस्ति । अथोशब्दो वाक्यान्तरोपक्रमे । अत्यल्पमिदमुच्यते स्वरवन्तं दिदृक्षन्त इति । यस्य यस्य स्वं धनमस्ति तं सर्वं दिदृक्षन्त इत्यर्थः । अतः स्वर एव स्वमिति निर्दिष्टस्वरवतो दिदृक्षितत्वं युज्यत इत्यर्थः ।

सामस्वरे स्वत्ववेदनस्य फलमाह—

भवति हास्य स्वं य एवमेतत्साम्नः स्वं वेद ॥ २५ ॥

स्पष्टोऽर्थः ॥ २५

तस्य हैतस्य साम्नो यः सुवर्णं वेद भवति हास्य सुवर्णम् ।

स्पष्टोऽर्थः ।

एवं फलप्रदर्शनेन शुश्रूषामुत्पाद्याऽऽह—

तस्य वै स्वर एव सुवर्णम् ।

क्रुष्टप्रथमादिलक्षणं सप्तस्वरविदः स्वर एव सुवर्णं भूषणम् ।
सामस्वरे सुवर्णत्वज्ञानस्य फलमाह—

भवति हास्य सुवर्णं य एवमेतत्साम्नः सुवर्णं वेद ॥ २६ ॥

स्पष्टोऽर्थः ॥ २६ ॥

तस्य हैतस्य साम्नो यः प्रतिष्ठां वेद प्रति ह तिष्ठति ।

एवं फलप्रदर्शनेन पूर्वं शुश्रूषामुत्पाद्याऽऽह—

तस्य वै वागेव प्रतिष्ठा ।

कुत इत्यत्राऽऽह—

वाचि हि खल्वेष एतत्प्राणः प्रतिष्ठितो गीयतेऽन्न इत्यु हैक आहुः ॥ २७ ॥

एष मुख्यप्राणो वाचि वागिन्द्रियस्थानभूतजिह्वामूलादिस्थानेषु प्रतिष्ठितः सन्नेतत्साम गीयते साममावमापन्नमुद्गीयत इत्येक आहुः । उशब्दोऽवधारणे । पूर्वत्रेह प्रतितिष्ठतीति प्राणस्यान्नप्रतिष्ठितत्वोक्तेर्वाक्छब्दिताजिह्वामूलादिप्रतिष्ठितत्वमेकीयमतमिति भावः ॥ २७ ॥

एवमुद्गातृप्राणविद्योपदेशानन्तरमेवंभूतं प्राणविदमुद्गातारं प्रति प्रार्थनारूपाणां ब्रह्मलोकाभ्यारोहहेतुतयाऽभ्यारोहशब्दितानां मन्त्राणां प्रयोगकालं मन्त्रार्थं चाऽऽह—

अथातः पवमानानामेवाभ्यारोहः ।

बहिष्पवमानमाध्यंदिनपवमानार्भवपवमानभेदभिन्नानां त्रयाणामेव पवमानानामभ्यारोहमन्त्रा नेतरेषामापृष्ठादिस्तोत्राणामित्यर्थः ।

स वै खलु प्रस्तोता साम प्रस्तौति ।

यः साम प्रस्तौति स प्रस्तोतेत्यर्थः ।

स यत्र प्रस्तुयात्तदेतानि जपेत् ।

यदा प्रस्तौति तदैतानि यजूंषि यजमानो जपेदित्यर्थः ।

तानि यजूंषि पठति—

असतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्माऽमृतं गमयेति स यदाहासतो मा सद्गमयेति मृत्युर्वा असत्सदमृतं मृत्योर्माऽमृतं गमयामृतं मा कुर्वित्येवैतदाह ।

मा मामसतः सद्गमय मृत्योरमृतं गमय मृत्योरमृतं कुरु मृत्योः संसारादुद्धृत्यामृतं कुर्वित्यर्थः । स यदाहानेन मन्त्रेण यत्प्रतिपाद्यमाह—तदमृतं मा कुर्वित्येतदाहेत्यर्थः । एवमुत्तरत्रापि द्रष्टव्यम् ।

तमसो मा ज्योतिर्गमयेति मृत्युर्वै तमो ज्योतिरमृतं
मृत्योर्माऽमृतं गमयामृतं मा कुर्वित्येवैतदाह
मृत्योर्माऽमृतं गमयेति नात्र तिरोहितमिवास्ति ।

तृतीयः पर्यायः । स्पष्टोऽर्थः ।

अथ यानीतराणि स्तोत्राणि तेष्वात्मनेऽन्नाद्यमागायेत् ।

यस्मात्कारणात्त्रिष्वपि पवमानेषूद्गातृभिर्यजुर्मन्त्रैर्यजमानेन स्वगतं फलं याचितोऽतो यजमानगामिफलमुद्दिश्यैवाऽऽगायेत् । पवमानत्रयव्यतिरिक्तेष्वाज्यादिषु नवस्तोत्रेष्वात्मने स्वार्थमन्नाद्यमुद्दिश्याऽऽगायेत् ।

तस्मादु तेषु वरं वृणीत यं कामं कामयेत तम् ।

तस्माद्धेतोः पवमानव्यतिरिक्तस्तोत्रेषु यं कामं कामयेत तं वरं वृणीत ।

स एष एवंविदुद्गाताऽऽत्मने वा यजमा-
नाय वा यं कामं कामयते तमागायति ।

तमुद्दिश्याऽऽगायति । आगानेन तं संपादयतीत्यर्थः ।

तद्धैतल्लोकजिदेव ।

पूर्वोक्तं तदेतत्प्राणवेदनं लोकजिदेव ब्रह्मलोकसाधनमेव ।

न हैवालोक्यताया आशास्ति य एवमेतत्साम वेद ॥ २८ ॥

इति बृहदारण्यकोपनिषदि प्रथमाध्यायस्य
तृतीयं ब्राह्मणम् ॥ १ ॥

सामशब्दनिर्दिष्टमाङ्गिरसत्वादिप्रागुक्तगुणविशिष्टं यो वेद य उपास्ते सोऽलोक्यताया लोक्यता लोकार्हता तदभावोऽलोक्यता ब्रह्मलोकार्हत्वाभावतो भीत्या न हैवाऽऽशाऽस्ति नैवाऽऽशास्ते साधनान्तरं नाभिलषति तस्य कृतार्थत्वादिति भावः ॥ २८ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां प्रथमाध्यायस्य
तृतीयं ब्राह्मणम् ॥ ३ ॥

नारायणतदुपासनतत्प्राप्तीनां परमतत्त्वहितपुरुषार्थत्वं तत्प्रसङ्गात्सन-[न्दा]दियोगीश्वरविषयलक्षणातिसृष्टेः सृष्टिविसृष्ट्यपेक्षयाऽतिशयित्वं च वक्तुमुपक्रमते—

आत्मैवेदमग्र आसीत्पुरुषविधः ।

इदं जगदग्रे सृष्टेः प्राक्पुरुषविध आत्मैवाऽऽसीत् । अस्य वाक्यस्य कारणवाक्यत्वादात्मशब्दो नारायणपरः । 'स यो हैतमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेद । अन्वयं पुरुषविधः' इति पुरुषविधश-ब्दस्य भगवति प्रयुक्तत्वात् । पुरुषस्य विधेव विधा यस्य स पुरुष-विधः । पुरुषाकार इत्यर्थः । अस्याऽऽत्मनः पुरुषविधत्वं चाऽऽनन्दम-यत्वं ज्ञापयति । 'आत्मन आकाशः संभूतः ।'[तै० २ । १] इत्युपक्रम्य, 'अन्योऽन्तर आत्माऽऽनन्दमयः '[तै० २ । ५] इत्युक्त्वा तस्य पुरुष-विधत्वप्रतिपादनादिति व्यासार्यैः सर्वव्याख्यानाधिकरणे ह्युक्तम् ।

सो[1]ऽन्वीक्ष्य नान्यदात्मनोऽपश्यत् ।

स पुरुषोऽन्वीक्ष्यान्वीक्षमाणः साक्षात्कुर्वन्नात्मनोऽन्यं विभक्तं नापश्यत्सृष्टेःप्राक्तमःपरे देव एकी भवतीत्युक्तरीत्याऽयःपीताम्बुवच्चिद-चित्प्रपञ्चस्य परमात्मनोऽविभक्तत्वादिति भावः ।

सोऽहमस्मीत्यग्रे व्याहरत्ततोऽहंनामाऽभवत् ।

अहमिति हिरण्यगर्भनाम । अहमभिमानाश्रयसृष्टिपुरुषाणां प्रथम-त्वाद्धिरण्यगर्भस्य । उक्तं च मोक्षधर्मे भृगुभरद्वाजसंवादे—

तस्मात्पद्मात्समभवद्ब्रह्मा वेदमयो निधिः ।
अहंकार इति ख्यातः सर्वभूतात्मभूतकृत् ॥ इति ।

तस्मादयमर्थः । अहमस्मि, अहंकारः स्यां चतुर्मुखः स्यामिति संक-ल्पवाक्यं व्याजहार ततोऽहंनामा चतुर्मुखोऽभवत् ।

तस्मादप्येतर्ह्यामन्त्रितोऽहमयमित्येवाग्र
उक्त्वाऽथान्यन्नाम प्रब्रूते यदस्य भवति ।

यस्माद्धेतोर्भगवता प्रथमतश्चतुर्मुखेऽहंशब्दः प्रयुक्तस्तस्माद्धेतोरेतर्ह्य-प्यस्मिन्नपि काले केनचित्पुंसाऽऽमन्त्रितोऽयं जनोऽहमित्येवाग्र उक्त्वाऽ-थान्यद्यदस्य पित्रादिकृतं नाम भवति तद्वदति ।

१ अत्र स्वमुद्रितपुस्तके—सोन्वीँ ।

स यत्पूर्वोऽस्मात्सर्वस्मात्सर्वान्पाप्मन औषत्तस्मात्पुरुषः ।

स आत्मा यस्मात्सर्वस्मात्पूर्वो यस्माच्च हेतोः सर्वान्पाप्मन औषद्दहत् । उष दाहे । तस्मात्पुरुषः । अत्र स इत्यनेन नाव्यहितस्याहंनाम्नो ग्रहणमुचितम् । तस्य स्वयंकर्मवश्यस्य सर्वपापप्रदाहकत्वाद्यसंभवादिति द्रष्टव्यम् । सर्वकारणत्वे सति सर्वपापप्रदाहकत्वं पुरुषशब्दप्रवृत्तिनिमित्तमिति भावः । पुरिसंज्ञे शरीरेऽस्मिञ्शयनात्पुरुषो हरिः । शकारस्य षकारोऽयं व्यत्ययेन प्रयुज्यत इति भगवदसाधारणपुरुषशब्देनोपक्रमादियमुपनिषन्नारायणपरेत्यवगन्तव्यम् । तद्वेदनस्य फलमाह—

ओषति ह वै स तं योऽस्मात्पूर्वो बुभूषति य एवं वेद ॥ १ ॥

एवं पुरुषत्वनिरुक्तिक्रमं निरन्तरमनुसंधत्ते स तमोषति दहति। कमित्यत्राऽऽह—योऽस्मात्पूर्वो बुभूषति । यः पुमानस्मात्पुरुषविदः पूर्वो बुभूषति श्रेष्ठो भवितुमिच्छति श्रेष्ठो भूयामी (भवेयमि) तीच्छतीत्यर्थः । विजिगीषुं तिरस्करोतीति फडि(लि)तार्थः ॥ १ ॥

सोऽबिभेत् ।

अहंनामा चतुर्मुखोऽबिभेत् । आत्मन एकाकितां दृष्ट्वाऽस्थानभयाविष्टोऽभवदित्यर्थः । अत्र स इति न परमप्रकृतस्य परमात्मनः परामर्शः संभवति तस्यापहतपाप्मत्वेन भयसंबन्धाभावादिति द्रष्टव्यम् ।

तस्मादेकाकी बिभेति ।

अत एव हि लोकेऽद्यत्वेऽप्यसहायो बिभेति ।

स हायमीक्षांचक्रे ।

हशब्दो वृत्तार्थस्मरणे । सोऽयं चतुर्मुख एवमचिन्तयदित्यर्थः । किमिति—

यन्मदन्यन्नास्ति कस्मान्नु बिभेमीति ।

यस्माद्धेतोर्मत्तोऽन्यत्प्रतिद्वंद्वि वस्त्विह नास्ति कुतोऽहं बिभेमि । लोके हि प्रतिद्वंद्विसत्त्वेऽसहायत्वं भयहेतुः । तदभावे त्वसहायत्वं न भयहेतुरिति भावः ।

तत एवास्य भयं वीयाय ।

तत एव विवेकरूपाज्ज्ञानादस्य भयं वीतमित्यर्थः ।

उक्तमर्थं श्रुतिः स्वयमेवानुमोदते—

कस्माद्ध्यभेष्यद्द्वितीयाद्वै भयं भवति ॥ २ ॥

द्वितीयस्यैव भयहेतुत्वम् । तस्यैवाभावे कुतो भयं प्राप्स्यतीति भावः । हिरण्यगर्भस्यापि शरीरपरिग्रहानन्तरमेव भयोत्पत्तेः शरीरित्वं कष्टमिति भावः । अत्राद्वैतसाक्षात्काराद्भयं निवृत्तमिति नार्थः । तथा सति आत्मरतेस्तस्योत्तरत्र नैव रेम इत्यरतिरिरंसाप्रतिपादनविरोधः । प्रारब्धवशादरतिरिरंसानुवृत्तौ भयमपि तद्वशात्कुतो नानुवर्ततेत्यास्तां तावत् ॥ २ ॥

स वै नैव रेमे ।

इष्टार्थसंयोगजा प्रीती रतिः । तां न लब्धवानित्यर्थः ।

तस्मादेकाकी न रमते ।

यस्मादेकाकिनश्चतुर्मुखस्य न रतिरत एवाद्यापि असहायस्य रतिर्नोपलभ्यत इत्यर्थः ।

स द्वितीयमैच्छत् ।

स प्रजापतिर्द्वितीयं रन्तुमैच्छत् ।

स हैतावानास यथा स्त्रीपुमाꣳसौ संपरिष्वक्तौ ।

हशब्दो वृत्तार्थस्मरणे । यथा लोके स्त्रीपुमांसौ रत्यर्थं संपरिष्वक्तौ यत्परिमाणौ स्यातां स तत्परिमाणो विवृद्धो बभूवेत्यर्थः ।

स इममेवाऽऽत्मानं द्वेधाऽपातयत् ।

स प्रजापतिरिमं विवृद्धमात्मानं शरीरं द्वेधाऽपातयत् ।

ततः पतिश्च पत्नी चाभवताम् ।

ततः पतनादेव [पति] पत्नीशब्दवाच्यौ दंपती अभवताम् । उक्तं च श्रीविष्णुपुराणे—

ब्रह्मणोऽभून्महाक्रोधस्त्रैलोक्यदहनक्षमः ।
भ्रुकुटीकुटिलात्तस्य ललाटात्क्रोधदीपितात् ॥
समुत्पन्नस्तदा रुद्रो मध्याह्नार्कसमप्रभः ।
अर्धनारीनरवपुः प्रचण्डोऽतिशरीरवान् ॥

विभजाऽऽत्मानमित्युक्त्वा त [त्रैवान्त] र्दधे ततः ।
तथोक्तोऽसौ द्विधा स्त्रीत्वं पुरुषत्वं तथाऽकरोत् ॥

श्रीभागवते च—

कस्य रूपमभूद्द्वेधा यत्कायमभिचक्षते ।
ताभ्यां रूपविभागाभ्यां यत्कायमभिचक्षते ॥ इति ।

तस्मादिदमर्धबृगलमिव स्व इति ह स्माऽऽह याज्ञवल्क्यः ।

तस्माद्धेतोरिदं शरीरं स्वः स्वस्याऽऽत्मन इति यावत् । विभक्तिव्यत्ययश्छान्दसः । विवाहात्प्रागर्धबृगलमिवार्धविदलमिवेति ह याज्ञवल्क्य आह स्मोक्तवान् ।

तस्मादयमाकाशः स्त्रिया पूर्यत एव ।

यस्माद्विवाहात्प्रागर्धविदलं तस्मादेकांशो विवाहे सति स्त्रिया पूर्यते । अर्धो वा एष आत्मनो यत्पत्नीति श्रुतेः ।

ता ँ समभवत् ।

तां शतरूपाख्यामात्मनो दुहितरं स प्रजापतिः समभवन्मैथुन्य(न)मुपगतवान् ।

ततो मनुष्या अजायन्त ॥ ३ ॥

तस्मात्सं[ग]मान्मनुष्या उत्पन्नाः । उक्तं च विष्णुपुराणे—

शतरूपां च तां नारीं तपोनिर्धूतकल्मषाम् ।
स्वायंभुवो मनुर्देवः पत्नीत्वे जगृहे प्रभुः ॥ ३ ॥

सो हेयमीक्षांचक्रे ।

सेयं शतरूपा कन्येत्थमचिन्तयत् ।

चिन्ताप्रकारमाह—

कथं नु माऽऽत्मन एव जनयित्वा संभवति ।

मा[मि]मामात्मन एवोत्पाद्योपगच्छतीति ।

हन्त तिरोऽसानीति ।

जात्यन्तरेण तिरोहिता भवानीत्यीक्षित्वा ।

सा गौरभवत् ।

सा शतरूपा गौरभवत् ।

वृषभ इतरः ।

इतरो मनुर्वृषभः पुंगवोऽभूत् ।

समभवदेव ।

पुनरपि मैथुन्य(न)मुपगतवानित्यर्थः ।

ततो गावोऽजायन्त ।

स्पष्टोऽर्थः ।

वडवेतराऽभवत् ।

इतराऽश्वाऽभवत् ।

अश्ववृष इतरः ।

इतरस्तु मनुः पुरुषोऽभवदित्यर्थः । वृषु सेचने । रेतः सेक्तेत्यर्थः ।

गर्दभीतरा गर्दभ इतरस्ताꣳ समे-
वाभवत्तत एकशफमजायत ।

अश्वाश्वतरगर्दभाख्या अजायन्त ।

अजेतराऽभवद्वस्त इतरः ।

बस्तश्छागः । शिष्टं स्पष्टम् ।

अविरितरा मेष इतरस्तां ताꣳ समेवाभवत् ।

तां तामिति वीप्सा । तामजां तामविं च समभवदेवेत्यर्थः ।

ततोऽजावयोऽजायन्तैवमेव यदिदं किंच मिथु-
नमा पिपीलिकाभ्यस्तत्सर्वमसृजत ॥ ४ ॥

स्पष्टोऽर्थः ॥ ४ ॥

सोऽवेदहं वाव सृष्टिरस्म्यहꣳ हीदꣳ सर्वमसृक्षीति ।

यस्मादिदं सर्वं जगदसृक्षि सृष्टवानस्मि तस्मादहमेव सृष्टिः सृज्यत इति सृष्टिर्जगदुच्यते । अहमेव सृष्टिरिति स प्रजापतिरवेज्ज्ञातवानित्यर्थः ।

ततः सृष्टिरभवत् ।

यस्माद्धेतोः प्रजापतिरहमेव सृष्टिरित्यभेदोपचारेण सृष्टिशब्दं प्रायुङ्क्त ततः सृष्टिनामाऽभवदित्यर्थः ।

सृष्ट्याᳫं हास्यैतस्यां भवति य एवं वेद ॥ ५ ॥

य एवं सृष्टिनिरुक्तिं वेद हास्य प्रजापतेरेतस्यां सृष्टौ मुख्यो भवतीत्यर्थः ॥ ५ ॥

अथेत्यभ्यमन्थत् ।

अथेति मङ्गलशब्दोच्चारणपूर्वकमभ्यमन्थत् ।

स मुखाच्च योनेर्हस्ताभ्यां चाग्निमसृजत तस्मादेतदुभयमलोमकमन्तरतः ।

फूत्कारनिर्मन्थनसाधनमुखहस्तात्मकमुभयम् । अग्नेर्योनित्वादलोमकमन्तरतो मध्येऽलोमकं लोमशून्यमित्यर्थः ।

योनेरन्तरतोऽलोमकत्वप्रसिद्धिं दर्शयति—

अलोमका हि योनिरन्तरतः ।

स्पष्टोऽर्थः ।

तद्यदिदमाहुरमुं यजामुं यजेत्येकैकं देवमेतस्यैव सा विसृष्टिरेष उ ह्येव सर्वे देवाः ।

तस्माद्धेतोर्यज्ञे याज्ञिका अमुं यजामुं यजेति एकैकं दैवमिन्द्रादिलक्षणमाहुः । एतस्य प्रजापतेरेव सा विसृष्टिर्विविधसृष्टिः । अत एव तत्सृष्टत्वादेव सर्वे देवा एष उ ह्येवैष एव कार्यकारणयोरभेदोपचारात्तथोक्तिः ।

अथ यत्किंचेदमार्द्रं तद्रेतसोऽसृजत ।

यच्चेदं कार्यमार्द्रं द्रवरूपं दृश्यते तद्रेतसोऽसृजत । तद्रेतसः प्रजापतिरसृजतेत्यर्थः । 'शिश्नाद्रेतो रेतस आपः' इति श्रुतेः ।

तदु सोमः ।

त[द्द्रवरूप]मेव सोमः सोमरसः ।

एतावद्वा इदꣳ सर्वमन्नं चैवान्नादश्च ।

इदं कार्यजातमन्नान्नादात्मकम् । सर्वस्य जगतोऽन्नान्नादात्मकत्वेऽग्नीषोमात्मकत्वमायातमित्याह—

सोम एवान्नमग्निरन्नादः ।

सोमस्य भक्ष्यमाणत्वादन्नत्वम् । अग्नेस्तद्दाहकतयाऽन्नादत्वम् । अतो जगदग्नीषोमात्मकमिति भावः ।

सैषा ब्रह्मणोऽतिसृष्टिः । यच्छ्रेयसो देवानसृजत ।

यद्यस्माच्छ्रेयसः श्रेष्ठानूर्ध्वरेतसः सनन्ता(न्दा)दीन्देवानसृजत सैषा ब्रह्मणोऽतिसृष्टिः । अतिशयिता सृष्टिरतिसृष्टिः ।

कथमतिशयितसृष्टित्वमित्यत आह—

अथ यन्मर्त्यः सन्नमृतानसृजत ।

प्रजापतिः स्वयं मर्त्यः सन्मरणधर्मा सन्नमृतान्मुक्तियोग्याञ्ज्ञानवैराग्यादिसंपन्नान्मुमुक्षून्सनन्ता(न्दा)दीन्देवानसृजत ।

तस्मादतिसृष्टिरतिसृष्ट्याꣳ ह्यस्यै-
तस्यां भवति य एवं वेद ॥ ६ ॥

य एवं वेदैवं प्रकरणज्ञानवानेतस्यामतिसृष्टौ मुख्यो भवतीत्यर्थः ॥६॥

ननु 'आत्मैवेदमग्र आसीत्' [बृ० १।४।१] इत्ययुक्तम् । ब्रह्मणो मर्त्य[त्वे] तत्पुत्राणाममर्त्यत्वं सनन्दनादित्वे लिङ्गे ज्ञायत इत्युक्तं 'यदिदं किंच मिथुनमा पिपीलिकाभ्यस्तत्सर्वमसृजत' [बृ० १।४।४]इति सृष्टतया निर्दिष्टस्य मिथुनादिरूपस्य प्रपञ्चस्येदंशब्दनिर्दिष्टस्याऽऽत्माभेदत्वेनाऽऽत्मैवेदमग्र आसीदिति वक्तुमयुक्तत्वादित्याशङ्क्येदमादिनामरूपभाक्त्वमपि ब्रह्मण एव तस्याऽऽत्मैवेदमग्र आसीदित्यात्मशब्दवाच्यः सूक्ष्मचिदचिद्विशिष्टब्रह्माभेद उपपद्यत इत्येतदर्थो ग्रन्थसंदर्भ आरभ्यते—

तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियत ।

हशब्दो वृत्तार्थस्मरणे । तदिदं मिथुनादिलक्षणं जगत्तर्हि तदा सृष्टेः प्रागव्याकृतमासीत् । अव्यक्तशरीरकं ब्रह्माऽऽसीदित्यर्थः । नामरूपाभ्यां

न व्याकृतमिति व्युत्पत्त्याऽव्याकृतशब्दस्याव्यक्तवचनत्वात् । अव्यक्तत्वं च नामरूपविशिष्टतयाऽनभिव्यक्तत्वम् । अविकृतशब्दस्य तच्छरीरकब्रह्म-परत्वे युक्तिः समनन्तरमेव स्पष्टयिष्यते । तदव्याकृतशरीरकं ब्रह्म । नाम-रूपाभ्यामितीत्थंभावे तृतीया । नामरूपवत्तया व्याकृतमासीत् । विआ-ङ्भ्यामुपसर्गाभ्यां विविच्य समन्तात्कृतमासीदित्यर्थः ।

तदेव दर्शयति—

असौनामाऽयमिदꣳरूप इति ।

देवमनुष्यादिनामकरचरणादिरूपवानित्येवं व्याक्रियतेत्यर्थः । असौ-नामेति च्छान्दसोऽलुक् । अदोनामेति वक्तव्येऽसौ नामेति लिङ्गव्यत्यय-श्छान्दसः । ततश्च नामरूपवत्त्वमव्याकृतशब्दितस्य ब्रह्मणः सिद्धमिति सर्वाणि नामानि तत्प्रवृत्तिनिमित्तभूतानि च रूपाणि तदीयान्येव । अत इदमादिशब्दैरपि तस्यैव निर्देशसंभवादात्मैवेदमग्र आसीदित्यभेदनिर्देशे नानुपपत्तिरिति भावः । नामरूपाभ्यामेवेत्यत्रैवकारो भिन्नक्रमः । तदेव नामरूपाभ्यां स्वयमेव व्याक्रियतेत्यर्थः । व्याक्रियतेत्यत्र कर्मकर्तरि लकारः । कर्त्रन्तराक्षेपे गौरवात् । 'तदात्मानꣳ स्वयमकुरुत' [तै०२।७।१] इत्यनेनैकार्थ्यात् । उक्तं च भगवता भाष्यकृता—तदेवाविभक्तनामरूपं ब्रह्म सर्वज्ञं सत्यसंकल्पं स्वेनैव विभक्तनामरूपं स्वयमेव व्याक्रियतेत्युच्यत इति । नन्वव्याकृतमासीदिति क्तप्रत्ययस्य कर्मार्थकत्वमेव वक्तव्यं न तु कर्मकर्त्रर्थकत्वम् । न च कर्मकर्तर्यपि कर्मवद्भावेन क्तप्रत्ययसिद्धिरस्त्विति वाच्यम् । लान्तस्य यः कर्मणा तुल्यक्रियः कर्ता तस्यैव कर्मवद्भावविधानात्कृत्यक्तखलर्थेषु कर्मवद्भावाभावादवश्यं कर्मण्येव क्तो वक्तव्यः । ततश्च तदैकरूप्याय व्याक्रियतेत्यत्रापि कर्मण्येव लकारोऽस्त्विति चेन्न । एवकारेण कर्त्रन्तरव्यवच्छेदात्कर्त्रन्तराक्षेपे गौरवाच्च व्याक्रियतेतिलका-रस्य कर्मकर्तर्येवाभ्युपगन्तव्यत्वात् ।

नन्वात्मनः कथं देवमनुष्यादिनामरूपवत्त्वम् । देवमनुष्यादिशरीरे तस्यावर्तमानत्वादितीमां शङ्कां व्यावर्तयति—

स एष इह प्रविष्टः । आ नखाग्रेभ्यः ।

अन्तर्यामिरूपेणेति शेषः ।

तत्र दृष्टान्तमाह—

यथा क्षुरः क्षुरधानेऽवहितः स्याद्विश्वंभरो वा विश्वंभरकुलाये ।

क्षुरो धीयतेऽस्मिन्निति क्षुरधानं क्षुरधानं क्षुरकोशस्तस्मिन्यथा क्षुरोऽवहितः प्रविष्टो विश्वं बिभर्ति वैश्वानराग्न्यादिरूपेणेति विश्वंभरोऽग्निस्तस्य कुलाये नीडे दारुणीति यावत् ।

तं न पश्यति अकृत्स्नो हि सः ।

यस्तिलतैलवत्सर्वस्वरूपव्याप्तं परमात्मानं न पश्यति सोऽकृत्स्नोऽपूर्णस्वरूपोऽसत्कल्प इति यावत् ।

परमात्मन एव सर्वनामरूपवत्त्वमुपपादयति—

प्राणन्नेव प्राणो नाम भवति । वदन्वाक्पश्यश्चक्षुः शृण्वञ्श्रोत्रं मन्वानो मनस्तान्यस्यैतानि कर्मनामान्येव ।

प्राणनक्रियां कुर्वन्प्राणनामा भवति वदनक्रियां कुर्वन्वाङ्नामा भवति । वक्तीति वाक् । दर्शनक्रियां कुर्वंश्चक्षुर्नामा भवति । चष्ट इति हि चक्षुः । शृण्वन्सञ्श्रोत्रम् । शृणोतीति श्रोत्रम् । मनुत इति मनः । तान्येतानि प्राणादीनि नामानि पाचकलावकादिवत्कर्मनामान्येवास्यान्तःप्रविष्टस्य नारायणस्यैव । अतः सर्वनामरूपाश्रयत्वं परमात्मनोऽस्तीति भावः । इदं च वाक्यं ‘ कारणत्वेन चाऽऽकाशादिषु ’ इत्यधिकरणे समन्वयाध्याये चिन्तितम् । तथा ‘ सदेव सोम्येदमग्र आसीत् । ’ [छा० ६ । २ । १] इति क्वचित्सत्पूर्विका सृष्टिराम्नायते । ‘असद्वा इदमग्र आसीत्’ [तै०२।७।१] इति क्वचिदसत्पूर्विका । अतो वेदान्तेषु स्रष्टुरव्यस्थितेर्जगतो ब्रह्मैककारणत्वं न निश्चेतुं शक्यम् । ‘तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत’ इत्यव्याकृतकर्तृकसृष्टेराम्नातायाः सांख्यस्मृत्यनुरोधित्वात्प्रधानमेव जगत्कारणम् । ईक्षणादयो गौणा नेतव्या इति पूर्वपक्षे प्राप्ते ‘ कारणत्वेन चाऽऽकाशादिषु यथाव्यपदिष्टोक्तेः ’ [ब्र० सू० १।४।१४] ‘समाकर्षात्’ [ब्र०सू०१।४।१५]इति सूत्राभ्यां सिद्धान्तितम् । ‘जन्माद्यस्य यतः ’ इत्यादिसूत्रेषु प्रतिपादितं सर्वज्ञं सत्यसंकल्पं ब्रह्म यथाव्यपदिष्टमित्युच्यते तस्यैवाऽऽत्मन आकाशः संभूतः [तै० २ । १] इत्यादिवाक्येष्वानाशादि(त्मन आ)काशादिकारणत्वेनोक्तेः । ‘समाकर्षात् ’ । ‘ असद्वा इदमग्र आसीत् ’ इत्यत्र ‘ सोऽकामयत’ [बृ० १ । २ । ७]

इति प्रकृतस्य ब्रह्मण एव 'तदप्येष श्लोको भवति' [तै० २ । १] इति समाकृष्य 'सद्वा इदमग्र आसीत्' इत्यभिधानादसच्छब्दः सूक्ष्मचिदचिद्विशिष्टपरः । तद्धेदं तर्ह्यव्याकृतमासीदित्यत्रापि अव्याकृतस्य 'स एष इह प्रविष्ट आनखाग्रेभ्यः। पश्यंश्चक्षुः' इत्यादिनोत्तरत्र समाकृष्यमाणत्वात्पश्यत्वादीनामचेतनेऽभावादव्याकृतशब्दोऽप्यव्याकृतशब्दिताव्यक्तशरीरकपरमात्मपर एवेत्यर्थ इति निर्णीतम् । तथा सांख्यस्मृतिश्च नानुरोद्धव्येति स्मृतिपादे 'स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात्' । [ब्र० सू० २ । १ । १] इत्यधिकरणे स्थितम् । 'तत्र हि सदेव सोम्येदमग्र आसीत् ।' 'असद्वा इदमग्र आसीत् ।' [तै० २ । ७ । १] 'तद्धेदं तर्ह्यव्याकृतमासीत्' इत्येवंरूपश्रुतीनां परस्परविरुद्धार्थतया प्रतीयमानानां स्वतोऽर्थनिर्णयासमर्थानां तत्त्वप्रतिपादकसर्वज्ञकपिलस्मृत्यनुसारेणैवार्थो निर्णेतव्यः । इतरथा सांख्यस्मृतेर्मन्वादिस्मृतिवत्कर्मस्वरूपेऽप्यवकाशाभावेनानवकाशत्वदोषः प्रसज्येतेति पूर्वपक्षं कृत्वा 'यद्वै किं च मनुरवदत्तद्भेषजम्' इतिश्रुतिप्रतिपादितप्रामाण्यानां श्रुत्यविरुद्धानां भूयसीनां मन्वादिस्मृतीनां प्रधानकारणवादेऽनवकाशप्रसङ्गेन श्रुतिविरुद्धाया असादृश्या एकस्याः सांख्यस्मृतेरेवानादरणीयत्वमुचितम् । मन्वादिस्मृतयो हि ऐककण्ठ्येन सर्वसंज्ञं परमात्मानमभिदधति । यथाऽऽह मनुः—आसीदिदं तमोभूतमित्यारभ्य—

> ततः स्वयंभूर्भगवानव्यक्तो व्यञ्जयन्निदम् ।
> महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः ॥
> सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः ।
> अप एव ससर्जाऽऽदौ तासु वीर्यमवासृजत् ॥ इति ।

भगवद्गीतासु च—

> अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ।
> अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ॥ इति ।

महाभारते च—

> कुतः सृष्टमिदं सर्वं जगत्स्थावरजङ्गमम् ।
> प्रलये च कमप्येति तन्मे ब्रूहि पितामह ॥

इति पृष्ट आह—नारायणो जगन्मूर्तिरनन्तात्मा सनातन इति । तथा तस्माद्व्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम । इति । अव्यक्तं पुरुषे ब्रह्मन्निष्क्रिये संप्रलीयत इति च । आह भगवन्पराशरः—विष्णोः सकाशादुद्भूतं जगत्तत्रैव च स्थितम् । स्थितिसंयमकर्ताऽसौ जगतोऽस्य जगच्च स इति । आह चाऽऽपस्तम्बः—पूः प्राणिनः सर्व एव गुहाशयस्य विहन्यमानस्य विकल्मषस्येत्यारभ्य 'तस्मात्कायाः प्रभवन्ति सर्वे समूलं शाश्वतकः स नित्ये' इति । न च मन्वादिस्मृतीनां कर्मस्वरूपे सावकाशत्वं कर्माराध्यपरमात्मस्वरूपेऽपि तात्पर्यात् । ननु कपिलेन मन्वाद्यभिमतस्य परमात्मनोऽनुपलब्धेस्तस्याप्रामाणिकत्वमिति चेत्तत्राऽऽह—'इतरेषां चानुपलब्धेः' [ब्र० सू० २ । १ । २] इतरेषां मन्वादीनां वैदिकानां बहूनां सांख्योक्तप्रकारेण तत्त्वानुपलब्धेः सांख्यस्मृतिर्नानुरोद्धव्येति सिद्धान्तः कृतः । तथा सांख्याभिमतस्य प्रधानस्य जगत्स्रष्टृत्वं न युक्तिसहमिति तर्कपादे रचनानुपपत्तेरित्यधिकरणे स्थितम् । तथा हि—'रचनानुपपत्तेश्च नानुमानम्'। [ब्र०सू०२।२।१] 'प्रवृत्तेश्च' [ब्र०सू०।२।२।२] सत्त्वरजस्तमोमयसुखदुःखमोहात्मकं जगत्स्वरूपोपादानकं कार्यत्वादित्यनुमानसिद्धं सांख्याभिमतं प्रधानं जगत्कारणम् । अनुमीयत इति व्युत्पत्त्याऽनुमानशब्द आनुमानिकप्रधानपरः । तादृशस्य प्रधानस्य तत्स्वभावाभिज्ञचेतनानधिष्ठितत्वेन विचित्रप्रपञ्चरचनासामर्थ्यानुपपत्तेस्तादृशचेतनाधिष्ठितस्यैव दार्वादेरचेतनस्य कार्यप्रवृत्तेर्दर्शनाच्च न प्रधानं जगत्कारणमित्यर्थः । 'पयोम्बुवच्चेत्तत्रापि ।' [ब्र० सू० २ । २ । ३] ननु पयसश्चेतनानधिष्ठितस्यापि दधिभावेन परिणामवद्वारिदमुक्तजलस्य नालिकेररसाद्यात्मना परिणामवच्चेतनानधिष्ठितस्यापि प्रधानस्य परिणामः किं न स्यादिति चेन्न । तत्रापि प्राज्ञाधिष्ठानमस्त्येव तस्यापि पक्षत्वादित्यर्थः । 'व्यतिरेकानवस्थितेश्चानपेक्षत्वात् । [ब्र० सू० २ । २ । ४] । सृज्यमानप्राणिकर्मपरिपाकाद्यभिज्ञपुरुषाधिष्ठानानपेक्षप्रधानस्य जगत्स्रष्टृत्वे सर्व एव सर्वदा स्यात्तद्व्यतिरेकस्य प्रतिसर्गस्यावस्थितिः सत्ता कदाचिदपि न स्यादित्यर्थः । 'अन्यत्राभावाच्च न तृणादिवत्' [ब्र० सू० २ । २ । ५] धेन्वाद्युपयुक्ततृणादेः प्राज्ञानधिष्ठितस्यापि क्षीराकारेण परिणामदर्शनादित्युदाहरणान्तरावलम्बनेन शङ्का । धेन्वाद्युपयुक्ततृणवदस्मदाद्युपयुक्ततृणादेः क्षीरभावेन परिणामाभावात्तत्रापि प्राज्ञाधिष्ठानमपेक्षितमिति परिहाराभिप्रायः । 'पुरुषा-

श्मवदिति चेत्तथाऽपि ' [ब्र० सू० २ । २ । ७] दृक्छक्तियुक्तपुरुष-संनिधानाद्दृङ्शक्तिशून्योऽप्यन्धो यथा प्रवर्तते यथाऽयस्कान्ताश्मसंनि-धानादयसोऽचेतनस्य प्रवृत्तिरेवं चिन्मात्रात्मकपुरुषसंनिधानादचेतनं प्रधानं जगत्सर्गे प्रवर्तत इति चेन्न । तथाऽपि प्रधानस्य स्रष्टृत्वं नोपप-द्यते । पुरुषस्य चिन्मात्रवपुपस्तदनुगुणोपदेशादिव्यापाराभावात्संनि-धानमात्रस्य प्रयोजकत्वे नित्यसर्गप्रसङ्गात् । ' अङ्गित्वानुपपत्तेश्च ' [ब्र० सू० २ । २ । ८] प्रलये साम्यावस्थानां सत्त्वरजस्तमसामुत्कर्षा-पकर्षलक्षणाङ्गाङ्गिभाववशेन जगत्सृष्टिर्वक्तव्या कालविषयेऽङ्गाङ्गिभावे नियामकाभावादित्यर्थः । 'अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात् ' [ब्र० सू० २ । २ । ९] । दूषितप्रकारातिरिक्तप्रकारेण प्रधानानुमानेऽपि ज्ञानित्वशक्त्यभावाज्जगत्स्रष्टृत्वं नोपपद्यते । ' अभ्युपगमेऽप्यर्थाभावात् ' [ब्र० सू० २ । २ । ६] आनुमानिकप्रधानाभ्युपगमेऽपि पुरुषस्य तन्मते चिन्मात्रत्वेन भोगापवर्गयोरभावात्पुरुषभोगार्था प्रधानप्रवृत्तिरिति नोपपद्यते । अतो व्यर्थः प्रधानाद्युपगमः । ' विप्रतिषेधाच्चासम-ञ्जसम् ' । मितिस्थपुरुषो न संसरति न मुच्यत इत्युक्त्वा पुरुषभोगाप-वर्गार्था प्रधानप्रवृत्तिरिति प्रतिपादयत्सांख्यदर्शनं पूर्वोत्तरविरोधाच्चासम-ञ्जसमिति स्थितम् । ततश्च सांख्याभिमतप्रधानस्य तुच्छत्वात् ' तद्धेदं तर्ह्यव्याकृतमासीत् ' इत्यत्र न तत्प्रतिपादकत्वशङ्कावकाशः ।

प्रकृतमनुसरामः—

स योऽत एकैकमुपास्ते न स वेद ।

यस्मान्नामरूपात्मकप्रपञ्चविशिष्टं ब्रह्मातो य एकैकं विशेषणांशं विशेष्यांशं वा पृथक्सिद्धतयोपास्ते न स वेद तदुपासनमेव न भव-तीत्यर्थः ।

कुत इत्यत्राऽऽह—

अकृत्स्नो ह्येषोऽत एकैकेन भवत्यात्मेत्येवोपासीत ।

एष विशिष्टपदार्थः । एकैकेन विशेषणांशेन विशेष्यांशेन वाऽकृत्स्नोऽ-पूर्णो भवति । केवलविशेषणांशेऽपि पूर्णता नास्ति केवलविशेष्यां-शेऽपि पूर्णता नास्ति । अतो नामरूपात्मकचिदचित्प्रपञ्चापृथक्सिद्धवि-शेष्यत्वेनैवोपासीतेत्यर्थः ।

अत्र ह्येते सर्व एकं भवन्ति ।

अत्र हि विशिष्टे सर्वे पदार्था एकं भवन्ति । अन्तर्भवन्तीत्यर्थः । विशिष्टे विशेषणविशेष्ययोरन्तर्भूतत्वादिति भावः । एतदेवाभिप्रेत्य, आत्मेति तूपगच्छन्तीत्यत्र व्यासार्यैरकृत्स्नोऽपूर्णो विशिष्ट एव हि पूर्ण इत्युक्तम् ।

तदेतत्पदनीयमस्य सर्वस्य यदयमात्मा ।

तदेतदात्मस्वरूपमस्य सर्वस्य नामरूपात्मकप्रपञ्चस्य पदनीयं प्रपदनीयं प्रपत्तव्यमित्यर्थः । पदेर्धातोरनीयर्प्रत्ययः । अथवा पदनीयं ज्ञातव्यमिति वाऽर्थः । तत्र हेतुमाह—अस्य सर्वस्य यदयमात्मा । यद्यस्मात्कारणादस्य सर्वस्यायमात्माऽत इत्यर्थः । ‘ तमेवैकं जानथाऽऽत्मानम् ’ इत्यात्मन एव ज्ञातव्यत्वाभिधानादिति भावः ।

अनेन ह्येतत्सर्वं वेद ।

आत्मनाऽभिज्ञातेन सर्वं वेद सर्वज्ञो भवति ।

यथा ह वै पदेनानुविन्देदेवम् ।

हवैशब्दौ प्रसिद्धौ । यथा चोराद्यपहृतं वागा(गवा)दिधनं तत्पदाङ्कितप्रतिपदेन लभत एवं पदनीयत्वेन प्राङ्निर्दिष्टेन सर्वस्य पदभूतेन ब्रह्मणा सर्वमनुविन्दे(?) द्विदेत्यर्थः ।

कीर्तिꣳ श्लोकं विन्दते य एवं वेद ॥ ७ ॥

कीर्तिं ख्यातिसामान्यं श्लोकं पुण्यश्लोकत्वं च लभत इत्यर्थः ॥ ७॥

तदेतत्प्रेयः पुत्रात्प्रेयो मित्रात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा ।

यद्यस्मात्कारणादयं सर्वेषामन्तरोऽभ्यन्तर आप्तो मुख्य इति यावत् । तादृश आत्मा तस्माद्धेतोरेतदेष पुत्रमित्रादिप्रियान्तरापेक्षयाऽतिप्रियतर इत्यर्थः ।

स योऽन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात्प्रियं रोत्स्यतीतीश्वरो ह तथैव स्यात् ।

स य एवंविदात्मनोऽपि आत्मापेक्षयाऽपि अन्यत्प्रियमस्तीति ब्रुवाणं

प्रतीश्वरः प्रियं रोत्स्यति प्रियनिरोधमीश्वरः करिष्यतीति यदि ब्रूयात् । तथैव भवेदित्यर्थः ।

आत्मानमेव प्रियमुपासीत ।

तस्माद्धेतोर्निरतिशयप्रियं परमात्मानमेवोपासीत परमात्मनोऽनुभूयमानस्य निरतिशयानन्दतया प्रियत्वमानन्दवल्ल्यादिसिद्धं द्रष्टव्यम् ।

स य आत्मानमेव प्रियमुपास्ते न
हास्य प्रियं प्रमायुकं भवति ॥८॥

प्रकृष्टं मायुर्मरणमस्य तत्प्रमायुकमविनष्टं भवतीत्यर्थः । शिष्टं स्पष्टम् ॥ ८ ॥

तदाहुः ।

तद्वक्ष्यमाणमाहुः । पप्रच्छुरित्यर्थः ।

यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते ।
किमु तद्ब्रह्मावेद्यस्मात्सर्वमभवदिति ॥ ९ ॥
ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेत् ।
अहं ब्रह्मास्मीति । तस्मात्तत्सर्वमभवत् ।

इदं हि वाक्यं व्यासार्थैर्यद्ब्रह्मविद्यया सर्वं भविष्यन्तः सर्वशब्दवाच्यपरमात्मपर्यन्ताविर्भावकामा मनुष्या मन्यन्ते । किमु तद्ब्रह्मावेद्यस्मात्सर्वमभवदिति । तद्ब्रह्म किं वेद्यं वस्त्वन्तरमवेत् । यस्माद्वेदनात्तत्सर्वमभवत् । ब्रह्मणोऽपि परं तदुपास्यं वास्त्विति न वेति बुभुत्सोत्थापिता । उपास्यान्तरशून्यमित्युत्तरमाह–तदात्मानमेवावेत् । अहं ब्रह्मास्मीति । तस्मात्तत्सर्वमभवदिति । आत्मानमेवावेन्न त्वन्यदुपास्यम् । तस्मात्तत्सर्वमभवदित्यन्यवेदनस्योपायत्वनिषेधे तात्पर्यं न तु स्ववेदनस्योपायत्वविधाने । यथा 'स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः' [श्वे० ६ । ९] इति कारणान्तरनिषेधेन परमकारणत्वसिद्धिः । एवमुपास्यान्तरनिषेधेन ब्रह्मणः परमोपास्यत्वं विवक्षितमिति सर्वव्याख्यानाधिकरणे विवृतम् ।

एवमुपास्यान्तरशून्यं ब्रह्म ज्ञातवतः फलमाह—

तद्यो यो देवानां प्रत्यबुध्यत स एव
तदभवत्तथर्षीणां तथा मनुष्याणाम् ।

देवानां मध्ये यो ब्रह्म प्रत्यबुध्यत स एव तदभवत्सर्वमभवत् । सर्वशब्दवाच्यपरमात्मपर्यन्ताविर्भाववान्भवतीत्यर्थः । सर्वात्मभूतपरमात्मकोऽभवत् । सर्वैणैकात्म्यं प्राप्तवानिति यावत् । ऐकात्म्यस्य नित्यप्राप्तस्य प्राप्तव्यत्वासंभवात्तत्साक्षात्कारः फलमिति फलति ।

तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवꣳ सूर्यश्चेति ।

हशब्दो वृत्तार्थस्मरणे । तदेतद्ब्रह्म पश्यन्नुपासीनो वामदेवर्षिरहं मनुरभवं सूर्यश्चेति मदात्मैव मन्वादीनामात्मेति मन्वादिना सर्वेण स्वस्यैकात्म्यं साक्षात्कृतवान् ।

तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मा-
स्मीति स इदꣳ सर्वं भवति ।

एतर्ह्यपि एतस्मिन्नपि काले तदिदं ब्रह्माहमस्मीति य एवं वेद स इदं सर्वं भवति । ततश्च ब्रह्मात्मकत्वोपासनस्य सर्वैकात्म्यसाक्षात्कारहेतुत्वं पूर्वकाल एव नास्मिन्काल इति न मन्तव्यमिति भावः ।

तस्य ह न देवाश्चनाभूत्या ईशते ।

तस्य ब्रह्मविदो देवाश्चन देवा अपि अभूत्यै मुक्त्यैश्वर्यविघाताय नेशते न समर्थाः कुतोऽन्य इति भावः ।

तत्र हेतुमाह—

आत्मा ह्येषाꣳ स भवति ।

स ब्रह्मविद्यस्माद्देवानामप्यात्मा नियन्ता ब्रह्मविद्याप्रभावेन वशित्वादिसिद्धिमत्तया तानपि नियन्तुं शक्त इत्यर्थः । एवं ब्रह्मात्मत्वविदां कृतार्थतामुक्त्वाऽतादृशानामनर्थं दर्शयति—

अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहम-
स्मीति न स वेद यथा पशुरेवꣳ स देवानाम् ।

यः पुमान्धारकत्वनियन्तृत्वादिना स्वस्मादात्मत्वेनान्यां देवतां परमात्मरूपामसौ देवतारूपो धारकत्वनियन्तृत्वादिनाऽऽत्मभूतादन्योऽहं च

धार्यत्वनियाम्यत्वादिप्रयुक्ततच्छरीरत्वादन्यो भिन्न इत्युपास्ते न स वेदाज्ञ इत्यर्थः । यथा लोके पशुरेवं स देवानां पशुः । तत्किंकरतया शेषभूत इत्यर्थः ।

यथा ह वै बहवः पशवो मनुष्यं
भुञ्ज्युरेवमेवैकैकः पुरुषो देवान्भुनक्ति ।

हवैशब्दौ प्रसिद्ध्यर्थे । यथा बहवः पशव एकं मनुष्यं दोहवाहादिक्रियाभिर्भुञ्ज्युः परिपालयन्ति । एवमेकैको ब्रह्मवित्पुरुषः शुश्रूषयाऽग्नीन्द्रादीन्देवान्भुनक्ति परिपालयति प्रीणयति तत्किंकरो भवतीति यावत् । एतावांस्तु विशेषः—बहवः पशव एकस्य किंकरा अब्रह्मवित्पुरुषस्तु एक एव सर्वदेवानां किंकर इति ।

एकस्मिन्नेव पशावादीयमानेऽप्रियं भवति किमु बहुषु
तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युः ॥ १० ॥

लोके हि पशुस्वामिन आच्छिद्य राजचोरादिभिरेकस्मिन्पशावादीयमानेऽप्रियं भवति किमु बहुषु तस्मादेषां देवानां तत्प्रियं न भवति यदेतन्मनुष्या ब्रह्म विद्युः । अतः स्वकिंकरतया पशुभूता मनुष्या ब्रह्मविद्यां प्राप्य पशुभावान्मुच्येरन्निति बुद्ध्या यथाशक्ति विघ्नमाचरन्तीति भावः । अतः श्रेयांसि बहुविघ्नानीति न्यायेन विघ्नबाहुल्यजटिलेऽपि ब्रह्मज्ञाने विघ्ननिवारणक्षमभगवत्प्रणामार्चनादिकमनुतिष्ठन्नवहितो ब्रह्मविद्यायां यतेतेति भावः ।

'आत्मैवोपासीत' [बृ०१ । ४ । ७] इति वाक्यं भगवता बादरायणेन चतुर्थाध्याये चिन्तितम् । तत्र हि ' पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति ' [श्वे० १ । ६ ।] इति जीवेश्वरपृथक्त्वज्ञानस्यामृतत्वसाधनत्वश्रवणात्स्वात्मानं प्रत्यपृथक्सिद्धविशेष्यत्वलक्षणमात्मत्वं ब्रह्मणो नास्त्येव । अत एवाऽऽत्मेत्येवोपासीतेति करणेन दृष्टिविधित्वं सूच्यते तादृशी च दृष्टिरमोक्षार्थोपासनविषया ततश्च मोक्षार्थोपासने तात्त्विकविषयत्वावश्यंभावेनातस्मिंस्तथारोपदृष्टिविधेरयुक्तत्वात्पृथक्त्वेनैवानुसंधानं कार्यं न त्वपृथक्सिद्धविशेष्यत्वरूपात्मकत्वेनेति पूर्वपक्षे वदति—' आत्मेति तूपगच्छन्ति ग्राहयन्ति च ' [ब्र० सू० ४ । १ । ३] इति । ' त्वं वा अहमस्मि भगवो देवते '

इति पूर्वं उपासितार आत्मत्वेनोपगच्छन्ति उपासत इत्यर्थः । 'य आत्मनि' इत्यादीनि च शास्त्राणि प्रत्यगात्मापेक्षयाऽऽत्मानं ग्राहयन्ति प्रतिपादयन्ति । न च पृथक्त्वानुसंधानस्य विरोधः शङ्क्यः । किंचिज्ज्ञत्वसर्वज्ञत्वादिलक्षणभेदकाकारस्य पारमार्थिकत्वाद्भेदरूपं पृथक्त्वमस्त्येव नियमेनाऽऽधारत्वलक्षणमपृथक्सिद्धविशेष्यत्वरूपमात्मत्वमस्त्येव। नहीदृशमात्मत्वं भेदविरोधि। अतः 'आत्मेत्येवोपासीत' इतिविधिवशादात्मत्वेनैवोपासनं कर्तव्यमिति स्थितम् ।

प्रकृतमनुसरामः । 'स मुखाच्च योनेर्हस्ताभ्यां चाग्निमसृजत' [बृ० १।४।६] इति 'तस्य श्रान्तस्य तप्तस्य तेजोरसो निरवर्तताग्निः' इति च ब्राह्मणवर्णाग्निसृष्टिः प्रागुक्ता । इन्द्रादिरूपक्षत्रादिसृष्टिं वक्तुम् 'आत्मैवेदमग्र आसीत्' इत्यादिनोक्तमेव प्रपञ्चस्य ब्रह्मोपादानत्वं बहुकृत्वोऽपि पाठ्यं पठितव्यमिति नीतिमनुसृत्य शिष्यावधानाय पुनः स्मारयति—

ब्रह्म वा इदमग्र आसीदेकमेव ।

स्पष्टोऽर्थः ।

तदेकꣳ सन्न व्यभवत् ।

न व्यभवद्वैभवं प्राप्तमित्यर्थः । न चाग्निसृष्ट्यनन्तरं ब्रह्मणः कथमेकत्वोक्तिरिति वाच्यम् । तदविवक्षयैकत्वोक्त्युपपत्तेरिति द्रष्टव्यम् ।

तच्छ्रेयो रूपमत्यसृजत क्षत्रम् ।

क्षत्रियाख्यं श्रेयः श्रेष्ठं रूपं शरीरभूतमत्यसृजत ससर्जेत्यर्थः ।

तदेव प्रपञ्चयति—

यान्येतानि देवत्रा क्षत्राणीन्द्रो वरुणः सोमो
रुद्रः पर्जन्यो यमो मृत्युरीशान इति ।

देवत्रा देवेषु । देवमनुष्य० [पा० सू० ५ । ४ । ५६] इत्यादिना सप्तम्यर्थे त्राप्रत्ययः । देवेष्विन्द्रवरुणादीनि यान्येतानि क्षत्राणि तानि ससर्जेत्यर्थः । 'ब्रह्म बृहस्पतिः क्षत्रमिन्द्रो मरुतो वै देवानां विशः' इति श्रुतेरिन्द्रादीनां क्षत्रियत्वं देवेष्वपि तपोविशेषेण वर्णविशेषसंभवात्तदभिमानित्वाद्वा क्षत्रियत्वं द्रष्टव्यम् । उभयमपि व्यासार्यैर्वर्णितम् ।

तस्मात्क्षत्रात्परं नास्ति ।

यस्माद्धेतोरिन्द्रादयो देवश्रेष्ठा अपि क्षत्रियास्तस्मात्क्षत्रियाच्छ्रेष्ठं नास्तीत्यर्थः ।

तस्माद्ब्राह्मणः क्षत्रियमधस्तादुपास्ते राजसूये ।

यस्मात्क्षत्रियः श्रेष्ठस्तस्माद्ब्राह्मणोऽपि राजसूययज्ञे क्षत्रियमधस्तात्, ‘ ततोऽन्यत्रापि दृश्यते ’ इति द्वितीया, उपास्त उपविशतीत्यर्थः ।

क्षत्र एव तद्यशो दधाति ।

राजसूये राज्ञा ब्रह्मन्नित्यामन्त्रित ऋत्विग्राजानमाह—त्वं राजन्ब्रह्माऽसीति श्रवणाद्ब्राह्मणत्वप्रयुक्तं यशो राजसूये क्षत्रिये ब्राह्मणो यस्मात्कारणाद्दधाति तस्मात्क्षत्रिय एव श्रेष्ठ इत्यर्थः ।

सैषा क्षत्रस्य योनिर्यद्ब्रह्म ।

एवंविधस्यापि क्षत्रस्य ब्राह्मण एव योनिरित्यर्थः । राजसूये क्षत्रियगतातिशयस्यापि ब्राह्मणाधीनत्वाद्यजनाध्ययनयोस्तदधीनत्वादिति भावः । योनिशब्दाभिप्रायेण सैषेति स्त्रीलिङ्गनिर्देशः ।

तस्माद्यद्यपि राजा परमतां गच्छति

ब्रह्मैवान्तत उपनिश्रयति स्वां योनिम् ।

तस्मादेव हेतोर्यद्यपि राजसूयाभिषेकदशायां परमतां श्रेष्ठतां क्षत्रियो गच्छति कर्मावसाने तु स्वयोनिभूतं ब्राह्मणमेवोपनिश्रयति याजनादिकार्याय ब्राह्मणसमीपमुपेत्य निहीनतयाऽऽश्रयतीत्यर्थः ।

य उ एनꣳ हिनस्ति स्वाꣳ स योनिमृच्छति ।

यः क्षत्रियो ब्राह्मणं हिनस्ति स स्वोत्पत्तिस्थानमेव हिनस्ति मातृहा पितृहा भवतीत्यर्थः ।

स पापीयान्भवति यथा श्रेयाꣳसꣳ हिꣳसित्वा ॥ ११ ॥

यथा श्रेयांसं पित्रादिकं हिंसित्वा पापीयान्भवति, एवं पापीयान्भवतीत्यर्थः ॥ ११ ॥

स नैव व्यभवत्स विशमसृजत ।

स परमात्मा क्षत्रसृष्ट्याऽपि विभुत्वं नाऽऽप । ततो वैश्यमसृजत ।

तदेव दर्शयति—

यान्येतानि देवजातानि गणश आख्यायन्ते वसवो
रुद्रा आदित्या विश्वे देवा मरुत इति ॥ १२ ॥

देवजातानि देवसमूहा गणशो गणरूपेणाऽऽख्यायन्ते । वसुरुद्रादित्यविश्वेदेवमरुतां गणदेवतात्वप्रसिद्धेः ॥ १२ ॥

स नैव व्यभवत्स शौद्रं वर्णमसृजत ।

स्पष्टोऽर्थः ।

पूषणमियं वै पूषेय᳚ हीद᳚ सर्वं पुष्यति यदिदं किंच ॥ १३॥

पृथिव्या एव सर्वकार्यपोषकत्वात्पृथिव्येव पूषेत्यर्थः । यथाऽग्नीन्द्रादीनां ब्राह्मणक्षत्रियाश्रयत्वमेवं पृथिव्या अपि शूद्रत्वाश्रयत्वं तदभिमानित्वं वा द्रष्टव्यम् ॥ १३ ॥

स नैव व्यभवत्तच्छ्रेयोरूपमत्यसृजत धर्मम् ।

एवं चातुर्वर्ण्यसृष्ट्यनन्तरमपि आत्मविभूतिं नाऽऽप्तवान् । तच्छ्रेयोरूपं तस्य श्रेयोरूपत्वेन प्राङ्निर्दिष्टस्य क्षत्रियस्यापि श्रेयोरूपं धर्मं सृष्टवानित्यर्थः ।

तदेतत्क्षत्रस्य क्षत्रं यद्धर्मात्परं नास्ति ।

सर्वनियन्तृतयोग्रो धर्मस्तस्मादधिकं किमपि नास्तीत्यर्थः ।

अथो अबलीयान्बलीया᳚समाश᳚सते धर्मेण यथा राज्ञैवम् ।

अथोशब्दोऽप्यर्थः । अबलीयानपि पुमान्बलीयांसं पुमांसं जेतुमाशंसते धर्मबलेन यथा राजबलमवलम्ब्य दुर्बलो जिगीषति तथेत्यर्थः । लोकेऽस्मिन्दुर्बलस्य दारादिकमपहरन्बलवानपि बाधितो दृष्ट इति भावः।

यो वै स धर्मः सत्यं वै तत् ।

क्षत्रादपि श्रेयोभूतो धर्मः सत्यवदनमेव ।

तत्र युक्तिमाह—

तस्मात्सत्यं वदन्तमाहुर्धर्मं वदतीति
धर्मं वा वदन्तं सत्यं वदतीति ।

स्पष्टोऽर्थः ।

एतद्ध्येवैतदुभयं भवति ॥ १४ ॥

एतध्द्येव सत्यवदनमेतदुभयं सत्यधर्मोभयरूपं भवति। तस्मात्सत्यवदनं सर्वशेषिभूतमिति भावः ॥ १४ ॥

चातुर्वर्ण्यसृष्टिं निगमयति—

तदेतद्ब्रह्म क्षत्रं विट्शूद्रः।

तस्मादेतद्ब्रह्म क्षत्रविट्शूद्रात्मकमिति भावः।

ननु कथं ब्रह्मणश्चातुर्वर्ण्यस्वरूपत्वम्। क्षत्रादिसृष्टिर्ह्युक्तेत्यपेक्षायामाह—

तदग्निनैव देवेषु ब्रह्माभवत्।

अग्निनेतीत्थंभावे तृतीया। 'स मुखाच्च योनेर्हस्ताभ्यां चाग्निमसृजत' [बृ० १।४।६] इति 'तेजोरसो नि[र]वर्तताग्निः' इति स्रष्टृत्वेन प्रागुक्तेनाग्निनैव विशिष्टं सद्ब्रह्माभवद्ब्राह्मणोऽभवत्। अग्निरसं ब्रह्म ब्राह्मणत्वजातिमद्ब्रह्मण्यग्निद्वारा ब्राह्मणत्वमित्यग्निरूपो ब्राह्मणोऽभवदितिपर्यवसितोऽर्थः। इन्द्रादिरूपविशिष्टं ब्रह्म तद्द्वारा क्षत्रियत्वजातिमदभूत्। वसुरुद्रादिविशिष्टं ब्रह्म तद्द्वारा वैश्यत्वजातिमदभूत्। पृथिवीरूपविशिष्टं ब्रह्म तद्द्वारा शूद्रत्वजातिमदभूदिति सिद्धम्।

एवं देवेषु ब्राह्मणत्वादिजातिमत्त्वमग्नीन्द्रादिद्वारकमित्युक्त्वा मनुष्येषु ब्राह्मणत्वादिजातिमत्त्वप्रकारो ब्रह्मणो दर्शयति—

ब्राह्मणो मनुष्येषु क्षत्रियेण क्षत्रियो वैश्येन वैश्यः शूद्रेण शूद्रः।

ब्राह्मणो मनुष्येष्वित्यत्र ब्राह्मणेनेत्यध्याहर्तव्यम्। ब्राह्मणेन ब्राह्मण इति क्षत्रियेण क्षत्रिय इत्युत्तरग्रन्थानुसारात्। ततश्च ब्राह्मणद्वारा ब्राह्मणत्वजातिमदभवत्। क्षत्रियवैश्यादिद्वारा क्षत्रियत्वादिजातिमदभूदित्यर्थः।

प्रसङ्गादग्निब्राह्मणौ प्रशंसति—

तस्मादग्नावेव देवेषु लोकमिच्छन्ते ब्राह्मणे मनुष्येषु।

देवानां मध्ये लोकमग्नावेवेच्छन्ति। अग्नाविति निमित्तसप्तमी। अग्नेर्निमित्तादेवेच्छन्ति। मनुष्याणां मध्ये ब्राह्मणादेव निमित्ताल्लोक-

मिच्छन्तीत्यर्थः । यद्वा देवेष्वग्नावेव हुत्वा मनुष्येषु ब्राह्मण एव दत्त्वा लोकमिच्छन्तीत्यर्थः ।

प्राशस्त्यहेतुमाह—

एताभ्याᳪ हि रूपाभ्यां ब्रह्माभवत् ।

प्रथमत इति शेषः । अग्निब्राह्मणरूपाभ्यां हि परं ब्रह्म प्रथमतो विशिष्टमभवदित्यर्थः ।

एवमात्मस्वरूपमुक्त्वा तद्वेदनस्याऽऽवश्यकतामाह—

अथ यो ह वा अस्माल्लोकात्स्वं लोकम-
दृष्ट्वा प्रैति स एनमविदितो न भुनक्ति
यथा वेदो वाऽननूक्तोऽन्यद्वा कर्माकृतम् ।

अथशब्दो वाक्यान्तरोपक्रमे । हवैशब्दः प्रसिद्धौ । लोक्यते दृश्यत इति लोकः । नित्यसूरिभिः सर्वदा लोक्यमानत्वात् । एवंभूतं स्वात्मानमदृष्ट्वा दर्शनसमानाकारेण ज्ञानेनाविषयीकृत्य यः पुमानस्माल्लोकात्प्रैति तमेनं स परमात्मा स्वभूतोऽपि न भुनक्ति न परिपालयति । कस्य हेतोरित्यत आह—अविदित [इति] अनुपासित इत्यर्थः । उपासनाभावे वस्तुगत्या शेषितयाऽऽत्मभूतोऽपि संसारं न निवर्तयतीत्यर्थः । तत्र दृष्टान्तमाह—वेदो वाऽननूक्तोऽन्यद्वा कर्माकृतम् । वेदस्य सर्वोपकारार्थप्रवृत्ततया सर्वसाधारण्येऽप्यनधीतो न पालयति । यथा ज्योतिष्टोमादिवैदिकं कर्माननुष्ठितं नोपकरोति तथेत्यर्थः ।

यदि ह वा अप्यनेवंविन्महत्पुण्यं कर्म
करोति तद्धास्यान्ततः क्षीयत एव ।

हशब्दः प्रसिद्धौ । अनेवंविदब्रह्मवित् । यदि वाऽपि महदश्वमेधादि पुण्यं कर्म कुर्यात् । तत्कर्मान्ततः सुदूरं गत्वा नश्यत्येव 'यो ह वा एतदक्षरं गार्ग्यविदित्वाऽस्मिँल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति' [बृ० ३ । ८ । १०] इति श्रुतेरिति भावः ।

किं कार्यमित्यत आह—

आत्मानमेव लोकमुपासीत ।

इतरत्परित्यज्याऽऽत्मानमेव लोकमुपासीत लोक्यत इति लोकः ।

एवं सति न पूर्वोक्तो दोष इत्याह—

स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयते ।

कर्मशब्द उपासनपरः । तदङ्गभूतकर्मपरो वा । कर्मणः क्षणिकस्याक्षयित्वं नामाक्षयफलकत्वमिति द्रष्टव्यम् ।

तस्माद्ध्येवाऽऽत्मनो यद्यत्कामयते तत्तत्सृजते ॥ १५ ॥

तस्मादेव ब्रह्मवेदनाद्धेतोः । 'स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्ति' । [छा० ८ । २ । १] 'संकल्पादेव तु तच्छ्रुतेः' [ब्र०सू० ४ । ४ । ८] इति श्रुतिसूत्रोक्तरीत्याऽस्याभिलषितं सर्वं संकल्पमात्रेण सृजतीत्यर्थः ॥ १५ ॥

नन्वात्मानमेव लोकमुपासीतेत्युक्तमयुक्तं लोको नाम प्राणिभोगस्थानविशेषस्तथात्वमात्मनः कथमित्याशङ्क्य कैमुतिकन्यायेन ब्रह्मणो लोकत्वं दर्शयितुं प्रत्यगात्मन एव सर्वभूतलोकत्वमाह—

अथो अयं वा आत्मा सर्वेषां भूतानां लोकः ।

अथो शब्दो वाक्यान्तरोपक्रमे । वैशब्दोऽवधारणे । अयमहमिति प्रत्यक्षसिद्ध आत्मा जीवात्मैव सर्वेषां भूतानां लोक इत्यर्थः ।

तदेवोपपादयति—

स यज्जुहोति यद्यजते तेन देवानां लोकः ।

यागहोमाभ्यां देवानामुपकारकत्वेन लोक इत्यर्थः ।

अथ यदनुब्रूते तेन ऋषीणाम् ।

अनुब्रूते स्वाध्यायमधीत इत्यर्थः ।

अथ यत्पितृभ्यो निमृणाति[1] ।

प्रयच्छतीत्यर्थः । यद्वा निमर्णनमौर्ध्वदेहिकम् । मृण हिंसायामिति हि धातुः ।

---

[1] अग्रत्यपुस्तके —निपृणाति ।

यत्प्रजामिच्छते ।

यत्प्रजामुत्पादयतीति यावत् ।

तेन पितॄणाम् ।

लोक इति शेषः ।

अथ यन्मनुष्यान्वासयते यदेभ्योऽ-
शनं ददाति तेन मनुष्याणाम् ।

वासयते गृहे शयनावकाशप्रदानेनातिथीन्वासयते वसद्भ्यश्चान्नं ददाति ततो मनुष्याणां लोक इत्यर्थः ।

अथ यत्पशुभ्यस्तृणोदकं विन्दति तेन पशूनाम् ।

विन्दति लम्भयतीत्यर्थः । तेन पशूनां लोक इति शेषः ।

यदस्य गृहेषु श्वापदा वयाꣳस्या पिपीलि-
काभ्य उपजीवन्ति तेन तेषां लोकः ।

अत्राऽऽङभिविधौ । श्वापदाः श्वादयः । वयांसि काकादीनि । बलिभाण्डप्रक्षालनादुपजीवन्ति । अतस्तेषां लोक इत्यर्थः ।

एवं स्वात्मनः सर्वलोकभूतलोकत्वपरिज्ञानस्य फलमाह—

यथा ह वै स्वाय लोकायारिष्टमिच्छेदेवꣳ
हैवंविदे सर्वाणि भूतान्यरिष्टमिच्छन्ति ।

हवैशब्दौ प्रसिद्धौ । यथा लोके जनः स्वाय लोकाय स्वभोगस्थानायारिष्टं रिष्टं नाशः । रिष हिंसायामिति हि धातुः । अरिष्टमनाशमिच्छति । एवमात्मनि सर्वभूतलोकत्वविदे सर्वाणि भूतानि क्षेमं वाञ्छन्तीत्यर्थः ।

परमप्रकृतं परमात्मनो लोकत्वमुपसंहरति—

तद्वा एतद्विदितं मीमाꣳसितम् ।

तद्वा एतत्परमात्मनो लोकत्वं विदितं मीमांसितं कैमुतिकन्यायतर्कानुगृहीतं चेत्यर्थः ॥ १६ ॥

आत्मैवेदमग्र आसीदेक एव ।

जायापुत्रादिविभागशून्यतयैकः पुरुषरूप एव स्थित इत्यर्थः ।

सोऽकामयत जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेति ।

मम जायाऽभूत्तदनन्तरं प्रजादिरूपेण जायेय वित्तं च भवतु तेन यज्ञादिकर्म कुर्वीय करवाणीति अकामयत ।

एतावान्वै कामः ।

जायापुत्रवित्तकर्मव्यतिरेकेण संसारिणां कामनाविषयः कोऽपि नास्तीत्यर्थः ।

नेच्छꣳश्चनातो भूयो विन्देत् ।

चनशब्दोऽप्यर्थः । इच्छन्नपि चिन्तयन्नपीतोऽप्यन्यत्काम्यान्तरमस्तीति चिन्तयन्नपि ततो भूयो जायापुत्रवित्तकर्मभ्योऽधिकं त्रैगुण्यनिष्ठो न लभत इत्यर्थः ।

तस्मादप्येतर्ह्येकाकी कामयते जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेति ।

तस्माद्धेतोरेतर्ह्यपि अद्यत्वेऽपि एकाकी पुरुषो जायादिकमेव कामयते।

स यावदप्येतेषामेकैकं न प्राप्नोत्यकृत्स्न एव तावन्मन्यते ।

यावन्तं कालमेष जायादीनां चतुर्णां मध्य एकैकं न प्राप्नोति तावत्कालमकृत्स्न एकांशहीन इत्येवं स्वात्मानं मन्यते ।

यस्तु वैराग्येण वाऽलाभेन वा जायापुत्राद्यन्यतमहीनतयाऽकृत्स्नस्तस्य कृत्स्नतासंपत्तिप्रकारं दर्शयति—

तस्यो कृत्स्नता ।

उशब्दोऽवधारणे । तादृशस्य कृत्स्नतैवमेव भवतीत्यर्थः ।

मन एवास्याऽऽत्मा ।

मनसः प्रधानत्वादिति भावः ।

वाग्जाया ।

स्त्रीत्वसाम्यादिति भावः ।

प्राणः प्रजा ।

पुत्र इत्यर्थः । वाङ्मनसाधीनत्वात्प्राणस्येत्यर्थः ।

देवमानुषभेदेन वित्तं च द्वेधा विभज्य दर्शयति—

चक्षुर्मानसं वित्तं चक्षुषा हि तद्विन्दते
श्रोत्रं दैवꣳ श्रोत्रेण हि तच्छृणोति ।

हिरण्यपश्वादिकमानुषवित्तोपलम्भकत्वाच्चक्षुरेव मानुषं वित्तम् । दैव-शब्दिताद्दृष्टप्रतिपादकश्रुतिस्मृत्युपलम्भकत्वाच्छ्रोत्रं दैवं वित्तमित्यर्थः ।

आत्मैवास्य कर्माऽऽत्मना हि कर्म करोति ।

आत्मशब्दः शरीरपरः ।

स एष पाङ्क्तो यज्ञः ।

आत्मजायापुत्रवित्तकर्मलक्षणपञ्चकनिर्वर्त्यः स एष समुदायः पञ्चा-क्षरा पङ्क्तिः । पाङ्क्तो यज्ञ इति निर्दिष्टपाङ्क्तयज्ञात्मा पञ्चत्वसंख्या-सामान्यात् ।

तथा

पाङ्क्तः पशुः ।

पशोरपि पाञ्चभौतिकत्वात्पाङ्क्तत्वमतो मनआदिसमुदायोऽपि पञ्चक-त्वसंख्याश्रयत्वात्पाङ्क्तः पशुरित्यर्थः ।

पाङ्क्तः पुरुषः ।

पुरुषस्यापि पाञ्चभौतिकत्वेन पाङ्क्तत्वमिति भावः ।

पाङ्क्तमिदꣳ सर्वं यदिदं किंच ।

सर्वस्यापि पाञ्चभौतिकत्वात्पाङ्क्तत्वम् । अतो मनआदिसमुदायस्यापि पञ्चत्वसंख्याश्रयत्वेन पाङ्क्तत्वात्पाङ्क्तत्वयज्ञत्वपुरुषत्वपशुत्वादिदृष्टिस्तत्र कर्तव्येति भावः ।

तदिदꣳ सर्वमाप्नोति य एवं वेद ॥ १७ ॥

इति बृहदारण्यकोपनिषदि प्रथमाध्याये
चतुर्थं ब्राह्मणम् ॥ ४ ॥

मनोवाक्प्राणचक्षुःश्रोत्रशरीरलक्षणसमुदायमात्मजायापुत्रवित्तकर्मरूपेण पाङ्क्तयज्ञत्वपशुत्वादिरूपेण च य उपास्ते स इदं सर्वं पाङ्क्तशब्दितं प्राप्नोतीत्यर्थः ॥ १७ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां प्रथमाध्यायस्य
चतुर्थं ब्राह्मणम् ॥ ४ ॥

यत्सप्तान्नानि मेधया तपसाऽजनयत्पिता ।
एकमस्य साधारणं द्वे देवानभाजयत् ।
त्रीण्यात्मनेऽकुरुत पशुभ्य एकं प्रायच्छत् ।
तस्मिन्सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न ।
कस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्वदा ।
यो वैतामक्षितिं वेद सोऽन्नमत्ति प्रतीकेन ।
स देवानपि गच्छति स ऊर्जमुपजीवतीति श्लोकाः॥ १ ॥

श्रुतिः स्वयमेव व्याकरोति—

यत्सप्तान्नानि मेधया तपसाऽजनयत्पि-
तेति मेधया हि तपसाऽजनयत्पिता ।

पितेतीतिकरणान्तं व्याख्येयग्रहणम् । मेधया हि तपसाऽजनयत्पितेत्यंशस्तस्य व्याख्यानम् ।

तपसा चीयते ब्रह्म यस्य ज्ञानमयं तपः ।
तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते ॥ इति ।

ज्ञानमयेन तपसा नामरूपलक्षणान्नजनकस्य परमात्मनोऽन्नजनकत्वं प्रसिद्धं खल्वतः किमत्र व्याख्यातव्यमिति भावः ।

एकमस्य साधारणमिति ।

प्रतीकग्रहणम् । तद्व्याचष्टे—

इदमेवास्य तत्साधारणमन्नं यदिदमद्यते । स य एतदुपास्ते न स पाप्मनो व्यावर्तते मिश्रꣳ ह्येतत् ।

यदिदं व्रीहियवादिरूपमद्यते तद्देवपित्रादिसाधारणमन्नम् । ईदृशं साधारणमन्नं देवपित्रादिभ्योऽदत्त्वा यो भुङ्क्ते स पाप्मनो न विमुच्यते । यस्माद्धेतोरेतदन्नं मिश्रमन्यदीयद्रव्येण मिश्रितं साधारणमिति यावत् । गीतं च भगवता—

तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः । [गी० ३।१२]
यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।
ते त्वघं भुञ्जते पापा ये पचन्त्यात्मकारणात् ॥ [गी०३।१३]

इति । तथा श्रुतिः—'केवलाघो भवति केवलादी'। तस्माद्देवपित्रादिभ्यो निवेदितं मनुष्येण भोक्तव्यमित्यर्थः । एवं च प्रसिद्धमन्नं मनुष्येषु विनियुज्यत इत्यर्थः ।

द्वे देवानभाजयदिति ।

व्याख्येयम् । तद्व्याचष्टे—

हुतं च प्रहुतं च तस्माद्देवेभ्यो जुह्वति च प्रजुह्वति ।

द्वे अन्ने सृष्ट्वा देवानसाधारण्येनाभाजयदप्रीणयदिति । यन्मन्त्रोक्तमन्नं तद्धुतं च प्रहुतं चेति व्याचक्षते—हुतमौपासनं प्रहुतमग्निहोत्रादि । यस्माद्धुतप्रहुते देवेभ्यो दत्ते तस्माद्देवेभ्यो देवानुद्दिश्यैव जुह्वति च प्रजुह्वति च ।

तस्यैव मन्त्रांशस्य व्याख्यान्तरमाह—

अथो आहुर्दर्शपूर्णमासाविति । तस्मान्नेष्टियाजुकः स्यात् ।

दर्शपूर्णमासावेव हुतप्रहुताख्ये देवान्ने इत्याहुः । यस्माद्दर्शपूर्णमासयोर्देवान्नत्वं तस्मात्तदतिरिक्तकाम्येष्टियजनशीलो न स्यादित्यर्थः । यद्वा दर्शपूर्णमासयोर्हुतप्रहुततया देवान्नत्वात्तत्र कियत्यप्यपचारे देवाः कुप्येयुरिति दर्शपूर्णमासयोरार्त्विज्यं न कुर्यादित्यर्थः ।

त्रीण्यात्मनेऽकुरुतेति मन्त्रं वक्तव्यबाहुल्यादन्ते व्याचिकीर्षुस्तदृतिक्रम्य तदुत्तरमन्त्रं व्याचष्टे—

पशुभ्य एकं प्रायच्छदिति तत्पयः । पयो ह्येवाग्रे मनुष्याः पशवश्चोपजीवन्ति तस्मात्कुमारं जातं घृतं वैवाग्रे प्रतिलेहयन्ति स्तनं वा नु धापयन्त्यथ वत्सं जातमाहुरतृणाद इति ।

तत्पयः पशुभ्यो दत्तमन्नं पयोरूपमत एव हि मनुष्याः पशवश्च प्रथमतः पय एवोपजीवन्ति । अत्र मनुष्याश्चोपजीवन्तीत्युक्त्या पशुभ्य एकं प्रायच्छदित्यत्र पशुशब्दो द्विपाच्चतुष्पात्साधारणो द्रष्टव्यः । तस्माज्जातं कुमारं जातकर्मसंस्कारे घृतं वा पयसो विकारं घृतमेवाग्रे प्रथमतः प्रतिलेहयन्ति आस्वादयन्ति । लिहेर्धातोर्णिचि द्विर्वचनं छान्दसम् । स्तनं वा नु धापयन्ति जातकर्माद्यकरणे स्तनं धापयन्ति पाययन्ति । नुशब्दः खल्वर्थे । अथ संजातमाहुरतृणाद इति । अथशब्दो व्याख्योपक्रमे । अतृणाद इति पयोमात्राहार इत्याहुरिति ।

तस्मिन्सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च नेति ।

व्याख्येयग्रहणम् । तद्व्याचष्टे—

पयसि हीदꣳ सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न ।

यत्प्राणिति चेष्टते मनुष्यपश्वादिकं यच्च न चेष्टते वृक्षादिकं तत्सर्वं पयसि प्रतिष्ठितम् । स्थावरप्रतिष्ठाहेतुभूतजलस्यापि पयस्त्वादिति भावः ।

तद्यदिदमाहुः संवत्सरं पयसा जुह्वदप पुनर्मृत्युं जयतीति न तथा विद्यात् ।

संवत्सरं पयोहोमं कुर्वन्नपमृत्युं जयतीति यदाहुस्तत्तथा न विद्यात् ।

कथं ज्ञातव्यमित्यत्राऽऽह—

यदहरेव जुहोति तदहः पुनर्मृत्युमपजयति ।

एकाहमात्रसाध्यपयआहुत्यैवापमृत्युं जयतीत्यर्थः । एतज्ज्ञानस्य फलमाह—

य एवं विद्वान्सर्वꣳ हि देवेभ्योऽन्नाद्यं प्रयच्छति ।

अन्नाद्यमाद्यशब्देन पयआज्यादिकमुच्यते । यद्यदन्नाद्यं स्वयमत्ति तद्दे-वेभ्य एव ददाति । देवेभ्यस्तद्दानेन यत्फलं लभते तल्लभत इति भावः ।

तस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्वदेति ।

व्याख्येयग्रहणम् । अत्र तस्मादितिशब्दार्थं व्याचष्टे—

पुरुषो वा अक्षितिः स हीदमन्नं पुनः पुनर्जनयते ।

वैशब्दोऽवधारणे । अक्षितिरक्षय इत्यर्थः । यस्मादक्षयः पुरुषः प्रत्य-हमन्नादि जनयति तस्माद्धेतोरद्यमानान्यन्नानि न क्षीयन्त इति मन्त्रार्थः ।

यो वैतामक्षितिं वेदेति ।

प्रतीकग्रहणम् । तद्व्याचष्टे—

पुरुषो वा अक्षितिः स हीदमन्नं धिया धिया
जनयते कर्मभिर्यद्धैतन्न कुर्यात्क्षीयेत ह ।

धिया धिया संकल्पेनेत्यर्थः । उत्पाद्यान्नव्यक्त्यभिप्राया धियेति वीप्सा । कर्मभिर्जनयते प्राणिनां कर्मभिः सहितः सन्नन्नं जनयत इत्यर्थः । एतदन्नं यद्ध यदि हि प्रत्यहं न कुर्यादन्नं क्षीयेत प्रत्यहमन्नकरणान्न क्षीयत इति भावः । एतादृशीमक्षितिं यो वेदेति मन्त्रार्थः ।

सोऽन्नमत्ति प्रतीकेनेति मुखं प्रतीकं मुखेनेत्येतत् ।

सोऽन्नमत्ति प्रतीकेनेति मन्त्रे प्रतीकेनेत्यंशं व्याचष्टे—मुखं प्रतीकं मुखेनेत्येतत् । इति उक्तं भवतीत्यर्थः । अनुभवमात्रेऽप्यत्तीति प्रयोगसं-भवात् । मुख्यभोजनप्रतीत्यर्थं मुखेनान्नमत्तीत्युक्तम् । ततश्चान्नाद[न]स्य मुखमात्रसाध्यत्वान्मुखेनेत्यस्य वैयर्थ्यं न चोदनीयम् ।

स देवानपि गच्छति स ऊर्जमुपजीवतीति प्रशꣳसा ॥ २ ॥

ऊर्जमन्नमित्यर्थः । प्रशंसा फलश्रुतिरिति यावत् ॥ २ ॥

त्रीण्यात्मनेऽकुरुतेति ।

व्याख्येयग्रहणम् । तद्व्याचष्टे—

मनो वाचं प्राणं तान्यात्मनेऽकुरुत ।

मनोवाक्प्राणरूपाणि त्रीण्यन्नानि सर्वस्मै जीववर्गायाकुरुत कृतवानित्यर्थः । उक्तं च व्यासार्यैर्ज्योतिरधिकरणे सप्तान्नब्राह्मणदशायां परमात्मनः संकल्पाद्देहिनामुपजीव्यत्वेनान्नशब्दवाच्यानां सप्तानामुत्पत्तिमुक्त्वा तत्र प्रसिद्धान्नदर्शपूर्णमासौ पयश्चेत्यत्र चतुष्टयस्य मानुषदेवतिर्यक्षु विनियोगमुक्त्वा त्रीण्यात्मनेऽकुरुतेत्यवशिष्टान्नत्रयस्य सर्वविधप्रवृत्तिहेतुत्वात्सामान्येन सर्वभोक्तृवर्गशेषमकरोदित्युक्त्वेत्युक्तम् । मनोवाक्प्राणानां सर्वजीवसाधारणोपकारकत्वं क्रमेणाऽऽह—

अन्यत्रमना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषमिति ।

अत्र लोकः प्रत्येतीति शेषः । अन्यत्र मनो यस्य सोऽन्यत्रमनाः । मनसो व्यासङ्गदशायां विषयानुभवाभावोऽनुभूयत इति भावः ।

ततः किमित्यत्राऽऽह—

मनसा ह्येव पश्यति मनसा शृणोति ।

यस्माद्व्यासङ्गदशायां दर्शनश्रवणाभावस्तस्माद्दर्शनश्रवणे मनःकरणके इति भावः ।

अत्यल्पमिदमुच्यते दर्शनश्रवणे मनःकरणके इति । कामादिकमपि मनःकरणकमित्याह—

कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा
धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव ।

कामो विषयाभिलाषः । संकल्पोऽध्यवसायः । विचिकित्सा संदेहः । श्रद्धा कर्मस्वास्तिक्यबुद्धिः । अश्रद्धा तद्विपरीतबुद्धिः । धृतिः प्रीतिः । अधृतिरप्रीतिः । ह्रीर्लज्जा । धीः प्रमाणजन्यज्ञानमात्रम् । भीरागामिदुःखशङ्का । एतत्सर्वं मनःकरणकमित्यर्थः ।

तस्मादपि पृष्ठत उपस्पृष्टो मनसा विजानाति ।

चक्षुरगोचरेऽपि प्रदेशे वृश्चिकादिनोपस्पृष्टो मनसाऽनुमिनोति तस्मादपि हेतोर्मन एव ज्ञानकरणमिति भावः ।

एवं मनस आत्मभोगार्थत्वमुक्त्वा वाचस्तदाह—

यः कश्चन शब्दो वागेव ।

वागिन्द्रियाधीनोच्चारणकर्मेत्यर्थः । ततश्च शब्दाभिवदनमेव वागिन्द्रियसाध्योपकार इति भावः ।

सैषा ह्यन्तमायत्ता ।

सैषा वाक्सर्वस्यान्तमायत्ता । इयत्तां प्राप्ता । इयत्तां प्रकाशयितुं शक्नोतीत्यर्थः ।

एषा हि न ।

एषा वाग्घि स्वयं नान्तमायत्ता । अपरिच्छिन्नेत्यर्थः । वाक्स्वयमन्यापरिच्छेद्या सतीतरेषां तु परिच्छेदिकेत्यर्थः ।

क्रमप्राप्तं प्राणस्याऽऽत्मोपकारकत्वप्रकारमाह—

प्राणोऽपानो व्यान उदानः समा-
नोऽन इत्येतत्सर्वं प्राण एव ।

प्राणनापाननादिव्यापारद्वारोपकारक इति यावत् । सूचितं च 'पञ्चवृत्तिर्मनोवद्व्यपदिश्यते' [ब्र० सू० २ । ४ । १२] इति । इत्थं हि तदधिकरणं मुख्यः प्राणः किं वायुमात्रमुत तदीयस्पन्दनक्रियोत वायुरेव कंचिदवस्थाविशेषमापन्न इति विशये 'यः प्राणः स वायुः' इति श्रुतेर्वायुमात्रं प्राणः । अथवोच्छ्वासनिःश्वासात्मकवायुक्रियायां प्राणशब्दप्रसिद्धेः क्रिया वा स्यादिति पूर्वपक्षे प्राप्ते 'न वायुक्रिये पृथगुपदेशात्' [ब्र० सू० २ । ४ । ९] 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापश्च' इति वाय्वपेक्षया पृथगेव द्रव्योत्पत्तिप्रकरणव्यपदेशान्न वायुमात्रं तत्क्रिया वा प्राणः । तर्हि किमग्निवद्भूतान्तरं नेत्याह—'चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः' [ब्र० सू० २ । ४ । १०] चक्षुरादिवदयं जीवोपकरणविशेषो न तत्त्वान्तरं प्राणसंवादादिषु चक्षुरादिभिः सह प्राणस्य शासनं श्रूयमाणं तत्साम्यमवगमयति । तथा मुख्यप्राण इत्यादिव्यपदेशोऽपि प्राणशब्दितचक्षुरादिसाजात्यमेवावगमयतीत्यर्थः । ननु प्राणस्यापि जीवोपकरणत्वे तद्वदुपकारकक्रिया वक्तव्या तदभावान्नोपकरणमित्यत्राऽऽह—'अकर-

णत्वाच्च न दोषस्तथाहि दर्शयति ' [ब्र० सू० २ । ४ । ११] करण-क्रियारूपकारकक्रियाराहित्याद्यो दोषः स न संभवति । शरीरधारणल-क्षणोपकारक्रियां श्रुतिरेव दर्शयति—'यथाऽहमेवैतत्पञ्चधाऽऽत्मानं विभ-ज्यैतद्बाणमवष्टभ्य विधारयामीति ' [प्र०२ । ३] इति 'प्राणेन रक्षन्नवरं कुलायम् ' [बृ० ४ । ३ । १२] इति च । नन्वेवं नामभेदाच्च कार्यभे-दाच्च प्राणापानादयस्तत्त्वान्तरं स्युर्नेत्युच्यते । 'पञ्चवृत्तिर्मनोवद्व्यप-दिश्यते' [ब्र० सू० ४ । १२] यथा कामः संकल्प इत्यादिवचनान्मन्ये यथा कामादिशब्दैर्व्यपदिश्यत एवं प्राणोऽपानो व्यान उदानः समान इत्येतत्सर्वं प्राण एवेति वचनान्न तत्त्वान्तरं प्राणापानादयः । न च धर्म-भूतज्ञानावस्थाविशेषाः कामादयो मनस्तत्त्वान्तरमेवेति वाच्यम् । कामादिशब्दैः कामादिहेतुत्वावस्थस्य मनस एवाभिधानान्न तत्त्वान्तर-मिति व्यासार्यैरुक्तत्वात् ।

प्रकृतमनुसरामः—

एतन्मयो वा अयमात्मा ।

वैशब्दः प्रसिद्धौ । एतन्मय इत्यस्यार्थमाह—

वाङ्मयो मनोमयः प्राणमयः ॥ ३ ॥

प्राचुर्ये मयट् ॥ ३ ॥

वाङ्मनःप्राणान्सर्वात्मकत्वेन स्तौति—

त्रयो लोका एत एव ।

एतच्छब्दार्थमाह—

वागेवायं लोको मनोऽन्तरिक्ष-
लोकः प्राणोऽसौ लोकः ॥ ४ ॥

पृथिवीलोक इत्यर्थः । असौ लोको द्युलोक इत्यर्थः ॥ ४ ॥

त्रयो वेदा एत एव वागेवर्ग्वेदो
मनो यजुर्वेदः प्राणः सामवेदः॥५॥

देवाः पितरो मनुष्या एत एव वागेव
देवा मनः पितरः प्राणो मनुष्याः ॥ ६ ॥

पिता माता प्रजेत एव मन एव
पिता वाङ्माता प्राणः प्रजा ॥ ७ ॥

पुत्र इत्यर्थः ॥ ७ ॥

विज्ञानं विजिज्ञास्यमविज्ञातमेत एव
यत्किंच विज्ञातं वाचस्तद्रूपम् ।

यद्वाग्व्यवहाराद्विज्ञातं तत्सर्वं वाचो रूपम् ।

तदेव प्रसिद्धं दर्शयति—

वाग्धि विज्ञाता ।

वाचा विज्ञायमानाः सर्वेऽपि वागेव तदधीनप्रकाशत्वात्सैवेत्यर्थः ।

ततश्च किमित्यत्राऽऽह—

वागेवैनं तद्भूत्वाऽवति ॥ ८ ॥

तद्वाचा विज्ञायमानं पदार्थजातमेनं विज्ञातारं यदवति रक्षत्युपकरोतीति यावत् । तद्वागेव भूत्वाऽवति वाचा विज्ञायमानेन पदार्थेन य उपकारः स सर्वोऽपि वागाद्यधीन एव तस्माद्वाच उपकारकत्वं सिद्धमिति भावः । एवमुत्तरत्रापि द्रष्टव्यम् ॥ ८ ॥

यत्किंच विजिज्ञास्यं मनसस्तद्रूपं मनो हि
विजिज्ञास्यं मन एनं तद्भूत्वाऽवति ॥ ९ ॥

विजिज्ञास्यं चिन्तनीयमित्यर्थः । यच्चिन्तितं देवादिकमुपकरोतीत्यर्थः ॥ ९ ॥

यत्किंचाविज्ञातं प्राणस्य तद्रूपं प्राणो ह्यविज्ञातः ।

प्राणस्येन्द्रियागोचरत्वादिति भावः ॥ ९ ॥

प्राण एनं तद्भूत्वाऽवति ॥ १० ॥

पूर्वसुकृतवशादचिन्तितं यदुपकरोति तद्भूत्वा प्राण उपकरोतीत्यर्थः ॥ १० ॥

एवं प्रशस्य त्रयाणामधिष्ठातॄंश्च दर्शयति—

तस्यै वाचः पृथिवी शरीरं ज्योतीरूपमयमग्निः ।

तस्य वागिन्द्रियस्य पृथिवी शरीरमायतनं जिह्वागोलस्थं पार्थिवांशमाश्रित्य वागिन्द्रियं तिष्ठतीत्यर्थः । ज्योतीरूपमयमग्निः । ज्योतिर्मयमधिष्ठातृदेवतास्वरूपमयमग्निरित्यर्थः ।

तद्यावत्येव वाक्तावती पृथिवी तावानयमग्निः ॥ ११ ॥

यत्र यत्र वागिन्द्रियं तत्र तत्र तदधिष्ठानतया पृथिव्यस्ति । अधिष्ठातृतयाऽग्निरप्यस्तीत्यर्थः ॥ ११ ॥

अथैतस्य मनसो द्यौः शरीरम् ।

इह द्युशब्द आकाशमात्रपरः । न तु लोकविशेषपरः । अनुपपत्तेः । न हि स्वर्गलोक एव मनसोऽधिष्ठानमन्येषाममनस्कत्वप्रसङ्गात् । द्युशब्दो हि लोकविशेषे न भूमिमात्रे च वर्तते । सुरलोको द्योदिवौ द्वे । द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरमिति निघण्टूक्तेः । तत्रापि सामर्थ्याद्धृदयाकाशे पर्यवस्यति । हृदयं छिद्ररूपाकाशमायतनमित्यर्थः ।

ज्योतीरूपमसावादित्यस्तावदेव मन-
स्तावती द्यौस्तावानसावादित्यः ।

पूर्ववदर्थः ।

तौ मिथुनꣳ समैताम् ।

तावग्न्यादित्यौ मिथुनं समैतां मिथुनभावमगच्छताम् ।

ततः प्राणोऽजायत ।

तस्यायमभिप्रायः—आदित्याधिष्ठेयमनःपूर्विकाऽग्न्याधिष्ठेयवाक्प्रवृत्तिस्तदुभयपूर्विका पञ्चवृत्तिप्राणाधीना शरीरप्रवृत्तिरिति ।

स इन्द्रः स एषोऽसपत्नः ।

स इन्द्रः परमैश्वर्यशाली । इन्द्रियान्तरापेक्षया प्राणस्येश्वरत्वादिति भावः ।

द्वितीयो वै सपत्नो न हास्य सपत्नो
भवति य एवं वेद ॥ १२ ॥

प्राणस्यासपत्नत्वं चक्षुरादिषु स्वसदृशस्वप्रतिस्पर्धिरहितत्वम् ॥ १२ ॥

अथैतस्य प्राणस्याऽऽपः शरीरम् ।

'प्राणा वा आपः' इति श्रुतेः । पानीयं प्राणिनां प्राणा विश्वमेव च तन्मयमित्यायुर्वेदविदः । अतः प्राणस्याऽऽप एवाऽऽयतनम् ।

ज्योतीरूपमसौ चन्द्रस्तद्यावानेव प्राण-
स्तावत्य आपस्तावानसौ चन्द्रः ।

पूर्ववदर्थः ।

त एते सर्व एव समाः सर्वेऽनन्ताः ।

त एते वाङ्मनःप्राणाः सर्व एव समाः । हस्तिमशकादीनां सर्वेषां समानाः । यथा दीपप्रभा घटगृहप्रासादाधारा समपरिमाणाऽपि तत्त-दाधारवशेन संकोचविकासौ याति तथा प्राणा अपि मशकमातङ्गादि-देहवशेन संकोचविकासौ यान्तीत्यर्थः । सर्वेऽनन्ताः । आनन्त्यं चाऽऽ-कल्पस्थायित्वात् । मनआदिव्यष्टिभेदाच्चेति द्रष्टव्यम् । तस्मात्फला-र्थिनाऽऽनन्त्येनैवोपासनीयम् ।

अनन्तवत्त्वेनैवोपासनेन तत्फलप्राप्तिरित्याह—

स यो हैतानन्तवत उपास्तेऽन्तवन्तꣳ स लोकं जयत्यथ
यो हैताननन्तानुपास्तेऽनन्तꣳ स लोकं जयति॥ १३ ॥

स्पष्टोऽर्थः ।

अत्रानन्तशब्दश्चिरकालस्थायित्वाभिप्रायः । प्राणवादे सर्व एव समाः सर्वेऽनन्ता इत्यानन्त्यश्रवणात्प्राणशब्दितानामिन्द्रियाणां विभुत्वमिति पूर्वपक्षे प्राप्ते, 'अणवश्च' [ब्र० सू० २ । ४ । ७] इति सूत्रेण सिद्धा-न्तितम् । तमुत्क्रामन्तं प्राणोऽनूत्क्रामतीत्यादिनोत्क्रान्त्यादिश्रवणात्परि-मितत्वे सिद्ध उत्क्रान्त्यादौ पार्श्वस्थैरनुपलभ्यमानत्वादणवश्च प्राणा भवन्ति । अनन्तानुपास्त इत्यानन्त्यश्रुतिस्तु दर्शनश्रवणाद्यनन्तकार्यवि-शिष्टतया तदुपासनविधिपरेति स्थितम् ॥ १३ ॥

प्रकृतमनुसरामः—

स एष संवत्सरः प्रजापतिः षोडशकलस्तस्य
रात्रय एव पञ्चदश कला ध्रुवैवास्य षोडशी

कला स रात्रिभिरेव चाऽऽपूर्यते अप च क्षीयते ।

चन्द्रमाः षड्भ्यो मासकृतून्कल्पयतीति प्रकारेण सर्वर्तुप्रवर्तकतया संवत्सरसंज्ञो राज्यधीनोपचयापचयान्वितकलामयः 'सौम्यो वै देवतया पुरुषः' इतिश्रवणात्प्राणाधिदेवताभूतश्चन्द्र उच्यते । अत एव प्रजापतित्वं षोडश्याः कलाया नाशाभावाद्ध्रुवत्वमिति द्रष्टव्यम् ।

सोऽमावास्याꣳ रात्रिमेतया षोडश्या कलया
सर्वमिदं प्राणभृदनुप्रविश्य ततः प्रातर्जायते ।

स चन्द्रमा अमावास्यायां रात्रौ ध्रुवया षोडश्या कलया सर्वं प्राणिजातमनुप्रविश्यापरेद्युः प्रातर्जायते ।

तस्मादेताꣳ रात्रिं प्राणभृतः प्राणं न विच्छिन्द्यादपि
कृकलासस्यैतस्या एव देवताया अपचित्यै ॥ १४ ॥

तस्मादमावास्यायां रात्रौ कृकलासस्यापि प्राणिनः प्राणं न हिंस्यात् । यस्य प्राणिनो हिंसा न निषिद्धा स्वल्पदोषा तादृशस्य पाप्मनोऽपि कृकलासस्य प्राणं न हिंस्यात् । कस्य हेतोरेतस्या एव चन्द्ररूपाया देवतायाः सर्वप्राणिजातप्रविष्टाया अपचित्यै पूजायै । इतरथा चन्द्रदेवतापचारः स्यादिति भावः ॥ १४ ॥

षोडशकलचन्द्रविद्याफलमाह—

यो वै संवत्सरः प्रजापतिः षोडशक-
लोऽयमेव स योऽयमेवंवित्पुरुषः ।

यथा चन्द्रः षोडशकल एवं तद्वेत्ता पुरुषोऽपि षोडशकलो भवतीत्यर्थः ।

पुरुषस्य षोडशकलत्वमेवोपपादयति—

तस्य वित्तमेव पञ्चदश कला आत्मैवास्य षोडशी
कला स वित्तेनैवाऽऽ च पूर्यतेऽप च क्षीयते ।

उपचयापचयशालि गवादिवित्तं पञ्चदशकलास्थानीयं शरीरं तु ध्रुवकलास्थानीयम् ।

तदेतन्नभ्यं यदयमात्मा प्रधिर्वित्तम् ।

आत्मा शरीरं नभ्यं नाभिमर्हति । नाभि नभं चेति नभादेशः । नाभिस्थानीयमिति यावत् । वित्तं तु प्रधिः परिवारभूतमरनेमिस्थानीयमिति ।

तस्माद्यद्यपि सर्वज्यानिं जीयत आत्मना चेयज्जीवति प्रधिनाऽगादित्येवाऽऽहुः ॥ १५ ॥

सर्वज्यानिम् । ज्या वयोहानौ । सर्वनाशो यथा भवति तथेति यावत् । जीयते । इयनि ग्रहिज्येति संप्रसारणम् । नश्यतीत्यर्थः । तथाऽप्यात्मना शरीरेण चेज्जीवति प्रधिना प्रधिस्थानीयेन वित्तेनागात्संगतवानित्येवाऽऽहुः कान्तारे सर्वहरणेऽपि शरीरमात्रं जीवति चेत्सर्वं वित्तमाप्यते वित्तस्य चन्द्रकलावदपक्षीयविनाशस्वभावत्वात् । विद्यामहिम्ना स्वयमेव पूर्णं भविष्यतीति विद्वांस आहुरित्यर्थः । अत एव व्यासार्यैरेतदर्थवदनदशायां तद्वदनफलं चोक्तमित्युक्तम् । अतोऽयं संदर्भो विद्याफलप्रतिपादनपरो द्रष्टव्यः ॥ १५ ॥

मनोवाक्प्राणानां प्रकारान्तरेणाप्यात्मोपकारकत्वं दर्शयितुं पीठिकामारचयति—

अथ त्रयो वाव लोका मनुष्यलोकः पितृलोको देवलोक इति ।

वावशब्दोऽवधारणे । स्पष्टोऽर्थः ।

सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा ।

न कर्मादिनेत्यर्थः ।

कर्मणा पितृलोको विद्यया देवलोकः ।

केवलकर्मणाऽन्तरिक्षलोकः काम्यविद्याविशेषेण देवलोकप्राप्तिरित्यर्थः ।

देवलोको वै लोकानाꣳ श्रेष्ठस्तस्माद्विद्यां प्रशꣳसन्ति ॥

अत्र देवलोकशब्दस्य भगवल्लोकपरत्वमपि स्वरसमिति द्रष्टव्यम् । यतो विद्याया एव श्रेष्ठलोकसाधनत्वमतो विद्यां स्तुवन्तीत्यर्थः ॥ १६ ॥

मनुष्यलोकस्य पुत्रेण जयप्रकारमाह—

अथातः संप्रत्तिः ।

संप्रत्तिः संप्रदानम् । संप्रत्तिरिति वक्ष्यमाणस्य कर्मणो नामधेयम् । पुत्रे हि स्वात्मव्यापारसंप्रदानं करोत्यनेन प्रकारेण पिता तेन संप्रत्तिसंज्ञमिदं कर्म ।

तत्कस्मिन्काले कर्तव्यमित्यत्राऽऽह—

स यदा प्रैष्यन्मन्यते ।

स पिता यदा यस्मिन्कालेऽरिष्टदर्शनेन मरिष्यामीति मन्यते ।

अथ पुत्रमाह ।

तदा पुत्रमाहूयाऽऽह ।

किमिति—

त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति स पुत्रः
प्रत्याहाहं ब्रह्माहं यज्ञोऽहं लोक इति ।

अस्यार्थं श्रुतिरेव व्याचष्टे—

यद्वै किंचानूक्तं तस्य सर्वस्य ब्रह्मेत्येकता ।

यत्किंचानूक्तमधीतमनधीतं च तस्य सर्वस्यैव ब्रह्मेत्येतस्मिन्पद एकैकत्वम् । योऽध्ययनव्यापारो मे कर्तव्य आसीदेतावन्तं कालं वेदविषयः स इत ऊर्ध्वं त्वं ब्रह्म त्वत्कर्तृकोऽस्त्वित्यर्थः ।

ये वै के च यज्ञास्तेषाꣳ सर्वेषां यज्ञ इत्येकता ये
वै के च लोकास्तेषाꣳ सर्वेषां लोक इत्येकता ।

ये यज्ञा मयाऽनुष्ठिता अननुष्ठिताश्च ते सर्वे त्वदधीना इति त्वं यज्ञ इत्यर्थः । ये च लोका जिता अजिताश्च ते सर्वे त्वया साध्या इति त्वं लोक इत्यस्यार्थः ।

एतावद्वा इदꣳ सर्वमेतन्मा सर्वꣳ सन्नयमितोऽभुनजदिति ।

लोके गृहिणां कर्तव्यं वेदयज्ञलोकात्मकमेवैतत्सर्वमयं पुत्रः स्वयमेव भूत्वेमं भारं स्वात्मनि निधायेतोऽस्माल्लोकान्मा मामभुनक्पालयिष्यतीति लङर्थे लङ् । इति मन्त्रव्याख्या समाप्ता ।

तस्मात्पुत्रमनुशिष्टं लोक्यमाहुः ।

एवं पित्राऽनुशिष्टं लोकसाधनमाहुः । तस्मादेवमनुशासति पितर इति शेषः ।

स यदैवंविदस्माल्लोकात्प्रैत्यथैभिरेव प्राणैः सह पुत्रमाविशति ।

पुत्रो भूत्वा यज्ञादिकमयमेव करोति । पुत्रगतं सर्वं परलोकगतस्य पितुः स्वानुष्ठितसुकृतवदुपकारकं भवतीत्यर्थः ।

स यद्यनेन किंचिदक्ष्णयाऽकृतं भवति तस्मा-
देनꣳ सर्वस्मात्पुत्रो मुञ्चति तस्मात्पुत्रो नाम ।

स पुत्रो यदि कदाचिदनेन पित्रा किंचित्कर्तव्यमक्ष्णया कोणच्छिद्र-तोऽन्तरा न कृतं भवति । तस्मात्कर्तव्यतारूपात्पित्राऽकृताल्लोकप्राप्ति-प्रतिबन्धकरूपात्सर्वस्मात्पुत्रो मुञ्चति मोचयति तत्सर्वं स्वयमनुतिष्ठन्पूर-यित्वा तेन पूरणेन त्रायत इति पुत्रो नाम भवतीत्यर्थः ।

स पुत्रेणैवास्मिँल्लोके प्रतितिष्ठति ।

स पितैवंविधेन पुत्रेण मृतोऽपि सन्नमृतोऽस्मिन्नेव लोके प्रतितिष्ठति एवमसौ पिता पुत्रेण मनुष्यलोकं जयतीति भावः ।

अथैनमेते देवाः प्राणा अमृता आविशन्ति ॥ १७ ॥

एवं पुत्रे निक्षिप्तभारं परलोकगतं पुण्यकर्माणं पुरुषं देवाः प्राणश-ब्दवाच्या मनआदयाविशन्तीत्यर्थः ॥ १७ ॥

तदेव प्रपञ्चयति—

पृथिव्यै चैनमग्नेश्च दैवी वागाविशति ।

पृथिव्याश्चाग्नेश्च दैवी वाक्परलोकगतं पुरुषमाविशति । एतस्यै वाचः पृथिवी शरीरं ज्योतीरूपमसौ चन्द्र इति प्रागुक्तेर्वाचः पृथिव्यायतनत्वा-दग्न्यधिष्ठितत्वाच्च ताभ्यां हेतुभ्यां दैवी वागाविशतीत्यर्थः ।

सा वै दैवी वाग्यया यद्यदेव वदति तत्तद्भवति ॥ १८ ॥

शापानुग्रहादिसमर्था वाग्दैवीत्यर्थः ॥ १८ ॥

दिवश्चैनमादित्याच्च दैवं मन आविशति तद्वै
दैवं मनो येनाऽऽनन्द्येव भवत्यथो न शोचति ।

अमोघसंकल्पमानन्दैककारणं मनो दैवं मन इत्यर्थः ॥ १९ ॥

अद्भ्यश्चैनं चन्द्रमसश्च दैवः प्राण आविशति स वै दैवः
प्राणो यः संचरꣳश्चासंचरꣳश्च न व्यथतेऽथो न रिष्यति ।

अप्रतिहतगमनादिव्यापारहेतुर्हिंसानर्हः प्राणो दैवः प्राण इत्यर्थः । देवताप्रसादादेवास्य मनोवाक्प्राणा एवंविधा भवन्तीत्यर्थः ।

एवं जीवोपकरणानां तेषां परलोके शक्त्यतिशयमुक्त्वैवंविदः फलमाह—

स एवंवित्सर्वेषां भूतानामात्मा भवति यथैषा देवतैवम् ।

यथा वागिन्द्रियादिदेवता सर्वेषां भूतानामात्मा भवति । सर्वभूतात्मत्वं नाम सर्वभूतान्तर्वर्तिज्ञानं तत्प्रेरणसामर्थ्यम् । एवमयमपि विद्वांस्तथा भवतीत्यर्थः ।

स यथैतां देवताꣳ सर्वाणि भूतान्यव-
न्त्येवꣳ हैवंविदꣳ सर्वाणि भूतान्यवन्ति ।

यथा वागादिदेवतां सर्वेऽपि पूजयन्ति एवमेवंविदमपि पूजयन्तीत्यर्थः । नन्वेवंविदः सर्वभूतप्रेरकत्वे तानि तानि भूतानि तत्तत्पापकर्मसु प्रेरयतः पापं प्रसज्येतेत्याशङ्क्याऽऽह—

यदु किंचेमाः प्रजाः शोचन्त्यमैवाऽऽसां तद्भवति ।

शोचन्ति शोचयन्ति । तत्प्रजाशोचयितृत्वकृतं पापमासां प्रजानामेव भवति । अमा सह सद्य इत्यर्थः ।

तत्र हेतुमाह—

पुण्यमेवामुं गच्छति न ह वै
देवान्पापं गच्छति ॥ २० ॥

तत्तत्पापकर्मसु प्रवर्तकानामपीन्द्रियाधिष्ठातृदेवानां तत्तत्पापं न प्राप्नोति तादृशो महिमा तेषामतस्तद्विदोऽपि न प्रेरणकृतपापप्रसक्तिरिति भावः ॥ २० ॥

अत्र वाङ्मनःप्राणानां साधारण्येनोपास्यत्वमुक्तं तत्र प्राणस्य श्रैष्ठ्य-निर्धारणायाऽऽरभते—

अथातो व्रतमीमाꣳसा ।

अथानन्तरं व्रतस्योपासनात्मकव्रतस्य मीमांसा विचारः प्रवर्तत इति शेषः । किंविषयकमुपासनं कर्तव्यमिति विचार्यत इति यावत् ।

प्रजापतिर्हि कर्माणि ससृजे ।

कर्माणि कर्मज्ञानेन्द्रियाणि सृष्टवानित्यर्थः ;

तानि सृष्टान्यन्योन्येनास्पर्धन्त ।

वदिष्याम्येवाहमिति वाग्दध्रे ।

धृञ् धारण इति धातुः । नान्यः कश्चिन्मत्तो वक्तुं समर्थ इत्यभि-मानं दध्रे धृतवती ।

द्रक्ष्याम्यहमिति चक्षुः श्रोष्याम्यहमिति

श्रोत्रमेवमन्यान्यपि कर्माणि यथाकर्म ।

अन्यान्यपीन्द्रियाणि यथास्वविषयमभिमानं धृतवन्तीत्यर्थः ।

तानि मृत्युः श्रमो भूत्वोपयेमे ।

उपयेमे समीपं प्राप्त इत्यर्थः ।

तान्याप्नोत् ।

श्रमरूपो मृत्युस्तानीन्द्रियाणि प्राप्तवान् ।

तान्याप्त्वा मृत्युरवारुन्ध ।

अवरोधं कृतवान्कार्यासमर्थमकरोदित्यर्थः ।

तस्माच्छ्राम्यत्येव वाक्श्राम्यति चक्षुः श्राम्यति श्रोत्रम् ।

श्राम्यति श्रमं प्राप्नोतीत्यर्थः ।

अथेममेव नाऽऽप्नोद्योऽयं मध्यमः प्राणः ।

देहमध्यवर्तिनं प्राणमेव श्रमो नाऽऽप्नोदित्यर्थः ।

तानि ज्ञातुं दध्रिरे ।

तानि श्रान्तानीन्द्रियाणि अस्माकं कः श्रेष्ठ इति ज्ञातुं प्रवृत्ता-नीत्यर्थः ।

अत्रत्यमुद्रितपुस्तके—इ १ इति वर्तते ।

अयं वै नः श्रेष्ठो यः संचरंश्चासंचरंश्च
न व्यथतेऽथो न रिष्यति हन्तास्यैव सर्वे
रूपमसामेति त एतस्यैव सर्वे रूपमभवन् ।

अयं मुख्यः प्राणोऽत्र संचाररूप[:]संचारेऽपि न व्यथते। अथोशब्दोऽप्यर्थः। न रिष्यते न हिंस्यतेऽपि तस्मादस्यैव मुख्यप्राणस्य सर्वे वयं रूपमसाम तदधीनप्रवृत्तयो भवेमेति निश्चित्यैतस्यैव मुख्यप्राणस्येतरे प्राणास्तदधीनप्रवृत्तयोऽभवन्नित्यर्थः। इदं च वाक्यं प्राणपादे 'त इन्द्रियाणीत्यधिकरणे[ब्र० सू० २ । ४ । १७] चिन्तितम् । वागादयः सर्वे मुख्यप्राणश्च प्राणशब्दवाच्यत्वाविशेषादिन्द्रियाणीति पूर्वपक्षे प्राप्ते 'त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्' । [ब्र० सू० २ । ४ । १७] त एव वागादय इन्द्रियाणि न तु श्रेष्ठस्ततोऽन्यत्रैवेन्द्रियाणि दशैकं चेतीन्द्रियत्वव्यपदेशात् । 'भेदश्रुतेः' । 'वैलक्षण्याच्च' [ब्र० सू० २ । ४ । १८ । १९] 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ' इति प्राणापेक्षयेन्द्रियाणां भेदव्यपदेशात् । न च मनसोऽपि भेदव्यपदेशादिन्द्रियभेदः शङ्कनीयः । तस्मादनन्यथासिद्धप्रमाणेनेन्द्रियत्वे सिद्धे गोबलीवर्दन्यायेन पृथग्गणनेति निश्चीयते । मुख्यप्राणस्यानन्यथासिद्धेन्द्रियत्वग्राहकप्रमाणाभावान्न गोबलीवर्दन्यायावतारः। एतस्यैव सर्वे रूपमभवन्निति चक्षुरादीन्द्रियाणां तदधीनप्रवृत्तित्वलक्षणकार्यवैलक्षण्याच्चेन्द्रियेभ्यो भिन्न एव प्राण इति ।

प्रकृतमनुसरामः ।

तस्मादेत एतेनाऽऽख्यायन्ते प्राणा इति ।

यस्मात्कारणाद्वागाद्याः प्राणस्यैव रूपमभवन्नतः प्राणनाम्नैव प्राणा इत्येवोच्यन्ते ।

तेन ह वाव तत्कुलमाचक्षते
यस्मिन्कुले भवति य एवं वेद ।

य एवमाकारेण प्राणं वेद स यस्मिन्कुले भवति तत्कुलं तन्नाम्नैवाऽऽचक्षते । यथा रघुकुलं यदुकुलमिति । कुलश्रेष्ठो भवतीति यावत् ।

य उ हैवंविदा स्पर्धतेऽनुशुष्यत्यनुशुष्य
हैवान्ततो म्रियत इत्यध्यात्मम् ॥२१॥

उशब्दोऽवधारणे । हशब्दः प्रसिद्धौ यः पुमानेवंविधप्राणविदा साकं स्पर्धते स शुष्को भूत्वाऽन्ततो म्रियत इत्यध्यात्मं प्राणोपासनप्रकारः ॥ २१ ॥

अथाधिदैवतम् ।

उपासनप्रकार उच्यत इति शेषः ।

ज्वलिष्याम्येवाहमित्यग्निर्दध्रे ।

अहमेव ज्वलिष्यामि मत्समः कोऽपि नास्तीति धृतवानित्यर्थः ।

तप्स्याम्यहमित्यादित्यो भास्याम्यहमिति चन्द्रमाः ।

स्पष्टोऽर्थः ।

एवमन्या देवता यथादैवतम् ।

श्रोत्राद्यभिमानिनो दिगादिदेवतास्तत्तद्देवतावृत्तिमनतिक्रम्याभिमेनिर इत्यर्थः ।

स यथैषां प्राणानां मध्यमः प्राण
एवमेतासां देवतानां वायुः ।

यथाऽध्यात्ममितरेषां प्राणानां मध्ये हृदयमध्यवर्ती मुख्यप्राणः श्रेष्ठ एवमधिदैवतमितरासां देवतानां मध्ये वायुः श्रेष्ठः ।

तत्र हेतुमाह—

म्लोचन्तीह्यन्या देवता न वायुः ।

इतरा अग्निसूर्याद्या देवता म्लोचन्ति अस्तं गच्छन्ति न वायुः । तस्याहोरात्रमेकरूपत्वात् ।

सैषाऽनस्तमिता देवता यद्वायुः ॥ २२ ॥

सैषाऽनस्तमिता देवता तस्मादधिदैवं वायुरेव श्रेष्ठत्वेन निर्धारितः । स एवोपास्य इति भावः ॥ २२ ॥

अथैष श्लोको भवति ।

प्रकृतविषयेऽयं श्लोको भवतीत्यर्थः ।

यतश्चोदेति सूर्योऽस्तं यत्र च गच्छतीति ।

अमुं श्लोकं स्वयमेव व्याचष्टे—

प्राणाद्वा एष उदेति प्राणेऽस्तमेतीति ।

अत्र प्राणो वायुः । वायुप्रेरणाधीनत्वादादित्याद्युदयानामिति भावः । उत्तरार्धमाह—

तं देवाश्चक्रिरे धर्मँ स एवाद्य स उ श्व इति ।

तं प्राणमेव देवा धर्मं चक्रिरे प्राणोपासनमेव श्रेयःसाधनमिति निश्चितवन्तः । स एव धर्मोऽद्याप्यनुष्ठेय इति ।

यद्वा एतेऽमुर्ह्यध्रियन्त तदेवाप्यद्य कुर्वन्ति ।

वैशब्दोऽवधारणे । यद्यस्मात्कारणादेते देवा वागाद्या देवा मुख्यप्राणममुर्हि अमुष्मिन्काले पूर्वकाल इति यावत् । अध्रियन्तोपास्यत्वेनावधृतवन्तः । तस्मादद्यापि तदेव कुर्वन्ति । मुख्यप्राणोपासनमेवानुतिष्ठन्तीत्यर्थः ।

तस्मादेकमेव व्रतं चरेत् ।

मुख्यप्राणोपासनमेवानुतिष्ठेदित्यर्थः ।

प्राण्याच्चैवापान्याच्च नेन्मा पाप्मा मृत्युराप्नुवदिति ।

उपासनारम्भसमये प्राणनापानने तदङ्गतया कुर्यात् । उच्छब्दोऽवधारणे । पाप्मा मृत्युर्नाऽऽप्नुवत् । शत्रन्तोऽयं शब्दः । नैवाऽऽप्नुयादिति बुद्ध्येत्यर्थः ।

यद्युचरेत्समापिपयिषेत् ।

यदीदं प्रथममुपक्रमेत्समापनं कुर्यान्मध्ये विच्छेदं न कुर्यादित्यर्थः ।

तेनो एतस्यै देवतायै सायुज्यँ सलोकतां जयति ॥ २३ ॥

इति बृहदारण्यकोपनिषदि प्रथमाध्याये
पञ्चमं ब्राह्मणम् ॥ ५ ॥

उशब्दोऽवधारणे । तेनानुष्ठितेन प्राणोपासनेनैतस्याः प्राणदेवतायाः सायुज्यं सालोक्यं च प्राप्नोतीत्यर्थः ॥ २३ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां प्रथमाध्याये
पञ्चमं ब्राह्मणम् ॥ ५ ॥

त्रयं वा इदं नाम रूपं कर्म ।

स्पष्टोऽर्थः ।

तेषां नाम्नां वागित्येतदेषामुक्थम् ।

तेषामेषां नाम्नां वागितिशब्दनिर्दिष्टमेतद्वस्तूक्थमुत्पादनम् ।
तदेव प्रदर्शयति—

अतो हि सर्वाणि नामान्युत्तिष्ठन्ति ।

वागिन्द्रियाधीनत्वात्सर्वेषां नाम्नामभिलापस्य ।

एतदेषाꣳ साम ।

वागित्येतदेषां नाम्नां साम ।
तदुपपादयति—

एतद्धि सर्वैर्नामभिः समम् ।

कार्यानुरूपत्वात्कारणस्य । समत्वमेव सामत्वमिति भावः ।

एतदेषां ब्रह्म ।

वागित्येतदेषां नाम्नां ब्रह्म ।
तदुपपादयति—

एतद्धि सर्वाणि नामानि बिभर्ति ॥ १ ॥

भर्तृत्वमेव बृहत्त्वरूपं ब्रह्मत्वम् । भर्तृत्वाद्वा ब्रह्मत्वमिति भावः । एवमुत्तरत्र द्रष्टव्यम् ।

अथो रूपाणां चक्षुरित्येतदेषामुक्थम् ।

पूर्ववदर्थः ।

अतो हि सर्वाणि रूपाण्युत्तिष्ठन्ति ।

रूपज्ञानस्य चक्षुरुत्थितत्वाद्रूपस्य चक्षुरुत्थितत्वव्यवहारः ।

एतदेषाᳫं सामैतद्धि सर्वै रूपैः समम् ।

सर्वरूपज्ञानजनकत्वाच्चक्षुषः कारणस्य कार्यसमत्वोक्तिः ।

एतदेषां ब्रह्मैतद्धि सर्वाणि रूपाणि बिभर्ति ॥ २ ॥

चक्षुषो रूपभरणं ज्ञानद्वारा द्रष्टव्यम् ॥ २ ॥

अथ कर्मणामात्मेत्येतदेषामुक्थमतो हि सर्वाणि कर्माण्युत्तिष्ठन्त्येतदेषाᳫं सामैतद्धि सर्वैः कर्मभिः सममेतदेषां ब्रह्मैतद्धि सर्वाणि कर्माणि बिभर्ति ।

अत्र कर्मशब्दः पुण्यपापात्मककर्मपरः । आत्मशब्दो जीवपरः । शिष्टं स्पष्टम् ।

तदेतत्त्रयᳫं सदेकमयमात्मा ।

नामरूपकर्मलक्षणमेतत्त्रितयं सदेकमयमात्मा । नामरूपकर्मण्यात्मनाऽगृहीतविवेकानि पामराणामेकमिव भवन्तीत्यर्थः ।

तदेतद्व्रूहयति—

आत्मैकः सन्नेतत्त्रितयम् ।

विवेकिनां त्रयमेतत् । अविवेकिनामेक आत्मेत्यर्थः ।

तदेतदमृतᳫं सत्येनच्छन्नम् ।

तदेतद्व्याचष्टे—

प्राणो वा अमृतं नामरूपे सत्यं ताभ्यामयं प्राणश्छन्नः ॥ ३ ॥

इति बृहदारण्यकोपनिषदि प्रथमाध्याये षष्ठं ब्राह्मणम् ॥ ६ ॥

इति बृहदारण्यकोपनिषदि प्रथमोऽध्यायः ॥ १ ॥

इति बृहदारण्यकक्रमेण तृतीयोऽध्यायः ॥ ३ ॥

अत्र प्राणशब्दो जीवपरः । 'प्राणो वा आशाया भूयान्' [छा० ७ । १५ । १] इत्यादौ प्राणशब्दस्य जीवे प्रयोगात् । सत्यं कर्मफलमित्यर्थः । 'ऋतं पिबन्तौ' [का० ३ । १] इत्यादौ सत्यापरपर्यायऋतशब्दप्रयोगस्य कर्मफले दर्शनात् । कर्मफलं ह्यवश्यंभावितया सत्यं भवति । ततश्च कर्मफलभूताभ्यां नामरूपाभ्यां संपिण्डितोऽयमात्मा व्याधकुलसंवर्धितराजकुमारवत्ताभ्यां प्रच्छन्नो भवति । नामरूपाभ्यां गृहीतविवेको भवतीत्यर्थः । केचित्तु प्राणशब्दः परमात्मपरः । स एष नामरूपविशिष्टो भवति । ततश्च 'तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत' [बृ० १ । ४ । ७] इत्यस्यार्थस्य निगमपरोऽयं संदर्भ इत्यपि वदन्ति ॥ ३ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां प्रथमाध्यायस्य षष्ठं ब्राह्मणम् ॥ ६ ॥

इति बृहदारण्यकव्याख्यायां प्रथमोऽध्यायः ॥ १ ॥

तृतीयाध्याये तद्धेदं तर्ह्यव्याकृतमासीदित्युपक्लृप्तस्य ब्रह्मणो जगत्कारणत्वस्य प्रपञ्चनायायमध्याय आरभ्यते—

दृप्तबालाकिर्हानूचानो गार्ग्य आस ।

दृप्तो गर्विष्ठः । बालाकिः । बलाकस्यापत्यं बालाकिः । दृप्तश्चासौ बालाकिश्चेति स तथोक्तः । हशब्दो वृत्तार्थस्मरणे । अनूचानः । 'एकां शाखामधीत्य श्रोत्रियोऽङ्गाध्याय्यनूचानः' इति श्रुतेः । गार्ग्यः । गोत्रतो गार्ग्यः । आस बभूव ।

स होवाचाजातशत्रुं काश्यं ब्रह्म ते ब्रवाणीति ।

काश्यं काशिराजमजातशत्रुनामानं ब्रह्म ते ब्रवाणीत्युक्तवान्

स होवाचाजातशत्रुः ।

स्पष्टोऽर्थः ।

सहस्रमेतस्यां वाचि दद्मो जनको
जनक इति वै जना धावन्तीति ॥ १ ॥

ब्रह्म ते ब्रवाणीत्येतस्यामेव वाचि निमित्ते गवां सहस्रं प्रयच्छामः। मत्समीपमागत्य ब्रह्म त उपदिशामीतिशब्दप्रयोक्ता कोऽपि न दृष्टः। सर्वेऽपि ब्रह्मविदो जनक एव ब्रह्म शुश्रूषुर्दाता चेति जनकस्य समीपमेव धावन्ति। भवांस्तु मत्समीपमागत्य ब्रह्म ते ब्रवाणीत्युक्तवान्। अनेनैव वाक्येन तोषितोऽहं सहस्रं प्रयच्छामीति भावः॥ १॥

स होवाच गार्ग्यो यएवासावादित्ये
पुरुषस्तमेवाहं ब्रह्मोपास इति ।

आदित्यमण्डलान्तर्वर्तिनं पुरुषमहमुपासेऽतस्त्वमपि तद्ब्रह्मोपास्स्वेति भावः।

स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठाः ।

मा मां प्रति एतस्मिन्नादित्यवर्तिपुरुषविषये मा संवदिष्ठाः संवादं मा कार्षीः। अज्ञातेऽहि विषये संवादः कर्तव्यः। अयं तु ज्ञात एव।

कथमित्यत्राऽऽह—

अतिष्ठाः सर्वेषां भूतानां मूर्धा
राजेति वा अहमेतमुपास इति ।

वैशब्दोऽवधारणे प्रसिद्धौ वा। अतीत्य सर्वानतीत्य तिष्ठतीत्यतिष्ठाः 'आतो मनिन्०' [पा०सू०३।२।७४] इत्यादिना विच्प्रत्ययः। सर्वेषां भूतानां च मूर्धा श्रेष्ठः। दीप्तिगुणोपेतत्वाद्राजा। एतैरतिष्ठात्वसर्वभूत-मूर्धत्वराजत्वविशिष्टमेतमादित्यपुरुषमहमुपासे। अतोऽस्य ज्ञातत्वादस्मि-न्विषये संवादो न कर्तव्यः।

स्वोक्तस्य फलं दर्शयति—

स य एतमेवमुपास्तेऽतिष्ठाः सर्वेषां
भूतानां मूर्धा राजा भवति ॥ २॥

यद्यप्यतिष्ठात्वादिगुणविशिष्टादित्योपासकः स्वयमपि तत्क्रतुन्यायात्त-द्गुणयुक्तो भवतीति भावः॥ २॥

स होवाच गार्ग्यो य एवासौ चन्द्रे पुरुषस्तमेवाहमुपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा बृहन्पाण्डरवासाः सोमो राजेति वा अहमेतमुपास इति ।

बृहन्महान्पाण्डरं शुक्लं किरणरूपं वासो यस्य स पाण्डरवासाः । उक्तं च व्यासार्यैः—पाण्डरैरंशुभिर्जगदाच्छादकत्वात्पाण्डरवासस्त्वमिति । सोमो राजा यज्ञसाधनभूतसोमराजशब्दवाच्यलताविशेषलक्षणौषधीनामीशनयेशेशितव्यसंबन्धकृताभेदेन वाऽहमुपास इत्यर्थः । शिष्टं स्पष्टम् ।

स य एतदेवमुपास्तेऽहरहर्ह सुतः प्रसुतो भवति नास्यान्नं क्षीयते ॥ ३ ॥

सोमलताभिन्नत्वेनोपासनस्य फलमाह—सुतः प्रसुत इति । कर्तरि क्तः । अहरहः सोमं सुतवानित्यर्थः । प्रकृतिविकृतिभेदविवक्षया सुतः प्रसुत इत्युक्तिः । चन्द्रस्यान्नभूतसोमशब्दवाच्यलतात्मकत्वेनोपास्यत्वान्नान्नस्य क्षय इत्यर्थः । केचित्तु चन्द्रस्य स्वत एव देवान्नभूतत्वात्तत्त्वेनोपासनस्यैवान्नक्षयाभावः फलम् । तस्यैव सोमराजशब्दमुख्यार्थत्वेनोपासनस्य याथार्थ्यसंभवे सोमराजशब्दवाच्यलताभेदोपासनाभ्युपगमस्य व्यर्थत्वात् । न चैवं सुतः प्रसुत इति सोमसुत्त्वरूपफलकीर्तनमयुक्तमिति वाच्यम् । चन्द्रस्य सोमराजत्वेनोपासने सोमराजशब्दवाच्यलताविशेषसवनरूपफलकीर्तनविरोधाभावादेकशब्दरूपितत्वरूपप्रत्यासत्तिसत्त्वादिति वदन्ति ॥ ३ ॥

स होवाच गार्ग्यो य एवासौ विद्युति पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठास्तेजस्वीति वा अहमेतमुपास इति स य एतमेवमुपास्ते तेजस्वी भवति तेजस्विनी हास्य प्रजा भवति ॥ ४ ॥

प्रजा पुत्र इत्यर्थः । शिष्टं स्पष्टम् ।

स होवाच गार्ग्यो य एवायमाकाशे पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठाः पूर्णमप्रवर्तीति वा अहमेतमुपास इति स य एतमेवमुपास्ते पूर्यते ह प्रजया पशुभिर्नास्यास्माल्लोकात्प्रजोद्वर्तते ॥ ५ ॥

पूर्णत्वविशिष्टोपासनायाः फलं प्रजापशुपूर्णत्वम् । पूर्णत्वप्रयुक्तनिर्व्यापारलक्षणाप्रवर्तित्वविशेषणविशिष्टोपासनायाः फलं प्रजा संतानाविच्छित्तिः । उद्वर्तनं लोकान्तरगमनम् ॥ ५ ॥

स होवाच गार्ग्यो य एवायं वायौ पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा इन्द्रो वैकुण्ठोऽपराजिता सेनेति वा अहमेतमुपास इति स य एतमेवमुपास्ते जिष्णुर्हापराजिष्णुर्भवत्यन्यतस्त्यजायी ॥ ६ ॥

इन्द्रः परमेश्वरः। 'योऽयं पवत एष देवतानां ग्रहः' इति वायोर्देवलोकत्वप्रसिद्धेः । तत्सामान्याद्वैकुण्ठत्वम् । मरुतां गणत्वप्रसिद्धेरपराजिता सेनेत्युक्तिः । जिष्णुर्जयशीलः । अपराजिष्णुरपराजितः । अन्यतस्त्यजायी । अन्यतो भवा अन्यतस्त्याः शत्रव इति यावत् । ताञ्जेतुं शीलमस्य 'सुप्यजातौ०' इति णिनिः । शिष्टं स्पष्टम् ॥ ६ ॥

स होवाच गार्ग्यो य एवायमग्नौ पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा विषासहिरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते विषासहिर्भवति विषासहिर्हास्य प्रजा भवति ॥ ७ ॥

विषासहिः सोढुमशक्यः शत्रुभिरित्यर्थः । मर्षयितेति भावः । शिष्टं स्पष्टम् ॥ ७ ॥

स होवाच गार्ग्यो य एवायमप्सु पुरुष एतमेवाहं
ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मि-
न्संवदिष्ठाः प्रतिरूप इति वा अहमेतमुपास इति
स य एतमेवमुपास्ते प्रतिरूपꣳ हैवैनमुपगच्छति
नाप्रतिरूपमथो प्रतिरूपोऽस्माज्जायते ॥ ८ ॥

सदृशप्रतिबिम्बोपेतत्वादपां प्रतिरूपत्वविशिष्टोपासनोपपत्तिः । प्रति-रूपं सदृशमेव कलत्रादिकमेनमुपगच्छति प्राप्नोति नाप्रतिरूपम् । प्रति-रूपः सदृश एव पुत्रोऽस्माज्जायते । शिष्टं स्पष्टम् ॥ ८ ॥

स होवाच गार्ग्यो य एवायमादर्शे पुरुष
एतमेवाहं ब्रह्मोपास इति स होवाचाजात-
शत्रुर्मा मैतस्मिन्संवदिष्ठा रोचिष्णुरिति वा
अहमेतमुपास इति य एतमेवमुपास्ते रोचि-
ष्णुर्भवति रोचिष्णुर्हास्य प्रजा भवत्यथो यैः
संनिगच्छति सर्वाꣳस्तानतिरोचते ॥ ९ ॥

रोचिष्णुर्भ्राजमानः । यैः संनिगच्छति संगतो भवति सर्वांस्तानति-क्रम्य प्रकाशते शिष्टं स्पष्टम् ।

स होवाच गार्ग्यो य एवायं यन्तं पश्चाच्छब्दोऽ-
नूदेत्येतमेवाहं ब्रह्मोपास इति स होवाचाजातश-
त्रुर्मा मैतस्मिन्संवदिष्ठा असुरिति वा अहमेतमुपास
इति स य एतमेवमुपास्ते सर्वꣳ हैवास्मिँल्लोक
आयुरेति नैनं पुरा कालात्प्राणो जहाति ॥ १ ॥

यन्तं गच्छन्तमित्यर्थः । पश्चाच्छब्दः प्रतिध्वनिरुदेति मूलशब्दान्तर-मुदेति तस्य प्रतिशब्दस्य प्राणकार्यत्वादसुरित्यहमुपास इत्यर्थः । पुरा कालात्प्राणो जहाति । अपमृत्युर्न प्राप्नोतीत्यर्थः ॥ १० ॥

स होवाच गार्ग्यो य एवायं दिक्षु पुरुष
एतमेवाहं ब्रह्मोपास इति स होवाचाजातश-
त्रुर्मा मैतस्मिन्संवदिष्ठा द्वितीयोऽनपग इति
वा अहमेतमुपास इति स य एतमेवमुपास्ते
द्वितीयवान्भवति नास्माद्गणश्छिद्यते ॥ ११ ॥

दिशां युग्मभूताश्विदैवत्यत्वाद्द्वितीयत्वेनोपासनोपपत्तिः। अनपगत्व-मविच्छिन्नत्वं दिशां परस्परविच्छेदाभावात्। द्वितीयत्वेनोपासनाफलं द्वितीयवानिति सहायवानित्यर्थः। अ[वि]च्छिन्नत्वलक्षणानपगत्वोपास-नाफलं नास्माद्गणश्छिद्यत इति। गणो बन्धुवर्गः। शिष्टं स्पष्टम् ॥ ११ ॥

स होवाच गार्ग्यो य एवायं छायामयः पुरुष
एतमेवाहं ब्रह्मोपास इति स होवाचाजात-
शत्रुर्मा मैतस्मिन्संवदिष्ठा मृत्युरिति वा अहमेत-
मुपास य एतमेवमुपास्ते सर्वꣳ हैवास्मिँल्लोक
आयुरेति नैनं पुरा कालान्मृत्युरागच्छति॥ १२॥

पुरुषच्छायां मृत्युवन्नीलत्वभयंकरत्वान्मृत्युत्वोपासनोपपत्तिः । शिष्टं स्पष्टम् ॥ १२ ॥

स होवाच गार्ग्यो य एवायमात्मनि पुरुष
एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा
मैतस्मिन्संवदिष्ठा आत्मन्वीति वा अहमेत-
मुपास इति स य एतमेवमुपास्त आत्मन्वी
ह भवत्यात्मन्विनी हास्य प्रजा भवति ।

आत्मनि शरीरादा अहमित्यभिमन्यमानो यः पुरुषः सर्वजीवसामान्यं ब्रह्मोपास्त इत्यर्थः। आत्मञ्शब्दात्प्रशंसायां छान्दसो विनिप्रत्ययः। शिष्टं स्पष्टम् ।

स ह तूष्णीमास गार्ग्यः ॥ १३ ॥

ततः परमुत्तरापरिस्फूर्तेस्तूष्णीं बभूव ॥ १३ ॥

स होवाचाजातशत्रुरेतावान्नू३ इति ।

प्रश्ने प्लुतः । एतावदेव किं त्वया ज्ञातमिति प्रश्नः ।

गार्ग्य आह—

एतावद्धीति ।

पुनरजातशत्रुराह—

नैतावता विदितं भवतीति ।

ब्रह्मस्वरूपमिति शेषः ।

एवमजातशत्रुणोक्तो बालाकिर्गताभिमानो नीचादप्युत्तमां विद्याम्, आपत्कल्पो ब्राह्मणस्याब्राह्मणाद्विद्योपयोग इति शास्त्रमनुसृत्य क्षत्रियादप्यजातशत्रोर्विद्यामुपादित्सुर्नानुपसन्नाय ब्रह्मोपदेष्टव्यमिति शास्त्रार्थं जानन्गार्ग्यः स्वयमेवाऽऽह—

उप त्वा यानीति ॥ १४ ॥

त्वा त्वामुपयानि शिष्यः सन्नुपगच्छामीत्यर्थः ॥ १४ ॥

स होवाचाजातशत्रुः प्रतिलोममेवैतय-
द्ब्राह्मणः क्षत्रियमुपेयाद्ब्रह्म मे वक्ष्यतीति ।

प्रतिलोमं विपरीतमेवैतत् । यद्ब्राह्मण उत्तमवर्ण आचार्यत्वेऽधिकृतः क्षत्रियमनाचार्यस्वभावं ब्रह्म मे वक्ष्यतीत्येतदाचारविधायकशास्त्रविरुद्धम् ।

कथं तर्हि विद्याप्राप्तिरिति न वाच्यम् । आचार्यकमस्वीकृत्य मय्येव केवलं विज्ञपयिष्यामीत्याह—

व्येव त्वा ज्ञपयिष्यामि ।

त्वा त्वां केवलमेव विज्ञपयिष्यामि बोधयिष्यामि । ब्रह्मेति शेषः ।

तं पाणावादायोत्तस्थौ ।

एवमुक्त्वा तं हस्ते गृहीत्वा गार्ग्योपदिष्टजीवातिरिक्तब्रह्मज्ञापनायाऽऽसनादुदतिष्ठत् ।

तौ ह पुरुषꣳ सुप्तमाजग्मतुः ।

राजभवने सुप्तं कंचित्पुरुषं प्राप्तवन्तौ ।

तमेतैर्नामभिरामन्त्रयांचक्रे बृह-
त्पाण्डरवासः सोमराजन्निति ।

अत्र 'प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च' [छा०५ । १ । १] इति ज्यैष्ठ्यश्रैष्ठ्यगुणेन प्राणस्य बृहत्त्वाद्बृहन्नित्यामन्त्रणपाण्डरवासस्त्वं च प्राणधर्मः । किं मे वास इति प्राणेन पृष्ट आपो वास इत्यपां प्राणवासस्त्वोक्तेः । तासां चापां यच्छुक्लं तदाप इति शुक्लवर्णाश्रयत्वात्पाण्डरत्वं युक्तम् । सप्तान्नब्राह्मणे—अथैतस्य प्राणस्याऽऽपः शरीरं ज्योतीरूपमसौ चन्द्र इति प्राणस्य चन्द्रसंबन्धप्रतीतेर्लक्षणया सोमेति प्राणस्य संबोधनम् । प्राणो वै सम्राडिति श्रवणाद्राजन्नित्यामन्त्र्यत इति व्यासार्यैरुक्तम् ।

स नोत्तस्थौ तं पाणिनाऽऽपेषं बोधयांचकार ।

एवमामन्त्रितोऽपि स नोदतिष्ठत् । पाणिनाऽऽपेषं बोधयांचकार । हिंसार्थानां च समानकर्मकाणामिति पिषेस्तृतीयायामुपपदे णमुल् । तृतीयाप्रभृतीन्यन्यतरस्यामिति विकल्पात्समासाभावः । पाणिना पिष्ट्वा बोधयांचकार ।

स होत्तस्थौ ॥ १५ ॥

स पश्चादुदतिष्ठत् । एवं प्राणनामभिरामन्त्रणेऽप्यनुत्थानप्रदर्शनं प्राणान्यत्वज्ञापनार्थम् । सुषुप्तिदशायामुपरतव्यापारेभ्यः शरीरेन्द्रियेभ्योऽन्यत्वं सुज्ञानमिति तस्यामपि दशायामनुपरतव्यापारात्प्राणादन्यत्वं ज्ञापनीयमिति प्राणनामभिरामन्त्रणेऽप्यनुत्थानेन पाणिनाऽऽपेषणेनोत्थापनप्रदर्शनेन च जीवस्य प्राणव्यतिरेकः प्रदर्शितो भवति ॥ १५ ॥

एवं देहेन्द्रियमनःप्राणव्यतिरिक्तं जीवं प्रदर्श्य ततोऽप्यन्यं परमात्मानं प्रदर्शयितुमारभते—

स होवाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽभूय एष
विज्ञानमयः पुरुषः क्वैष तदाऽभूत्कुत एतदागादिति ।

यत्र यदा । एष एतत्सुप्तोऽभूदेतत्स्वप्नं सुप्तोऽभूत्स्वप्नं प्राप्तोऽभूत् । एतदित्यनेनैव स्वपिधात्वर्थस्य सिद्धत्वात्सुप्त इत्येतत्प्रत्ययार्थमात्रपरं पाकं पचतीतिवत् । यद्वैतदीदृशं सुप्तं यस्य स एतत्सुप्तः । क्वैष इत्यत्राऽऽह—

य एष विज्ञानमयः पुरुषः । यस्तु प्रबुध्यमान एव सर्वेन्द्रियार्थविज्ञानमयतयोत्तिष्ठति स एष पुरुषः पाणिपेषणोत्थापनात्प्राक्स्वापदशायां क्व स्थितः । एतदेतस्मिन्काले कुत आगात्कुत उद्गत इति ।

तदु ह न मेने गार्ग्यः ॥ १६ ॥

एवमजातशत्रुणोक्तोऽपि गार्ग्यस्तन्न ज्ञातवान् । उशब्दोऽवधारणे । हशब्दो वृत्तार्थस्मरणे ॥ १६ ॥

स होवाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुष एषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते ।

अत्र प्राणानां विज्ञानेन विज्ञानमादाय प्राणशब्देन्द्रियवाच्यजन्यं ज्ञानं मनसा सहाऽऽदायेत्यर्थः । उपरतव्यापारं मनः कृत्वेत्यर्थः । अनेनेन्द्रियव्यापारोपरतिः फलिता तेषां मनःसापेक्षत्वादिति व्यासार्यैर्विवृतम् । य एषोऽन्तर्हृदय आकाश इत्याकाशशब्दः परमात्मपरः । 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते ।' 'आकाशो ह वै नामरूपयोर्निर्वहिता' इत्यत्राऽऽकाशशब्दस्य परमात्मनि प्रसिद्धेः । कौषीतकिनामुपनिषदि समानप्रकरणे—अथास्मिन्प्राण एवैकधा भवति इति प्राणशब्दितस्य सुषुप्त्याधारत्वश्रवणात् । अत एव प्राणः प्राणस्तथानुगमादित्यादौ प्राणशब्दस्य परमात्मपरत्वस्य बोधितत्वादाकाशप्राणशब्दयोः श्रौतनिरुक्तानुसारेण परमात्मपरत्वेनाविरोधसंभवे तत्परित्यागस्यानुचितत्वात् । 'सता सोम्य तदा संपन्नो भवति' इति सुषुप्तौ ब्रह्मसंपत्तेः श्रुत्यन्तरसिद्धत्वाच्चाऽऽकाशशब्दस्य ब्रह्मैवार्थः । तत्र च शयनं नाम तदेकतापत्तिः । एकत्वं च देवत्वमनुष्यत्वलक्षणभेदकाकारास्फुरणम् ।

तानि यदा गृह्णाति ।

स्वस्थानेभ्यो यदाऽयं संहरतीन्द्रियजन्यज्ञानानुकूलयत्नवान्यदा न भवति ।

अथ हैतत्पुरुषः स्वपिति नाम ।

अथानन्तरमेव पुरुषः स्वपितीति नाम भवति । पुरुषः स्वपितीतिशब्दः प्रयुज्यत इति भावः ।

तद्गृहीत एव प्राणो भवति ।

तत्तदेत्यर्थः । अत्र प्राणशब्द इन्द्रियप्रकरणत्वात्घ्राणेन्द्रियपरः । न तु मुख्यप्राणपरः ।

गृहीता वाग्गृहीतं चक्षुर्गृहीतꣳ श्रोत्रं गृहीतं मनः ॥ १७ ॥

स्वस्वस्थानेभ्य इन्द्रियाणि उपरतानि भवन्तीत्यर्थः ॥ १७ ॥
स्वप्नवैलक्षण्यं वक्तुं स्वप्नमुपक्षिपति—

स यत्रैतत्स्वप्न्यया चरति ।

एतदेष इत्यर्थः । स एष यत्र यदा स्वप्न्यया स्वप्नावस्थया स्वप्नावस्थमनसा युक्तः सन्स्वप्नस्थाने संचरतीत्यर्थः ।

ते हास्य लोकास्तदुतेव महाराजो भवति ।

ह प्रसिद्धाः स्वर्गादिलोका भवन्ति तदुतेव । उतशब्दोऽप्यर्थः । महाराज इव भवतीत्यर्थः ।

उतेव महाब्राह्मणः ।

महाब्राह्मणः श्रोत्रियत्वादिगुणयुक्तोऽपि भवतीत्यर्थः ।

उतेवोच्चावचं निगच्छति ।

उत्कृष्टापकृष्टशरीरमपि प्राप्नोति । स्वप्नपदार्थानां तत्तत्काले परमात्मसृष्टतया यथार्थत्वेऽपि लोकद्रव्यानुसारेणेवशब्दः प्रयुक्तः । अत एव सूत्रकृता ‘ वैधर्म्याच्च न स्वप्नादिवत् ’ [ब्र० सू० २।२।२९] इति सूत्रितम् ।

यथा महाराजो जानपदान्गृहीत्वा स्वे जनपदे
यथाकामं परिवर्ततैवमेवैष एतत्प्राणान्गृहीत्वा
स्वे शरीरे यथाकामं परिवर्तते ॥ १८ ॥

यथा महाराजो जनपदप्रभवान्गृहीत्वा स्वीयमूलराजधान्यां यथेष्टं परिवर्तत एवमेवैष एतस्मिन्काले स्वस्वस्थानेभ्य इन्द्रियाण्युपसंहृत्य स्वे शरीरे संचरतीत्यर्थः । न च ‘प्राणेन रक्षन्नवरं कुलायं बहिष्कुलायादमृतं

चरित्वा ' [बृ० ४।३।१२] इति बहिष्कुलायसंचरणस्य श्रुतत्वात्स्वप्नशरीरादिसृष्टेश्च प्रमाणप्रतिपन्नत्वात्स्वे शरीरे यथाकाममित्यनुपपन्नमिति वाच्यम् । स्वप्नदृष्टव्याघ्रमनुष्यदेहान्तरस्यापि स्वीयत्वेन स्वे शरीर इत्यस्याविरोधात् । नन्वेवं स्वे शरीर इति व्यर्थम् । अव्यावर्तकत्वात् । स्वप्ने व्याघ्रमनुष्यादिशरीरेण हिमवदादिदेशगमनस्यानुभूयमानतया पूर्वशरीराद्बहिर्गमने प्राप्ते तद्व्यावर्तकतया हि स्वे शरीरे यथाकामं परिवर्तत इति वाक्यं सफलं स्यादिति चेन्न । स्वे शरीर इत्यस्य स्वीयशरीरे यत्र क्वापि परिवर्तते न तु जाग्रच्छरीर एवेत्येतदर्थपरत्वाद्वाक्यस्य । इतरथा बहिष्कुलायश्रुतिः कुलायाद्बहिरिव चरित्वेति भाक्तया व्याख्येयेति वाच्यम् । तथात्वे जीवस्य स्वशरीर एव स्थिततया जाग्रद्दशायामिव तद्रक्षणस्य सिद्धतया प्राणेन रक्षन्नवरं कुलायमिति प्राणद्वारा रक्षकत्वोक्तिरनुपपन्ना स्यात् । अतो बहिष्कुलायश्रुतिरुपपत्तिरूपतात्पर्यलिङ्गानुगृहीततया प्रबलत्वान्न भाक्तया व्याख्येयेत्येव युक्तमिति द्रष्टव्यम् । इदं च वाक्यं वियत्पादे–'उपादानात् । विहारोपदेशात् ' [ब्र०सू०२।३।३५।३४] इति सूत्रे चिन्तितम् । तत्र हि जीवो न कर्ता तस्यानाधेयातिशयत्वेनाऽऽत्मनि कृतेरसंभवात् । असङ्गो ह्ययं पुरुष इति श्रुत्याऽसङ्गत्वावगमेन कृतिनिमित्तसंयोगाद्यभावाच्च ।

> 'हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् ।
> उभौ तौ न विजानीतो नायं हन्ति न हन्यते॥[गी०२।१९]

इति कर्तृत्वस्य प्रतिषिद्धत्वात् ।

> प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
> अहंकारविमूढात्मा कर्ताऽहमिति मन्यते ॥ [गी० ३।२७]
> नान्यं गुणेभ्यः कर्तारं यदा द्रष्टाऽनुपश्यति ।[गी०१४।१९]

इत्यादिस्मरणाच्चान्तःकरणरूपपरिणता त्रिगुणात्मिका प्रकृतिरेव कर्त्री न जीव इति पूर्वपक्षे प्राप्ते 'कर्ता शास्त्रार्थवत्त्वात् । [ब्र० सू०२।३।३३] आत्मैव कर्ता न प्रकृतिः । ज्योतिष्टोमेन यजेतेत्यादिशास्त्राणामर्थवत्त्वावश्यंभावात् । शास्त्रं हि प्रवर्त्यस्य प्रवर्तकज्ञानोत्पादनद्वारा प्रवृत्तिमुत्पाद्य साफल्यं भजेत । अन्तःकरणादेरचेतनस्य प्रवर्त्यत्वे तस्याचेतनत्वेन प्रवर्तकज्ञानोत्पादनासंभवाच्छास्त्रमफलमेव स्यात् । नचानाधेयातिशयत्वात्कृत्यभावः शङ्कनीयः । सुखदुःखाद्यतिशयस्य प्रत्यक्षसिद्ध-

त्वेनानाधेयातिशयत्वासिद्धेः। न च निमित्तः संयोगाभावः। 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' इति निमित्तसंयोगस्य श्रुत्या प्रतिपादनात्। असङ्गत्वे श्रुतयस्तु जाग्रद्दशायां स्वप्नदृष्टेन जीवस्य संबन्धाभावमात्रपरत्वात्। हन्ता चेन्मन्यते हन्तुमिति श्रुतेर्हननक्रियायां नित्यस्याऽऽत्मनः कर्तृकर्मभावनिषेधपरत्वेन कर्तृत्वसामान्यप्रतिक्षेपकत्वाभावात्। यच्च प्रकृतेः क्रियमाणानीत्यादिना गुणानामेव कर्तृत्वं स्मर्यत इति तत्सांसारिकप्रवृत्तिष्वस्य कर्तृता सत्त्वरजस्तमोगुणसंसर्गकृता न स्वरूपप्रयुक्तेति प्राप्ताप्राप्तविवेकेन गुणानामेव कर्तृत्वमुच्यते। तथा च तत्रैवोच्यते—कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मस्विति। अत एव—

अधिष्ठानात्तथा कर्ता करणं च पृथग्विधम्।
विविधा च पृथक्चेष्टा दैवं चैवात्र पञ्चमम्॥
तत्रैवं सति कर्तारमात्मानं केवलं तु यः।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः॥

इति अधिष्ठानादिसापेक्षे सत्यात्मनः कर्तृत्वे यः केवलमात्मानं कर्तारं पश्यति न स पश्यतीति केवलस्यैवाऽऽत्मनः कर्तृत्वं निषिध्यते। उपादानाद्विहारोपदेशाच्च स यथा महाराज इति प्रकृत्यैवमेवैष एतान्प्राणान्गृहीत्वा स्वे शरीरे यथाकामं परिवर्तत इत्युपादानविहारयोः कर्तृत्वोपदेशात्। 'व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः [ब्र० सू० २। ३। ३६] विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च [तै०२। ५। १] इति लौकिकवैदिकक्रियासु कर्तृत्वव्यपदेशाच्चाऽऽत्मा कर्ता। ननु न विज्ञानशब्देनाऽऽत्मनो व्यपदेशः किंतु बुद्धेरिति चेत्तथा सति बुद्धेः करणत्वाद्विज्ञानेन यज्ञं तनुत इति निर्देशः स्यात्। उपलब्धिवदनियमः। [ब्र०सू०२। ३। ३७] यथाऽऽत्मनो विभुत्वे सार्वत्रिकोपलब्धिः स्यादित्युपलब्धेर्नियमः प्रसज्यत एवमात्मनः कर्तृत्वे प्रकृतेश्च कर्तृत्वे तस्याः सर्वपुरुषसाधारणत्वात्सर्वाणि कर्माणि सर्वेषां भोगाय स्युः। अन्तःकरणादयोऽपि नियामकाभावादनियताः स्युः शक्तिविपर्ययात्। बुद्धेः कर्तृत्वे भोक्तृत्वस्य कर्तृत्वसामानाधिकरण्याद्भोक्तृत्वमपि बुद्धेरेव स्यात्। ततश्च पुरुषोऽस्ति भोक्तृभावादिति सांख्यदर्शनमसंगतमेव स्यात्। 'समाध्यभावाच्च' [ब्र० सू० २। ३। ३९] प्रकृतिविविक्तज्ञानलक्षणसमाधिश्च लुप्येत प्रकृतेस्तादृशज्ञानासंभवात्। आत्मनो निष्क्रियस्य कर्तृत्वासंभवाच्च। नन्वात्मनः कर्तृत्वे स्वाभाविके सति सर्वदा कर्तृत्वं स्यात्त-

त्राऽऽह—'यथा च तक्षोभयथा' [ब्र० सू० २ । ३ । ३९] यथा तक्षा सत्यामिच्छायां वास्यादिसहकारिसंपत्तौ करोति नान्यदा तथाऽपीच्छादिसंपत्तौ करोतीतरथा न करोतीत्युपपद्यते । न च कर्तृत्वस्यानौपाधिकत्वे यावद्द्रव्यभावित्वनियमः । बदरफले श्यामरक्तरूपयोरनौपाधिकयोरपि यावद्द्रव्यभावित्वादर्शनात् । अनेनैव कर्तृत्वसमर्थनेन बुद्धिगतं कर्तृत्वमात्मन्यध्यस्यत इति वदन्तो मृषावादिनः पराकृताः । अन्तःकरणमिति लोकवेदयोः करणत्वेन प्रसिद्धाया बुद्धेः कर्तृत्वासंभवात् । 'शक्तिविपर्ययात्' [ब्र० सू० २।३।३८] इति सूत्रे बुद्धेः करणशक्तिर्हीयेत कर्तृशक्तिश्चाऽऽपद्येत सत्यां च कर्तृशक्तौ कर्तृशक्तियुक्तायास्तस्याः करणमन्यत्कल्पनीयं स्यात् । शक्तोऽपि हि कर्ता लोके करणमुपादाय प्रवर्तत इति । ततश्च नाममात्रे विवादः स्यान्नार्थभेदः कश्चित्करणव्यतिरिक्तस्य कर्तृत्वाभ्युपगमादित्युक्तत्वात् । 'गुहां प्रविष्टौ' [ब्र० सू०१।२।११] इति सूत्रे वस्तुतो नैकस्यापि कर्तृत्वं बुद्धेरचेतनत्वादात्मनो निर्विकारत्वादिति परैरुक्तत्वाच्चान्तःकरणगतं कर्तृत्वमात्मन्यध्यस्यत इत्युक्तिः पूर्वापरविरुद्धेत्यास्तां तावत् ।

प्रकृतमनुसरामः—

अथ यदा सुषुप्तो भवति ।

अथ स्वप्नानन्तरं यदा यस्मिन्काले सुषुप्तो भवति ।

यदा न कस्यचन वेद ।

यदा न किंचिदपि जानाति तदेत्यर्थः ।

हिता नाम नाड्यो द्वासप्ततिः सह-
स्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते
ताभिः प्रत्यवसृप्य पुरीतति शेते ।

आत्मनो हितावहत्वाद्धिता इति प्रसिद्धाः । द्विसहस्राधिकसप्ततिसहस्राणि नाड्यो हृदयात्पुरीतच्छब्दितहृदयान्तर्वर्तिमांसपिण्डमभिमुखीकृत्य प्रस्थिता भवन्ति ताभिर्नाडीभिः प्रत्यवसृप्य करणगणोपसंहारपूर्वकं ताभिर्द्वारभूताभिर्नाडीभिः प्रत्यागत्य पुरीतति स्थाने शेते । अत्र पुरीतति वर्तमाने ब्रह्मणि शेत इत्यर्थः । 'य एषोऽन्तर्हृदय आका-

शस्तस्मिञ्छेते' इति परमात्मनः सुषुप्त्याधारत्वस्य प्रतिपादकपूर्ववाक्यानुसारात्। पर्यङ्कास्तरणयोः शयानपुरुषाधारत्ववत्पुरीतद्ब्रह्मणोरपि समुच्चित्य सुप्तपुरुषाधारत्वस्योभयलिङ्गपादे तदभावो नाडीष्वित्यत्र समर्थित्वात्। तथा हि—'तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानाति आसु तदा नाडीषु सुप्तो भवति' [छा० ८। ६। ३] 'ताभिः प्रत्यवसृप्य पुरीतति शेते'। 'य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते' इति नाडीपुरीतद्ब्रह्मणां सुषुप्तिस्थानत्वश्रवणात्समुच्चये सप्तम्यवगतनिरपेक्षाधारत्वप्रतीतिभङ्गप्रसङ्गाद्युगपदेकस्थानत्रयसंभवाच्च विकल्प इति पूर्वपक्षे 'तदभावो नाडीषु तच्छ्रुतेरात्मनि च' [ब्र०सू०३।२।७] तदभावः पूर्वनिर्दिष्टस्वप्नाभावः। सुषुप्तिरिति यावत्। नाडीष्वात्मनि परमात्मनि चकारात्पुरीतति चेत्यर्थः। नाडीमार्गेण गत्वा पुरीतदाख्यहृदयवेष्टन[मां]सपरिवृतहृदयान्तर्वर्तिब्रह्मणि शयाने जीवे प्रासादे खट्वायां पर्यङ्के शेत इतिवन्नाडीषु शेते पुरीतति शेते ब्रह्मणि शेत इति निर्देशत्रयस्याप्युपपत्तेः पक्षबाधगर्भो विकल्पो नाङ्गीकार्यः। 'अतः प्रबोधोऽस्मात्'। [ब्र०सू०३।२।८]। यस्माद्ब्रह्मैव सुषुप्तिस्थानमत एव सुप्तस्य 'सत आगम्य न विदुः' [छा०६।१०।२] इति ब्रह्मण एव नित्यवत्प्रबोधः श्रूयमाण उपपद्यत इति।

प्रकृतमनुसरान:—

स यथा कुमारो वा महाराजो वा महाब्राह्मणो वाऽतिघ्नीमानन्दस्य गत्वा शयीतैवमेवैष एतच्छेते ॥ १९ ॥

कुमारः स्तनंधयः। अतिघ्नीमतिशयं गतां मात्रां गत्वैतदेतस्मिन्काले पुरीतति शेत इत्यर्थः। एतच्छब्दः पुरीतत्परो वा द्रष्टव्यः ॥१९॥

क्वैष तदाऽभूदित्यस्योत्तरमुक्तं कुत एतदागादित्यस्योत्तरमाह—

स यथोर्णनाभिस्तन्तुनोच्चरेत्।

यथोर्णनाभिर्लूताख्यः कीटविशेषस्तन्तुजालमध्यस्थित आहारग्रहणाय तन्तुद्वारा निर्गच्छेत्।

दृष्टान्तान्तरमाह—

यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति।

व्युच्चरन्ति निर्गच्छन्तीत्यर्थः। शिष्टं स्पष्टम्।

एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः
सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति ।

सुषुप्त्याधारात्परमात्मनः सर्वे प्राणाः । प्राणशब्दो जीवपरः । लोकशब्दो ज्ञानपरः। लोकनं लोक इतिव्युत्पत्तेः। देवशब्द इन्द्रियपरः। सर्वाणि च भूतानि व्युच्चरन्तीत्यर्थः। अत्र सुप्तजीवमात्रस्योद्गमनापादानप्रश्ने सर्वोद्गमनापादानत्वकीर्तनस्य किं फलमिति चेन्न । सर्वभूतोद्गमनापादानस्य परमात्मनः सुप्तजीवोद्गमनापादानत्वे को भार इत्येतदर्थपरत्वात्तस्य । न च समानप्रकरणे कौषीतकिनामुपनिषदि, 'एतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः' इति क्रमान्तरं वर्णितमिति विरोधः शङ्कनीयः । यथा 'आत्मन आकाशः संभूतः । आकाशाद्वायुः। वायोरग्निः' [तै०२।१] इति श्रुतेः। 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' एवम् । 'खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी' इति श्रुतेश्च । 'विपर्ययेण तु क्रमोऽत उपपद्यते' [ब्र०सू० २।३।१४] इति न्यायेनाविरोधसमर्थनमेवमिहापि द्रष्टव्यम् ।

तस्योपनिषत्सत्यस्य सत्यमिति ।

तस्य परमात्मनः सत्यस्य सत्यमिति उपनिषद्रहस्यनामेत्यर्थः ।

प्राणा वै सत्यं तेषामेष सत्यम् ॥ २० ॥

इति बृहदारण्यकोपनिषदि द्वितीयाध्यायस्य
प्रथमं ब्राह्मणम् ॥ १ ॥

प्राणा आत्मान इत्यर्थः । तेषामचेतनवत्स्वरूपान्यथाभावात्सत्यता निर्विकारता । परमात्मनस्तु धर्मभूतज्ञानस्वभावान्यथाभावस्याप्यभावात्तदपेक्षयाऽप्यधिकसत्यतेत्यर्थः ॥ २० ॥

इति बृहदारण्यकोपनित्प्रकाशिकायां द्वितीयाध्याये
प्रथमं ब्राह्मणम् ॥ १ ॥

यो ह वै शिशुꣳ साधानꣳ सप्रत्याधानꣳ सस्थूणꣳ सदामं वेद ।

तस्येदं फलम् । किं तत्—

सप्त ह द्विषतो भ्रातृव्यानवरुणद्धि ।

सप्तपुरुषपर्याप्तान्द्वेषयुक्ताञ्छत्रूनवरुणाद्धि स्ववशी करोतीत्यर्थः ।

मन्त्रस्यार्थमाह—

अयं वाव शिशुर्योऽयं मध्यमः प्राणस्तस्येदमेवाऽऽ-
धानमिदं प्रत्याधानं प्राणः स्थूणाऽन्नं दाम ॥ १ ॥

मध्यमः शरीरमध्यवर्ती पञ्चवृत्तिर्यः प्राणः स शिशुः । इतरकरणवत्क्रियाकर्तृत्वादिशून्यत्वाच्छिशुरिव शिशुरित्यर्थः । तस्य शिशोर्वत्सस्थानीयस्य तस्येदमेव शरीरमाधानम् । आधीयतेऽस्मिन्नित्याधानम् । गर्भगोलकमिदं मध्यशब्दोपस्थापितं हृदयमेवाऽऽधानं गर्भगोलम् । इदमेव प्रत्याधानं प्रत्यक्षोपस्थापितं शरीरमेव । प्रत्याधानमाहितस्याऽऽधानं प्रत्याधानं गर्भ आहितो वत्सः पश्चाद्भूमावाधीयत इति प्रत्याधानम् । प्रसूतिभूमिः । एवं हृदये लब्धात्मको हि प्राणः पश्चात्सर्वशरीरव्याप्त्यभिव्यज्यत इति प्रत्याधानं प्रसूतिभूमिः । प्राणः स्थूणा । स्थूणायां हि वत्सो भवति । एवं प्राणशब्दिते जीवे हि मुख्यप्राणो बद्धो भवति जीवे शरीरे स्थित एव प्राणस्यावस्थितेर्जीवो हि प्राणस्य स्थूणा । अन्नं दाम पाश इत्यर्थः । अन्नेन पाशेन बद्धो हि प्राणोऽभितिष्ठते । 'अन्नं प्राणस्य षड्विंशः' इति श्रुतेः । षड्विंशो हि पाशविशेषः ॥ १ ॥

तमेताः सप्ताक्षितय उपतिष्ठन्ते ।

तमेतं चक्षुष्यारूढं प्राणं वक्ष्यमाणाः सप्ताक्षितय उपतिष्ठन्त उपस्थिता भवन्ति । न विद्यते क्षितिः क्षयो येषां ते तथोक्ताः । अक्षितित्वं च तेषामापेक्षिकं द्रष्टव्यम् ।

तद्या इमा अक्षन्लोहिन्यो राज-
यस्ताभिरेनꣳ रुद्रोऽन्वायत्तः ।

तत्तत्र अक्षंश्चक्षुषि या इमा लोहिन्यो लोहिता राजयो रेखास्ताभिर्द्वारभूताभिरेनं प्राणं रुद्रोऽन्वायत्तः ।

अथ या अक्षन्नापस्ताभिः पर्जन्यः ।

अक्षन्नक्षणि शुण्ठ्यादिकटुद्रव्यसंयोगेनाभिव्यज्यमाना या आपस्ताभिः पर्जन्यो देवतात्मोपतिष्ठते ।

या कनीनिका तयाऽऽदित्यः ।

अक्ष्णो या कनीनिका तारका तेजोमयी दृक्छक्तिस्तद्द्वाराऽऽदित्य उपतिष्ठते ।

यत्कृष्णं तेनाग्निर्यच्छुक्लं तेनेन्द्रः ।

स्पष्टोऽर्थः ।

अधरयैनं वर्तन्या पृथिव्यन्वायत्ता ।

अधरया वर्तन्याऽधरेण पक्ष्मणेत्यर्थः ।

द्यौरुत्तरया ।

उत्तरेण पक्ष्मणेत्यर्थः । सप्ताक्षित्युपस्थेयचक्षुर्निष्ठप्राणज्ञानस्य फलमाह—

नास्यान्नं क्षीयते य एवं वेद ॥ २ ॥

स्पष्टोऽर्थः ।

तदेष श्लोको भवति । अर्वाग्बिलश्चमस ऊर्ध्वबुध्न-
स्तस्मिन्यशो निहितं विश्वरूपम् । तस्याऽऽसत
ऋषयः सप्त तीरे वागष्टमी ब्रह्मणा संविदानेति ।

अमुं मन्त्रं श्रुतिरेव व्याचष्टे—

अर्वाग्बिलश्चमस ऊर्ध्वबुध्न इतीदं
तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नः ।

अर्वाग्बिलश्चमस इति मन्त्रखण्डेनोच्यमानमिदं तदेव शिरः प्रसिद्धमेव शिरः कण्ठादुपरिभाग इति यावत् । किं तदित्याशङ्क्याऽऽह—एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नः । चम्यतेऽनेनेति चमसो भक्षणसाधनमित्यर्थः । एष मुखरूपश्चमसः । आस्यस्य बिलरूपत्वादर्वाग्बिलत्वं शिरस ऊर्ध्वस्थूलमूलभागरूपबुध्नाकारत्वादूर्ध्वबुध्नत्वम् । लोके हि प्रसिद्धश्चमस ऊर्ध्वबिलस्तिर्यग्बुध्नः । अयं तु विलक्षणश्चमस इति भावः ।

तस्मिन्यशो निहितं विश्वरूपमिति
प्राणा वै यशो विश्वरूपं प्राणानेतदाह ।

तस्मिन्यशो निहितं विश्वरूपमित्येतद्वाक्यं प्राणानाह। तत्र हेतुमाह— प्राणा वै यशो विश्वरूपम्। प्राणस्य प्राणापानादिबहुरूपतया यशोवत्प्रसृमरत्वाद्यशस्त्वेन रूपणम्। वृत्तिभेदात्प्राणा इति बहुवचनम्।

तस्याऽऽसत ऋषयः सप्त तीर इति
प्राणा वा ऋषयः प्राणानेतदाह।

साक्षिश्रोत्रनासिकास्योपाधिसंबन्धिनः सप्त शीर्षण्याः प्राणास्तस्य समीपे वर्तन्त इत्यर्थः।

वागष्टमी ब्रह्मणा संविदानेति वाग्घ्यष्टमी ब्रह्मणा संवित्ते ॥ ३ ॥

ब्रह्मणा वेदेन संविदाना संवादं कुर्वती संवित्ते। समित्येकीकारे वित्तशब्दो ज्ञापनपरः। ब्रह्मणैकप्रत्ययैकबुद्धिः। ब्रह्मणा वेदेनैककण्ठा वेदवादिनीति यावत् ॥ ३ ॥

सप्त ऋषयः क इत्यत्र कर्णौ प्रदर्शयन्नुवाच—

इमावेव गोतमभरद्वाजौ।

कर्णावेव गोतमभरद्वाजौ।

अयमेव गोतमोऽयं भरद्वाजः।

तयोर्मध्य एको गोतम एको भरद्वाजः।

चक्षुषी उपदिशन्नुवाच—

इमावेव विश्वामित्रजमदग्नी अयमेव विश्वामित्रोऽयमेव जमदग्निः।

चक्षुषोर्मध्य एकं विश्वामित्रः। अपरं जमदग्निः।

नासिके उपदिशन्नुवाच—

इमावेव वसिष्ठकाश्यपावयमेव वसिष्ठोऽयं काश्यपः।

पूर्ववदर्थः।

वागेवात्रिर्वाचा ह्यन्नमद्यते ।

वागिन्द्रियाधिष्ठानभूतेनाऽऽस्येनान्नमद्यत इति वागिन्द्रियमेवात्रिः ।

अत्तिर्ह वै नामैतद्यदत्त्रिरिति ।

अत्तृत्वादत्तिरित्येतन्नाम सदत्रिरिति परोक्षेणोच्यते ।

वागत्रित्वज्ञानस्य फलमाह—

सर्वस्यात्ता भवति सर्वमस्यान्नं भवति य एवं वेद ॥४॥

इति बृहदारण्यकोपनिषदि द्वितीयाध्यायस्य
द्वितीयं ब्राह्मणम् ॥ २ ॥

अत्र सर्वस्यात्ता भवतीत्यर्थस्य सिद्धत्वात्सिद्धस्य कीर्तनमनुकूलभोग्यत्वकीर्तनमिति द्रष्टव्यम् ॥ ४ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां द्वितीयाध्यायस्य
द्वितीयं ब्राह्मणम् ॥ २ ॥

द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं च मर्त्यं
चामृतं च स्थितं च सच्च यच्च त्यच्च ॥१॥

ब्रह्मणो द्वे शरीरे । वावशब्दः प्रसिद्धौ । मूर्तं कठिनममूर्तमकठिनम् । मर्त्यं मरणधर्मकं विनश्वरमित्यर्थः । अमृतं तद्इतरत् । स्थितमव्यापकम् । सत्प्रत्यक्षोपलभ्यम् । यद्व्यापकम् । एति गच्छति सर्वानिति यद्व्यापकमित्यर्थः । त्यत्तदितरादित्यर्थः ॥ १ ॥

मूर्तामूर्ते दर्शयति—

तदेतन्मूर्तं यदन्याद्वयोश्चान्तरि-
क्षाच्चैतन्मर्त्यमेतत्स्थितमेतत्सत् ।

वाय्वन्तरिक्षव्यतिरिक्तं पृथिव्यप्तेजोलक्षणं कठिनत्वविनश्वरत्वाव्यापकत्वप्रत्यक्षोपलभ्यत्वरूपधर्मयुक्ततया मूर्तमर्त्यस्थितसच्छब्दवाच्यमित्यर्थः।

तस्यैतस्य मूर्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य
सत एष रसो य एष तपति सतो ह्येष रसः ॥२॥

य एष तपति मण्डलरूपेणेत्यर्थः। आदित्यमण्डलं सच्छब्दितस्य तेजोबन्नस्य रसः। तेजोबन्नवन्मण्डलस्य प्रत्यक्षोपलभ्यमानत्वादादित्यमण्डले मूर्तत्वादिचतुष्टययुक्ते तेजोबन्नरसत्वबुद्धिः कर्तव्येत्यर्थः ॥२॥

अथामूर्तं वायुश्चान्तरिक्षं चैतदमृतमेतद्यदे-
तत्त्यं तस्यैतस्यामूर्तस्यैतस्यामृतस्यैतस्य यत
एतस्य त्यस्यैष रसो य एष एतस्मिन्मण्डले
पुरुषस्त्यस्य ह्येष रस इत्यधिदैवतम् ॥३॥

अमूर्तत्वामृतत्वयत्त्व[त्यत्त्व]लक्षणधर्मचतुष्टयाश्रयवाय्वन्तरिक्षरसत्वबुद्धिरादित्यमण्डलस्थपुरुषे कर्तव्येत्यर्थः ॥ ३ ॥

एवमधिदैवतमुपासनप्रकार उक्तः । इतः परमध्यात्मं मूर्तामूर्तरसोपासनचिन्ताप्रकारो वर्ण्यते—

अथाध्यात्मम् ।

आत्मनि देह इत्यर्थः ।

इदमेव मूर्तं यदन्यत्प्राणाच्च यश्चायमन्तरात्मन्नाकाशः ।

तस्माच्चेति शेषः ।

एतन्मर्त्यमेतत्स्थितमेतत्सत्तस्यैतस्य मूर्तस्यै-
तस्य मृतस्यैतस्य स्थितस्यैतस्य सत एष
रसो यच्चक्षुः सतो ह्येष रसः ॥ ४ ॥
अथामूर्तं प्राणश्च यश्चायमन्तरात्मन्नाकाश
एतदमृतमेतद्यदेतत्त्यं तस्यैतस्यामूर्तस्यैतस्या-
मृतस्यैतस्य यत एतस्य त्यस्यैष रसो योऽयं
दक्षिणेऽक्षन्पुरुषस्त्यस्य ह्येष रसः ॥ ५ ॥

प्राणहार्दाकाशव्यतिरिक्तं शरीरान्तर्वर्तिमूर्तत्वादिधर्मचतुष्टयाधारभूतं यत्तस्य चक्षुरेव रसः। अमूर्तत्वादिचतुष्टयाश्रयप्राणहार्दाकाशयोर्दक्षि-

णाक्षिस्थः पुरुषः परमात्मा रस इत्यर्थः । नन्वहिकुण्डलाधिकरणभाष्ये मूर्तामूर्तस्याचित्प्रपञ्चस्य ब्रह्मणो रूपत्वं 'द्वे वाव ब्रह्मणो रूपे' इत्यादिनोपदिश्यत इत्युक्तम् । तद्याचक्षाणैर्व्यासार्यैश्चिदचिदात्मकप्रपञ्चकथनेनाचित्प्रपञ्चोऽपि कथितः स्यादित्यर्थः । नन्वयोगव्यवच्छेदः । संगत्युपयोगित्वेनाचित्प्रपञ्चोपादानं कृतमिति भाष्यस्थमचित्प्रपञ्चपदं चित्प्रपञ्चस्याप्युपलक्षकमिति व्याख्यातम् । नचास्मिञ्श्रुतिसंदर्भे चित्प्रपञ्चसमर्पकं किमपि पदं दृश्यत इति चेन्न वाय्वन्तरिक्षादिशब्दानामचित्संसृष्टचित्परत्वोपपत्त्या चित्प्रपञ्चस्याप्युपादानसंभवेन चेतनाचेतनप्रपञ्चस्य द्वे एव ब्रह्मणो रूपे इत्यादिना ब्रह्मशरीरत्वप्रतिपादनादिति ध्येयम् ॥ ५ ॥

तस्य हैतस्य रूपं यथा माहारजनं वासः ॥ ५ ॥

महारजनं हरिद्रा तद्रञ्जितं वासः ।

यथा पाण्ड्वाविकम् ।

कम्बलः ।

यथेन्द्रगोपः ।

शक्रगोपकृमिः ।

यथाऽग्न्यर्चिः ।

अग्निज्वाला ।

यथा पुण्डरीकम् ।

अम्भोजमित्यर्थः ।

यथा सकृद्विद्युत्तम् ।

द्युतेर्निष्ठा विद्योतनमिति यावत् । सकृत्सकृत्प्रवृत्तविद्युदिवेत्यर्थः । एवं रूपमस्य भवतीति पूर्वेणान्वयः ।

सकृद्विद्युत्तेव हास्य श्रीर्भवति ।

विद्युत्तेव विद्युदिवास्य श्रीः प्रकाशमाना भवति ।

य एवं वेद ।

द्वे वाव ब्रह्मणो रूपे मूर्तामूर्तात्मकरूपवत्त्वे ब्रह्मणः कथिते तत्प्रयुक्तेयत्तालक्षणपरिच्छेदरूपप्रकारवत्त्वं प्राप्तं प्रतिषेद्धुमुपक्रमते—

अथात आदेशो नेति नेति ।

आदेश उपदेश इत्यर्थः । अथातःशब्दो वाक्यान्तरोपन्यासार्थौ इतिशब्द इयत्तालक्षणप्रकारवचनः । नैवं नैवमित्यर्थः । मूर्तामूर्तात्मकद्वयवत्त्वप्रयुक्तेयत्तालक्षणप्रकारयुक्तो नेत्यर्थः ।

न ह्येतस्मादिति नेत्यन्यत्परमस्ति ।

इति नेति यद्ब्रह्म प्रतिपादितं तस्मादेतस्माद्वस्तु परं न ह्यस्ति ब्रह्मणोऽन्यत्स्वरूपतो गुणतश्च परं नास्तीत्यर्थः । नत्वन्यमात्रस्य निषेधः । तथा हि सत्यन्यत्परमिति वैयर्थ्यापत्तेः ।

तदुपपादयति—

अथ नामधेयꣳ सत्यस्य सत्यं प्राणा
वै सत्यं तेषामेष सत्यमिति ॥ ६ ॥

इति बृहदारण्यकोपनिषदि द्वितीयाध्याये
तृतीयं ब्राह्मणम् ॥ ३ ॥

प्राणशब्दनिर्दिष्टेभ्यश्चेतनेभ्योऽपि कदाचिदपि ज्ञानादिसंकोचाभावात्परमात्मा सत्यं निर्विकारमित्यर्थः । ननु द्वे वाव ब्रह्मणो रूपे इति पूर्वमुपदिष्टस्य मूर्तामूर्तात्मकरूपस्य 'तस्य हैतस्य पुरुषस्य रूपं यथा माहारजनं वासः' इति संदर्भेणोपदिष्टस्य वा रूपस्य, 'अथात आदेशो नेति नेति' इत्यनेन निषेधः किं न स्यादिति चेत्तथा सति रूपिणोऽपि ब्रह्मणः प्रतिषेधः प्राप्नोति । ननु तथा सति मानान्तरप्राप्तब्रह्मस्वरूपप्रतिपादकशास्त्राप्रामाण्यप्रसङ्गात्तन्निषेधो नोपपद्यत इति चेन्न । द्वे वाव ब्रह्मणो रूपे' इति ब्रह्मणो मानान्तरप्राप्तमूर्तामूर्तात्मकरूपद्वयवत्त्वप्रतिपादकशास्त्रस्याप्यप्रामाण्यप्रसङ्गसाम्यात् । न चोपासनार्थं तदुपदेशसाफल्यमिति वाच्यम् । ब्रह्मस्वरूपेऽपि तथात्वप्रसङ्गात् । अतो नेति नेतीत्यनेनेयत्तैव निषिध्यते । इदं वाक्यमुभयलिङ्गपादे प्रकृतैतावत्त्वम् । [ब्र० सू० ३ । २ । २२] इति सूत्रे चिन्तितम् । तत्र हि ब्रह्मणो मनुष्यादिदेहान्तरावस्थित्या तत्प्रयुक्तसुखदुःखभोक्तृत्वमपि प्रसजेत् । न च परमात्मनो देहान्तरावस्थितिप्रयुक्तभोक्तृत्वमाशङ्क्य परितो दह्यमानगृहान्तर्वर्तित्वे देवदत्तयज्ञदत्त-

योरविशिष्टेऽपि तत्स्वामिनस्तदभिमानिनो देवदत्तस्यैव यज्ञदत्तस्य तत्कृतदुःखादर्शनवद्देहान्तर्वर्तित्वे जीवपरयोरविशिष्टेऽपि 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ' [मु०३।१] इति श्रुत्यनुसारेण देहाभिमानिजीववन्न परस्य भोक्तृत्वमिति 'संभोगप्राप्तिरिति चेन्न वैशेष्यात् । [ब्र० सू० १ । २ । ८] इति सूत्रे स्थितम् । तथा स्मृतिपादेऽपि सर्वस्यापि परमात्मनः शरीरतया शरीरं प्रति स्वामित्वमपि परमात्मनोऽस्तीति मनुष्यादिशरीरस्वामिनस्तदन्तर्वर्तिपरमात्मनो भोक्तृत्वमवर्जनीयमिति जीवेश्वरस्वभावविभाग इति पूर्वपक्षं प्रापय्य शरीरस्वामित्वेऽपि तदन्तर्वर्तित्वेऽपि नित्याविर्भूतापहतपाप्मत्वादिगुणकस्य परमात्मनो न भोक्तृत्वप्रसङ्गः । यथा लोके राजशासनानुवर्तिनां तदतिवर्तिनां च राजानुग्रहनिग्रहकृतसुखदुःखयोगेऽपि न राज्ञि तत्प्रसक्तिरेवं न परमात्मनि शासके भोक्तृत्वप्रसक्तिरिति 'भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् । [ब्र० सू० २ । १ । १३] इत्यधिकरणे स्थितम् । तथाऽपि शासकस्यापि राज्ञः स्वेच्छयाऽपि पूयशोणितादिकर्दमिते कारागृहे वसतो दुःखसंबन्धापरिहारवत्परमात्मनोऽपि स्वेच्छया हेयमनुष्यादिशरीरेषु वसतो दुःखसंबन्धोऽपरिहार्यः । ब्राह्मणादिशरीरस्वामित्वाच्च ब्राह्मणादिशब्दवाच्यत्वावश्यंभावेन ब्राह्मणो यजेतेत्यादिविधिकिंकरत्वावश्यंभावेन कर्मवश्यत्वादेरप्यवश्यंभावादिति पूर्वपक्षे प्राप्ते ' न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि । [ब्र० सू० । ३ । २ । ११] मनुष्यादिदेहस्थानप्रयुक्तं भोक्तृत्वं परस्य न संभवति । 'अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः '[छा० ८।१।५] इति श्रुत्या सर्वत्र हि विद्यमानं परं ब्रह्म हेयप्रत्यनीककल्याणैकतानत्वरूपोभयलिङ्गयुक्तमेव भवति । अतो न भोक्तृत्वप्रसङ्गः । 'न भेदादिति चेन्न प्रत्येकमतद्वचनात् ' । [ब्र० सू० ३ । २ । १२] यथा जीवस्यापहतपाप्मत्वादिगुणाष्टकयुक्तस्यापि मनुष्यादिदेहयोगरूपावस्थाभेदाद्भोक्तृत्वमेवं परमात्मनोऽपि किं न स्यादिति चेन्न । अन्तर्यामिब्राह्मणे 'स त आत्माऽन्तर्याम्यमृतः' इत्यन्तर्यामिणः परस्य ब्रह्मण आविर्भूतगुणाष्टकत्वलक्षणं पृथक्त्वं श्रूयतेऽतो न जीवसाम्यम् । 'अपि चैवमेके' । ब्र०- सू० । ३ । २ । १३] अपि चैके शाखिनः 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति' [मु०३।१] [इति] जीवपरयोर्भोक्तृत्वाभोक्तृत्वलक्षणं वैषम्यमधीयते । 'अरूपवदेव हि तत्प्रधानत्वात्' । [ब्र०सू०

३ । २।१४]सर्वशरीर्यपि ब्रह्माशरीरितुल्यमेव । 'आकाशो ह वै नामरूपयोर्निर्वहिता ते यदन्तरा ' [छा० ८ । १४ । १] इति नामरूपकार्यास्पृष्टत्वे सति नामरूपनिर्वाह(र्वोढृ)त्वस्य प्रतिपादनेन मनुष्यादिनामरूपसंबन्धकृतकार्यस्य तत्राप्रसक्तेः । अतः सर्वत्र विद्यमानमपि ब्रह्मोभयलिङ्गमेव । ननु ब्रह्मणः कल्याणगुणा न सन्ति । अथात आदेशो नेति नेतीति प्रतिषेधादिति चेत्तत्राऽऽह—' प्रकाशवच्चावैयर्थ्यात् । [ब्र० सू० ३ । २ । १५] यथा ' सत्यं ज्ञानमनन्तं ब्रह्म ' इति श्रुत्यवैयर्थ्याय ज्ञानादिरूपत्वमभ्युपगम्यत एवं सत्यकामसत्यसंकल्पादिश्रुत्यवैयर्थ्याय कल्याणगुणगणोऽप्यभ्युपगन्तव्यः । ननु सत्यं ज्ञानमिति ज्ञानस्वरूपत्वप्रतिपादनादेव ज्ञानस्य गुणाश्रयत्वासंभवादर्थाद्गुणा निषिद्धा इति तत्राऽऽह—आह च तन्मात्रम् । [ब्र० सू० ३ । २ । १६] सत्यं ज्ञानमिति श्रुतिर्ब्रह्मणो ज्ञानस्वरूपतामात्रं प्रतिपादयति । न तु सर्वज्ञत्वादिगुणाश्रयतां प्रतिषेधति । तेजोरूपदीपस्य प्रभारूपतेजोन्तराश्रयत्ववज्ज्ञानरूपस्यापि ब्रह्मणः सार्वज्ञ्याश्रयत्वमुपपद्यते । ' दर्शयति चाथो अपि स्मर्यते ' [ब्र० सू० ३ । २ । १७] दर्शयति वेदान्तगणः । निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् । [श्वे० ६ । १९] । ' पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ' [श्वे० ६ । ८] इति । ब्रह्मण उभयलिङ्गत्वं स्मर्यते च । यो मामजमनादिं च वेत्ति लोकमहेश्वरमित्यादिभिः । ' अत एवोपमा सूर्यकादिवत् ' [ब्र० सू० ३ । २ । १८] यत एव तत्तत्स्थानस्थितस्यापि तद्दोषास्पृष्टत्वम् । अत एव—

आकाशमेकं हि यथा घटादिषु पृथग्भवेत् ।
तथाऽऽत्मैकोऽप्यनेकस्थो जलाधारेष्विवांशुमान् ॥
एक एव हि भूतात्मा भूते भूते व्यवस्थितः ।
एकधा दशधा चैव दृश्यते जलचन्द्रवत् ॥

इति जलगतसूर्यप्रतिबिम्बादिवदिति दृष्टान्तो युज्यते । ' अम्बुवदग्रहणात्तु न तथात्वम् ' । [ब्र० सू० ३ । २ । १९] तुशब्दश्चोद्यं द्योतयति । अम्बुवदिति सप्तम्यन्ताद्वतिः । परमात्मनो न तथात्वं सूर्यप्रतिबिम्बादिसाम्यं न संभवतीत्यर्थः । कुतः । अम्बुवदग्रहणात् । अम्बुनि यथा प्रतिबिम्बं गृह्यते न तथा परमात्मा गृह्यते ।

तत्र हि अजलस्थमेव जलस्थमिव गृह्यते । अतस्तद्गतदोषासंस्पर्शो युज्यते । प्रकृते च विकारान्तरवर्तिनि ब्रह्मणि चिदचिद्गतदोषासंस्पर्शो न युज्यते वक्तुम् । 'वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्' । 'दर्शनाच्च' [ब्र० सू० ३।२।२०।२१] विकारान्तर्भावप्रयुक्तविकारगतवृद्धिह्रासादिभाक्त्वलक्षणो यो दोषः स नाऽऽपतति । तद्गततया प्रतीयमानस्यापि तद्गतदोषास्पृष्टत्वांश आकाशसूर्यरूपदृष्टान्तद्वयसामञ्जस्यसंभवात् । सिंह इव माणवक इत्यादौ विवक्षितक्रौर्यांश एव दृष्टान्तत्वदर्शनाच्च न सर्वथा साम्यं दृष्टान्तदार्ष्टान्तिकयोरपेक्षितमिति भावः । ननु 'द्वे वाव ब्रह्मणो रूपे' इति प्रकृतस्य मूर्तामूर्तात्मकप्रपञ्चस्य 'यथा माहारजनं वासः' इत्यादिनोपक्षिप्तस्याऽऽकारविशेषस्याथात आदेशो नेति नेतीति प्रतिषेधान्निर्विशेषमेव ब्रह्म । अतो नोभयलिङ्गत्वमिति तत्राऽऽह—'प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः' [ब्र०सू० ३।२।२२] प्रकृतैर्द्वे वाव ब्रह्मणो रूपे इत्यादिना प्रतिपादितै रूपैर्ब्रह्मणो यदेतावत्त्वं परिच्छिन्नत्वलक्षणो यः प्रकारस्तमितिशब्देन परामृश्य नेतीति निषेधति न तु स्वरूपेण ब्रह्मसंबन्धिरूपं निषेधति । न हि श्रुतिः स्वयमेव मानान्तराप्राप्तं मूर्तामूर्तात्मकप्रपञ्चरूपवत्त्वं ब्रह्मणः प्रतिपाद्य स्वयमेव निषेधतीति युज्यते वक्तुम् । 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' [म० भा० ३।२।४९] इति न्यायात् । अत एव निषेधानन्तरमपि ब्रह्मणो भूयो गुणज्ञानं ब्रवीति । न ह्येतस्मादिति नेत्यन्यत्परमस्तीति स्वरूपतो गुणतश्च सर्वोत्कृष्टत्वं प्रतिपाद्यते । 'अथ नामधेयं सत्यस्य सत्यम्' इति नामधेयरूपगुणवत्ता च प्रतिपाद्यते । अतो नेति नेतीति प्रकृतैतावत्त्वमात्रस्य निषेधः । 'तदव्यक्तमाह हि' [ब्र० सू० ३।२।२३] । तद्ब्रह्म मानान्तरागम्यमिति श्रुतिराह—'न चक्षुषा गृह्यते नापि वाचा' [मुण्ड० ३।१।८] इति । ततश्च मानान्तरागम्यश्रुत्येकसमधिगम्यस्य ब्रह्मस्वरूपस्य मूर्तामूर्तात्मकप्रपञ्चशरीरकत्वस्य वा निषेधो युक्तः । 'अपि संराधने प्रत्यक्षानुमानाभ्याम्' । [ब्र० सू० ३।२।२४] । संराधनं सम्यक्प्रीणनं भक्तिरूपापन्ननिदिध्यासनं तस्मिन्सत्येव साक्षात्कारो नान्यथेति 'ततस्तु तं पश्यते निष्कलं ध्यायमानः' [मु०३।१।८] ।

नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ॥
[भ० गी०११।५३।५४]

इति श्रुतिस्मृतिभ्यामवगम्यते। 'प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात्' [ब्र०सू०३।२।२५] निदिध्यासनजन्यसाक्षात्कारदशायां च ब्रह्मस्वरूपभूतज्ञानानन्दादितुल्यतयाऽहं मनुरभवं सूर्यश्चेति ब्रह्मशरीरभूतमनुसूर्यादिप्रपञ्चस्यापि तत्त्वविद्भिर्वामदेवादिभिः साक्षात्क्रियमाणत्वाद्ब्रह्मस्वरूपवत्तच्छरीरभूतमूर्तामूर्तात्मकप्रपञ्चस्याप्यबाधितत्वं सिद्धम्। ब्रह्मस्वरूपप्रकाशश्च कदा भवतीत्याशङ्कायामाह—प्रकाशश्च कर्मण्यभ्यासादिति। संराधनात्मके ध्यानरूपे कर्मणि अभ्यासात्प्रकाशो भवति 'ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढवत्' [श्वे० १।१४] इति श्रुतेरिति भावः। 'अतोऽनन्तेन तथा हि लिङ्गम्' [ब्र० सू० ३।२।६] अत उक्तैर्हेतुभिरनन्तेन कल्याणगुणेन विशिष्टं ब्रह्म। तथा हि सत्यवोभयलिङ्गं ब्रह्मोपपन्नं भवतीति तत्र स्थितम्। न ह्येतस्मादिति वाक्यं तत्रैव पादे 'तथाऽन्यप्रतिषेधात्' [ब्र० सू० ३।२।३६] इति सूत्रे चिन्तितम्। तत्र हि उक्तात्परब्रह्मणोऽपि परं किंचिदस्ति 'य आत्मा स सेतुर्विधृतिः' [छा० ८।४।१] इति सेतुत्वश्रवणात्। सेतुर्हि कूलान्तरप्रापक एवमस्यापि परस्य ब्रह्मणः प्राप्यान्तरप्रापकत्वमभ्युपगन्तव्यम्। किं च 'चतुष्पाद्ब्रह्म' [छा० ३।१८।२] षोडशकलमित्येतस्य परिच्छिन्नत्वावगमादपरिच्छिन्नं मुख्यं ब्रह्मेतो जगत्कारणादन्यदिति निश्चीयते। तथा 'अमृतस्यैष सेतुः' [मु० २।२।५] इति प्राप्येणामृतेन संबन्धो व्यपदिश्यते। 'तथा परात्परं पुरुषमुपैति दिव्यम्' [मु० ३।२।८] इति परस्माद्ब्रह्मणः प्राप्यस्य भेदो व्यपदिश्यतेऽतः परब्रह्मणोऽपि अन्यत्प्राप्यान्तरमस्तीति 'परमतः सेतून्मानसंबन्धभेदव्यपदेशेभ्यः' [ब्र० सू० ३।२।३१] इति पूर्वपक्षे प्राप्त उत्तरं पठति 'सामान्यात्तु' [ब्र० सू० ३।२।३२]। तुशब्दः पक्षं व्यावर्तयति। असंकरकारित्वलक्षणन्यासे तु सामान्यात्सेतुरिति ब्रह्मोच्यते। 'एष सेतुर्विधरण एषां लोकानामसंभेदाय [बृ० ४।४।२२] इति श्रुतेः। प्रसिद्धो हि सेतुः पार्श्वद्वयवर्तिजलासंकरकारीति भावः। 'बुद्ध्यर्थः पादवत्' [ब्र० सू० ३।२।३३]। चतुष्पाद्ब्रह्मेत्युन्मानव्यपदेशो बुद्ध्यर्थ उपासनार्थः। ब्रह्मप्रतीकभूते मनसि वाक्पादः प्राण इति व्यपदेशो यथोपासनार्थस्तद्वत्। न हि मनसो वागादिपादवत्त्वं वास्तवं भवति। 'स्थानविशेषात्प्रकाशादिवत्' [ब्र० सू० ३।२।३४] यथाऽऽलोकाकाशादेर्वातायनघटादिस्थानभेदात्परिच्छिन्नतयाऽनुसंधान-

मेवमनुन्मितस्यापि ब्रह्मण उन्मितत्वमुपपद्यत इति भावः। 'उपपत्तेश्च' [ब्र० सू० ३ । २ । ३५] 'यमेवैष वृणुते तेन लभ्यः [मु० ३ । २ । ३] इति स्वप्राप्तेः स्वयमेव साधनतया जोघुष्यमाणे ब्रह्मणि, 'अमृतस्यैष सेतुः' इति श्रुतस्य प्राप्यप्रापकभावसंबन्धस्योपपत्तेरित्यर्थः। 'तथाऽन्यप्रतिषेधात्' [ब्र० सू० ३ । २ । ३६] यदुक्तं परात्परमिति भेदो व्यपदिश्यत इति तत्र न ह्येतस्मादिति नेत्यन्यत्परमस्ति [बृ० २ । ३ । ६] इतीति नेतिशब्दनिर्दिष्टादेतस्माद्ब्रह्मणोऽन्यत्परं नास्तीति जगत्कारणभूतात्परस्माद्ब्रह्मणोऽन्यस्य प्रतिषेधात् 'परात्परं पुरुषम्' इतिश्रुतिस्तु 'अक्षरात्परतः परः' इत्यक्षरापेक्षया परस्मात्समष्टिजीवात्परमदृश्यत्वादिगुणकं प्रकृतं भूतयोन्यक्षरपुरुषमेव प्रतिपादयतीत्यर्थः। 'अनेन सर्वगतत्वमायामशब्दादिभ्यः' [ब्र० सू० ३ । २ । ३७]। अनेन ब्रह्मणा सर्वस्यापि जगतो व्याप्तत्वं तेनेदं पूर्णं पुरुषेण सर्वम्। [श्वे० ३ । ९] अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः। 'नित्यं विभुं सर्वगतं सुसूक्ष्ममित्यादिभिरायामवाचिशब्दादियुक्तैः प्रमाणैरेव गम्यते। अत इदमेव परं ब्रह्म सर्वस्मात्परमिति स्थितम्। प्रकृतमनुसरामः ॥ ६ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां द्वितीयाध्यायस्य
तृतीयं ब्राह्मणम् ॥ ३ ॥

अमृतत्वप्राप्त्युपायत्वसर्वजगत्कारणत्वसर्वात्मत्वादिकल्याणगुणप्रतिपिपादयिषया ब्राह्मणमिदमारभ्यते—

मैत्रेयीति होवाच याज्ञवल्क्यः ।

याज्ञवल्क्यस्य द्वे भार्ये स्तो मैत्रेयी कात्यायनी चेति। मित्राया अपत्यं मैत्रेयी तां मैत्रेयीत्यामन्त्र्याऽऽह—

उद्यास्यन्वा अरेऽहमस्मात्स्थानादस्मि हन्त
तेऽनया कात्यायन्याऽन्तं करवाणीति ॥ १ ॥

अरे मैत्रेयि अहमस्मात्स्थानाद्गार्हस्थ्यलक्षणादाश्रमादुद्यास्यन्नस्मि ऊर्ध्वं गन्तुमिच्छन्नस्मि। हन्त तवानया कात्यायन्या सहान्तं युवयोः कलहशान्तये द्रव्यविभागनिर्णयं करवाणीति ॥ १ ॥

सा होवाच मैत्रेयी । यन्नु म इयं भगोः सर्वा
पृथिवी वित्तेन पूर्णा स्यात्कथं तेनामृता स्यामिति ।

हे भगोः । संबुद्धौ विभाषा भवद्भगवदघवतामोच्चावस्येत्योत्तस्य रुत्वं विसर्गश्च । सर्वा पृथिवी वित्तेन पूर्णा यद्यदि ये मम स्याद्वशंवदा स्यादित्यर्थः । तदा तेन वित्तेन कथं कथंचिदमृता स्यां नु संसारान्मुक्ता स्यां नु किमित्यर्थः ।

नेति स होवाच याज्ञवल्क्यो यथैवोपकरण-
वतां जीवितं तथैव ते जीवितꣳ स्यादमृत-
त्वस्य तु नाऽऽशाऽस्ति वित्तेनेति ॥ २ ॥

उपकरणवतां भोगसाधनवतां जीवितं सुखजीवनं यथा सिध्यति तथैव ते भोगोपकरणवित्तवत्याः सुखेन जीवनं परं लभ्यते मोक्षस्य वित्तेन साधनेन प्राप्यता (प्राप्त्या)शा नास्तीत्यर्थः ॥ २ ॥

सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन
कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहीति ॥ ३ ॥

ममामृतत्वप्राप्त्यनुपायभूतेन वित्तेनाहं किं करिष्यामि भगवान्यदमृतत्वप्राप्त्युपायं वेद तदेव मे ब्रूहीति ॥ ३ ॥

स होवाच याज्ञवल्क्यः प्रिया बतारे नः सती
प्रियं भाषस एह्यास्स्व व्याख्यास्यामि ते
व्याचक्षाणस्य तु मे निदिध्यासस्वेति[1]॥ ४ ॥

बतेत्यनुकम्पायाम् । अरे मैत्रेयि त्वं सती साध्वी च सती प्रियाऽनुकूला च सती प्रियं मनोनुकूलं वाक्यं भाषसे । एहि आगच्छाऽऽस्स्वोपविशामृतत्वोपायं वक्ष्यामि । व्याख्यानं कुर्वतो मम वाक्यान्यर्थतो निश्चयेन ध्यातुमिच्छ । यद्वा व्याचक्षाणस्य तु मे मुखं निदिध्यासस्व । निध्यानमवलोकनमवलोकयेति यावत् । इतिशब्दो वाक्यावसाने । ब्रवीतु मे भगवानिति ॥ ४ ॥

---

१ ब्रवीतु मे भगवानिति । अत्रत्यमुद्रितपुस्तकस्थं पाठान्तरम् ।

स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति ।

अत्रामृतत्वार्थिन्यै मैत्रेय्या अमृतत्वसाधनदर्शनविषयतयाऽऽत्मैव द्रष्टव्य इत्युपदिश्यमान आत्मा परमात्मेत्यवश्यमभ्युपेयः । 'तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते' इति तस्यैव मोक्षसाधनत्वावगमात् । 'ब्रह्म तं परादात्' इत्यादिना तस्य सार्वात्म्यकथनात् । 'आत्मनो वा अरे दर्शनेन' इत्यादिना तज्ज्ञानेन सार्वज्ञ्यावेदनेन सर्वोपादानत्वप्रतिपादनाच्चाणि(स्मि)न्प्रकरणे द्रष्टव्यतयोऽपदिश्यमान आत्मा परमात्मेति सिद्धम् । तदुपपादकस्यास्य संदर्भस्य यथा परमात्मपरत्वं तथाऽर्थो वर्णनीय इति सिद्धम् । अतोऽस्य वाक्यस्यायमर्थः—न वा इत्यत्र वैशब्दोऽवधारणे । नैवेत्यर्थः । पत्युः कामाय । कामः संकल्पः । कामाय संकल्पाय संकल्पं सफलीकर्तुमित्यर्थः । 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' [पा० सू० २ । ३ । १४] इति चतुर्थी । पत्युः प्रियत्वमहमस्याः प्रियः स्यामिति पतिसंकल्पसाफल्याय न भवति पतिसंकल्पायत्तं न भवतीति यावत् । वेदाध्ययनं सफलीकर्तुं यज्ञ इत्युक्ते वेदाध्ययनस्य यज्ञः फलमिति हि सिध्यति । एवं संकल्पसाफल्याय प्रियत्वमित्युक्ते संकल्पायत्तं प्रियत्वमिति हि सिध्यति । ततश्चाहमस्याः प्रियः स्यामिति पतिसंकल्पायत्तं न पतिप्रियत्वमपि त्वात्मनः परमात्मनः कामाय संकल्पात्प्रियो भवतीत्यर्थः । आत्मशब्दस्य परमात्मनि मुख्यप्रवृत्तत्वात् । अत्रापि कामायेत्य(?)त्रापि पूर्ववच्चतुर्थी । एवमुत्तरत्रापि द्रष्टव्यम् ।

न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति । न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति । न वा अरे वित्तस्य कामाय वित्तं प्रियं भवत्यात्मनस्तु कामाय वित्तं प्रियं भवति । न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवत्यात्मनस्तु कामाय ब्रह्म प्रियं भवति ।

ब्रह्म ब्राह्मण इत्यर्थः ।

न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भव-
त्यात्मनस्तु कामाय क्षत्रं प्रियं भवति ।

क्षत्रं क्षत्रियवर्ण इत्यर्थः ।

न वा अरे लोकानां कामाय लोकाः प्रिया
भवन्त्यात्मनस्तु कामाय लोकाः प्रिया भवन्ति ।

स्वर्गाद्या लोका इत्यर्थः ।

न वा अरे देवानां कामाय देवाः प्रिया
भवन्त्यात्मनस्तु कामाय देवाः प्रिया भवन्ति ।
न वा अरे भूतानां कामाय भूतानि प्रियाणि
भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि
भवन्ति । न वा अरे सर्वस्य कामाय सर्वं प्रियं
भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति ।

स्पष्टोऽर्थः ।

ततः किमित्यत्राऽऽह—

आत्मा वा अरे द्रष्टव्यः श्रोतव्यो
मन्तव्यो निदिध्यासितव्यः ।

यस्मात्पतिजायादीनां प्रियत्वं यत्संकल्पायत्तं(तस्मात्)तस्य परमात्मनः प्रसादाय परमात्मा द्रष्टव्यः । स हि परमात्मदर्शनेन प्रसन्नः सन्सर्वेषामपि वस्तूनां पतिजायादिवत्ततोऽधिकं वा प्रियत्वमापादयितुं शक्नोति । 'न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम् । [छा०७।२६] इति श्रवणादिति भावः । अत्र स्वाध्यायस्यार्थपरत्वेनाधीतवेदः पुरुषः प्रयोजनवदर्थदर्शनात्तन्निर्णयाय स्वयमेव गुरुमुखान्न्याययुक्तार्थग्रहणलक्षणश्रवणे प्रवर्तत इति श्रवणस्य प्राप्तत्वाच्छ्रोतव्य इत्यनुवादः । स्वात्मन्येवमेवेति युक्तिभिः श्रुतार्थप्रतिष्ठापनलक्षणमननस्य श्रवणप्रतिष्ठार्थतया प्राप्तत्वान्मन्तव्य इति चानुवादः । अनवरतभावनारूपध्यानमेव निदिध्यासितव्य इति विधीयते । उपायत्वदशाप्रभृति भगवद्ध्यानस्यानुकूलत्वसूचनाय निदिध्यासितव्य इति सन्नन्तपदेन निर्देशः । अत्र स्मृतिलम्भे

सर्वग्रन्थीनां विमोक्ष इति च ध्यानस्यैव मोक्षाव्यवहितहेतुत्वश्रवणात् । 'क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे' [मु० २ । २ । ८] इति दर्शनस्यापि मोक्षाव्यवहितकारणत्वश्रवणादुभयोरप्येकार्थकत्वस्य वक्तव्यत्वाच्चाक्षुषज्ञानवाचितया दृशिधातोश्चाक्षुषज्ञानस्य च 'न चक्षुषा गृह्यते' इत्यचाक्षुषतया प्रतिपन्ने ब्रह्मण्यसंभवाद्दर्शनशब्देनोपचाराद्दर्शनसमानाकारमतिविशदं ज्ञानमभिधीयते । ततश्च द्रष्टव्यो निदिध्यासितव्य इत्याभ्यां दर्शनसमानाकारं ध्यानं विधीयते । आर्षेयं वृणीत एकं वृणीते द्वौ वृणीते त्रीन्वृणीते न चतुरो वृणीते न पञ्चातिवृणीत इत्यत्राऽऽर्षेयं वृणीते त्रीन्वृणीत इत्याभ्यां त्रित्वविशिष्टार्षेयवरणविधानवदिति द्रष्टव्यम् ।

तस्य किं फलमित्यत्राऽऽह—

मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या
विज्ञानेनेद१ँ सर्वं विदितं भवति ॥ ५ ॥

अत्र विज्ञानेनेति विज्ञानशब्दो निदिध्यासनपरः । 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो, निदिध्यासितव्यः' इति स्थानप्रमाणात् । तस्मिन्परमात्मनि दर्शनसमानाकारध्यानविषयीकृते सति तत्प्रसादात्सर्वं विदितं भवति । अनुकूलत्वेन विदितं भवति सर्वं प्रियं भवतीति यावत् । यद्वा निदिध्यासितव्यतया निर्दिष्टस्य परमात्मनो जगत्कारणत्वं लक्षणमाह—आत्मनो वा इत्यादिना । उपादानोपादेययोरभेदात्तस्मिञ्ज्ञाते सर्वं विदितं भवति । अत्र सर्वमिदमिति शब्दौ स्थूलावस्थचिदचिद्विशिष्टब्रह्मपरौ । आत्मशब्दोऽपि सूक्ष्मचिदचिद्विशिष्टब्रह्मपरः । अतस्तयोरभेदात्तद्विज्ञानेन सर्वं विज्ञातमित्युपपद्यते । अनेन जगदुपादानत्वमुक्तं भवति । अत्र निदिध्यासितव्य इत्युक्त्वा सर्वोपादानत्वकथनाज्जगत्कारणत्वं सफलपरविद्यानुयायीति वदन्ति ॥ ५ ॥

ननु कथमात्मनि विज्ञाते सर्वमिदं विज्ञातं स्याज्जगतस्तद्भिन्नत्वादित्याशङ्क्याऽऽह—

ब्रह्म तं परादाद्योऽन्यत्राऽऽत्मनो ब्रह्म वेद ।

ब्रह्म ब्राह्मणवर्णः । अस्याऽऽत्मनोऽन्यत्र परमात्मनोऽन्यत्र स्थितं न तु परमात्मनि स्थितमब्रह्मात्मकं स्वनिष्ठं ब्राह्मणवर्णं यो वेद तं ब्रह्म परादात्पराकुर्यादभिभवेत् । अन्यत्वेनावगतो ब्राह्मणवर्ण एव तं संसारयतीत्यर्थः । एवमुत्तरत्रापि द्रष्टव्यम् ।

क्षत्रं तं परादाद्योऽन्यत्राऽऽत्मनः क्षत्रं वेद
लोकास्तं परादुर्योऽन्यत्राऽऽत्मनो लोकान्वेद
देवास्तं परादुर्योऽन्यत्राऽऽत्मनो देवान्वेद
भूतानि तं परादुर्योऽन्यत्राऽऽत्मनो भूतानि
वेद सर्वं तं परादाद्योऽन्यत्राऽऽत्मनःसर्वं वेद ।

स्पष्टोऽर्थः । ननु सर्वस्य ब्रह्माधारतया ब्रह्मात्मत्वेऽपि ब्रह्मात्मकस्य शरीरभूतस्य जगतः शरीरिभूतब्रह्मभिन्नत्वेन ज्ञानेन तज्ज्ञानेन तज्ज्ञानासंभवात्तस्मिन्विज्ञात इदं सर्वं विदितमिति निर्देशो नोपपद्यत इत्याशङ्क्य सर्वस्यापि तच्छरीरत्वश(त्वाच्छ)रीरवाचिनां च शब्दानां शरीरिपर्यन्तत्वादिदं सर्वमितिशब्दाभ्यामन्यैरपि शब्दैस्तच्छरीरकं ब्रह्मैवाभिधीयत इत्यभिप्रेत्याऽऽह—

इदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा
इमानि भूतानीदꣳ सर्वं यदयमात्मा ॥ ६ ॥

ततश्चाऽऽत्मनि विज्ञात इदं सर्वं विदितं भवति सर्वशरीरकं ब्रह्म विदितं भवतीत्यर्थ उपपद्यत इति भावः ॥ ६ ॥

एवं जगत्कारणत्वविशिष्टपरमात्मोपासनं विधायोपासनोपकरणभूतमनःप्रभृतिकरणनियमनमाह—

स यथा दुन्दुभेर्हन्यमानस्य न बाह्या-
ञ्शब्दाञ्शक्नुयाद्ग्रहणाय दुन्दुभेस्तु ग्रह-
णेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः ॥७॥

दुन्दुभेरित्यनादरे षष्ठी । ग्रहणशब्द इह निरोधपरः । उपादाननिरोधयोर्द्वयोरपि ग्रहणशब्दवाच्यत्वात् । यथा गृहीतानि पुष्पाणि गृहीतश्चोर इति । यथा दुन्दुभौ हन्यमाने ततो निःसरतः शब्दान्न निरोद्धुं शक्नुयात् । कथं तर्हि निरुणद्धीत्यत्राऽऽह—दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः । दुन्दुभिनिरोधेन तदाहन्तृपुरुषनिरोधेन वा शब्दा निरुध्यन्ते भेरीदण्डयोरन्यतरनिरोधेन संयोगनिरोधद्वारा शब्दा निरुध्यन्ते । एवमिन्द्रियेषु व्याप्रियमाणेषु बाह्यार्थज्ञानं दुर्निरोधम् ।

अतो विषयापसारणेन वेन्द्रियनिरोधेन वा परमात्मसाक्षात्कारविरोधि-बाह्यार्थज्ञानं निरुध्यत इत्यर्थः । एवमुत्तरत्रापि द्रष्टव्यम् ॥ ७ ॥

स यथा शङ्खस्य ध्मायमानस्य न बाह्याञ्श-
ब्दाञ्शक्नुयाद्ग्रहणाय शङ्खस्य तु ग्रहणेन
शङ्खध्मस्य वा शब्दो गृहीतः ॥ ८ ॥

स यथा वीणायै वाद्यमानायै न बाह्याञ्श-
ब्दाञ्शक्नुयाद्ग्रहणाय वीणायै तु ग्रहणेन
वीणावादस्य वा शब्दो गृहीतः ॥ ९ ॥

अत्र वीणाया इति चतुर्थी षष्ठ्यर्थे । छान्दसो विभक्तिव्यत्ययः ॥ ९ ॥

सामान्येनोक्तं कारणत्वं प्रपञ्चयति—

स यथाऽऽर्द्रैधाग्नेरभ्याहितात्पृथग्धूमा विनिश्चरन्ति ।

एधशब्दोऽकारान्त इन्धनवाची । आर्द्रैधाग्निग्रहणं निमित्तोपादनयो-र्ग्रहणार्थम् । अग्निर्हि धूमोत्पत्तौ निमित्तम् । इन्धनं तूपादानम् । अभ्या-हितात् । ध्मानवीजनादिना प्रवर्तितादित्यर्थः । पृथग्विधा धूमा निर्ग-च्छन्तीत्यर्थः ।

एवं वा अरे अस्य महतो भूतस्य निःश्वसितमेतत् ।

महतो भूतस्य परमात्मनो निःश्वसितमनायासेनोद्भूतमेतद्वक्ष्यमाण-मित्यर्थः ।

किं तदित्यत्राऽऽह—

ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः
पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्या-
नानि व्याख्यानान्यस्यैव निःश्वसितानि ॥ १० ॥

भाव्यरूपाण्येतानि सर्वाणि भगवतो निःश्वसितानि । अयत्नेन तदुद्भूतानीत्यर्थः । यद्यपि सूत्रस्मृतिपुराणादयो व्यासाद्युद्भूता इति पुरा-णेषु प्रसिद्धिस्तथाऽपि तेषां भगवदंशत्वाद्भगवन्निःश्वसितोक्तिरुपपद्यत इति द्रष्टव्यम् । अत्र वाचकशब्दसृष्टिमात्रमुक्तम् । षष्ठे मैत्रेयीब्राह्मणे तु,

इष्टं हुतमाशितं पायितम् । इत्यादिना भोग्यभोगस्थानभोक्तृवर्गरूपवाच्यसृष्टेरुक्तत्वादनुक्तस्यान्यतो ग्राह्यत्वादत्रापि वाच्यसृष्टिरुक्तेति द्रष्टव्यम् । अनेन पूर्वं सामान्यतो निर्दिष्टं जगत्कारणत्वं विवृतं भवति ॥ १० ॥

स यथा दुन्दुभेर्हन्यमानस्येत्यादिना परोपासनोपकरणभूतकरणग्रामनियमनमुक्तं विशदयति—

स यथा सर्वासामपाᳬ समुद्र एकायन-
मेवᳬ सर्वेषाᳬ स्पर्शानां त्वगेकायनम् ।

समुद्रस्यापामयनत्वं नाम तदुपादातृत्वमेवं त्वचः स्पर्शायतनत्वं नाम तदुपादातृत्वम् । ततश्चायमर्थः—यथा समुद्रो भूयसीरपो गृह्णाति एवं त्वगिन्द्रियमसंख्याकान्स्पर्शविशेषान्गृह्णाति । ततश्च त्वगिन्द्रियस्पर्शविषयकव्यापारा अनन्ता इत्यर्थः । एवमुत्तरत्रापि द्रष्टव्यम् ।

एवं सर्वेषाᳬ रसानां जिह्वैकायनमेवᳬ सर्वेषां
गन्धानां नासिकैकायनमेवᳬ सर्वेषाᳬ रूपाणां
चक्षुरेकायनमेवᳬ सर्वेषाᳬ शब्दानाᳬ श्रोत्रमेका-
यनमेवᳬ सर्वेषाᳬ संकल्पानां मन एका-
यनमेवᳬ सर्वासां विद्यानाᳬ हृदयमेकायनम् ।

अवस्थाविशेषविशिष्टं मनो हृदयमित्युच्यते ।

एवᳬ सर्वेषां कर्मणाᳬ हस्तावेकायनमे-
वᳬ सर्वेषामानन्दानामुपस्थ एकायन-
मेवᳬ सर्वेषां विसर्गाणां पायुरेकायन-
मेवᳬ सर्वेषामध्वनां पादावेकायनम् ।

अध्वनामध्वगमनानामित्यर्थः ।

एवᳬ सर्वेषां वेदानां वागेकायनम् ॥ ११ ॥

स्पष्टोऽर्थः । ततश्चैकैकेन्द्रियवृत्तिविशेषा अनन्ताः । ततश्चाऽऽत्मसाक्षात्कारार्थिनैते वृत्तिविशेषा निरोद्धव्या इत्यभिप्रायः । ततश्च स यथा दुन्दुभेर्हन्यमानस्येत्यनेनोक्तं ब्रह्मोपासनोपयोगिकरणग्रामनियमनं विवृतं भवति ॥ ११ ॥

सर्वावस्थास्वपि जीवस्य परमात्मनिष्ठतया स्वातन्त्र्याभावज्ञापनाय जीववाचिशब्देन परमात्मानं निर्दिशन्नमृतत्वोपायप्रवृत्तिप्रोत्साहनाय भूतसंघात्मकशरीरजन्ममरणानुविधायिनः संसरतो जीवस्यापरिच्छिन्नज्ञानै[का]कारतामापादयति—

स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेत न हास्योद्ग्रहणायैव स्यात् । यतो यतस्त्वाददीत लवणमेव ।

सैन्धवखिल्यो लवणखण्डः । खिल एव खिल्यः स्वार्थे यत् । यथा सैन्धवशकलमुदके प्रक्षिप्तमुदकमनुप्रविश्य विलीयत एव । अस्य विलीनस्य लवणस्योद्ग्रहणायोदकात्पृथक्कृत्य ग्रहीतुं यथा नैव कोऽपि शक्तः स्यात् । तच्चोदकं यथा यतो यतो यस्माद्यस्माद्देशान्मध्यतः पार्श्वतो वाऽऽददीत तत्तोयं लवणमेव भवति ।

एवं वा अरे महद्भूतमनन्तमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति ।

एवमेवेदं महद्भूतमनन्तमपरिच्छेद्यमपारं गुणतोऽप्यपरिच्छेद्यं ब्रह्म विज्ञानघन एव जीवशरीरकतयैतेभ्यो भूतेभ्य उत्थाय तान्येवानु विनश्यति भूतेषूत्पाद्यमानेषु स्वयमुत्पाद्यमानस्तेषु नश्यत्स्वनु पश्चात्स्वयं नश्यतीत्यर्थः । देहोत्पत्तिविनाशानुविधायित्वाद्विनाशवान्भवति । विनाशो नामात्यन्तज्ञानसंकोचः । विनश्यति नश्यतीत्यर्थ इति 'स्वाप्ययसंपत्त्योः' [ब्र० सू० ४ । ४ । १६] इति सूत्रे भगवता भाष्यकृतोक्तम् । उत्पत्तिर्नाम विकासप्रादुर्भावः ।

न प्रेत्य संज्ञाऽस्तीति होवाच याज्ञवल्क्यः ॥ १२ ॥

प्रेत्य चरमदेहवियोगं प्राप्य मोक्षदशायां स्वाभाविकापरिच्छिन्नज्ञानसंकोचाभावे न संज्ञाऽस्ति । समित्येकीकारे । ज्ञाधातोर्ज्ञानमर्थः । ततश्च भूतसंघातेनैकीकृत्य ज्ञानं संज्ञाशब्दार्थ इति द्रष्टव्यम् । न च महद्भूतमनन्तमपारमिति निर्दिष्टस्यैव ब्रह्मणो विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थायेति जीवत्वसंसारित्वावेदनं मुख्यमेवास्तु विज्ञानघनो जीवशरीरक इति कुतो व्याख्यायत इति वाच्यम् । 'निरनि(णि)ष्टो

निरवद्यः’ इति श्रुतिप्रतिपन्नस्य परमात्मनः संसारित्वासंभवात्। मोक्षधर्मे जनकयाज्ञवल्क्यसंवादे—

अन्यश्च राजन्स परस्तथाऽन्यः पञ्चविंशकः।
तत्स्थत्वादनुपश्यन्ति एक एव हि साधवः॥

इति शरीरशरीरिणोर्भेदेऽपि शरीरान्तःस्थितस्य शरीरिण एकत्वाद्यमेकः पुरुष इति व्यवहारवदन्तरवस्थितिनिबन्धनाः प्रकार्यैक्यविषया अभेदव्यवहारा इत्युक्तम्। ततश्च जीवस्य परमात्मशरीरतया तद्वाचिना विज्ञानघनशब्देन परमात्मनोऽभिधानं तद्धर्मभूतोत्पत्तिविनाशादिना धर्मवत्त्वं च न विरुद्धमिति द्रष्टव्यम्। न चोत्थानविनाशयोस्तद्द्वारकविशेषणत्व आवश्यकेऽपि विज्ञानघनत्वस्य परमात्मनि साक्षादेव संभवाद्विज्ञानघनशब्दस्य न जीवशरीरकपरमात्माभिधानाश्रयणक्लेशः। ‘अवस्थितेरिति काशकृत्स्नः [ब्र० सू० १।४।२२] इति सूत्रभाष्ये कुतो न भूत इति वाच्यम्। परमात्मनः स्वरूपेणोत्थानविनाशासंभवाज्जीवरूपेणोत्थानविनाशस्य वक्तव्यत्वेन जीववाचिपदस्य कस्यचिदावश्यकत्वादन्यस्य चाभावाद्विज्ञानघनशब्दस्य जीववाचित्वसंभवाच्च विज्ञानघनशब्देन जीवशरीरकपरमात्माऽभिधीयत इत्युक्तौ विरोधाभावात्॥ १२॥

सा होवाच मैत्रेय्यत्रैव मा भग-
वानमूमुहन्न प्रेत्य संज्ञाऽस्तीति।

वाक्य एव मामामम्मुहत्। मुहेर्णौ चङि मोहयति स्मेत्यर्थः। विज्ञानशब्दस्य ज्ञानैकाकारस्याऽऽत्मनो मुक्त्यै संज्ञाभावो विरुद्ध इति मोहो मे संभूत इति भावः। यद्यपि संज्ञाशब्दोऽपि देहात्मैक्यभ्रान्तिपर इति न विरोधस्तथाऽपि तदभिप्रायानभिज्ञानान्मुह्यन्ती मैत्रेय्येवमुक्तवतीति द्रष्टव्यम्।

स होवाच न वा अरेऽहं मोहं ब्रवी-
म्यलं वा अर इदं विज्ञानाय॥ १३॥

न प्रेत्य संज्ञाऽस्तीति नाहं वाचो ब्रवीमीदं विज्ञानघनशब्दितं महद्भूतं पूर्वनिर्दिष्टं प्रेत्यापि विज्ञानायालं ज्ञातुं पर्याप्तम्। ततश्च मुक्तावपि ज्ञानमस्ति ज्ञानिन एव सतो मुक्तस्य प्रेत्य न संज्ञाऽस्तीति पूर्वनिर्दिष्टः संज्ञाभावो देहात्मैक्यविषयकभ्रान्त्यभावाच्चेति भावः॥ १३॥

एवं मुक्तौ देहात्मभ्रमनिवृत्तिमुक्त्वा स्वनिष्ठताभ्रमनिवृत्तिं प्रतिपादयति—

यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति ।

यत्र यस्यामवस्थायां द्वैतमिव भवति स्वनिष्ठतया परमात्मनः पृथगिव भवति स्वतन्त्र इव भवतीति यावत् । स्वातन्त्र्यस्याप्रामाणिकत्वद्योतनार्थ इवशब्दः । तदितर इतरं जिघ्रति । तत्तदेतरो भिन्नात्मक इतरं भिन्नात्मकं जिघ्रति । अत्रेतरेणेत्यध्याहार्यम् । उत्तरत्र तत्केन कं पश्येदिति दर्शनात् । इतरेण स्वतन्त्रेण करणेन जिघ्रतीत्यर्थः ।

तदितर इतरं पश्यति तदितर इतरमभिवदति तदितर इतरमभिशृणोति तदितर इतरं मनुते तदितर इतरं विजानाति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं जिघ्रेत्तत्केन कं पश्येत्तत्केन कमभिवदेत्तत्केन कꣳ शृणुयात्तत्केन कं मन्वीत तत्केन कं विजानीयात् ।

यत्र यदा सर्वं वस्तु एकात्मकमेवाभूत्तत्तदा केन भिन्नात्मकेन करणेन कं भिन्नात्मकं जिघ्रेदित्यर्थः । एवं सर्वत्र द्रष्टव्यम् । अत्र सदैकात्मकस्य जगतः कालभेदेन भिन्नाभिन्नात्मकत्वासंभवादात्मैवाभूदेकात्मकत्वेन ज्ञातमभूदित्येवार्थः । यस्याऽऽत्मभेदप्रतीतिः कियत्यप्यस्ति तस्य कर्तृकर्मकरणेषु भिन्नात्मकत्वप्रतीतिरनुवर्तते । यस्याऽऽत्मभेदप्रतीतिर्यदा सर्वथा नास्ति तदा कर्तृकर्मकरणेषु भिन्नात्मकतया प्रतीतिः सर्वथा नास्तीति पर्यवसितोऽर्थः । शिष्टं स्पष्टम् ।

येनेदꣳ सर्वं विजानाति तं केन विजानीयात् ।

येन परमात्मना प्रसन्नेनानुगृहीतः सर्वज्ञो भवति तं परमात्मानं केन हेतुना विजानीयात् । 'क इत्था वेद यत्र सः' [काठ० १ । २ । २५] इतिवत्परमात्मप्रसादमन्तरेण परमात्मा दुःखबोध इत्यर्थः ।

विज्ञातारमरे केन विजानीयादिति ॥ १४ ॥

इति बृहदारण्यकोपनिषदि द्वितीयाध्याये चतुर्थं ब्राह्मणम् ॥ ४ ॥

अत्र विज्ञातृशब्देन प्रक्रमोदितजगत्कारणत्वाक्षिप्तसार्वज्ञ्याश्रयः परमात्मैवोच्यते। तादृशं विज्ञातारं सर्वज्ञं परमात्मानं प्रक्रमोदितध्यानं विना केन केवलयज्ञदानाद्युपायेन विजानीयात्। उक्तं च व्यासार्यैः- परमात्मप्रसादादृते तस्य दुरवगमत्वपरं तं केन विजानीयादिति पूर्ववाक्यमुपासनातिरिक्तकेवलयज्ञदानाद्युपायान्तरनिषेधपरं विज्ञातारमरे केन विजानीयादित्युत्तरवाक्यमिति। ततश्च परमात्मप्रसादपरमात्मोपासनयोर्द्वयोरप्यावश्यकत्वं द्वाभ्यां वाक्याभ्यां प्रतिपादितं भवति। अत्र परमात्मोपासनतत्प्रसादसाध्यपरमात्मावगतिः किंरूपेति चिन्तायां दर्शनसमानाकारध्यानरूपावगतिरेव प्रसादोपासनसाध्यत्वेन वाक्यद्वयप्रतिपन्नेति केचिदाहुः। मुक्तिकालीना देशविशिष्टब्रह्मसाक्षात्कारलक्षणेत्यपरे। नोभयथाऽपि विरोधं पश्यामः। इतिशब्दः प्रतिवचनसमाप्तौ। इति मैत्रेयीब्राह्मणम्। इदं च ब्राह्मणं समन्वयाध्याये चतुर्थपादे चिन्तितम्। उपक्रमे पतिजायापुत्रवित्तादिप्रियसंबन्धित्वलक्षणजीवलिङ्गकीर्तनान्मध्ये च 'विज्ञानघन एवैतेभ्यः समुत्थाय तान्येवानुविनश्यति' [बृ० २। ४। १२] इति देहानुबन्धिजननमरणलक्षणजीवलिङ्गप्रतिपादनादन्ते च 'विज्ञातारमरे केन विजानीयात्' इति विज्ञातृत्वरूपजीवलिङ्गकीर्तनाच्च कृत्स्नमपि प्रकरणं जीवपरमेव। परमात्मलिङ्गानि तु कथं चित्रेयानीति पूर्वपक्षे पठत्याचार्यः—'वाक्यान्वयात्' [ब्र० सू० १। ४। १९] कृत्स्नस्य वाक्यसंदर्भस्यान्वयः परमात्मन्येवोपपद्यते नान्यत्र। तथा हि—'अमृतत्वस्य तु नाऽऽशाऽस्ति वित्तेन' [बृ० २। ४। २] इति याज्ञवल्क्येनाभिहिते 'येनाहं नामृता स्यां किमहं तेन कुर्याम्' [बृ० २। ४। ३] इत्यमृतत्वोपायमात्रार्थिन्यै मैत्रेय्यै 'आत्मा वा अरे द्रष्टव्यः' [बृ० २। ४। ५] इति द्रष्टव्यत्वेनोपदिष्टस्याऽऽत्मनः परमात्मत्वमेवाभ्युपगन्तव्यम्। आख्यायिकाया विद्यागतविशेषप्रतिपादनोपयुक्तत्वस्य पुरुषार्थपादे स्थितत्वात्। तत्र हि 'अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुः' [बृ० ४। ५। १] इत्याद्याख्यानानां 'सर्वाण्याख्यानानि पारिप्लवे शंसन्ति' [शतपथ० ब्रा० १३। ४। ३] इत्यश्वमेधगतपारिप्लवनामकशस्त्रे विनियुक्तत्वात्पारिप्लवार्थान्याख्यानानि न तु विद्योपयोगीनीति 'पारिप्लवार्थाः' [ब्र० सू० ३। ४। २३] इति सूत्रखण्डेन पूर्वपक्षं कृत्वा 'न विशेषितत्वात्'। न सर्वाण्याख्यानानि परिप्लवार्थानि भवितुमर्हन्ति सर्वाख्यानानि शंसन्तीति विधाय

'मनुर्वैवस्वतो राजा' [श०ब्रा० १३ । ४ । ३] इत्यादिना केषांचिदाख्यानानामेव विशेषितत्वाद्वाक्यशेषपठितानामेवाऽऽख्यानानां पारिप्लवे विनियोगो न सर्वेषाम् । अतो विद्यासंनिधिपठितानां याज्ञवल्क्याख्यानानां तत्तद्विद्यागतपरमात्मविषयकत्वादिति शेषप्रतिपादनोपयोगित्वमेव । 'तथा चैकवाक्यतोपबन्धात्' [ब्र०सू०३ । ४ । २४] यथा तेजो वै घृतं सोऽरोदीत्येवमादीनामुक्ताः शर्करा उपदधाति तस्माद्बर्हिषि रजतं न देयमित्यादिविधिनिषेधैकवाक्यतया विधिनिषेधस्तुतिनिन्दाद्युपयोगित्वं तथैव 'आत्मा वा अरे द्रष्टव्यः' इति विधिनाऽऽख्यानानामेकवाक्यतोपबन्धादविधेयविद्यागतविशेषोपयोगित्वमवश्याभ्युपगन्तव्यमिति सिद्धान्तितम् । ततश्चोपक्रमगताख्यायिकावशात्परमात्मविषयत्वमेव प्रकरणस्य । तथा 'अस्य महतो भूतस्य निश्वसितमेतत्' 'आत्मनो वा अरे दर्शनेन श्रवणेन इत्यादिना प्रतीयमानं सर्वोपादानत्वं 'ब्रह्म तं परादात्' इत्यादिना प्रतीयमानं सार्वात्म्यं च न परमात्मनोऽन्यत्र संभवति । यदुक्तं पतिजायापुत्रादिसंबन्धित्वकीर्तनं जीवलिङ्गमिति तन्न । तस्य वाक्यस्य परमात्मानुगुणतयाऽर्थवर्णनोपपत्तेः । तद्वर्णनप्रकारश्च पूर्वमेव प्रदर्शितः । नन्वेवं 'विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय' इति जीववाचिविज्ञानघनशब्देन कथं परमात्मनोऽभिधानमुत्पाद्यविनाशादिजीवलिङ्गानां कथं परमात्मनि समन्वय इति चेत्तत्राऽऽह—'प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः' [ब्र० सू० १ । ४ । २०] एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाक्षिप्तोपादानोपादेयभावलब्धाभेदसूचकं जीवधर्माणां तत्र कीर्तनमित्याश्मरथ्य आचार्यो मन्यते । 'उत्क्रमिष्यत एवंभावादित्यौडुलोमिः' । [ब्र० सू० १ । ४ । २१] ।

> आ मुक्तेर्भेद एव स्याज्जीवस्य च परस्य च ।
> मुक्तस्य तु न भेदोऽस्ति भेदहेतोरभावतः ॥

इत्युक्तरीत्या मुक्तिदशायां भाव्यभेदमाश्रित्य परमात्मनि जीवधर्माभिधानमुपपद्यत इत्यौडुलोमिराचार्यो मन्यते । 'अवस्थितेरिति काशकृत्स्नः' । [ब्र० सू० १ । ४ । २२] जीवे परमात्मनोऽन्तर्यामितयाऽवस्थितेराकृत्यधिकरणन्यायेन शरीरभूतजीववाचिशब्दैः शरीरिणः परमात्मनोऽभिधानसं [भ] वाच्छरीरभूतजीवधर्माणां शरीरिणि परमात्मन्युपपत्तेश्च जीवश्रुतलिङ्गानां परमात्मनि नानुपपत्तिरिति स्थितम् । अत्र तु काशकृत्स्नमतमेवाऽऽचार्यमतं तदुपरि पक्षान्तरानुपन्यासात् ।

आश्मरथ्यौडुलोमिमतयोर्दुष्टत्वाच्चोपादानोपादेययोर्भेदाभेदवाद्याश्मरथ्यमतं जैनमतप्रतिक्षेपादेव प्रतिक्षिप्तम् । तर्कपादे जैनानां मतं साधु ते चैवं मन्यन्ते । जीवाजीवास्रवसंवरनिर्जरबन्धमोक्षा नाम सप्त पदार्थाः । बोधात्मको जीवः । जडवर्गस्त्वजीवः । इन्द्रियप्रवृत्तिरास्रवः । शमदमादिरूपा प्रवृत्तिः संवरः । तप्तशिलारोहणादि निर्जरः । बन्धोऽष्टविधं कर्म । तत्र घातिकर्म चतुर्विधम्—ज्ञानावरणीयं दर्शनावरणीयं मोहनीयमान्तरायिकमिति । तत्र सत्यज्ञानान्न मोक्ष इति विपर्ययो ज्ञानावरणीयं कर्म । आर्हतदर्शनाभ्यासान्न मोक्ष इति ज्ञानं दर्शनावरणीयम् । बहुषु विप्रतिपिद्धेषु मोक्षमार्गेषु विशेषानवधारणीयं मोहनीयम्—मोक्षमार्गप्रवृत्तानां तद्विघ्नकरं विज्ञानमान्तरायिकम् । तानीमानि निःश्रेयोमार्गहन्तृत्वाद्घातिकर्माण्युच्यन्ते । अथाघातिकर्म चतुर्विधम्—वेदनीयं नामिकं गोत्रिकमायुष्कं चेति । तत्र वेदनीयं कर्म शुक्लपुद्गलविपाकहेतुः । तद्धि कर्मबन्धोऽपि न भवति निःश्रेयसपरिपन्थिज्ञानविघातित्वात् । शुक्लपुद्गलारम्भकं वेदनीयकर्मानुगुणं नामिकं कर्म । तद्धि शुक्लपुद्गलस्याद्यामवस्थां कललबुद्बुदादिकमारभते । गोत्रिकं त्वव्याकृतं ततोऽप्याद्यं शक्तिरूपेणावस्थितम् । आयुष्कमायुः कथयत्युत्पादनद्वारेत्यायुष्कम् । तान्येतानि शुक्लपुद्गलाश्रयत्वादघाति कर्माणि । तदेतत्कर्माष्टकं पुरुषं बध्नातीति बन्धः । निर्गलितसमस्तक्लेशतद्वासनस्यानावरणज्ञानसुखैकतानस्याऽऽत्मन उपरि देशावस्थानं मोक्ष इत्येके । अन्ये तूर्ध्वगमनशीलस्य जीवस्य शुष्कालाबूफलोन्मज्जनवत्सततोर्ध्वगमनं मोक्ष इति वर्णयन्ति । इममन्यमपि प्रपञ्चमाचक्षते । पञ्चास्तिकाया नाम जीवास्तिकायः पुद्गलास्तिकायो धर्मास्तिकायोऽधर्मास्तिकाय आकाशास्तिकायश्चेति । अस्तीति कायते शब्द्यत इत्यस्तिकायः । जीव एवास्तिकायो जीवास्तिकायः । एवं सर्वत्र । तत्र च जीवास्तिकायस्त्रिविधः–बद्धो मुक्तो नित्यसिद्धश्च । नित्यसिद्ध आर्हतः । इतरौ द्वौ प्रसिद्धौ । पूर्यते गलतीत्युपचितापचितं वस्तु पुद्गलशब्देनोच्यते । पुद्गलास्तिकायश्च षोढा—पृथिव्यादिभूतचतुष्टयं स्थावरं जङ्गमं चेति । धर्मास्तिकायः प्रवृत्त्यनुमेयः । अधर्मास्तिकायः स्थितिहेतुः । आकाशास्तिकायो द्विविधः–लोकाकाशोऽलोकाकाशश्चेति । उपर्युपरि वर्तमानानां लोकानामन्तर्वर्त्याकाशो लोकाकाशः । सर्वेषां लोकानामूर्ध्ववर्त्यनावृताकाशोऽलोकाकाशः । सर्वेऽप्येते पदार्थाः स्यादस्ति स्यान्नास्ति स्यादस्ति च नास्ति च स्यादवक्तव्यः स्यादस्ति चावक्तव्यः स्यान्नास्ति चावक्तव्यः स्यादस्ति च नास्ति चावक्तव्य

इत्येवं सत्त्वासत्त्वसदसद्विलक्षणत्वसत्त्वविशिष्टसदसद्विलक्षणत्वासत्त्वविशिष्टसदसद्विलक्षणत्वरूपसप्तभङ्गीर(रि)ता: । स्याच्छब्दोऽयं तिङन्तप्रतिरूपको निपातोऽनेकान्तद्योती । एवं सर्वं वस्त्वनेकान्तमिति । अतस्तन्मतं कस्याप्यप्रतिक्षेपकत्वादिति पूर्वपक्षे प्राप्ते 'नैकस्मिन्नसंभवात्' [ब्र०सू०२।२।३३] एकस्मिन्वस्तुनि सत्त्वासत्त्वभिन्नत्वाभिन्नत्वादिविरुद्धधर्माणां परस्परविरहस्वरूपाणामसंभवात्तन्मतमसमञ्जसम् । प्रमाणाप्रमाणविभागभङ्गप्रसङ्गेन सर्वव्यवहारोच्छेदप्रसङ्गात् । 'एवं चाऽऽत्माकात्स्न्र्यम् ।' [ब्र० सू० २ । २ । ३४] जीवस्य देहानुरूपपरिमाणत्वमित्येवमभ्युपगच्छतां जैनानां हस्त्यादिशरीरस्थस्याऽऽत्मनो न्यूनपरिमाणमशकादिशरीरानुप्रवेश आत्मनः परिपूर्णता न स्यात् । अतः संकोचविकासधर्मतयाऽऽत्मनः पर्यायेणावस्थान्तरापत्त्या न विरोध इति चेत्तत्राऽऽह—'न च पर्यायादप्यविरोधो विकारादिभ्यः ।' [ब्र० सू० २।२।३५] कालभेदेन संकोचविकासावस्थाभ्युपगमे विकारित्वानित्यत्वादिदोषप्रसङ्गः । 'अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः' [ब्र० सू० २।२।३६] । जीवस्य यदन्त्यपरिमाणं मोक्षावस्थागतं तस्य देहान्तरपरिग्रहाभावेनावस्थितत्वात्तस्य परिमाणस्य तदाश्रयस्य च जीवस्य नित्यत्वादुत्तरावधिविधुरत्वेन नित्यत्वात्तदेव परिमाणं पूर्वत्राप्यविशिष्टमित्येवाभ्युपगन्तव्यम् । उत्तरावधिशून्यस्य पूर्वावध्यभावात् । अतश्च देहभेदेन तदनुरूपपरिमाणभेद इति जैनानां दर्शनमसमञ्जसम् । ततश्च जैनमतप्रतिक्षेपेणैव भेदाभेदसमावेशासमावेशवाद्याश्मरथ्यमतमपि निरस्तमेव ।

परमात्मात्मनोर्योगः परमार्थ इतीष्यते ।
मिथ्यैतदन्यद्द्रव्यं हि नैति तद्द्रव्यतां यतः ॥

इति स्मरणाद्ब्रह्मभिन्नस्य जीवस्य मुक्तौ आत्मैक्यवाद्यौडुलोमिमतमपि निरस्तम् । अतः काशकृत्स्नमतमेव भगवद्बादरायणाभिमतम् । अत एव 'अंशो नानाव्यपदेशात्' [ब्र० सू० २।३।४३] इति जीवस्य ब्रह्मांशत्वमेवोक्तम् । तत्र ह्यधिकरणे 'ज्ञाज्ञौ द्वावजौ' [श्वे० १।९] इत्यादिभेदश्रुत्यनुरोधादभेदो वा जात्याद्यभिप्रायेण गौणो नेतव्यः । अथवा तत्त्वमस्याद्यभेदश्रुत्यनुरोधाद्भेदव्यपदेश औपाधिकभेदपरतया नेतव्य इत्येवं पूर्वपक्षे प्राप्त इदमुच्यते—'अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके' [ब्र० सू० २।३।४३] भेदव्यपदेशा-

दन्यथाऽपि व्यपदेशाच्छ्रुतिद्वयानुग्रहाय ब्रह्मणोंऽशो जीव इत्यवगम्यते। चिदचिद्विशिष्टं हि ब्रह्मस्वरूपं तत्र विशेषणभूतचिदंशस्यान्तर्भूतत्वाभेद-व्यपदेशोपपत्तिः। विशेष्यापेक्षया विशेषणस्य भिन्नत्वाद्भेदव्यपदेश-स्याप्युपपत्तिः। 'ब्रह्म दाशा ब्रह्म दासा ब्रह्मैवेमे कितवा ये ब्रूत' इति कितवादीनामपि ब्रह्मत्वमेके शाखिनोऽधीयते। नास्याभेदव्यपदेशस्य गौणत्वं वक्तुं युज्यते नापि सृज्यत्वसंहार्यत्वादिलक्षणभेदव्यपदेशस्य मानान्तरासिद्धार्थाभिधायिनोऽनुवादित्वं गौणत्वं वा वक्तुं युज्यते। अत उभयव्यपदेशमुख्यत्वाय नीलगोत्वाद्यपृथक्सिद्धविशेषणभूतरूप-जात्यादिविशिष्टद्रव्यस्य यथा रूपजात्यादिविशेषणमंश एवमपृथक्सि-द्धविशेषणभूतः शक्तिस्थानीयो जीवोंऽश इत्यर्थः। 'मन्त्रवर्णाच्च' [ब्र० सू०२।३।४४]। पादोऽस्य विश्वा भूतानीति मन्त्रवर्णेन सर्वजीवानां पादशब्दितांशत्वप्रतिपादनात्। 'अपि च स्मर्यते' [ब्र० सू० २।३।४५] ममैवांशो जीवलोके [गी० १५।७] इति गीतावचनाच्चांशत्वम्। ननु जीवस्यांशत्वे जीवस्य ब्रह्मैकदेशत्वावश्यंभावेन तद्गता दोषा ब्रह्मणि स्युः। नेत्युच्यते। 'प्रकाशादिवत्तु नैवं परः' [ब्र० सू० २।३।४६]। तुशब्दश्चोद्यं व्यावर्तयति। परः परमात्मैवं न जीववद्दुष्टः। यथा प्रकाशगोत्वादिविशिष्टप्रभावत्। गवादिद्रव्यस्य प्रभागोत्वादिकमंश-स्तादृशोऽयमंशः। न तु घटाकाशादिवत्तदेकदेशरूपः। अतो न जीव-दोषेण परस्य दुष्टत्वम्। 'स्मरन्ति च' [ब्र० सू० २।३।४७]। स्मरन्ति च पराशरादयः।

एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा।
परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत्॥

इति प्रकाशाद्यंशसाम्यम्। ननु सर्वेषां जीवानां ब्रह्मांशत्वे समाने केषांचिद्वेदाध्ययनाद्यनुज्ञा केषांचित्तत्परिहार इति व्यवस्था कथं संग-च्छतां तत्राऽऽह—'अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवत्' [ब्र० सू० २।३।४८] यथाऽग्न्यादेः श्रोत्रियचण्डालागारादिसंबन्धदर्शनेन हेयत्वोपादेयत्वमेवं ब्रह्मांशत्वाविशेषेऽपि जीवानां त्रैवर्णिकात्रैवर्णिक-शरीरसंयोगाद्वेदाध्ययनानुज्ञापरिहारावुपपद्येते। 'असंततेश्चाव्यतिकरः' [ब्र०सू०२।३।४९]प्रतिशरीरं भिन्नानां जीवानामणुत्वेन सर्वत्रासंगतत्वान्न भोगव्यतिकरदोषोऽपि भवति। ननु जीवब्रह्माभेदपक्षेऽप्यविद्याकृतोपा-धिभेदाद्भोगासंकर उपपत्स्यते तत्राऽऽह—'आभास एव च' [ब्र०सू०२।

३ । ५०] । अखण्डैकरसप्रकारमात्रस्वरूपस्य ब्रह्मणोऽविद्याकृतस्वरूपतिरोधानतत्पूर्वकोपाधिभेदपरिकल्पनहेतुराभास एव । प्रकाशस्वरूपस्य तिरोधानं हि प्रकाशनाश एवेति पर्यवस्येत् । ननु पारमार्थिकोपाध्युपहितब्रह्मजीववादे उपाधिभेदहेतुभूतानाद्यदृष्टवशाद्भोगव्यवस्था भविष्यति तत्राऽऽह—'अदृष्टानियमात' [ब्र० सू० २ । ३ । ५१] ब्रह्मस्वरूपस्य च्छेदभेदाद्यसंभवेन सर्वेषामदृष्टानां ब्रह्मस्वरूपमात्रसमवायितयाऽदृष्टानामनियतत्वान्न भोगव्यवस्था सिध्येत् । न च दृष्टहेतुभूताभिसंध्यादिव्यवस्थयाऽदृष्टव्यवस्था तद्द्वारा भोगव्यवस्था च भविष्यतीत्यत्राऽऽह —'अभिसंध्यादिष्वपि चैवम्' । अभिसंध्यादीनामपि च्छेदनाद्यनर्हब्रह्मस्वरूपमात्रसंबन्धित्वादव्यवस्था तदवस्थैव । ननु ब्रह्मस्वरूपस्यैकत्वेऽप्युपाधिसंबन्धिप्रदेशभेदादुपपद्यते भोगव्यवस्थेति चत्तन्न । उपाधीनां तत्र तत्र गमनात्सर्वप्रदेशानां सर्वोपाध्यन्तर्भावाद्भोगव्यतिकरस्तदवस्थ एव । प्रदेशभेदेनोपाधिसंबन्धेऽपि सर्वस्य ब्रह्मप्रदेशत्वात्सर्वसंबन्धिदुःखं ब्रह्मण एव स्यादिति ब्रह्मभावो(वे) महाननर्थ आपद्येतेति स्थितम् । ततश्चान्तर्यामितयाऽवस्थितेः शरीरवाचिनां च शब्दानां शरीरिपर्यन्तत्वाज्जीववाचिविज्ञानघनशब्देन परमात्माभिधानं न विरुध्यत इति काशकृत्स्नमतमेव बादरायणमतम् । प्रकृतमनुसरामः ।

इति बृहदारण्यकोपनिषत्प्रकाशिकायां द्वितीयाध्यायस्य
चतुर्थं ब्राह्मणम् ॥ ४ ॥

इयं पृथिवी सर्वेषां भूतानां मध्वस्यै
पृथिव्यै सर्वाणि भूतानि मधु ।

सर्वभूतानां धारणान्नपानादिहेतुतया मधुत्वम् । अस्यै पृथिव्यै । अस्याः पृथिव्या इत्यर्थः । सर्वभूतानां पृथिवीधार्यत्वेन तत्पोष्यत्वेन तदनुकूलत्वान्मधुत्वम् । एवं पृथिव्या भूतानां च परस्परं मधुत्वमित्यर्थः ।

यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो
यश्चायमध्यात्मꣳ शारीरस्तेजोमयोऽमृतमयः पुरुषः।

सर्वभूतोपजीव्यतया मधुभूतायामस्यां पृथिव्यां तेजोमयः स्वयंप्रकाशज्ञानमय इति यावत् । अमृतमयो मरणधर्मशून्यः । अपहतपाप्मत्वा-

द्विगुणाश्रय इति यावत् । तत्रान्तर्यामितयाऽवस्थितो यः पुरुषो यश्चाध्यात्मम् । अत्राध्यात्ममित्यत्राऽऽत्मशब्देन देहेन्द्रियमनःप्राणजीवसंघात उच्यते । तस्मिन्यः शारीरः शरीरान्तर्यामी तेजोमयोऽमृतमयश्च यः पुरुषः । अत्र शरीरस्य पृथिवीविकारत्वादधिभूतं पृथिव्याः स्थानेऽध्यात्मं शरीरस्य निवेशः ।

अयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेद॰ सर्वम् ॥ १ ॥

योऽयमात्मा । 'आत्मा वा अरे द्रष्टव्यः' [बृ० २ । ४ । ५] इति मैत्रेयीब्राह्मण आत्मतया निर्दिष्टः सोऽयमेव पृथिव्यन्तर्यामी शरीरान्तर्यामी चायमेवेत्यर्थः । इदममृतमुपकोशलविद्यादौ 'एतदमृतमेतदभयमेतद्ब्रह्म' इत्यमृतत्वब्रह्मत्वादिना निर्दिश्यमानमपीदमेव 'सर्वं खल्विदं ब्रह्म' इत्यादौ सर्वोपादानतया निर्दिश्यमानमपीदं ब्रह्मेत्यर्थः । एवमुत्तरत्रापि द्रष्टव्यम् ।

इमा आपः सर्वेषां भूतानां मध्वासामपा॰ सर्वाणि भूतानि मधु यश्चायमास्वप्सु तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्म॰ रैतसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेद॰ सर्वम् ॥ २ ॥

'यो रेतसि तिष्ठन्रेतसोऽन्तरः' [बृ० ३ । ७ । २३] इत्यन्तर्यामिब्राह्मणे रेतोन्तरतया निर्दिष्टो रैतस इत्युच्यते । रेतसो जलविकारत्वात् । 'आपो रेतो भूत्वा शिश्नं प्राविशन्' [ऐ० २ । २] इति श्रुतेश्च । अपां स्थानेऽध्यात्मं रेतसो निवेशः ॥ २ ॥

अयमग्निः सर्वेषां भूतानां मध्वस्याग्नेः सर्वाणि भूतानि मधु यश्चायमस्मिन्नग्नौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं वाङ्मयस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेद॰ सर्वम् ॥ ३ ॥

अग्न्यभिमानिकत्वाद्वाचः । 'अग्निर्वाग्भूत्वा मुखं प्राविशत्' [ऐ० २ । ४] इति श्रुतेश्चाध्यात्मं तत्स्थाने वाचो निवेश उपपद्यते । एवमुत्तरपर्यायेष्वपि कश्चन संबन्धो द्रष्टव्यः ॥ ३ ॥

---

१ यमस्मिन्नग्नौ । इति अत्रत्यमुद्रितपुस्तके वर्तते ।

अयं वायुः सर्वेषां भूतानां मध्वस्य वायोः सर्वाणि भूतानि मधु यश्चायमस्मिन्वायौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं प्राणस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳसर्वम् ॥ ४ ॥

अयमादित्यः सर्वेषां भूतानां मध्वस्याऽऽदित्यस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्नादित्ये तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं चाक्षुषस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳसर्वम् ॥ ५ ॥

इमा दिशः सर्वेषां भूतानां मध्वासां दिशां सर्वाणि भूतानि मधु यश्चायमासु दिक्षु तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मꣳ श्रौत्रः प्रातिश्रुत्कस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ ६ ॥

अयं चन्द्रः सर्वेषां भूतानां मध्वस्य चन्द्रस्य सर्वाणि भूतानि मधु यश्चायमस्मिꣳश्चन्द्रे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं मानसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ ७ ॥

इयं विद्युत्सर्वेषां भूतानां मध्वस्यै विद्युतः सर्वाणि भूतानि मधु ।

अस्या अस्या इत्यर्थः ।

यश्चायमस्यां विद्युति तेजोमयोऽमृत-
मयः पुरुषो यश्चायमध्यात्मं तैजसः ।

कौक्षेयतेजःसंबन्धीत्यर्थः ।

तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽय-
मात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ ८ ॥

अयꣳ स्तनयित्नुः सर्वेषां भूतानां मध्वस्य स्तन-
यित्नोः सर्वाणि भूतानि मधु यश्चायमस्मिꣳ स्तन-
यित्नौ तेजोमयोऽमृतमयः पुरुषो यश्चायम-
ध्यात्मं शाब्दः सौवरस्तेजोमयोऽमृतमयः पुरुषोऽय-
मेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ ९ ॥

शाब्दो वागिन्द्रियोच्चार्यमाणशब्दान्तर्यामी । तस्यैव विशेषणं सौवर इति । स्वरे भवः सौवरः । द्वारादित्वादैजागमः । अत्र शब्द-स्याद्रव्यत्वेन शरीरत्वासंभवात्तद्गुणकद्रव्यनिष्ठतया वा तदुक्तिर्द्रष्टव्या । प्रमाणबलाद्द्रव्यस्यापि शब्दस्य द्रव्यत्वघटितशरीरत्वाभावे परमात्मा-श्रयत्वेन प्रकारान्तरेण शरीरत्वोक्तौ न दोष इति द्रष्टव्यम् ॥ ९ ॥

अयमाकाशः सर्वेषां भूतानां मध्वस्याऽऽकाशस्य
सर्वाणि भूतानि मधु यश्चायमस्मिन्नाकाशे तेजोम-
योऽमृतमयः पुरुषो यश्चायमध्यात्मं हृद्याकाशस्ते-
जोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमा-
त्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ १० ॥

अयं धर्मः सर्वेषां भूतानां मध्वस्य धर्मस्य सर्वाणि
भूतानि मधु यश्चायमस्मिन्धर्मे तेजोमयोऽमृतमयः
पुरुषो यश्चायमध्यात्मं धार्मस्तेजोमयोऽमृतमयः पुरु-
षोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम्॥ ११॥

धर्मः श्रुतिस्मृतिप्रसिद्धो ज्योतिष्टोमादिलक्षणो धर्मः । धार्मस्तु तत्फलभूतसुखदुःखादिलक्षणः ॥ ११ ॥

इदꣳ सत्यꣳ सर्वेषां भूतानां मध्वस्य सत्यस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्सत्ये तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं सात्यस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ १२ ॥

सत्यं सत्यवचनं सात्यं तत्फलभूतं सुखादिलक्षणम् ॥ १२ ॥

इदं मानुषं सर्वेषां भूतानां मध्वस्य मानुषस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्मानुषे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं मानुषस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ १३ ॥

मानुषं मनुष्यप्रसिद्धम् । अधिदैवतमग्नीन्द्रादिरूपं सर्वेषां मध्वित्यर्थः । अध्यात्मं मानुष इत्यत्र मनुष्यशब्दो मुख्यमनुष्यपरो द्रष्टव्यः ॥ १३ ॥

एवमध्यात्माधिदैवतभेदभिन्नसर्वाचेतनान्तर्यामित्वं तद्द्वारा सर्वाचेतनवैलक्षण्यं प्रतिपाद्य चेतनान्तर्यामित्वमुखेन सर्वचेतनवैलक्षण्यं च प्रतिपादयति—

अयमात्मा सर्वेषां भूतानां मध्वस्याऽऽत्मनः सर्वाणि भूतानि मधु यश्चायमस्मिन्नात्मनि तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्ममात्मा तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम्॥ १४॥

अयमात्मा प्रत्यगात्मेत्यर्थः । शिष्टं पूर्ववत् । यश्चायमस्मिन्नात्मनि तेजोमयोऽमृतमयः पुरुषः सर्वेषु यश्चायं तेजोमयोऽमृतमयः पुरुष इति निर्दिष्टः सोऽस्मिन्नवस्थितोऽन्तर्यामीत्यर्थः । सोऽपि क इत्यत्राऽऽह— यश्चायमात्मा तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वं पूर्ववदर्थः ॥ १४ ॥

स वा अयमात्मा सर्वेषां भूतानामधिपतिः ।

इयता प्रबन्धेन प्रतिपादितश्चेतनाचेतनविलक्षण आत्मा सर्वेषां भूतानाम् । अधिपतिशब्दः शेषिणि रूढ इति व्यासार्यैः प्रथमसूत्रे प्रतिपादितत्वात् ।

सर्वेषां भूतानाꣳ राजा ।

नियन्ता ।

तद्यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिता एवमेवास्मिन्नात्मनि सर्वाणि भूतानि सर्वे देवाः सर्वे लोकाः सर्वे प्राणाः सर्व एत आत्मानः समर्पिताः ॥ १५॥

रथनाभिर्नाम रथचक्रस्य मध्यवर्ति सरन्ध्रं काष्ठं नेमिर्नाम बाह्यं वलयाकारं काष्ठम् । एतयोस्तु मध्यवर्तिदारुशलाका अरा यथा नाभिनेम्याश्रिता एवं देवलोकप्राणजीवाः परमात्माश्रिता इत्यर्थः । चेतनाचेतनः सर्वोऽपि प्रपञ्चस्तदाश्रित इति यावत् ॥ १५ ॥

एवमुपदिष्टमधुविद्यास्तुतय आख्यायिकाऽऽरभ्यते—अत्रेयमाख्यायिकाऽनुसंधेया । दध्यङ्ङाथर्वण इन्द्रान्मधुब्राह्मणं प्राप्तवानिन्द्रेण च तदुपदेशसमयेऽन्यस्मै नैतदुपदेष्टव्यमन्यथा शिरश्छेत्स्यामीत्युक्तेऽप्यसौ लोभादश्विनोः समीपमागतयेन्द्रः शिरश्छेत्स्यतीति भीतोऽस्मि तद्भयं निवार्यते चेद्युवयोर्मधुब्राह्मणमुपदेक्ष्यामीत्युक्तवान् । ततस्ताभ्यामुपदेशकाल आवामेव त्वदीयं शिरश्छित्त्वाऽन्यत्र स्थापयित्वाऽन्यदीयशिरसा त्वां योजयिष्यावस्तेन शिरसाऽऽवाभ्यामुपदिश । उपदेशकुपितेनेन्द्रेण तच्छिरसि च्छिन्ने त्वदीयमेव शिरो यथापूर्वं प्रतिसंधास्यावहे इत्युक्तम् । तथैव तेनोपायेन विद्यां प्राप्तवन्तौ । ततः पूर्वं शिरो यथापूर्वं प्रतिसंहितवन्तौ चेति ।

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच ।

वैशब्दो यथोक्ताख्यायिकावृत्तान्तस्मरणे । दध्यङ् । दध्यञ्चतीति दध्यङ् । ऋत्विगित्यादिना क्विन्हल्ङ्यादिलोपे संयोगान्तलोपे ‘ क्विन्प्रत्ययस्य कुः ’ [पा० सू० ८ । २ । ६२] इति कुत्वम् । आथर्वणः । अथर्वणः पुत्रोऽश्विभ्यां तदेतन्मधुब्राह्मणमुवाचेत्यर्थः ।

तदेतदृषिः पश्यन्नवोचत् ।

तदेतदश्विनोर्वृत्तान्तं योगसाक्षात्कारेण पश्यन्कश्चिदृषिरश्विनौ प्रत्युवाच ।

तद्वां नरा सनये दꣳस उग्रमा-
विष्कृणोमि तन्यतुर्न वृष्टिम् ।

हे नरा 'सुपां सुलु०'[पा० सू० ७ । १ । ३९]इत्यादिना द्विवचनस्याऽऽदेशः । हे नरौ दिव्यपुरुषावश्विनौ वां युवयोः सनये सनिर्लाभो लाभाय विद्यालाभायेति यावत् । उग्रं क्रूरं शिरश्छेदनपुनःप्रतिसंधानरूपं दंसः कर्मास्ति । सकारान्तोऽयं शब्दः । तत्तन्यतुः पर्जन्यो वृष्टिं न वृष्टिमिव नशब्द इवार्थे । यथा पर्जन्यो वृष्टिं प्रकाशयत्येवं तत्कर्माऽऽविष्करोमि प्रकाशयामि ।

किं तदाविष्क्रियत इत्याह—

दध्यङ्[२]ङाथर्वणो ह वामश्वस्य
शीर्ष्णा प्रयदीमुवाचेति ॥ १६ ॥

ईंशब्दोऽनर्थनिपातः । हः प्रसिद्धौ हेऽश्विनौ वां युवयोर्दध्यङ्ङाथर्वणोऽश्वस्य शीर्ष्णा स्वशिरोव्यतिरिक्तेनाश्वशिरसा प्रोवाचेति यत्तदाविष्कृणोमीत्यर्थः । एवं महता यत्नेनाश्विभ्यां दधीचो विद्या गृहीतेति विद्या स्तुता भवति ॥ १६ ॥

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्वि-
भ्यामुवाच । तदेतदृषिः पश्यन्नवोचत् ।

पूर्ववदर्थः । मन्त्रान्तरप्रदर्शनायायमारम्भः—

आथर्वणायाश्विना दधीचे[२]ऽश्व्यꣳ शिरः
प्रत्यैरयतम् । स वां मधु प्रवोचदृताय-
न्त्वाष्ट्रं यद्दस्रावपि कक्ष्यं वामिति ॥ १७ ॥

हेऽश्विनौ दधीच आथर्वणाय दध्यङ्नाम्न आथर्वणायाश्व्यं शिरोऽश्वस्य शिरः प्रत्यैरयतं प्रतिसंहितवन्तौ स दध्यङ्नाम ऋषिर्वां युवयो-

अन्यत्रमुद्रितपुस्तके—१ °ध्यङ्ङाथर्वणो° । २ °चेऽश्व्यꣳ° ।

ऋतायन्सन्नुपदेक्ष्यामीति स्वोक्तं वच ऋतायन्नृतं कुर्वंस्त्वाष्ट्रं मधु त्वष्टा यज्ञशिरस्तत्संबन्धि त्वाष्ट्रं तादृशं शिरःसमाधायकत्वसाम्यान्मधु प्रवर्ग्यमिति यावत् । प्रवर्ग्यस्य त्वाष्ट्रशब्दितयज्ञशिरःप्रतिसंधानार्थत्वात्त्वाष्ट्रं तत्प्रोवाच तत्प्रोक्तवान् । हे दस्रौ हेऽश्विनौ 'नासत्यावाश्विनौ दस्रौ' इत्यमरः । कक्ष्यं गोप्यमपि यद्ब्रह्मसंबन्धि मधु ब्राह्मणं वां युवयोः प्रोवाचेत्यर्थः ॥ १७ ॥

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्वि-
भ्यामुवाच । तदेतदृषिः पश्यन्नवोचत् ।

पूर्ववदर्थः । मन्त्रान्तरप्रकाशनार्थोऽयमारम्भः ।

पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः ।
पुरः स पक्षी भूत्वा पुरुष आविशदिति ।

द्विपदः पुरश्चक्रे पुरः पुराणि । पूःशब्दोऽयं द्वितीयाबहुवचनान्तः । द्विपात्पुराणि चतुष्पात्पुराणि च चक्र इत्यर्थः । देवमनुष्यपश्वादिशरीरं सृष्ट्वा पुरः पुरस्तात्परमात्मा पक्षी भूत्वा संसारहेतुभूतकर्मावृतो भूत्वा संसारी जीवशरीरको भूत्वेति यावत् । परमात्मनस्तु अङ्गारककर्मसंबन्धाभावात्सृष्टानि सर्वाणि पुराणि जीवशरीरकः परमात्मा प्रविष्ट इत्यर्थः ।

तमिमं मन्त्रं श्रुतिरेव व्याचष्टे—

स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयः ।

सर्वासु पूर्षु सर्वशरीरेषु वर्तमानः सोऽयं पुरिसंज्ञे शरीरेऽस्मिञ्शयनात्पुरुषो हरिः । शकारस्य षकारोऽयं व्यत्ययेन प्रयुज्यत इत्युक्तरीत्या पुरिशयनात्पुरुष इत्यर्थः ।

नैनेन किंचनानावृतं नैनेन किंचनासंवृतम् ॥ १८ ॥

अनावृतं बहिरनावृतमित्यर्थः । असंवृतमन्तरसंवृतमित्यर्थः । अन्तर्बहिश्चाव्याप्तं किमपि नास्तीत्यर्थः ॥ १८ ॥

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्वि-
भ्यामुवाच तदेतदृषिः पश्यन्नवोचत् ।

मन्त्रान्तरप्रदर्शनार्थोऽयमारम्भः ।

रूपꣳ रूपं प्रतिरूपो बभूव ।

रूप्यत इति रूपं दृश्यं वस्तु । वीप्सायां द्वित्वम् । प्रतिवस्त्विति यावत् । प्रतिरूपः सदृशरूप इत्यर्थः । तत्तद्रूपसदृशतयाऽन्तर्यामितयाऽवस्थित इति यावत् । यद्वा । प्रतिरूपं प्रतिष्ठितं रूपमस्य तथोक्तः । सर्वान्तर्यामीति फलितोऽर्थः ।

तदस्य रूपं प्रतिचक्षणाय ।

चक्षिङो भावे ल्युट् । प्रतिचक्षणं व्यवहारः । व्यवहाराय यद्व्यवहर्तव्यमिति यावत् । तत्सर्वमस्य परमात्मनो रूपं शरीरमित्यर्थः । यद्वा । तत्तस्मादिति वाऽर्थः । यस्मादयं प्रतिरूपो बभूव तस्मादेव सर्वं तच्छरीरमित्यर्थः ।

ननु शरीरसंबन्धस्य कर्माधीनत्वात्कर्मारब्धस्य व्यवह्रियमाणप्रपञ्चस्य कथं तद्रूपत्वमित्याशङ्क्याऽऽह—

इन्द्रो मायाभिः पुरुरूप ईयते ।

इन्द्रः परमेश्वरः । इदि परमैश्वर्य इति हि धातुः । मायाभिः । माया वयुनं ज्ञानमिति नैघण्टकाः । मायाभिः संकल्परूपज्ञानैर्विचित्राश्चर्यकारित्वाज्ज्ञानरूपत्वाच्च मायाशब्दितत्वं संकल्पस्योपपद्यते । पुरुरूपो बहुशरीरः स्वेच्छागृहीतानन्तदेह इति यावत् ।

ननु रूपं रूपं प्रतिरूपो बभूवेत्येतदयुक्तम् । अनन्तेषु ब्रह्मादिस्तम्बपर्यन्तेषु रूपेष्वेकस्य परमात्मनस्तत्तदन्तर्वर्तितयाऽवस्थानासंभवादित्याशङ्क्याऽऽह—

युक्ता ह्यस्य हरयः शता दशेति ।

शता शतानीत्यर्थः । सुपां सुलुगित्यादिनाऽऽकारादेशः । अस्यानन्तप्रपञ्चस्य युक्ता योग्या इत्यर्थः । तदनुरूपसंख्याशालिनः शतानि दश हरयः शतानि दशानन्ता इति यावत् । अनन्ता हरयः । अन्तर्यामिविग्रहानन्त्यादनन्ता हरय इत्युक्तिरिति द्रष्टव्यम् ।

अयं वै हरयोऽयं वै दश च शतानि
सहस्राणि बहूनि चानन्तानि ।

अयमेक एव हरिः शतानि सहस्राणि बहूनि हरयो भवन्ति । विचित्रशक्तेः परमात्मनः काऽनुपपत्तिरिति भावः । एवमियता प्रबन्धेन निर्दिष्टं ब्रह्मेत्युपसंहरति—

तदेतद्ब्रह्म ।

ब्रह्मशब्दितत्रिविधपरिच्छेदराहित्यमुपपादयति—

अपूर्वमनपरम् ।

पूर्वोत्तरकालशून्यं कालापरिच्छिन्नमित्यर्थः ।

अनन्तरमबाह्यम् ।

देशपरिच्छेदशून्यमित्यर्थः । बाह्याभ्यन्तरव्यवहारानर्हमिति भावः ।
सर्वोत्कृष्टत्वलक्षणवस्तुपरिच्छेदाभावमुपपादयति—

अयमात्मा ब्रह्म ।

सर्वनियन्तृतया सर्वोत्कृष्टमित्यर्थः । यद्वा । सर्वात्मत्वादेवमिदं नेति निर्देशानर्हत्वलक्षणवस्तुपरिच्छेदोऽत्र विवक्षितो द्रष्टव्यः ।

सर्वानुभूः ।

सर्वज्ञः । इदं जगत्कारणत्वनियन्तृत्वाक्षिप्तसर्वशक्तित्वादिगुणानामप्युपलक्षणं द्रष्टव्यम् ।

इत्यनुशासनम् ॥ १९ ॥

इति बृहदारण्यकोपनिषदि द्वितीयाध्याये
पञ्चमं ब्राह्मणम् ॥ ५ ॥

अनुशासनमुपदेशः ॥ १९ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां द्वितीयाध्यायस्य
पञ्चमं ब्राह्मणम् ॥ ५ ॥

अज्ञातसंप्रदायाया विद्याया अभ्युदयफलकत्वाभावेनानादरणीयत्वात्, 'आचार्यवंशो ज्ञेयः' इति श्रवणाच्च विद्याप्रवर्तकाचार्यपरम्परामुपदिशति—

अथ वंशः ।

कीर्त्यत इति शेषः । सर्वतः प्रथमान्तैः शिष्यनिर्देशः पञ्चम्यन्तैराचार्यनिर्देशः ।

पौतिमाष्यो गौपवनात्[1] ।

पौतिमाष्य आचार्यो गौपवनात्प्राप्तविद्य इति शेषः । एवमुत्तरत्रापि द्रष्टव्यम् ।

गौपवनः कौशिकात्कौशिकः कौण्डिन्यात्कौण्डिन्यः शाण्डिल्याच्छाण्डिल्यः कौशिकाच्च गौतमाच्च ।

तस्याऽऽचार्यद्वयमिति भावः ।

गौतमः ॥ १ ॥

आग्निवेश्यादाग्निवेश्यः शाण्डिल्याच्चानभिम्लाताच्चा-नभिम्लातो[2] गौतमाद्गौतमः सैतवप्राचीनयोग्याभ्याꣳ सैतवप्राचीनयोग्यौ पाराशर्यात्पाराशर्यो भारद्वाजा-द्भारद्वाजो भारद्वाजाद्गौतमाच्च गौतमो भारद्वाजाद्भा-रद्वाजः पाराशर्यात्पाराशर्यो वैजवापायनाद्वै-जवापायनः कौशिकायनेः कौशिकायनिः ॥ २ ॥

घृतकौशिकाद्घृतकौशिकः पाराशर्यायणात्पाराश-र्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्य आसुरायणाच्च यास्काच्चाऽऽसुरायणस्त्रैवणेस्त्रैवणिरौ-पजन्धनेरौपजन्धनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाज आत्रेयादात्रेयो माण्टेर्माण्टिर्गौतमाद्गौतमो वात्स्याद्वा-त्स्यः शाण्डिल्याच्छाण्डिल्यः कैशोर्यात्काप्यात्कै-शोर्यः काप्यः कुमारहारीतात्कुमारहारीतो गालवा-द्गालवो विदर्भीकौण्डिन्याद्विदर्भीकौण्डिन्यो वत्सनपा-तो बाभ्रवाद्वत्सनपाद्बाभ्रवः पथः सौभरात्पन्थाः सौभरोऽयास्यादाङ्गिरसादयास्य आङ्गिरस आभूते-स्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वा-

---

१ गौपवनः पौतिमाष्यात्पौतिमाष्यो गौपवनात् । इत्यधिकम् । २ त आनभिम्लातादा-नभिम्लात आनभिम्लातादानभिम्लातः । एतत्पाठद्वयमत्रत्यमुद्रितपुस्तके वर्तते ।

ध्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्दध्यङ्-
ङाथर्वणोऽथर्वणो दैवादथर्वा दैवो मृत्योः प्रा-
ध्वꣳसनान्मृत्युः प्राध्वꣳसनः प्रध्वꣳसनात्प्रध्वꣳ-
सन एकर्षेरेकर्षिर्विप्रचित्तेर्विप्रचित्तिर्व्यष्टेर्व्यष्टिः
सनारोः सनारुः सनातनात्सनातनः सनका-
त्सनकः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयंभु ।

स्वयमेव भवतीति स्वयंभु । उपदेशमन्तरेण विद्याप्रवर्तकं भवतीत्यर्थः ।

ब्रह्मणे नमः ॥ ३ ॥

इति बृहदारण्यकोपनिषदि द्वितीयाध्याये
षष्ठं ब्राह्मणम् ॥ ६ ॥

इति बृहदारण्यकोपनिषदि द्वितीयोऽध्यायः ॥ २ ॥

सर्वगुरवे ब्रह्मणे नमः ॥ ३ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां द्वितीयाध्यायस्य
षष्ठं ब्राह्मणम् ।

इति बृहदारण्यकोपनिषत्प्रकाशिकायां द्वितीयोऽध्यायः ॥ २ ॥

मधुकाण्डसिद्धमेव सर्वान्तर्यामित्वं मुखान्तरेणास्मिन्नध्याये दृढी क्रियते तत्र पुष्कलधनदानं बहुविद्वत्समवायं च (यश्च) विद्यार्जनोपाय इति प्रदर्शनायाऽऽख्यायिकाऽऽरभ्यते—

जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे ।

हेति वृत्तार्थस्मरणे । वैदेहो विदेहदेशाधिपतिर्बहुदक्षिणेन यज्ञेनेज इष्टवान् । ‘ असंयोगाल्लिट्कित् ’ [पा० सू० १।२।५] इति कित्त्वात्संप्रसारणम् ।

तत्र ह कुरुपञ्चालानां ब्राह्मणा अभिसमेता बभूवुः ।

तस्मिन्यज्ञे विद्वद्भूयिष्ठकुरुपञ्चालदेशेभ्यो ब्राह्मणाः समागताः ।

तस्य ह जनकस्य वैदेहस्य विजिज्ञासा बभूव
कः स्विदेषां ब्राह्मणानामनूचानतम इति ।

आगतानां ब्राह्मणानां मध्ये को वाऽतिशयेन ब्रह्मविद्यानुवचनकुशल इति जिज्ञासा बभूव ।

स ह गवाᳬ सहस्रमवरुरोध ।

तज्जिज्ञासया गोष्ठे गवां सहस्रमवरुरोध ।

दश दश पादा एकैकस्याः शृङ्गयोराबद्धा बभूवुः ॥१॥

पादः पलस्य चतुर्थांशः । सुवर्णस्य दश दश पादा एकैकस्याः शृङ्गयोर्निबद्धा बभूवुः ॥ १ ॥

तान्होवाच ब्राह्मणा भगवन्तो यो वो
ब्रह्मिष्ठः स एता गा उदजतामिति ।

भवतां मध्येऽतिशयेन यो ब्रह्मवित्स एता गाः स्वगृहं प्रति कालयतु नयतु । अज गतिक्षेपणयोरिति हि धातुः ।

ते ह ब्राह्मणा न दधृषुः ।

ते ह ब्राह्मणा न धृष्टा बभूवुः । आ धृषाद्वेति णिजभावे रूपम् ।

अथ ह याज्ञवल्क्यः स्वमेव ब्रह्मचारिण-
मुवाचैताः सोम्योदज सामश्रवा ३ इति ।

साम शृणोतीति सामश्रवाः । एता गा हे सामश्रवो गृहान्प्रति कालयेति ।

ता होदाचकार ।

अकालयदित्यर्थः ।

ते ह ब्राह्मणाश्चुक्रुधुः कथं नो ब्रह्मिष्ठो ब्रुवीतेति ।

याज्ञवल्क्येन ब्रह्मिष्ठपणस्वीकरणेनाऽऽत्मनो ब्रह्मिष्ठता प्रतिज्ञातेति सर्वे क्रुद्धा बभूवुः कथं नोऽस्माननादृत्याहं ब्रह्मिष्ठ इति वदेदित्यर्थः ।

अथ ह जनकस्य वैदेहस्य होताऽश्वलो बभूव स हैनं पप्रच्छ त्वं नु खलु नो याज्ञवल्क्य ब्रह्मिष्ठोऽसी३ इति।

अस्माकं मध्ये त्वमेव खलु ब्रह्मिष्ठोऽसीत्यश्वलनामा होता पप्रच्छ। असी ३ इति भर्त्सने प्लुतिः।

स होवाच नमो वयं ब्रह्मिष्ठाय कुर्मो गोकामा एव वयꣳ स्म इति।

ब्रह्मिष्ठाय नमस्कुर्मो नास्माभिर्ब्रह्मिष्ठत्वाभिमानाद्गावो नीता गोकामायै(ए)वेति सोपहासमुक्तवानित्यर्थः।

तꣳ ह तत एव प्रष्टुं दध्रे होताऽश्वलः॥ २॥

तत एव सोपहासवचनादश्वलः प्रष्टुमवस्थितः। धृङ् अवस्थान इति हि धातुः॥ २॥

याज्ञवल्क्येति होवाच।

याज्ञवल्क्येति संबोध्य वक्ष्यमाणमुवाचेत्यर्थः।

यदिदꣳ सर्वं मृत्युनाऽऽप्तꣳ सर्वं मृत्युनाऽभि[1]संपन्नम्।

यदिदं प्रसिद्धं जगच्चेतनात्मकं मृत्युना मरणधर्मेणाऽऽप्तं न केवलं व्याप्तं मृत्युनाऽभिसंपन्नं वशीकृतं चेत्यर्थः। यद्वा। व्याप्तमित्यस्य विवरणमभिपन्नमिति।

केन यजमानो मृत्योराप्तिमतिमुच्यत इति।

केन साधनेन मृत्योर्व्याप्तिमतिक्रम्य मुच्यत इत्यर्थः।

होत्रर्त्विजाऽग्निना वाचा।

तदेव व्याचष्टे—

वाग्वै यज्ञस्य होता तद्येयं वाक्सोऽयमग्निः स होता स मुक्तिः साऽतिमुक्तिः॥ ३॥

कर्माङ्गभूते होतर्यग्न्यभिन्नत्वेन ध्याताया वाचो दृष्टौ कृतायां कर्मणो वीर्यवत्तरतया ब्रह्मोपासनद्वारा जीवदशायामेव विश्लिष्टाश्लिष्टपूर्वोत्तरदुरिम(त)हरत्वलक्षणा मुक्तिर्भवति शरीरावियोगानन्तरं प्रकृत्यतिक्रान्तप-

---

१ 'भिपन्न'। अत्रत्यमुद्रित पुस्तके।

दाधिरोहणलक्षणाऽतिमुक्तिर्भवतीत्यर्थः । तद्धेयं तत्सा होतर्यध्यस्यमाना वागित्यर्थः । स मुक्तिः साऽतिमुक्तिरिति कारणे कार्योपचारः ॥ ३ ॥

याज्ञवल्क्येति होवाच यदिदꣳ सर्वमहोरा-
त्राभ्यां व्याप्तꣳ सर्वमहोरात्राभ्यामभिसंपन्नं केन
यजमानोऽहोरात्रयोराप्तिमतिमुच्यत इत्यध्वर्यु-
णर्त्विजा चक्षुषाऽऽदित्येन चक्षुर्वै यज्ञस्याध्वर्यु-
स्तद्यदिदं चक्षुः सोऽसावादित्यः सोऽध्वर्युः
स मुक्तिः साऽतिमुक्तिः ॥ ४ ॥

अहोरात्रयोराप्तिर्नाम कतिपयाहोरात्रैर्विनश्वरत्वम् ।शिष्टं पूर्ववत्॥४॥

याज्ञवल्क्येति होवाच यदिदꣳ सर्वꣳ पूर्वपक्षापर-
पक्षाभ्यामाप्तꣳ सर्वं पूर्वपक्षापरपक्षाभ्यामभिपन्नं
केन यजमानः पूर्वपक्षापरपक्षयोराप्तिमतिमुच्यत
इत्युद्गात्रर्त्विजा वायुना प्राणेन प्राणो वै यज्ञ-
स्योद्गाता तद्योऽयं प्राणः स वायुः स
उद्गाता स मुक्तिः साऽतिमुक्तिः ॥ ५ ॥

पूर्वपक्षापरपक्षयोराप्तिर्नाम कतिपयपक्षाविनश्वरत्वम् । शिष्टं पूर्ववत् ॥ ५ ॥

याज्ञवल्क्येति होवाच यदिदमन्तरिक्षमनारम्बणमिव
केनाऽऽक्रमेण यजमानः स्वर्गं लोकमाक्रमत इति ।

अनारम्बणमिव रलयोरभेदः । अनालम्बनमिव दृश्यते तत्केनाऽऽक्रमेण क्रमणसाधनेन केन वाऽऽक्रम्य यजमानः स्वर्गं भगवल्लोकमाक्रमत इत्यर्थः । अत्र स्वर्गलोकशब्दस्य भगवल्लोकवाचित्वे स मुक्तिः साऽतिमुक्तिरित्युत्तरवाक्यस्वारस्यं भवति ।

उत्तरमाह—

ब्रह्मणर्त्विजा मनसा चन्द्रेण मनो वै यज्ञस्य
ब्रह्मा तद्यदिदं मनः सोऽसौ चन्द्रः

स ब्रह्म स मुक्तिः साऽतिमुक्तिः ।

इति चन्द्राभिन्नत्वेन ध्यातं मनोदृष्ट्योपासितो ब्रह्म भगवल्लोकाक्रमणसाधनमित्यर्थः ।

इत्यतिमोक्षाः ।

अनेन प्रकारेणातिमोक्षप्रश्नाः समाप्ता इत्यर्थः ।

अथ संपदः ॥ ६ ॥

उच्यन्त इति शेषः । येनाग्निहोत्रादीनां फलवत्कर्मणां तत्फलाय संपादनं सा संपत् ॥ ६ ॥

याज्ञवल्क्येति होवाच कतिभिरयम-
द्यर्ग्भिर्होताऽस्मिन्यज्ञे करिष्यतीति ।

अयं होताऽद्य यज्ञे काले कतिभिर्ऋग्भिरस्मिन्यज्ञे करिष्यतीति हौत्रमिति शेषः ।

उत्तरम्—

तिसृभिरिति ।

पुनः प्रश्नः—

कतमास्तास्तिस्र इति ।

संख्येयर्ग्विशेषविषयोऽयं प्रश्नः । पूर्वस्तु संख्याविषयः ।

उत्तरमाह—

पुरोनुवाक्या च याज्या च शस्यैव तृतीया ।

यागकालात्प्राक्प्रयुज्यमाना ऋचः पुरोनुवाक्याः । यागसाधनभूता ऋचो याज्याः । शस्यार्था ऋचः शस्याः । जात्यभिप्रायेणैकवचनं द्रष्टव्यम् । तिसृष्वेव हौत्रिणामृचामन्तर्भाव इति भावः ।

किं ताभिर्जयतीति ।

प्रश्नः । उत्तरम्—

यत्किंचेदं प्राणभृदिति ॥ ७ ॥

तत्सर्वं जयतीति शेषः ॥ ७ ॥

याज्ञवल्क्येति होवाच कत्ययमद्या-
ध्वर्युरस्मिन्यज्ञ आहुतीर्होष्यतीति ।

किंसंख्याका आहुतीर्होष्यतीत्यर्थः । उत्तरम्—

तिस्र इति ।

पुनः प्रश्नः—

कतमास्तास्तिस्र इति या हुता उज्ज्वलन्ति
या हुता अतिनेदन्ते या हुता अधिशेरते ।

या हुताः सत्य उज्ज्वलन्ति समिदाज्याहुतय इत्यर्थः । या हुता अतिनेदन्तेऽतीव शब्दं कुर्वन्ति । णिदि शब्दकुत्सायाम् । शीत्कारशब्दं कुर्वन्तीत्यर्थः । मांसाद्याहुतयः । या हुता अधिशेरते । अध्यधो गत्वा शेरते पयःसोमाद्याहुतय इत्यर्थः ।

पुनः प्रश्नः—

किं ताभिर्जयतीति ।

उत्तरम्—

या हुता उज्ज्वलन्ति देवलोकमेव ताभिर्जयति ।

तत्र हेतुमाह—

दीप्यत इव हि देवलोकः ।

तत्रत्यानां देवलोको दीप्यत इवाऽऽभासते अत उज्ज्वलानां समिदाज्याहुतीनामुज्ज्वलदेवलोकसाधनत्वमुपपद्यत इति भावः ।

या हुता अतिनेदन्ते पितृलोकमेव
ताभिर्जयत्यतीव हि पितृलोकः ।

कुत्सितशब्दयुक्ताभिराहुतिभिः कुत्सितशब्दयुक्तं पितृलोकं जयतीत्यर्थः । पितृलोकसंबद्धायां हि यमिन्यां पुर्यां वैवस्वतेन पात्यमानानां हा हतोऽस्मीति शब्दो भवति । अतः पितृलोकस्य कुत्सितशब्दयुक्तत्वमस्तीति द्रष्टव्यम् ।

या हुता अधिशेरते मनुष्यलोकमेव ताभि-
र्जयत्यध इव हि मनुष्यलोकः ॥ ८ ॥

ऊर्ध्वलोकापेक्षया मनुष्यलोकोऽध इव हि वर्ततेऽतस्तत्सामान्यान्मनुष्यलोकं जयतीत्यर्थः ॥ ८ ॥

याज्ञवल्क्येति होवाच कतिभिरयमद्य ब्रह्मा
यज्ञं दक्षिणतो देवताभिर्गोपायतीति ।

विहारस्य दक्षिणत उपविष्टो ब्रह्मा कतिभिर्देवताभिर्यज्ञं गोपायति । उत्तरम्—

एकयेति ।

कतमा सैकेति ।

प्रश्नः सा केत्यर्थः । उत्तरम्—

मन एवेति ।

तेन किं जयतीति प्रश्नोऽत्राध्याहर्तव्यः ।

उत्तरमाह—

अनन्तं वै मनः ।

तदानन्त्ये हेतुमाह—

अनन्ता विश्वे देवाः ।

देवशब्द इन्द्रियपरः । तदधीनानां सर्वेषामिन्द्रियाणामानन्त्यान्मनस आनन्त्यमिति भावः ।

अनन्तमेव स तेन लोकं जयति ॥ ९ ॥

एवमानन्ता(न्त्य)विशिष्टतयोपासितेन ब्रह्मणा मनसाऽनन्तं भगवल्लोकं भगवदुपासनद्वारा जयतीत्यर्थः ॥ ९ ॥

याज्ञवल्क्येति होवाच कत्ययमद्योद्गाताऽ-
स्मिन्यज्ञे स्तोत्रियाः स्तोष्यतीति ।

अस्मिन्यज्ञे स्तोत्रियाः स्तोत्रसाधनभूता ऋचः कति स्तोष्यतीति । उत्तरम्—

तिस्र इति ।

कतमास्तास्तिस्र इति ।

पुनः प्रश्नः ।

पुरोनुवाक्या च याज्या च शस्यैव तृतीया ।

उक्तोऽर्थः । पुनः पृच्छति—

कतमास्ता या अध्यात्ममिति ।

ताः पुरोनुवाक्याद्या अध्यात्मं कतमा भवन्ति । तासु किमध्यात्मदृष्टिः कर्तव्येत्यर्थः ।

उत्तरम्—

प्राण एव पुरोनुवाक्याऽपानो याज्या व्यानः शस्या ।

पुरोनुवाक्यादिष्वध्यात्मभूतप्राणादिदृष्टिः कर्तव्येत्यर्थः ।

पुनः पृच्छति—

किं ताभिर्जयतीति ।

प्राणादिदृष्टिविशिष्टपुरोनुवाक्यादिभिः कं लोकं जयतीत्यर्थः ।

उत्तरमाह—

पृथिवीलोकमेव पुरोनुवाक्यया जयत्यन्त-
रिक्षलोकं याज्यया द्युलोकꣳ शस्यया ।

स्पष्टोऽर्थः ।

ततो ह होताऽश्वल उपरराम ॥ १० ॥

इति बृहदारण्यकोपनिषदि तृतीयाध्याये
प्रथमं ब्राह्मणम् ॥ १ ॥

एवं प्रश्नानामुत्तरे दत्ते प्रष्टव्यान्तराभावाद्धेतोरुपररामेत्यर्थः ॥ १० ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां तृतीयाध्यायस्य
प्रथमं ब्राह्मणम् ॥ १ ॥

अथ हैनं जारत्कारव आर्तभागः पप्रच्छ ।

जरत्कारुगोत्रज ऋतभागपुत्रः पप्रच्छ ।

याज्ञवल्क्येति होवाच कति ग्रहाः कत्यति ग्रहा इति ।

उत्तरम्—

अष्टौ ग्रहा अष्टावतिग्रहा इति ।

पुनः प्रश्नः—

ये तेऽष्टौ ग्रहा अष्टावतिग्रहाः कतमे त इति ॥ १ ॥

क इत्यर्थः ॥ १ ॥

उत्तरम्—

प्राणो वै ग्रहः सोऽपानेनातिग्रहेण
गृहीतोऽपानेन हि गन्धाञ्जिघ्रति॥२॥

अत्र प्राणशब्देन नस्यत्वसामान्यात्प्राणेन्द्रियं गौण्या वृत्त्याऽभिधीयते । गृह्णात्यात्मानं स्ववशं करोतीति ग्रह इन्द्रियम् । पचाद्यच् । अपानो गन्धः । अपानेन निश्वासवायुनाऽपानीयत्वाद्गन्धो लक्ष्यते । तेन विषयरूपेणातिग्रहेण गृहीतो व्याप्तो भवति । अतिशयेन स्वस्वविषयिणमिन्द्रियादिकं गृह्णाति स्ववशी करोतीत्यतिग्रहो विषयः। तदुपपादयति—अपानेन हि गन्धाञ्जिघ्रति । अत्र प्राणेनेत्यध्याहर्तव्यम् । अपानेनापनीतान्गन्धान्घ्राणेन जिघ्रतीत्यर्थः । यद्वाऽपानशब्दो घ्राणपरो द्रष्टव्यः । उत्तरसंदर्भैकरूप्यात् । अतो घ्राणं गन्धाधीनमिति भावः । ततश्चेन्द्रियेभ्यः परा ह्यर्था इत्युक्तरीत्या ग्रहशब्दितेऽपीन्द्रियेभ्योऽतिग्रहशब्दितानां विषयाणां प्रबलतया तद्वशीकरणे यत्नः कर्तव्य इति भावः ॥ २ ॥

वाग्वै ग्रहः स नाम्नाऽतिग्रहेण गृहीतो
वाचा हि नामान्यभिवदति ॥ ३ ॥
जिह्वा वै ग्रहः स रसेनातिग्रहेण गृहीतो
जिह्वया हि रसान्विजानाति ॥ ४ ॥
चक्षुर्वै ग्रहः स रूपेणातिग्रहेण गृहीतश्चक्षुषा हि रूपाणि पश्यति ॥ ५ ॥
श्रोत्रं वै ग्रहः स शब्देनातिग्रहेण
गृहीतः श्रोत्रेण हि शब्दाञ्शृणोति ॥ ६ ॥
मनो वै ग्रहः स कामेनातिग्रहेण गृहीतो
मनसा हि कामान्कामयते ॥ ७ ॥

हस्तौ वै ग्रहः स कर्मणाऽतिग्रहेण गृहीतो
हस्ताभ्यां हि कर्म करोति ॥ ८ ॥

त्वग्वै ग्रहः स स्पर्शेनातिग्रहेण गृहीतस्त्वचा हि
स्पर्शान्वेदयत इत्येतेऽष्टौ ग्रहा एतेऽष्टावतिग्रहाः॥९॥

स्पष्टोऽर्थः । एवं ग्रहातिग्रहप्रश्नस्योत्तरे दत्त आर्तभाग एवान्यत्पृच्छति—

याज्ञवल्क्येति होवाच यदिदꣳ सर्वं मृत्योरन्नं
का स्वित्सा देवता यस्या मृत्युरन्नमिति ।

यस्य मृत्योरिदं सर्वमन्नं स मृत्युः कस्या देवताया अन्नमिति ।
उत्तरमाह—

अग्निर्वै मृत्युः सोऽपामन्नम् ।

अग्निना हि सर्वं दह्यते सोऽप्यद्भिर्नाश्यते । अतोऽपामग्न्यन्नकत्वमिति भावः ।

अपामग्न्यन्नकत्वचिन्तनस्य फलमाह—

अप पुनर्मृत्युं जयति ॥ १० ॥

य एवं वेद सोऽपमृत्युं जयतीत्यर्थः । कास्वित्सा देवतेति प्रश्नानुरोधादपामित्यस्याप्त्वाभिमानिनारायणपरत्वेऽपि न दोषः । तस्मिन्पक्षे 'अग्निर्वै मृत्युः' इत्यत्राग्निशब्दस्य कालाग्निरुद्रपरत्वं द्रष्टव्यम् । 'अग्निर्वै रुद्रः' इति प्रसिद्धेश्च । एतदेवाभिप्रेत्य व्यासार्यैरार्तभागप्रश्नस्य विद्वद्विषयत्वेऽपीति ग्रन्थेनास्य प्रकरणस्य परमात्मविषयत्वमपि सूचितम् ॥ १० ॥

याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियत
उदस्मात्प्राणाः क्रामन्त्याहो ३ नेति ।

यत्र यदाऽयं जीवो म्रियते किमस्मान्म्रियमाणात्प्राणा उत्क्रामन्ति जीवं विहाय यथायथं गच्छन्त्युत तत्संयुक्ता एव सन्तस्तेन सहैवोत्क्रामन्तीति प्रश्नार्थः ।

उत्तरमाह—

नेति होवाच याज्ञवल्क्योऽत्रैव समवनीयन्ते स उच्छ्वयत्याध्मायत्याध्मातो मृतः शेते ॥ ११ ॥

अत्रैवाऽऽत्मनि समवनीयन्ते संयोज्यन्ते । समित्येकीकारे । एकीभूततया संयुक्ता भवन्तीत्यर्थः । न तं विहायोत्क्रामन्ति न हैनो (सहैवो)त्क्रामन्तीत्यर्थः । स पुरुषो मृत उत्क्रान्तप्राणः सञ्श्वयथुं प्राप्नोति । आध्मायति बाह्यवायुना पूर्यते । आध्मातो बाह्यवायुना पूरितः सञ्शेते । यद्यप्युच्छूनत्वादिर्देहधर्मो न तु तस्मादिति निर्दिष्टम्रियमाणजीवधर्मस्तथाऽपि देहात्मनोरभेदोपचारेण तथानिर्देशो द्रष्टव्यः । न च 'स उच्छ्वयत्याध्मातो मृतः शेते' इत्युच्छूनत्वादिविस्पष्टदेहधर्मश्रवणेन देहापादानकोत्क्रमणप्रतिषेधविषयकत्वोपपत्ता अभेदोपचारमाश्रित्य जीवापादानकोद्गमननिषेधपरत्वं कुत आश्रयणीयमिति वाच्यम् । 'योऽकामो निष्काम आत्मकाम आप्तकामो न तस्मात्प्राणा उत्क्रामन्ति' [बृ० ४ । ४ । ६] इत्यत्र शरीरापादनकोद्गमनप्रतिषेधवादिनोऽभेदोपचारस्यावश्याश्रयणीयत्वेन दोषसाम्यात्, 'प्रतिषेधादिति चेन्न शारीरात्' [ब्र० सू० ४ । २ । १२] इति सूत्रभाष्यादावस्यार्थस्य प्रपञ्चितत्वान्नात्रास्माकं वक्तव्यमवशिष्यते ॥ ११ ॥

याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियते किमेनं न जहातीति ।

पूर्वत्र प्राणं म्रियमाणं न जहातीत्युक्तमिदानीं तु प्राणेभ्योऽन्यच्च किं वा म्रियमाणं न जहातीति प्रश्नः । उत्तरम्—

नामेति ।

तद्त्याग एव प्रदर्श्यते प्रसिध्या ।

अनन्तं वै नाम ।

देहे नष्टेऽपि युधिष्ठिरादीनां नामानुवृत्तिदर्शनान्नाम्नो नाशो नास्तीत्यर्थः ।

नामाभिमानिदेवता अप्यनन्ता इत्याह—

अनन्ता विश्वे देवाः ।

नामानन्त्यज्ञानस्य फलमाह—

अनन्तमेव स तेन लोकं जयति ॥ १२ ॥

अनुवृत्तेन नाम्ना शाश्वतपुण्यलोकं जयतीत्यर्थः । अत एव हि लोके नामानुवृत्त्यर्थं यतन्त इति भावः ॥ १२ ॥

याज्ञवल्क्येति होवाच यत्रास्य पुरुषस्याग्निं वागप्येति ।

अत्र वागादीन्द्रियाणामाकल्पस्थायित्वादाहंकारिकत्वाच्च मरणदशायामनुपादानभूताग्नौ लयासंभवाच्च वाचोऽग्नावप्ययो नाम वागिन्द्रियाभिमानिदेवभूतस्याग्नेर्वागिन्द्रियाधिष्ठानानुकूलव्यापारमन्तरेणावस्थितिरेव । मरणदशायां म्रियमाणजीवसंबन्धिवागिन्द्रियं तदभिमान्यग्निर्न व्यापारयतीति यावत । सूत्रितं च भगवता बादरायणेन—'अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात्' [ब्र० सू० ३ । १ । ४] इति । एवमुत्तरत्रापि द्रष्टव्यम् । अप्ययश्च भाक्तो यथायोग्यं द्रष्टव्यः ।

वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः
श्रोत्रं पृथिवीꣳ शरीरमाकाशमात्मा ।

आत्मा देहान्तर्गताकाश इत्यर्थः ।

ओषधीर्लोमानि वनस्पतीन्केशाः ।

लोमाभिमानिदेवता ओषध्यभिमानिदेवतामप्येति लोमाभिमानित्वं विहाय केवलमोषध्यभिमानी भवतीत्यर्थः ।

अप्सु लोहितं च रेतश्च निधीयते ।

निधीयते प्रक्षिप्यत इत्यर्थः ।

क्वायं तदा पुरुषो भवतीति ।

म्रियमाणसंबन्धिषु सर्वेषु तत्तदाधाराश्रितेषु शारीरः पुरुषः किमाश्रितो भवतीति प्रश्नः ।

एवं पृष्टो याज्ञवल्क्य एतदुत्तरस्य प्रकृतजल्पमार्गेण जनसमक्षमप्रकटनीयत्वादार्तभागं वादमार्गेण बोधयिष्यन्नाह—

आहर सोम्य हस्तमार्तभागाऽऽवामेतस्यैव वेदिष्यावो न नावेतत्सजन इति ।

हे सोम्याऽऽर्तभागाऽऽवामेवैतस्य प्रश्नस्योत्तरं वेदिष्यावो ज्ञास्यावः ।

यद्यपि याज्ञवल्क्य एव विचारको निर्णेता चाथापि द्विर्वचनं वीतराग-कथाद्योतनार्थम् । नावावयोरेतत्प्रकृतप्रश्नोत्तरं सजने जनसमुदाये न भवति ।

तौ होत्क्रम्य मन्त्रयांचक्राते ।

तावार्तभागयाज्ञवल्क्यौ तस्माद्देशादुत्क्रम्य विजनस्थानं गत्वा विचारमकुरुताम् ।

तौ ह यदूचतुः कर्म हैव तदूचतुरथ
यत्प्रशशꣳसतुः कर्म हैव तत्प्रशशꣳसतुः ।

तौ मिलित्वा विचार्य निश्चित्य कार्यकारणसंघातात्मकशरीरपरिग्रह-हेतुतया यदुक्तवन्तौ तत्कर्मैव । हेतुषु यत्स्तुतवन्तौ तत्कर्मैव । यद्यपीश्वर-कालादीनि कारणान्तराणि सन्ति तथाऽपि तेषां साधारणत्वाच्छरीर-परिग्रहहेतूनां मध्ये कर्मैवासाधारणं कारणं पुरुषस्याऽऽश्रयभूतमिति स्तुतवन्तावित्यर्थः ।

तदेव प्रदर्शयति—

पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति ।

पुण्येन कर्मणा पुण्यशरीरयुक्तो भवति पापेन कर्मणा पापशरीर-युक्तो भवति । 'तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्ब्राह्मणयोनिं क्षत्रिययोनिं वैश्ययोनिं वाऽथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरञ्श्वयोनिं वा शूकर-योनिं वा चण्डालयोनिं वा' [छा० ५ । १० । ७] इति श्रुत्यन्तरा-दिति भावः ।

ततो ह जारत्कारव आर्तभाग उपरराम ॥ १३ ॥

स्पष्टोऽर्थः ॥ १३ ॥

इति बृहदारण्यकोपनिषदि तृतीयाध्यायस्य
द्वितीयं ब्राह्मणम् ॥ २ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां तृतीयाध्यायस्य
द्वितीयं ब्राह्मणम् ॥ २ ॥

अथ हैनं भुज्युर्लाह्यायनिः पप्रच्छ ।

भुज्युर्नामतः । लाह्यायनिर्गोत्रतः । लभस्य गोत्रापत्यं गर्गादिभ्यो यञ् ' [पा० सू० ४ । १ । १०५] तस्यापत्यं यञिञोश्चेति फक् । ततो गोत्राद्यूनीतिनियमादत इञ् । पप्रच्छ ।

याज्ञवल्क्येति होवाच । मद्रेषु चरकाः पर्यव्रजाम ।

मद्रा नाम जनपदास्तेषु चरका अध्ययनार्थं व्रतचरणाच्चरकाः । यद्वा मद्रेषु चरन्तीत्यर्थे ' चरेष्टः ' [पा० सू० ३ । २ । १६] इति टप्रत्यये तत्पुरुषे ' तत्पुरुषे कृति बहुलम् ' [पा० सू० ६ । ३ । १४] इत्यलुक् । स्वार्थे कः । पर्यव्रजाम । पर्यटितवन्तः । अस्मदो द्वयोश्च ' [पा० सू० १ । २ । ५९] इत्येकस्मिन्बहुवचनम् । ब्रह्मचर्यापेक्षया वा ।

ते पतञ्चलस्य काप्यस्य गृहानैम ।

ते वयं नाम्ना पतञ्चलस्य गोत्रेण काप्यस्य गृहानैम गतवन्तः । इणो लङ् ।

तस्याऽऽसीद्दुहिता गन्धर्वगृहीता ।

तस्य काप्यस्य दुहिता गन्धर्वेणामानुषेण सत्त्वेनाऽऽविष्टा ।

तमपृच्छाम ।

तं गन्धर्वमपृच्छाम लङ् ।

कोऽसीति सोऽब्रवीत्सुधन्वाऽऽङ्गिरस इति ।

स गन्धर्वो नामतोऽहं सुधन्वा गोत्रत आङ्गिरस इत्यब्रवीत् ।

तं यदा लोकानामन्तानपृच्छाम ।

पृष्टवन्त इति । यत्तत्त्वां पृच्छामि जानासि चेद्वदेति शेषः ।

अथैनमब्रूम* क्व पारिक्षिता अभवन्निति क्व पारिक्षिता अभवन् ।

ब्रूमेत्यत्राऽऽगमाभावश्छान्दसः । अनन्तरमन्यदप्येनं गन्धर्वमब्रूमापृच्छाम पारिक्षित्राः (ताः) कस्मिँल्लोकेऽभवन्निति ।

स त्वा पृच्छामि याज्ञवल्क्य क्व पारिक्षिता अभवन्निति ॥ १ ॥

ततो गन्धर्वादवगततत्स्वरूपस्त्वां पृच्छामि पारिक्षिताः क्वाभवन्निति ॥ १ ॥

* अत्र ब्रूमेत्यादिव्याख्यानानुसारेण ' नं ब्रूम ' इति रामानुजीयपाठ इति प्रतिभाति ।

स होवाच ।

किमिति—

उवाच वै सोऽगच्छन्वै ते तद्यत्राश्वमेधयाजिनो गच्छन्तीति ।

यत्र यस्मिँल्लोकेऽश्वमेधयाजिनो गच्छन्ति तत्तं लोकं ते पारिक्षिता अगच्छन्निति स गन्धर्वो युष्मभ्यमुवाच वै स उक्तवान्किल ।

एवमुत्तरे दत्ते याज्ञवल्क्यं पुनः पप्रच्छ—

क्व न्वश्वमेधयाजिनो गच्छन्तीति ।

याज्ञवल्क्यस्त्वेतस्यैव प्रश्नस्योत्तरे दत्तेऽपि प्रथमप्रश्नप्रतिवचनमन्तरेण न शाम्यतीति मत्वा(त्वा) प्रथमप्रश्नस्यास्य चोत्तरमाह—

द्वात्रिꣳशतं वै देवरथाह्न्यान्ययं लोकः ।

देवरथः सूर्यरथस्तस्य गत्याऽह्नो यावद्देशपरिमाणं परिच्छिद्यते तद्देवरथाह्न्यं तद्द्वात्रिंशद्गुणि तदेव रथाह्न्यानि तत्परिमाणोऽयं लोकालोकागिरिपरिवृतो देशः । द्वात्रिंशतं द्वात्रिंशदित्यर्थः ।

तꣳ समन्तं पृथिवी द्विस्तावत्पर्येति ।

तं लोकं समन्ततो द्विगुणा पृथिवी पर्येति ।

ताꣳ समन्तं पृथिवीं द्विस्तावत्समुद्रः पर्येति ।

तां महापृथिवीं द्विगुणः समुद्रः पर्येति यं घनोदकमाचक्षते पौराणिकाः ।

तत्राश्वमेधलोकमार्गविवरपरिमाणमुच्यते—

तद्यावती क्षुरस्य धारा यावद्वा मक्षि-
कायाः पत्रं तावानन्तरेणाऽऽकाशः ।

तत्तत्राण्डकटाहे क्षुरधारया मक्षिकापत्रेण च सदृशं मध्ये रन्ध्रमित्यर्थः ।

तानिन्द्रः सुपर्णो भूत्वा वायवे प्रायच्छत् ।

तान्पारिक्षितानिन्द्रः सुपर्णो भूत्वा वाहनं भूत्वा वायवे दत्तवानित्यर्थः । कंचित्प्रदेशमिन्द्र एव वायवे दत्तवानित्यर्थः ।

तान्वायुरात्मनि धित्वा तत्रागम-
यद्यत्राश्वमेधयाजिनोऽभवन्निति ।

आत्मनि धित्वाऽऽत्मनि स्थापयित्वा यत्र ब्रह्मलोकेऽश्वमेधयाजिनो गच्छन्ति तत्रागमत् । ततश्चेन्द्रस्यापि प्रवेशयोग्यरन्ध्रद्वारा वायुः पारिक्षितांश्चतुर्मुखलोकमगमयदित्यर्थः ।

एवं याज्ञवल्क्य उक्त्वाऽस्योक्तस्य संवादं दर्शयति—

एवमिव वै स वायुमेव प्रशशंस ।

एवं खलु स गन्धर्वो वायुं स्तुतवानित्यर्थः ।

तस्माद्वायुरेव व्यष्टिर्वायुरेव समष्टिः ।

पञ्चीकृतव्यष्ट्यात्मकब्रह्मलोकतदधस्तनलोकसंचारितया सूत्रात्मप्राणरूपेण सर्वनिर्वाहकतया व्यष्टिसमष्टिरूप इत्यर्थः ।

व्यष्टिसमष्ट्यात्मकतया वायुचिन्तनस्य फलमाह—

अप पुनर्मृत्युं जयति य एवं वेद ततो
ह भुज्युर्लाह्यायनिरुपरराम ॥ २ ॥

इति बृहदारण्यकोपनिषदि तृतीयाध्यायस्य
तृतीयं ब्राह्मणम् ॥ ३ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां तृतीयाध्यायस्य
तृतीयं ब्राह्मणम् ॥ ३ ॥

एवमस्य कर्मकाण्डवैदुष्यं मत्वा ब्रह्मकाण्डे वाऽस्याप्रतिभां संपादयिष्याम इति मन्यमानाः प्रष्टुं प्रावर्तन्त—

अथ हैनमुषस्तश्चाक्रायणः पप्रच्छ ।

नाम्नोषस्तः । चक्रस्य गोत्रापत्यं 'नडादिभ्यः फक्' [पा० सू० ४।१।९९] चाक्रायणः ।

याज्ञवल्क्येति होवाच यत्साक्षादपरोक्षा-
द्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेति ।

अपरोक्षादपरोक्षमित्यर्थः । सुपां सुलुक्० [पा० सू० ७ । १ । ३९] इत्यादिनाऽऽदादेशः । अपरोक्षत्वं नाम सर्वदेशकालसंनिहितत्वम् ।

देशकालसंनिकर्षे हि अपारोक्ष्यदर्शनात् । यदपरोक्षं साक्षाद्ब्रह्माव्यवधानेन ब्रह्मागौणं मुख्यमिति यावत् । सर्वान्तरः । 'आत्मा च द्रष्टव्यः श्रोतव्यः' इति दर्शनादिकर्मत्वेनोक्तश्च यस्तादृशं वस्तु मे व्याचक्ष्व विविच्याऽऽचक्ष्व दर्शयेत्यर्थः । उत्तरत्र 'न दृष्टेर्द्रष्टारं पश्येः' इति द्रष्टव्यत्वादेरन्यत्र निषेधाद्द्रष्टव्यत्वादिकमपि प्रश्नविषय इति द्रष्टव्यम् । उत्तरमाह—

एष त आत्मा सर्वान्तरः ।

ते य आत्मा स एव सर्वान्तर्यामी । अपरोक्षं मुख्यं ब्रह्म द्रष्टव्यश्चेत्यर्थः ।

पुनः पृच्छति—

कतमो याज्ञवल्क्य सर्वान्तरः ।

यदुक्तं त आत्मा सर्वान्तर इति तदस्तु कतम आत्मा सर्वान्तर इति तवाभिप्राय इति न जाने । देहेन्द्रियप्राणजीवादिषु कश्चिन्म आत्मा सर्वान्तर उत ततोऽन्य इत्यर्थः । यद्यपि त आत्मेति व्यतिरेकनिर्देशेन प्रत्यक्षदृष्टाभिमुखशरीरव्यतिरेकः सिध्यति तथाऽपीन्द्रियाद्यन्यतमत्वसंदेहो नापकृत इति भावः ।

उत्तरमाह—

य: प्राणेन प्राणिति स त आत्मा सर्वान्तरो
योऽपानेनापानिति स त आत्मा सर्वान्तरो
यो व्यानेन व्यानिति स त आत्मा सर्वान्तरो
य उदानेनोदानिति स त आत्मा सर्वान्तर
एष त आत्मा सर्वान्तरः ॥ १ ॥

उक्त इति शेषः । प्राणितीत्यादौ 'रुदश्च पञ्चभ्यः' [पा० सू० ७।२।७८] इतीट्प्राणादिव्यापारकर्ता यः स सर्वान्तर आत्मेत्यर्थः । अत्र प्राणस्य करणतया निर्देशात्प्राणव्यतिरेकः सिद्धः । सुषुप्तौ बाह्यान्तरिन्द्रियोपरतावपि प्राणादिव्यापारदर्शनात्तद्व्यतिरेकोऽपि सिद्धः । सुषुप्तौ जीवस्याप्युपरतव्यापारतया प्राणेन प्राणयितृत्वाभावात्तद्व्यतिरेकोऽपि सिध्यतीत्याशयः ॥ १ ॥

स होवाचोषस्तश्चाक्रायणः ।

आशयमविद्वान्पुनराहेत्यर्थः ।

यथा विब्रूयादसौ गौरसावश्व इत्येवमेवैत-
द्व्यपदिष्टं भवति यदेव साक्षादपरोक्षाद्ब्रह्म
य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेत्येष त
आत्मा सर्वान्तरः कतमो याज्ञवल्क्य सर्वान्तरः ।

यथा गां प्रदर्श्यासौ गौरसावश्व इति गव्यश्वाभेदोपदेशो विरुद्ध एवमेव 'यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्व' इति मामकप्रश्न एष त आत्मा सर्वान्तरो 'यः प्राणेन प्राणिति' इति प्राणनादिकर्तुर्मद्यात्मनो जीवस्य सर्वान्तरत्वकथनं विरुद्धवचनमेव । अतः कतमो याज्ञवल्क्य सर्वान्तरः स तावदविरुद्धतया वक्तव्य इत्यर्थः ।

उत्तरमाह—

न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारꣳ शृणुया न मते-
र्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीयाः ।

अत्र दृष्टेर्द्रष्टारमिति पाकं पचतीतिवन्निर्देशः । द्रष्टारं कर्तारमित्यर्थः । दर्शनश्रवणमनननिदिध्यासनानां कर्ता जीवः स न द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ।

एष त आत्मा सर्वान्तरः ।

दर्शनादिकर्तुर्जीवादन्य एव दर्शनादिकर्मभूतः सर्वान्तर आत्मा ।

अतोऽन्यदार्तम् ।

अतः परमात्मनोऽन्यद्व्यतिरिक्तं त्वदभिमतं प्राणितृत्वादिमज्जीवजातमार्तं दुःखीत्यर्थः । अत एव नित्यमुक्तानां कदाऽप्यस्पृष्टदुःखत्वात् 'अतोऽन्यदार्तम्' इत्युक्तिः कथमिति शङ्का प्रत्युक्ता । तेषामिहाप्रसक्तत्वात् ।

ततो होषस्तश्चाक्रायण उपरराम ॥ २ ॥

इति बृहदारण्यकोपनिषदि तृतीयाध्याये
चतुर्थं ब्राह्मणम् ॥ ४ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां तृतीयाध्यायस्य
चतुर्थं ब्राह्मणम् ॥ ४ ॥

अथहैनं कहोलः कौषीतकेयः पप्रच्छ ।

कहोलो नामतः । कुषीतकस्यापत्यं कौषीतकेयः । 'विकर्णकुषीतकात्काश्यपे '[पा० सू० ४ । १ । १२४] इति ढक् ।

याज्ञवल्क्येति होवाच यदेव साक्षादपरोक्षाद्ब्रह्म
आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेत्येष त आत्मा
सर्वान्तरः । कतमो याज्ञवल्क्य सर्वान्तरः ।

पूर्ववदर्थः । यद्यपि प्रश्नोऽयमुषस्तेन कृत एव दत्तोत्तरश्च निरुपाधिकसर्वप्राणिप्राणनहेतुत्वनिरङ्कुशसर्वान्तरत्वादस्य जीवव्यावृत्तिरपि सिद्धा 'न दृष्टेर्द्रष्टारम् ' इत्यादिना दर्शनश्रवणादि कर्तुर्जीवस्य द्रष्टव्यत्वादिनिषेधमुखेन मुख्यब्रह्मत्वमपि प्रतिषिद्धं तथाऽपि प्राणितृत्वस्य जाग्रदादिदशाविशेषे जीवेऽपि संभवाद्देहाद्यपेक्षयाऽन्तरे जीव आपेक्षिकसर्वान्तरत्वसंभवान्न दृष्टेर्द्रष्टारमित्यत्रापि दृष्टिव्यतिरिक्तद्रष्टृनिषेधपरत्वसंभवेन ज्ञानस्वरूपजीवप्रतिपादकत्वसंभवादुक्तधर्माणां परमात्मैकान्तिकत्वं निश्चेतुमसमर्थस्य कहोलस्य दृढतरेण व्यावर्तकधर्मेण जीवव्यावर्तकधर्मभूयस्तया व्यावृत्तिबुद्ध्यतिशयार्थमेकविषयकप्रश्नद्वयमित्युक्तं व्यासार्यैः । तदभिप्रायं जानन्नाह—

योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति ।

अशनाया बुभुक्षा पातुमिच्छा पिपासा शोक इष्टानिष्टवियोगसंयोगजः । मोहः कामादिजनितोऽज्ञानं वा । जीवस्य कर्माधीनदेहसंसर्गतयाऽशनायाद्यनतीतत्वात्तद्व्यावृत्तिः सिध्यतीति भावः । यद्यपि मुक्तानां नित्यानां चाशनायाद्यतीतत्वमस्ति तथाऽपि तेषामशनायाद्यतीतत्वस्य परमात्मसंकल्पायत्तत्वादनन्यसंकल्पाधीनाशनायाद्यतीतत्वं परमात्मन एव । किं च प्रकृते बद्धजीवव्यावृत्तेरेव स त आत्मेति निर्दिष्टस्योपदेष्टव्यतया नित्यमुक्तव्यावर्तकधर्मानुक्तावपि न दोष इति द्रष्टव्यम् ।

एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति ।

तमेतं सर्वान्तरमशनायाद्यतीतं परमात्मानमनार्तं विदित्वा । ब्राह्मणा इत्यनेन क्षत्रियादिव्यावृत्तिः । पुत्रैषणायाश्च । इषेर्ण्यन्तात्, 'ण्यासश्रन्थः०' [पा० सू० ३ । ३ । १०७] इति युच्क्तिनोऽपवादः । अण्यन्तात्तु इच्छेति निपातः । इषेः स्वार्थे णिच्छान्दसः । पुत्रैषणेत्यनेन 'जाया मे स्यादथ प्रजायेय' [बृ० १ । ४ । १७] इति योक्ता सा गृह्यते । वित्तैषणायाश्चेत्यनेन 'वित्तं मे स्यादथ कर्म कुर्वीय' [बृ० १ । ४ । १७] इति योक्ता सा गृह्यते । लोकैषणायाश्चेत्यनेन जायाप्रजावित्तकर्मसाध्यसकललोकेच्छा गृह्यते । उक्तैषणात्रयाद्व्युत्थायैषणात्रयं हित्वा यथाविधि संन्यस्येति यावत् । अथानन्तरं देहयात्रार्थं भिक्षाटनं कुर्वन्तीत्यर्थः । इदं चोपलक्षणम् । सर्वसंन्यासाश्रमधर्मानुष्ठानस्यात्राप्राप्तत्वात्पारिव्राज्यं विधीयते ।

या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणा ।

अवर्जनीयपरस्परसंबन्धादिति भावः ।

उभे ह्येते एषणे एव भवतः ।

सर्वथा साध्यसाधनविषयैषणाद्वयमेव पर्यवस्यतीति भावः ।

तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् । बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः ।

यद्वा वैराग्यमावश्यकं तस्माद्ब्राह्मणोऽधीतवेद इत्यर्थः । ब्रह्माधीते ब्राह्मणो जातिपरो वा । पाण्डित्यं निर्विद्य । ऊहापोहक्षमा धीः पण्डा साऽस्य संजातेति पण्डितस्तस्य धर्मः पाण्डित्यम् । औपदेशिकार्थावगमरूपं विवेकं निर्वेदविरक्तिफलकं निर्विद्य लब्ध्वा बाल्येन स्वमाहात्म्यानाविष्करणबालस्वभावेन युक्तः सन्ब्रह्मणि तिष्ठासेत्तन्निष्ठां लभेतोपासीतेति यावत् । तथैव व्याख्यातं च व्यासार्यैर्बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः । बाल्यपाण्डित्ये निर्विद्य लब्ध्वाऽथाऽऽ-

रंव(रम्ब)णसंशीलनलक्षणमननशीलः स्यादित्यर्थः । ध्यानविच्छेद-दशायामत्यन्तविषयोन्मुखत्वराहित्याय शुभाश्रयवस्तुसंशीलनं कर्तव्य-मित्यर्थः ।

अमौनं मौनं च निर्विद्याथ ब्राह्मणः ।

अमौनं मौनादन्यत् । पूर्वनिर्दिष्टं बाल्यपाण्डित्यलक्षणं मौनं चाऽऽरं-व(रम्ब)णसंशीलनात्मकं मौनं च निर्विद्याथ ब्राह्मणो ब्रह्मविद्भवति लब्धनिदिध्यासनो भवतीत्यर्थः ।

स ब्राह्मणः केन स्याद्येन स्यात्तेनेदृश एव ।

लब्धनिदिध्यासनो ब्रह्मविदुक्तोपायादन्येन केन स्यादिति प्रश्नः । उत्तरम्—येन स्यात्तेनेदृश एव येन मौनपर्यन्तेन ब्राह्मणः स्यादित्युक्तं तेनैवेदृशः स्यान्न केनाप्यन्येनोपायेन ।

अतोऽन्यदार्तम् ।

अस्मात्परमात्मनो यदन्यत्प्राणिजातं तद्दुःखीत्यर्थः ।

ततो ह कहोलः कौषीतकेय उपरराम ॥ १ ॥

इति बृहदारण्यकोपनिषदि तृतीयाध्यायस्य
पञ्चमं ब्राह्मणम् ॥ ५ ॥

स्पष्टोऽर्थः । बाल्येन तिष्ठासेदित्यत्र बाल्यशब्दस्य भावकर्मसाधारण-त्वेऽपि वयोविशेषलक्षणभावस्येच्छया संपादयितुमशक्यत्वेनाविधेयत्वा-त्कर्मैव विधेयम् । तत्र कामचारवादभक्षत्वादिकं यद्बालस्य कर्म यच्च दम्भा-दिराहित्यलक्षणं स्वमाहात्म्यानाविष्करणलक्षणरूपं यत्कर्म तत्सर्वं बाल्य-शब्देन विधेयमविशेषात् । न च निषिद्धस्य कामचारादेर्विधानमयुक्तमिति वाच्यम् । वामदेवोपासनाङ्गतया प्रार्थयमानसर्वयोषिदपहारलक्षणनि-षिद्धकर्मविधानवद्विद्याङ्गतया निषिद्धस्यापि कामचारादेर्विधानसंभवा-दिति पूर्वपक्षे प्राप्त उच्यते । 'अनाविष्कुर्वन्नन्वयात्' [ब्र० सू० ३।४।५] स्वमाहात्म्यमनाविष्कुर्वन्नेव विद्वान्वर्तेत । स्वमाहात्म्यानाविष्करणलक्ष-णबाल्यस्यैव विद्यायामन्वयसंभवात् ।

नाविरतो दुश्चरितान्नाशान्तो नासमाहितः ।
न शान्तमानसो वाऽपि प्रज्ञानेनैनमाप्नुयात् ॥

इति विशिष्य विद्यायामपि प्रतिषिद्धस्य कामचारादेर्विद्याङ्गतयाऽन्वयसंभवादित्यङ्गपादे स्थितम्। तत्रैव तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्। बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरित्यत्र मुनिशब्देन पाण्डित्यशब्दविहितं ज्ञानमेवानूद्यते न ततोऽर्थान्तरं विधीयते प्रमाणाभावादिति पूर्वपक्षे प्राप्त उच्यते—'सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्' [ब्र० सू० ३ । ४ । ४७] विधीयत इति कर्मसाधनो विधिशब्दः। सहकार्यन्तरं च तद्विधिश्च सहकार्यन्तरविधिः। तद्वतो विद्यावतो तृतीयं बाल्यपाण्डित्यापेक्षया तृतीयं मौनं विद्यायाः सहकार्यन्तरं विधीयत इत्यर्थः। न च मुनिशब्दार्थस्य पाण्डित्यशब्देनैव प्राप्तत्वाद्विधेयत्वानुपपत्तिरिति वाच्यम्। पक्षेण प्रकृष्टमननशीले व्यासादौ मुनिशब्दस्य प्रयोगात्पक्षप्रकृष्टं मननमेव मुनिशब्दार्थः। तच्च पाण्डित्यशब्दितोपदेशिकार्थावगमाच्छ्रवणप्रतिष्ठार्थान्मननाच्चार्थान्तरभूतरूपमारंव(रम्भ)णसंशीलनात्मकमिति तस्याप्राप्तत्वेन विधानार्हत्वाद्विधेयत्वं प्रयुज्यते। पक्षः परिग्रहः। पक्ष परिग्रह इति हि धातुः। आदर इति यावत्। तत्कृतप्रकर्षयुक्तं यन्मननं तदेव मुनिशब्देन विधीयते सादरं मननमारंव(रम्भ)णसंशीलनं विधीयत इत्यर्थः। विध्यादिवदत्रापि विधिशब्दः कर्मसाधनः। विधेयादिवत्। प्रस्तुतमननापेक्षयाऽऽदिर्यो विधेयः प्राक्तनो यो विधेयः पाण्डित्यबाल्यलक्षणः। ततश्चायमर्थः—विद्याङ्गतया यथा बाल्यपाण्डित्ये विधीयेते एवं मुनिशब्देनाप्यारंव(रम्भ)णसंशीलनलक्षणं सादरं मननं तृतीयं सहकारि विधीयत इत्यर्थः। यद्वा विध्यादिवदित्यत्र विधिशब्देन विधेयं यज्ञदानाद्युच्यते। आदिशब्दग्राह्यं श्रवणं मननं च। ततश्च सहकार्यन्तरविधिरित्यत्र सहकार्यन्तरेति पृथक्पदं लुप्तविभक्तिकम्। ततश्चायमर्थः—तृतीयं मौनं यज्ञदानश्रवणमननवद्बाल्यपाण्डित्यापेक्षया सहकार्यन्तरं सद्विध्यर्हमित्यर्थः। पाण्डित्यादिभिन्नत्वेऽप्यनुवाद्यता स्यादित्यर्थः। ननु बाल्यपाण्डित्यमौनाङ्गीकाराय विद्यायाः सर्वेष्वाश्रमेषु संभवाच्छान्दोग्ये 'अभिसमावृत्य कुटुम्बे शुचौ देशे' [८।१५।१] इत्यारभ्य 'स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते' इति गार्हस्थ्यधर्मेणोपसंहारः कथमित्यत्राऽऽह—'कृत्स्नभावात्तु गृहिणोपसंहारः' [ब्र० सू० ३।४।४८] तुशब्दः पक्षं व्यावर्तयति। कृत्स्नेष्वाश्रमेषु ब्रह्मविद्यायाः सद्भावाच्छान्दोग्ये गृहस्थेनोपसंहार उपलक्षणार्थः। यथा छान्दोग्ये गृहस्थधर्मकीर्तनमितराश्रमधर्मोपलक्षणार्थमेवं बृहदारण्यके भिक्षाचर्यं

चरन्तीति संन्यासिधर्मकीर्तनमाश्रमधर्मान्तरोपलक्षणार्थमित्याहुः। 'मौनवदितरेषामप्युपदेशात्' [ब्र० सू० ३ । ४ । ४९]। अत्र मौनशब्देन मौनसमभिव्याहृतसंन्यासिधर्मभूतं भिक्षाचरणं लक्ष्यते । मौनवत् । संन्यासिधर्मवदितरेऽप्याश्रमधर्मा विद्याङ्गमित्यर्थः । इतरेषामप्याश्रमिणां ब्रह्मसंस्थोऽमृतत्वमेतीति ब्रह्मविद्याया मोक्षस्य चोपदेशादिति स्थितम् । प्रकृतमनुसरामः । उषस्तकहोलब्राह्मणद्वयं गुणोपसंहारपादे 'अन्तरा भूतग्रामवत्स्वात्मनः' [ब्र० सू० ३ । ३ । ३५] 'अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशान्तरवत्' [ब्र०सू० ३ । ३ । ३६] इत्यत्र चिन्तितम् । तत्र हि ब्राह्मणद्वयप्रतिपाद्यविद्ययोर्भेदोऽस्ति नेति विषये पूर्वपक्षी प्रत्यवतिष्ठते—अन्तरा भूतग्रामवत्स्वात्मनोऽन्यथाभेदानुपपत्तिरिति चेदित्यन्तरशब्दाद्भावप्रधानात्सुपां सुलुगिति तृतीयैकवचनस्याऽऽकारादेशेऽन्तरेति रूपम् । अन्तरत्वेनेत्यर्थः । अन्तराशब्दो मध्यवचनोऽप्यस्ति तयोरेकशेषेण सूत्रेऽन्तरेति निर्देशः । ततश्चायमर्थः—मध्य उषस्तब्राह्मणे 'एष त आत्मा सर्वान्तरः' इति सर्वान्तरत्वेन निर्देशो भूतग्रामवत्स्वात्मनः । भूतग्रामवान्यः स्वात्मा भूतग्रामशब्दिताचेतनान्तर्यामी यः प्रत्यगात्मा तद्विषयको न तु परमात्मविषयकः । यः प्राणेन प्राणितीति प्राणितृत्वादेर्जीवधर्मस्य वाक्यशेषे कीर्तनात् । कहोलब्राह्मणं तु अशनायाद्यतीतत्वरूपपरमात्मलिङ्गात्परमात्मविषयकमेव । यदि ब्राह्मणद्वयमपि परमात्मविषयकं स्यात्तर्ह्युषस्तेन पृष्टे प्रत्युक्ते च परमात्मस्वरूपे कहोलस्य पुनः प्रश्नः प्रतिवचनं चासंगतं स्यात् । अतो वेद्यभेदाद्विद्याभेद इति पूर्वपक्षे प्राप्ते नोपदेशवत् । न भेदो युज्यते । 'साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः' [बृ० ३ । ४ । १] इति मुख्यब्रह्मत्वलक्षणसाक्षाद्ब्रह्मत्वसर्वकालसंनिहितत्वलक्षणापरोक्षत्वसर्वान्तर्यामित्वरूपसर्वान्तरत्वरूपपरमात्मलिङ्गविशिष्टविषयत्वेन प्रश्नद्वयस्याप्येकविषयत्वावश्यंभावात् । 'यः प्राणेन प्राणिति' [बृ० ३ । ४ । १] इति वाक्यशेषश्रुतस्यापि निरुपाधिकसर्वप्राणिप्राणनहेतुत्वस्य परमात्मलिङ्गत्वादुत्तरत्र 'न दृष्टेर्द्रष्टारं पश्येः' [बृ० ३ । ४ । २] इत्यादिनेन्द्रियाधीनदर्शनादीनां कर्तारं प्रत्यगात्मानं प्राणनस्य कर्तृत्वेनोक्त इति न मन्वीथा इति प्रत्यगात्मव्यावृत्तेः प्रतिपादितत्वाच्चोषस्तप्रश्नप्रतिवचनमपि परमात्मविषयमेव । अत एव कहोलप्रश्ने 'यदेव साक्षादपरोक्षाद्ब्रह्म' इत्येवकारेण पूर्वपृष्टाधिकविषयत्वं व्यावर्तितम् । नन्वेवं सति पुनःप्रश्नवैयर्थ्यमिति चेत् 'नोपदेशवत्' यथा सद्विद्यायाम् 'उत तमादेशम-

प्राक्ष्यः ' [छा० ६ । १ । २] इति प्रक्रान्तसदुपदेशे ' भगवाँस्त्वेव मे तद्ब्रवीत्विति ' [छा० ६ । १ । ७] ' भूय एव मा भगवान्विज्ञापयतु ' [छा०६ । ५ । ४] इति प्रश्नस्य ' स य एषोऽणिमैतदात्म्यमिदꣳ सर्वम् ' [छा० ६ । ८ । ७] इति प्रतिवचनस्य च भूयो भूय आवृत्तिस्ततो ब्रह्मणस्तत्तन्माहात्म्यविशेषप्रतिपादनाय दृश्यते । एवमेकस्यैव सर्वान्तरभूतस्य कृत्स्नप्राणिप्राणनहेतोः परस्य ब्रह्मणोऽशनायाद्यतीतस्वरूपब्रह्मलिङ्गान्तरप्रतिपादनाय कहोलस्य पुनःप्रश्नोपपत्तेः । ' व्यतिहारो विशिंषन्ति हीतरवत् ' [ब्र० सू० ३ । ३ । ३७] यस्माद्धेतोरेवमेव परमात्मानं याज्ञवल्क्यवचनानि सर्वप्राणिप्राणनहेतुत्वाशनाद्यतीतत्वादिधर्मैर्विशिंषन्ति तस्माद्धेतोर्वेद्यैक्याद्विद्यैक्येन व्यतिहारो ब्राह्मणद्वयश्रुतानामितरत्रोपसंहारः कर्तव्य इतरवत् । यथा सद्विद्यायां वेद्यैक्यबलाद्भूय एव मा भगवान्विज्ञापयतु तथा सोम्येति होवाचेति प्रश्नप्रतिवचनभेदेऽपि सर्वप्रतिवचनगतानां सर्वेषां धर्माणां सर्वत्रोपसंहारवत् । ननु सद्विद्यायामपि प्रश्नप्रतिवचनभेदाद्भेद एवास्त्वित्यत्राऽऽह— 'सैव हि सत्यादयः' [ब्र० सू० ३ । ३ । ३८] सैव हि तच्छब्दाभिहिता देवता तत्सत्यं स आत्मेति श्रुताः सत्यत्वादयश्च । 'उद्दालको हाऽऽरुणिः श्वेतकेतुं पुत्रमुवाच' [छा० ६ । ८ । १] इत्यारभ्य प्रवृत्तेषु नवस्वपि खण्डेष्वनुगता दृश्यमाना वेद्यैक्यमवगमयन्त्यतो न दृष्टान्तासिद्धिशङ्का कार्येति स्थितम् । प्रकृतमनुसरामः ।

इति बृहदारण्यकोपनिषत्प्रकाशिकायां तृतीयाध्यायस्य
पञ्चमं ब्राह्मणम् ॥ ५ ॥

अथ हैनं गार्गी वाचक्नवी पप्रच्छ ।

गर्गस्य गोत्रापत्यं स्त्री गार्गी । 'गर्गादिभ्यो यञ् [पा०सू०४।१।१५] स्त्रीत्वविवक्षायां यञश्च [पा० सू० ४।१।१६] इति ङीप् । यस्येत्यकारलोपः । 'हलस्तद्धितस्य' [पा०सू०६ । १ । १५०] इति यकारलोपः । वाचक्नवी वचक्नुर्नाम ऋषिस्तस्यापत्यं स्त्रीत्यणि वृद्धौ ङीपि ओर्गुणेऽवादेशे यस्येति चेत्यणोऽकारलोपे वाचक्नवी वचक्नुपुत्रीत्यर्थः ।

याज्ञवल्क्येति होवाच यदिदꣳ सर्वमप्स्वोतं च प्रोतं चेति कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति ।

यदिदं पार्थिवं सर्वं धातुजातं कारणभूतास्वप्सु ओतं प्रोतं च दीर्घप-

दृतन्तुवदोतं तिर्यक्तन्तुवत्प्रोतं च। अप्सु प्रोतत्वाभावे पार्थिवो धातुः सक्तुमुष्टिवद्विशीर्येत। ता आपः कस्मिन्नु खल्वेताः प्रोताश्चेति।

उत्तरम्—

वायौ गार्गीति कस्मिन्नु खलु वायुरोतश्च प्रोतश्चेत्यन्तरिक्षलोकेषु गार्गीति कस्मिन्नु खल्वन्तरिक्षलोका ओताश्च प्रोताश्चेति गन्धर्वलोकेषु गार्गीति कस्मिन्नु खलु गन्धर्वलोका ओताश्च प्रोताश्चेत्यादित्यलोकेषु गार्गीति कस्मिन्नु खल्वादित्यलोका ओताश्च प्रोताश्चेति चन्द्रलोकेषु गार्गीति कस्मिन्नु खलु चन्द्रलोका ओताश्च प्रोताश्चेति नक्षत्रलोकेषु गार्गीति कस्मिन्नु खलु नक्षत्रलोका ओताश्च प्रोताश्चेति देवलोकेषु गार्गीति कस्मिन्नु खलु देवलोका ओताश्च प्रोताश्चेतीन्द्रलोकेषु गार्गीति कस्मिन्नु खल्विन्द्रलोका ओताश्च प्रोताश्चेति प्रजापतिलोकेषु गार्गीति कस्मिन्नु खलु प्रजापतिलोका ओताश्च प्रोताश्चेति ब्रह्मलोकेषु गार्गीति कस्मिन्नु खलु ब्रह्मलोका ओताश्च प्रोताश्चेति।

स्पष्टोऽर्थः। न चाधःस्थितानामन्तरिक्षलोकानामुपरितनेषु गन्धर्वलोकादिषु ओतत्वं प्रोतत्वमनुपपन्नमिति शङ्क्यम्। पर्वतानामुपरिस्थितानां क्षितिधारकत्ववदोर्ध्वस्य ज्योतिश्चक्रा(क्र)धारकत्ववदुपपत्तेः।

स होवाच गार्गि माऽतिप्राक्षीर्मा ते मूर्धा व्यपप्तत्।

ब्रह्मलोकमप्यतिक्रम्य तत ऊर्ध्वस्य प्रश्नं मा कुरु ते मूर्ध्नः पतनं मा भूत्पृच्छसि चेत्पतिष्यतीति भावः। अपप्तत्। लुङि लृदित्वादङ्। पतः पुमिति पुमागमः।

अनतिप्रश्न्यां वै देवतामतिपृच्छसि गार्गि माऽतिप्राक्षीरिति।

प्रश्नमर्हतीति प्रश्न्या। नियमाद्युपेतप्रश्नमर्यादामतिक्रम्य वर्तमानः प्रश्नोऽतिप्रश्न आक्षेप इति यावत्। अतिप्रश्नमर्हतीत्यतिप्रश्न्याऽऽक्षेपा-

हेत्यर्थः । सा न भवतीत्यनतिप्रश्न्या आक्षेपमुखेन ज्ञातुमयोग्यां देवतामाक्षेपमुखेन ज्ञातुमिच्छसीत्यर्थः । यद्यपि ब्रह्मलोकाधारविषयः प्रश्नो न परदेवताविषयोऽपि त्वव्याकृताकाशविषयस्तथाऽपि तदनन्तरप्रश्नः परदेवताविषयो भविष्यतीति दूरदृष्ट्या ब्रह्मलोकाधारप्रश्नमेव प्रतिचिक्षेपेति द्रष्टव्यम् ।

ततो ह गार्गी वाचक्नव्युपरराम ॥ १ ॥

इति बृहदारण्यकोपनिषदि तृतीयाध्याये
षष्ठं ब्राह्मणम् ॥ ६ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां तृतीयाध्यायस्य
षष्ठं ब्राह्मणम् ॥ ६ ॥

अथ हैनमुद्दालक आरुणिः पप्रच्छ ।

नाम्नोद्दालकः । अरुणस्यापत्यमारुणिः ।

याज्ञवल्क्येति होवाच मद्रेष्ववसाम पतञ्चलस्य काप्यस्य गृहेषु यज्ञमधीयानाः ।

मद्रेषु देशेषु गोत्रतः काप्यस्य नाम्ना पतञ्चलस्य गृहेषु गृहाः पुंसि च भूम्न्येवेत्येकस्मिन्बहुवचनम् । कल्पसूत्रमधीयाना उषितवन्तः ।

तस्याऽऽसीद्भार्या गन्धर्वगृहीता तमपृच्छाम कोऽसीति सोऽब्रवीत्कबन्ध आथर्वण इति ।

नाम्ना कबन्धः । अथर्वपुत्रश्च । इतरत्स्पष्टम् ।

सोऽब्रवीत्पतञ्चलं काप्यं याज्ञिकाꣳश्च ।

स गन्धर्वो याज्ञिकान्यज्ञाध्येतॄनस्मांश्चाध्यापकं काप्यं चाब्रवीत् ।

वेत्थ नु त्वं काप्य तत्सूत्रं येनायं च लोकः परश्च लोकः सर्वाणि भूतानि संदृब्धानि भवन्तीति ।

सूत्रेण पुष्पाणीव ग्रन्थनेन विदृब्धानीत्यर्थः । एतादृशं सूत्रं त्वं वेत्थ किमिति प्रश्नः ।

सोऽब्रवीत्पतञ्चलः काप्यो नाहं तद्भगवन्वेदेति ।

एवं सूत्रं पृष्ट्वाऽन्तर्यामिणं पप्रच्छेत्याह—

सोऽब्रवीत्पतञ्चलं काप्यं याज्ञिकाꣳश्च वेत्थ नु त्वं काप्य तमन्तर्यामिणं य इमं च लोकं च परं च लोकं च सर्वाणि भूतानि चान्तरो यमयतीति सोऽब्रवीत्पतञ्चलः काप्यो नाहं तं भगवन्वेदेति सोऽब्रवीत्पतञ्चलं काप्यं याज्ञिकाꣳश्च यो वै तत्काप्य सूत्रं विद्यात्तं चान्तर्यामिणमिति ।

इतिशब्दः प्रकारवचनः । हे काप्य तत्सूत्रं तं चान्तर्यामिणमस्मदवगतप्रकारेण यो विद्यादित्यर्थः । शिष्टं स्पष्टम् ।

स ब्रह्मवित्स लोकवित्स देववित्स वेदवित्स भूतवित्स आत्मवित्स सर्वविदिति ।

स परब्रह्मवित्तन्नियम्यलोकदेवभूतवित्स परमात्मवित्स सर्वविदिति ।

तेभ्योऽब्रवीत्तदहं वेद ।

काप्य याज्ञिकेभ्यो गन्धर्वोऽब्रवीदित्यर्थः । तदहं वेद तत्सर्वमहं जान इत्यर्थः ।

तच्चेत्त्वं याज्ञवल्क्य सूत्रमविद्वाꣳस्तं चान्तर्यामिणं ब्रह्मगवीरुदजसे मूर्धा ते विपतिष्यतीति वेद वा अहं गौतम तत्सूत्रं तं चान्तर्यामिणमिति ।

ब्रह्मगवीः । ब्रह्मविद्यापणबन्धभूता गाः । गोरतद्धितलुकीति टचि टिड्ढाणञित्यादिना ङीप् । उदजसे चेत्कालयसि चेत्त मूर्धा विपतिष्यतीति शशाप । तं वेद वा अहं तत्सूत्रं तं चान्तर्यामिणमिति याज्ञवल्क्यस्य प्रतिवचनं हे गौतम तं तत्सूत्रं तदन्तर्यामिणमहं वेद्मीत्यर्थः ।

एवमुक्त उद्दालक उवाच—

यो वा इदं कश्चिद्ब्रूयाद्वेद वेदेति ।

कश्चिद्वै सर्वज्ञंमन्य इदं वेदेदं वेदेति वाचा ब्रूयादित्यर्थः ।

यथा वेत्थ तथा ब्रूहीति ॥ १ ॥

येन प्रकारेण वेत्थ तेन प्रकारेण ब्रूहि किं वञ्चयस इत्यर्थः ॥ १ ॥

स होवाच वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्ति तस्माद्वै गौतम पुरुषं प्रेतमाहुर्व्यस्रꣳसिषतास्याङ्गानीति वायुना हि गौतम सूत्रेण संदृब्धानि भवन्तीति ।

यस्मात्सर्वाणि वायुना ग्रथितानि तस्मादेव हेतोरुत्क्रान्तप्राणस्य पुरुषस्याङ्गानि उत्सूत्रमाल्यानीव स्रस्तानि भवन्ति । अतो वायुना संदृब्धानि व्यस्रंसिषत । लुङ् ।

अङ्गी करोति—

एवमेवैतद्याज्ञवल्क्य ।

भवत्वेतदेवमितरद्ब्रूहीत्यर्थः ।

अन्तर्यामिणं ब्रूहीति ॥ २ ॥

यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः॥३॥

पृथिव्यां स्थितस्तदन्तर्गतः । तदवेद्यस्तच्छरीरकः सन्योऽन्तःप्रविश्य प्रवृत्तिनिवृत्तिलक्षणं नियमनं करोति एषोऽन्तर्यामी तेऽमृत आत्मा निरुपाधिकामृतत्वशालि आत्मेत्यर्थः । अत्र त आत्मेति व्यतिरेकनिर्देशादन्तर्यामिणो जीवस्य व्यतिरेकः सिद्धोऽमृतत्वविशेषणाच्च । तद्धि विशेषणं जीवव्यावृत्त्यर्थम् । अन्तर्यामी त आत्मेत्युक्त आत्मशब्दस्य स्वरूपवचनत्वशङ्काया जीवव्यावृत्तिर्न प्राप्नोतीति हि अमृत इत्युक्तम् । निरुपाधिकामृतत्वशालि आत्मा परमात्मैव । अत्र प्रश्नानुरूप्येणेमं च

लोकं परं च लोकं सर्वाणि च भूतानि योऽन्तरो यमयति एष त आत्माऽन्तर्यामीत्येकेनैव निर्देशेन सर्वान्तर्यामिण उद्दालकं प्रति त आत्मेत्यात्मप्रतिपादनसंभवाद्यः पृथिव्यां तिष्ठन्योऽप्सु तिष्ठन्नित्यादिपर्यायोपदेशबाहुल्यं किमर्थमिति चेन्न । एकैकवस्तुषु परिपूर्णत्वेन नियन्तृतया स्थितिज्ञापनार्थत्वेन सार्थक्यात् । परिपूर्णत्वं चाणुमात्रेऽपि वस्तुनि स्थितस्य निरवधिकषाड्गुण्यविशिष्टप्रतिपत्तियोग्यत्वमिति व्यासार्यैर्वाक्यान्वयाधिकरणे वर्णितम् । ननु सर्वाणि भूतानि योऽन्तरो यमयति तन्मे ब्रूहीति सर्वभूतस्याप्यन्तर्यामि एकोऽस्ति स वक्तव्य इति पृष्टवन्तं प्रति पृथिव्यन्तर्याम्येव तेऽन्तर्यामी जलान्तर्याम्येव तेऽन्तर्यामीति पृथिव्यन्तर्यामिणश्चोद्दालकान्तर्यामिणश्चाभेदबोधनमसंगतम् । अन्तर्याम्यैक्यस्य प्रागेव निश्चितत्वात् । अतः स त आत्मेत्यत्राऽऽत्मशब्दो नान्तर्यामिवचनोऽपि तु स्वरूपवचन इत्येवं युक्तमिति चेन्न । आत्मशब्दस्य शेषित्वाधारत्वाद्यर्थकतयाऽप्युपपत्तेः । पतिं विश्वस्येत्यादिवाक्यैर्विश्वशेषिणः कस्यचिदवगतत्वात्तेन वाक्येन प्रतिपन्नस्त आत्मा ते शेषिपृथिव्यादीनामन्तर्यामीति प्रघट्टार्थः ॥ ३ ॥

योऽप्सु तिष्ठन्नद्भ्योऽन्तरो यमापो न विदुर्यस्याऽऽपः शरीरं योऽपोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ ४ ॥

योऽग्नौ तिष्ठन्नग्नेरन्तरो यमग्निर्न वेद यस्याग्निः शरीरं योऽग्निमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ ५ ॥

योऽन्तरिक्षे तिष्ठन्नन्तरिक्षादन्तरो यमन्तरिक्षं न वेद यस्यान्तरिक्षꣳ शरीरं योऽन्तरिक्षमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ ६ ॥

यो वायौ तिष्ठन्वायोरन्तरो यं वायुर्न वेद यस्य वायुः शरीरं यो वायुमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ ७ ॥

यो दिवि तिष्ठन्दिवोऽन्तरो यं द्यौर्न वेद
यस्य द्यौः शरीरं यो दिवमन्तरो यमय-
त्येष त आत्माऽन्तर्याम्यमृतः ॥ ८ ॥
य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न
वेद यस्याऽऽदित्यः शरीरं य आदित्यमन्तरो
यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ ९ ॥
यो दिक्षु तिष्ठन्दिग्भ्योऽन्तरो यं दिशो न
विदुर्यस्य दिशः शरीरं यो दिशोऽन्तरो
यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥१०॥
यश्चन्द्रतारके तिष्ठꣳश्चन्द्रतारकादन्तरो
यं चन्द्रतारकं न वेद यस्य चन्द्रता-
रकꣳ शरीरं यश्चन्द्रतारकमन्तरो यमय-
त्येष त आत्माऽन्तर्याम्यमृतः ॥ ११ ॥
य आकाशे तिष्ठन्नाकाशादन्तरो यमाकाशो न
वेद यस्याऽऽकाशः शरीरं य आकाशमन्तरो
यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ १२ ॥
यस्तमसि तिष्ठꣳस्तमसोऽन्तरो यं तमो न
वेद यस्य तमः शरीरं यस्तमोऽन्तरो यम-
यत्येष त आत्माऽन्तर्याम्यमृतः ॥ १३ ॥
यस्तेजसि तिष्ठꣳस्तेजसोऽन्तरो यं तेजो न वेद यस्य
तेजः शरीरं यस्तेजोऽन्तरो यमयत्येष त आत्माऽ-
न्तर्याम्यमृत इत्यधिदैवतमथाधिभूतम् ॥ १४ ॥

उपदिष्टमन्तर्यामिस्वरूपमिति शेषः । अथाधिभूतमन्तर्यामिस्वरूप-
मुच्यत इति शेषः ।

यः सर्वेषु भूतेषु तिष्ठन्सर्वेभ्यो भूतेभ्योऽन्तरो यꣳ
सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भूतानि

शरीरं यः सर्वाणि भूतान्यन्तरो यमयत्येष त
आत्माऽन्तर्याम्यमृत इत्यधिभूतमथाध्यात्मम् ॥१५॥
यः प्राणे तिष्ठन्प्राणादन्तरो यं प्राणो न वेद
यस्य प्राणः शरीरं यः प्राणमन्तरो यमय-
त्येष त आत्माऽन्तर्याम्यमृतः ॥ १६ ॥
यो वाचि तिष्ठन्वाचोऽन्तरो यं वाङ्न वेद
यस्य वाक्शरीरं यो वाचमन्तरो यम-
यत्येष त आत्माऽन्तर्याम्यमृतः ॥ १७ ॥
यश्चक्षुषि तिष्ठंश्चक्षुषोऽन्तरो यं चक्षुर्न वेद
यस्य चक्षुः शरीरं यश्चक्षुरन्तरो यमय-
त्येष त आत्माऽन्तर्याम्यमृतः ॥ १८ ॥
यः श्रोत्रे तिष्ठञ्छ्रोत्रादन्तरो यꣳ श्रोत्रं न
वेद यस्य श्रोत्रꣳ शरीरं यः श्रोत्रमन्तरो यम-
यत्येष त आत्माऽन्तर्याम्यमृतः ॥ १९ ॥
यो मनसि तिष्ठन्मनसोऽन्तरो यं मनो न
वेद यस्य मनः शरीरं यो मनोऽन्तरो यम-
यत्येष त आत्माऽन्तर्याम्यमृतः ॥ २० ॥
यस्त्वचि तिष्ठꣳस्त्वचोऽन्तरो यं त्वङ्न वेद
यस्य त्वक्शरीरं यस्त्वचमन्तरो यमयत्येष
त आत्माऽन्तर्याम्यमृतः ॥ २१ ॥
यो विज्ञाने तिष्ठन्विज्ञानादन्तरो यं विज्ञानं न
वेद यस्य विज्ञानꣳ शरीरं यो विज्ञानमन्तरो
यमयत्येष त आत्माऽन्तर्याम्यमृतः ॥ २२ ॥

अत्र विज्ञानशब्द आत्मपरः । समानप्रकरणे माध्यंदिनशाखायां विज्ञानशब्दस्थान आत्मनि तिष्ठन्नित्यात्मशब्देन निर्देशदर्शनात् ।

योरेतसि तिष्ठन्रेतसोऽन्तरो यꣳ रेतो न वेद यस्य रेतः शरीरं यो रेतोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतोऽदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मन्ताऽविज्ञातो विज्ञाता।

द्रष्टृत्वं रूपसाक्षात्कारवत्त्वं न तु चक्षुर्जन्यज्ञानवत्त्वं तस्य परमात्मन्यसंभवात् । श्रोतृत्वं शब्दसाक्षात्कारवत्त्वम् । मन्तृत्वं मन्तव्यविषयकसाक्षात्कर्तृत्वम् । विज्ञातृत्वं विज्ञानशब्दितनिदिध्यासनविषयसाक्षात्कर्तृत्वम् । द्रष्टृत्वादिकं जीवस्याप्यस्तीत्यदृष्टत्वादिना द्रष्टृत्वादिकं विशेषितं तादृशं च न जीवस्यास्तीति भावः । अत्र च द्रष्टृत्वादावुपाध्यनुक्तेर्निरुपाधिकद्रष्टृत्वमर्थसिद्धम् ।

नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता नान्योऽतोऽस्ति मन्ता नान्योऽतोऽस्ति विज्ञातेष त आत्माऽन्तर्याम्यमृतोऽतोऽन्यदार्तं ततो होद्दालक आरुणिरुपरराम ॥ २३ ॥

इति बृहदारण्यकोपनिषदि तृतीयाध्यायस्य सप्तमं ब्राह्मणम् ॥ ७ ॥

अन्यशब्दादेः सर्वनाम्नः पूर्वनिर्दिष्टसदृशान्यपरत्वस्य 'समाने पूर्ववत्त्वात्' [जै० न्या० ७।१।१३] इति साप्तमिकाधिकरणे व्यवस्थितत्वादत्राप्यन्यशब्देन पूर्वनिर्दिष्टादृष्टत्वादिविशेषितनिरुपाधिकरूपादिसाक्षात्कारादिति मतोऽन्यस्तत्सदृशो द्रष्टा नास्तीत्यर्थः । एवमुत्तरत्रापि ॥२३॥

इदं च ब्राह्मणमधिकृत्य समन्वयाध्याये चिन्तितम् 'यः पृथिव्यां तिष्ठन्' [बृ० ३।७।३] इत्यारभ्याथाधिदैवतमधिलोकमधिवेदमधियज्ञमधिभूतमध्यात्मं चान्तरवस्थितोऽयमधिदैवतान्तर्यामी जीव एव स्यात् । वाक्यशेषे द्रष्टा श्रोतेति करणायत्तज्ञानवत्त्वोक्तेः । न च दर्शनश्रवणादिशब्दा रूपशब्दादिसाक्षात्कारपरास्तादृशसाक्षात्कारवत्त्वं च परमात्मनोऽपि संभवतीति वाच्यम् । तथा हि सति 'नान्योऽतोऽस्ति द्रष्टा' इति तदतिरिक्तद्रष्टृनिषेधानुपपत्तेः । जीवस्यैव तदति-

रिक्तस्य रूपादिसाक्षात्कारवतः सत्त्वाद्द्रष्ट्रादिशब्दानां करणायत्तज्ञानवत्त्वार्थकतया जीवपरत्वे तु जीवव्यतिरिक्तस्य करणायत्तज्ञानवतो निषेध उपपद्यते । ईश्वरस्य करणायत्तज्ञानवत्त्वाभावादिति पूर्वपक्षे प्राप्त उच्यते—' अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् । ' [ब्र० सू० १ । २ । १८] अधिलोकादयो माध्यंदिने द्रष्टव्याः । अधिदैवादिषु श्रूयमाणोऽन्तर्यामी परमात्मैव सर्वभूतान्तरत्वामृतत्वादेः परमात्मधर्मस्य श्रवणात् । ' न च स्मार्तमतद्धर्माभिलापात् । ' [ब्र० सू० १ । २ । १९] शारीरश्च । यथा स्मार्तं प्रधानमदृष्टो द्रष्टेति श्रुतस्यादृष्टत्वविशिष्टद्रष्टृत्वस्य सर्वान्तर्यामित्वामृतत्वादेश्च तदसंभावितधर्मस्य श्रवणान्न प्रतिपाद्यमेवं न जीवोऽप्यत्र प्रतिपाद्यः । ' उभयेऽपि हि भेदेनैनमधीयते । ' [ब्र० सू० १ । २ । २०] काण्वा माध्यंदिनाश्चोभयेऽपि अन्तर्यामिणं जीवभिन्नमेवाऽऽमनन्ति । माध्यंदिना हि ' य आत्मनि तिष्ठन्नात्मनोऽन्तरः ' इति काण्वाश्चाऽऽत्मपदस्थाने यो विज्ञाने तिष्ठन्निति विज्ञानपदमधीयतेऽतो न जीवोऽन्तर्यामीति स्थितम् । नन्वात्मनो ज्ञानाश्रयस्य कथं विज्ञानशब्दवाच्यत्वमिति चेदस्यार्थस्य वियत्पादे चिन्तितत्वात् । तथा हि–'यो विज्ञाने तिष्ठन् । ' [बृ०३।७।२२]' विज्ञानं यज्ञं तनुते । ' [तै०२।५] ज्ञानस्वरूपमत्वं (वन्तं) तं निर्मलं परमार्थत इति श्रुतिस्मृतिभिर्ज्ञानस्वरूपत्वेनैवाऽऽत्मनः प्रतीतेर्न ज्ञाता । अथ वा ' यो वेदेदं जिघ्राणीति स आत्मा ' [छा० ८ । १२ । ४] ' एष हि द्रष्टा श्रोता ' [प्र०४ । ९] इत्यादिश्रवणादहं जानाम्यज्ञासिषमित्याद्यनुभवाच्चाऽऽगन्तुकज्ञानाश्रय एव न स्वयं ज्ञानरूपः । ज्ञानरूपत्ववचनानि तु लाक्षणिकानीत्येवं पूर्वपक्षे प्राप्त उच्यते—' ज्ञोऽत एव । ' [ब्र० सू० २ । ३ । १८] अत एव ' एष हि द्रष्टा स्प्रष्टा श्रोता रसयिता घ्राता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः ' [प्र० ४ । ९] इति विज्ञानात्मन एव जीवस्य द्रष्टृत्वादिश्रुतेरेव ज्ञानात्मकोऽपि सन्स्वाभाविकज्ञानाश्रयश्च भवतीत्यर्थः । ननु विभोरात्मनः स्वाभाविकज्ञानाश्रयत्वे तज्ज्ञानस्य सर्वपदार्थसंबन्धात्सार्वज्ञ्यं सर्वदा स्यादित्याशङ्क्याऽऽह—

' उत्क्रान्तिगत्यागतीनाम् । ' [ब्र० सू० २ । ३ । १९] विभुत्वे स्यादियं शङ्काऽपि । ' तेन प्रद्योतेनैष आत्मा निष्क्रामति । ' [बृ० ४ । ४ । २] ये वैके चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति ' [कौषी०१।२]तस्माल्लोकात्पुनरैत्यस्मै लोकाय कर्मणे ' [बृ०४।४।६] इति

जीवस्योत्क्रान्तिगत्यागतीनां श्रवणाज्जीवो न विभुः । ननु शरीरादुत्क्रमणं नाम शरीरविषयकाभिमानराहित्यं तच्च विभोरप्यात्मनः संभवतीत्यत्राऽऽह—'स्वात्मना चोत्तरयोः' [ब्र०सू०२।३।२०] चशब्दोऽवधारणे। उत्क्रमणस्य कथंचित्संभवेऽपि उत्तरयोर्गमनागमनयोः स्वात्मना स्वरूपेण संपाद्यत्वात् । किं च भूतकरणग्रामासंपरिष्वक्तस्यैव 'स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति' [बृ०४।४।१] शुक्रमादाय पुनरैति स्थानम् [बृ० ४ । ३ । ११]इति शरीर एव स्वात्मनैव गत्यागतिश्रवणाद्विभुत्वे च तयोरसंभवान्न विभुरात्मा । 'नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् [ब्र० सू० २।३ । २१] 'योऽयं विज्ञानमयः प्राणेषु' [बृ० ४ । ४ । २२] इति जीवं प्रस्तुत्य 'स वा एष महानज आत्मा' इति महत्वश्रुतेर्नाणुर्जीव इति चेद्यस्यानुवित्तः प्रतिबुद्ध आत्मे (त्यु)-त्तरं परमात्मानमधिकृत्य तस्यैव महानज इति महत्त्वप्रतिपादनात् । 'स्वशब्दोन्मानाभ्यां च' [ब्र०सू० २ । ३ । २२] एषोऽणुरात्मा चेतसा वेदितव्यः [मु० ३ । १ । ९] इत्यणुत्वलक्षणस्य स्वस्य वाचकशब्दश्रवणात् । 'वालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीवः स विज्ञेयः' [श्वे० ५ । ९] इत्यणुसदृशं वस्तूद्धृत्य तन्मानत्वस्य जीव आम्नानात् । नन्वणुत्वे सत्येकदेशस्थस्य कथं सकलदेहव्यापिवेदनोपलम्भ इत्यत्र मतान्तरेण परिहारमाह—'अविरोधश्चन्दनवत्' [ब्र० सू० २ । ३ । २३] यथा हरिचन्दनबिन्दुः शरीरैकदेशस्थोऽपि सकलदेहव्यापिनमाह्लादं करोति एवं जीवोऽपि भविष्यति । 'अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि' । [ब्र०सू०२।३।२४]हरिचन्दनबिन्द्वादेर्हृदयादिरूपदेशविशेषावस्थितिशेषात्तथाभावः । आत्मनो न देशविशेषावस्थितिरस्तीति चेन्न—'हृदि ह्ययमात्मा' इति जीवस्यापि शरीरे प्रदेशविशेषावस्थितेरभ्युपगमात् । स्वमतेन परिहारमाह—'गुणाद्वा लोकवत्' [ब्र०-सू० २ । ३ । २५] वाशब्दो मतान्तरव्यावृत्त्यर्थः । लोके यथैकदेशस्थानामपि मणिद्युमणिप्रभृतीनां प्रभा व्यापिनि एवमेकदेशस्थितस्यापि जीवस्य प्रभास्थानीयधर्मभूतज्ञानव्याप्त्या सर्वाङ्गीणसुखदुःखाद्यनुभवसंभवात् । नन्वात्मव्यतिरिक्तं ज्ञानं नास्तीत्यत्राऽऽह—'व्यतिरेको गन्धवत् तथा च दर्शयति' [ब्र० सू० २ । ३ । २६ । २७] । यथा गन्धस्य पृथिवीव्यतिरेकः प्रत्यक्षसिद्धस्तथाऽहं जानामीति ज्ञानस्याऽऽत्मव्यतिरेकः प्रत्यक्षसिद्धः । 'जानात्येवायं पुरुषः' इति श्रुतिश्च तथा दर्श-

यति। 'पृथगुपदेशात्' [ब्र० सू० ३ । २ । २८] विज्ञानात्मनोः पृथक्कृत्य न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते [बृ० ४ । ३ । ३०] इति तत्तद्वाचकशब्दैरेव पृथक्कृत्योपदेशदर्शनात् । ननु ज्ञानस्याऽऽत्मापेक्षया पृथक्त्वे 'यो विज्ञाने तिष्ठन्' इत्यादिश्रुतीनां का गतिरित्यत्राऽऽह—'तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्' [ब्र० सू० २ । ३ । २९] । तुशब्दश्चोद्यं व्यावर्तयति । विज्ञानगुणस्यैव सारभूतगुणत्वाद्विज्ञानमिति व्यपदिश्यते । यथा प्राज्ञस्य परमात्मन आनन्दगुणसारत्वाय 'एष आकाश आनन्दो न स्यात्' [तै० २ । ७ । १] इत्यानन्दशब्देन व्यपदेशः । 'यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्' [ब्र० सू० २ । ३ । ३०] यथा गोत्वादीनां यावद्गोव्यक्तिभावित्वाद्गोत्ववाचिभिः शब्दैर्व्यक्तिनिर्देशो दृश्यत एवमेव ज्ञानरूपधर्मस्य यावद्द्रव्यभावित्वात्तद्वाचिना ज्ञानशब्देन धर्मिणो व्यपदेशो न दोषाय । अत्र चकाराज्ज्ञानवदात्मनोऽपि स्वप्रकाशत्वेन ज्ञानमिति व्यपदेशो न दोष-(पाये)ति समुच्चिनोति । ननु सुषुप्त्यादिषु ज्ञानाभावान्न ज्ञानस्य यावदात्मभाविधर्मत्वं तत्राऽऽह—'पुंस्त्वादिवत्तस्य सतोऽभिव्यक्तियोगात्' [ब्र० सू० २ । ३ । ३१] यथा सर्वदा विद्यमानस्य पुंस्त्वव्यञ्जकधातोर्यौवनेऽभिव्यक्तिरेवं सर्वदा विद्यमानस्य विज्ञानस्येन्द्रियसंप्रयोगदशायामभिव्यक्तिः । अतश्च ज्ञानस्वरूपोऽणुरात्मा ज्ञाता च । ननु विज्ञानरूप एवाऽऽत्मा विभुरस्तु तत्राऽऽह—'नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा' [ब्र० सू० २ । ३ । ३२] । किं सर्वगत आत्मा उपलब्धेरेव हेतुरुतानुपलब्धेरेव हेतुरुतोभयोरेव हेतुः । आद्यपक्षद्वय उपलब्धिरेव वाऽनुपलब्धिरेव वेत्यन्यतरनियमः स्यात् । तृतीयपक्षे सर्वदोपलब्ध्यनुपलब्धी स्यातां ततश्चोपलम्भानुपलम्भौ पर्यायेण दृश्यमानौ नोपपद्येयाताम् । अणोर्ज्ञानस्वरूपस्यैवाऽऽत्मन इन्द्रियसंप्रयोगादिकारणमहिम्ना कादाचित्कधर्मभूतज्ञानव्यक्तिरिति सिद्धान्तपक्षे नानुपपत्तिरिति स्थितम् । तथा तत्रैव पादे 'कर्ता शास्त्रार्थवत्त्वात्' [ब्र० सू० २ । ३ । ३३] इति प्रतिपादितं जीवानां कर्तृत्वं न परायत्तम् । परायत्तत्वे हि प्रवृत्तिनिवृत्त्योः सालभञ्जिकावदस्वतन्त्रं जीवं नियोजयतोर्विधिनिषेधशास्त्रयोरानर्थक्यं स्यादिति पूर्वपक्षे प्राप्त उच्यते—'परात्तु तच्छ्रुतेः' [ब्र० सू० २ । ३ । ४१] तुशब्दः पक्षं व्यावर्तयति । तच्च कर्तृत्वं परात्परमात्मायत्तमित्यर्थः । 'य आत्मान-

मन्तरो यमयति ' इति तत्कर्तृत्वस्य परायत्तत्वश्रवणात् । नन्वेवं विधिनिषेधशास्त्रानर्थक्यं तत्राऽऽह—'कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः' [ब्र० सू० २ । ३ । ४२] परमात्मा जीवकृतं पूर्वप्रयत्नमपेक्ष्य तदनुमतिज्ञानेन प्रवर्तयति । एवं सति विधिप्रतिषेधावैयर्थ्यानुग्राहकत्वादिकं सिध्यति । भगवान्पुरुषोत्तमोऽवाप्तसमस्तकामः सर्वज्ञः सर्वेश्वरः सत्यसंकल्पः स्वमाहात्म्यानुगुणलीलाप्रवृत्त एतानि कर्माणि समीचीनानि एतान्यसमीचीनानीति कर्मद्वैविध्यं संविधाय तदुपादानोचितदेहेन्द्रियादिकं नियमनशक्तिं च सर्वेषां क्षेत्रज्ञानां सामान्येन प्रदिश्य स्वशासनावबोधिशास्त्रं च प्रदर्श्यान्तरात्मतयाऽनुप्रविश्यानुमन्तृतया च नियच्छंस्तिष्ठति ते च क्षेत्रज्ञास्तदाहितशक्तयस्तत्प्रदिष्टकरणकलेवरादिकाः सदाधाराः स्वयमेव स्वेच्छानुगुण्येन पुण्यापुण्यरूपे कर्मणी उपाददते ततश्च पुण्यरूपकर्मकारिणं स्वशासनानुवर्तिनं ज्ञात्वा धर्मार्थकाममोक्षैर्वर्धयति शासनातिवर्तिनं च तद्विपर्ययेण योजयति । अतः स्वातन्त्र्यदयालुत्वादिवैकल्यचोद्यस्य नावकाशः । दया हि नाम स्वार्थनिरपेक्षपरदुःखासहिष्णुता सा च स्वशासनातिवर्तिव्यवसायिन्यपि वर्तमाना न गुणायावकल्पते प्रत्युतापुंस्त्वमेवाऽऽवहति तन्निग्रह एव तत्र गुणः । अन्यथा शत्रुनिग्रहादीनामगुणत्वप्रसङ्गात् । शासनातिवर्तिव्यवसायनिवृत्तिमात्रेणानाद्यनन्तकल्पोपचितदुर्विषहानन्तापराधानङ्गीकारेण निरतिशयसुखसंवृद्धये स्वयमेव प्रयतते । यथोक्तम्—

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ [गी०१०।१०]इति ।

ननु कूपे पतन्तं बालकं दृष्ट्वोपेक्षमाणस्य पुंसो नैर्घृण्यादिप्रसक्तिवदहितकर्मप्रवृत्तपुरुषविषय उपेक्षकत्वे वाऽनुमन्तव्यत्वे वा प्रयोजकत्वे वा तस्य निर्दयत्वादिकमवश्यंभावीति चेच्छास्त्रप्रवर्तनमुखेन सामान्येनाहितप्रवृत्तिवारणस्य कृतत्वान्नोपेक्षणम् । तत्तत्प्रवृत्तिकाले विशेषतो निवारकत्वाभावलक्षणमुपेक्षकत्वं तु स्वतन्त्रस्य न पर्यनुयोज्यम् । एतादृशस्वातन्त्र्यमेव शेष (दोष) इति चेत्तत्र किं प्रमाणम् । न प्रत्यक्षम्—तस्येश्वरविषयेऽप्रमाणत्वात् । नाप्यनुमानम्—ईश्वराख्यधर्मिणं शास्त्रैकसमधिगम्यमभ्युपेत्य तत्स्वातन्त्र्यस्य दोषत्वमनुमीयत उतानभ्युपगम्य । अनभ्युपगमे हेतोराश्रयासिद्धिः । अभ्युपगमे धर्मिग्राहकेण शास्त्रेण तस्य गुणत्वेन प्रतिपन्नत्वात्कालात्ययापदिष्टत्वम् । चिकीर्षापूर्व-

कक्रृतिमत्त्वेन सालभञ्जिकाविलक्षणतया कर्तृत्वान्न शास्त्रानर्थक्यम्। प्रवर्तकज्ञानचिकीर्षोत्पादकत्वेन साफल्यात्कालादिवत्साधारणकृतिहेतोरीश्वरस्य न वैषम्यादिप्रसक्तिः। उक्तं च भगवता पराशरेण—निमित्तमात्रमेवासौ सृज्यानां सर्गकर्मणीति। निमित्तमात्रं साधारणमात्रमित्यर्थः। गीतं च भगवताऽपि—तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययमिति। साधारणकर्तारं विद्धि असाधारणकर्तारं न विद्धीति तस्यार्थः। उक्तं च व्यासार्यैः—

वैयर्थ्यं यावता न स्याद्विधानप्रतिषेधयोः।
नियन्तृत्वश्रुतेस्तावान्संकोचो न त्वतः परः॥

इति। नन्वेवं साधाणकारणैरेव सर्वकार्योत्पत्तिसंभव ईश्वरस्य प्रयोजकत्वानुमन्तृत्वादिकं कुतोऽभ्युपगन्तव्यमिति चेत्कल्पनायामेवेदृशचोद्यावकाशः। अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा 'एष ह्येव साधु कर्म कारयति' [कौ० ३। ८] इति प्रमाणप्रतिपन्नार्थ ईदृशचोद्यानवकाश इति स्थितम्। तथा प्राणपादे जीवस्य यत्स्वभोगसाधनशरीराद्यधिष्ठातृत्वं न परमात्मायत्तमिति पूर्वपक्षे प्राप्त उच्यते—'ज्योतिराद्यधिष्ठानं तु तदामननात्' 'प्राणवता शब्दात्' [ब्र० सू० २। ४। १४। १५] प्राणवता जीवेन सह ज्योतिरादीनामग्न्यादिदेवतानां यत्प्राणविषयमधिष्ठानं जीवेनाग्न्यादिदेवताभिश्च क्रियमाणं प्राणकर्मकाधिष्ठानं तदामननात्तस्य परमात्मन आमननात्संकल्पादेव भवति। 'योऽग्नौ तिष्ठन्नग्नेरन्तरो यमग्निर्न वेद यस्याग्निः शरीरं योऽग्निमन्तरो यमयति [बृ०३। ७। ५] य आत्मनि तिष्ठन्नित्यादिशब्दात्। तस्य च नित्यत्वात्सर्वेषां परमात्माधिष्ठितत्वस्य यावत्स्वरूपभावित्वादिति स्थितम्॥ २३॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां तृतीयाध्यायस्य
सप्तमं ब्राह्मणम्॥ ७॥

प्रकृतमनुसरामः—

अथ ह वाचक्नव्युवाच।

अन्तर्यामिब्राह्मणे प्रसिद्धब्रह्मविदुद्दालके याज्ञवल्क्येन पराजिते सर्वेषां ब्राह्मणानामेवमव पराजयो भविष्यतीति मन्यमाना गार्गी 'माऽति-

प्राक्षीर्मा ते मूर्धा व्यपप्तत् ।' [बृ० ३ । ६ । १] इति याज्ञवल्क्यस्य सक्रोधोक्त्या भीत्योपरताऽपि ब्राह्मणानुज्ञां प्राप्य पुनः प्रष्टुकामाऽनुज्ञादानाय ब्राह्मणानुवाचेत्यर्थः ।

ब्राह्मणा भगवन्तो हन्ताहमिमं द्वौ प्रश्नौ
प्रक्ष्यामि तौ चेन्मे वक्ष्यति न जातु
युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेतेति ।

हे भगवन्तो ब्राह्मणा इमं याज्ञवल्क्यं प्रश्नद्वयं प्रक्ष्यामि तस्य चेदुत्तरं याज्ञवल्क्यो वक्ष्यति तदेमं याज्ञवल्क्यं युष्माकं मध्ये ब्रह्मोद्यं ब्रह्मवादं प्रति जेता कोऽपि नास्ति ब्रह्मोद्यम् । 'वदः सुपि क्यप्च' [पा० सू० ३ । १ । १०६] इति क्यप् ।

इत्येवमुक्ता ब्राह्मणा आहुः—

पृच्छ गार्गीति ॥ १ ॥

सा होवाचाहं वै त्वा याज्ञवल्क्य यथा काश्यो वा वैदेहो वोग्रपुत्र उज्ज्यं धनुरधिज्यं कृत्वा द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वोपोत्तिष्ठेदेवमेवाहं त्वा द्वाभ्यां प्रश्नाभ्यामुपोदस्थां तौ मे ब्रूहीति ।

काशीदेशभवो विदेहदेशभवो वा शूरवंश्य उत्कृष्टज्यं धनुः पुनरधिज्यं कृत्वा द्वौ बाणवन्तौ बाणशब्देन शराग्रे यः खण्डः सोऽभिधीयते सपत्नातिव्याधिनौ सपत्नात्यन्तव्यथनशीलौ शरौ हस्ते गृहीत्वा सपत्नसमीपं गच्छति एवमेवाहं द्वाभ्यां प्रश्नाभ्यामुपस्थिताऽस्मि । उपोदस्थाम् । लुङ् । गातिस्थाघुपाभूभ्यः० [पा० सू० २ । ४ । ७७] इति सिचो लुक् । तौ मे ब्रूहीति ।

एवमुक्त आह याज्ञवल्क्यः—

पृच्छ गार्गीति ।

सा होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे

यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिँश्-
स्तदोतं च प्रोतं चेति ॥ ३ ॥

दिवो यदूर्ध्वं द्युलोकाद्यदूर्ध्वं लोकजातं पृथिव्याश्चाधस्तनं यद्वस्तुजातं द्यावापृथिव्यन्तरालवर्ति कालत्रयपरिच्छिन्नं यद्वस्तुजातमेतत्सर्वं कुत्र वा दीर्घतिर्यक्तन्तुवदोतं प्रोतं चेति। यदर्वाक्पृथिव्या इति पाठेऽप्ययमेवार्थः ॥ ३ ॥

स होवाच यदूर्ध्वं गार्गि दिवो यदवाक्पृ-
थिव्या यदन्तरा द्यावापृथिवी इमे भूतं
च भवच्च भविष्यच्चेत्याचक्षत आकाशे
तदोतं च प्रोतं चेति ॥ ४ ॥

आकाशशब्देन न वायुमदम्बरं गृह्यते तस्य सर्वविकाराश्रयत्वाभावात्। किं चाव्याकृताकाशः। एतच्च 'क्षरमम्बरान्तधृतेः' [ब्र० सू० १ । ३ । १०] इत्यत्रापि स्थितम् ॥ ४ ॥

सा होवाच नमस्तेऽस्तु याज्ञवल्क्य यो
म एतं व्यवोचोऽपरस्मै धारयस्वेति ।

यस्त्वं म एतं व्यवोच उक्तवानसि तस्मै ते नमोऽस्तु। अपरस्मै द्वितीयप्रश्नायावधानं कुरु ।

स होवाच—

पृच्छ गार्गीति ॥ ५ ॥

सा होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक्पृथिव्या
यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्य-
च्चेत्याचक्षते कस्मिँश्स्तदोतं च प्रोतं चेति ॥ ६ ॥
स होवाच यदूर्ध्वं गार्गि दिवो यदवाक्पृथिव्या
यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भवि-
ष्यच्चेत्याचक्षत आकाश एव तदोतं च प्रोतं चेति ।

आकाश उक्त इति शेषः ।

कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति ॥ ७ ॥

सोऽव्याकृत आकाशः किमाश्रित इत्यर्थः ॥ ७ ॥

स होवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्य-
स्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमत-
मोऽवाय्वनाकाशमसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रम-
वागमनोऽतेजस्कमप्राणममुखममात्रमनन्तरमबाह्यं न
तदश्नाति किंचन न तदश्नाति कश्चन ॥ ८ ॥

हे गार्गि तदेतत्सर्वासूपनिषत्सु प्रसिद्धम् । अश्नुत इति वा न क्षर-
तीति वाऽक्षरं ब्रह्म ब्राह्मणा ब्रह्मविदोऽभिवन्दति । अत्र ब्राह्मणाभिवद-
नकथनेन नाहं किंचिद्विप्रतिपन्नं वक्ष्यामीति हृदयम् । अस्थूलं स्थूला-
द्भिन्नम् । तर्हि किमण्वित्यत्राऽऽह—अनण्विति । तर्हि ह्रस्वमित्यत
आह—अह्रस्वमिति । किं तर्हि दीर्घमित्यत्राऽऽह—अदीर्घमिति ।
एवमुत्तरत्रापि द्रष्टव्यम् । अमात्रं मात्रा इन्द्रियाणि । यद्वा मात्रा परि-
च्छेदस्तद्रहितमित्यर्थः । अनन्तरमबाह्यम् । स्वाव्याप्तदेशशून्यमित्यर्थः ।
न तदश्नाति किंचन । तदक्षरं कर्तृ किंचिदपि नाश्नाति । अवाप्तकाम-
तया भक्ष्यनिरपेक्षमित्यर्थः । तत्स्वयं न कस्यापि भक्ष्यमित्याह—न
तदश्नाति कश्चनेति । तद्ब्रह्म कर्म ॥ ८ ॥

एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ
विधृतौ तिष्ठत एतस्य वा अक्षरस्य प्रशासने
गार्गि द्यावापृथिव्यौ विधृतौ तिष्ठतः ।

वैशब्दोऽवधारणे । प्रशासन आज्ञाचक्षे(सत्वे) । सूर्याचन्द्रमसौ ।
'देवताद्वन्द्वे च' इति पूर्वपदस्याऽऽनङ् । विधृतौ विशेषेण धृतौ तिष्ठतः ।
प्रकृष्टं शासनं क्वचिदप्यप्रतिहतत्वमेव शासनस्य प्रकर्षः । ततश्च सर्वविषयकं
शासनमिति फलति 'प्रशासितारं सर्वेषाम्' इति प्रमाणानुसारात् ।
ततश्च सर्वविषयकशासनाधीनद्यावापृथिव्यादिधारणवत्त्वमर्थ इति पर्य-
वस्यति । अत्र प्रधानस्य जगद्धारकत्वेऽपि शासनाधीनधारकत्वाभावा-
ज्जीवस्य प्रशासनाधीनयत्किंचिद्धारकत्वेऽपि प्रशासनशब्दितसर्वविषय-
कशासनाधीनसर्वधारकत्वासंभवाच्च नात्र जीवो वा प्रधानं वा प्रति-

पाद्यते। इदं च 'सा च प्रशासनात्' [ब्र० सू० १ । ३ । ११] इति सूत्रे स्पष्टम्।

एतस्य वा अक्षरस्य प्रशासने गार्गि निमेषा मुहूर्ता अहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरा इति विधृतास्तिष्ठन्ति।

इतिशब्दः प्रकारवचनः । संवत्सरा इत्येवंजातीयकाः कालविशेषा इत्यर्थः।

एतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्यो नद्यः स्यन्दन्ते श्वेतेभ्यः पर्वतेभ्यः प्रतीच्योऽन्या यां यां च दिशमनु ।

प्रशासन इति सतिसप्तमी। प्राच्यः प्राक्प्रवाहाः प्रसिद्धा गङ्गाद्या नद्यः । श्वेतेभ्यो हिमवदादिभ्यः पर्वतेभ्यो लोकोपकाराय स्यन्दन्ते तत्प्रशासनाभावे ताः स्यन्दनाय न प्रभवन्तीति भावः। प्रतीच्यः प्रत्यङ्मुखाः। अन्या उदीच्यश्च नद्यो यां यां दिशमनुप्रस्थितास्ताः सर्वा एतस्य प्रशासने सति प्रस्यन्दन्ते ।

एतस्य वा अक्षरस्य प्रशासने गार्गि ददतो मनुष्याः प्रशꣳसन्ति यजमानं देवा दर्वीं पितरोऽन्वायत्ताः॥९॥

एतस्य वा अक्षरस्य प्रशासने निमित्ते ददतस्तदाज्ञया दानं कुर्वत आज्ञाकैंकर्यबुद्ध्या दानं कुर्वतो जनानन्वायत्ता अनुवशाः सन्तो मनुष्याः प्रशंसन्ति। प्रशासन इत्येतद्यजमानं देवा दर्वीं पितर इत्यत्रापि संबध्यते। अन्वायत्ता इति पदं देवमनुष्यपितृसाधारणम् । द्वितीयान्तपदानां प्रशंसन्तीत्यनेनान्वयः। परमात्माज्ञया यागं कुर्वाणमन्वायत्ताः सन्तो देवाः प्रशंसन्ति। परमात्माज्ञया प्रवृत्तं दर्वीं होममन्वायत्ताः सन्तः पितरः प्रशंसन्ति। एवमेव व्याख्यातं व्यासार्यैः ॥ ९ ॥

यो वा ह एतदक्षरं गार्ग्यविदित्वाऽस्मिँल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवतीति यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपणः।

ब्रह्मज्ञानमन्तरेण क्रियमाणं होमयज्ञबहुकालतपआदिकं सर्वं नश्वरफलसाधनं भवति तज्ज्ञानमन्तरेण लोकान्तरगतस्यापि शोच्यता भवति। तदज्ञानात्संसारो भवतीति यावत्।

अथ यो वा एतदक्षरं गार्गि विदित्वाऽ-
स्माल्लोकात्प्रैति स ब्राह्मणः ॥ १० ॥

ब्रह्मविद्ब्रह्मानुभविता मुक्त इति यावत्। उक्तं च भगवता भाष्यकृता 'यो वा एतदक्षरं गार्गि' इत्येतद्व्याकुर्वता। यदज्ञानात्संसारप्राप्तिर्यज्ज्ञानाच्चामृतत्वप्राप्तिस्तदक्षरं परं ब्रह्मेति भाषितम् ।

तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृश्रुतꣳ
श्रोत्रमतं मन्त्रविज्ञातं विज्ञातृ ।

अयोगिभिरदृश्यं द्रष्टृ रूपादिसाक्षात्कर्तृ श्रोतृ शब्दसाक्षात्कर्तृ मन्तृ मन्तव्यसाक्षात्कर्तृ विज्ञातृ अध्यवसेयसाक्षात्कर्तृ ।

नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ नान्य-
दतोऽस्ति मन्तृ नान्यदतोऽस्ति विज्ञातृ ।

अन्तर्यामिब्राह्मणव्याख्यानोक्तरीत्याऽत्रापि अन्यशब्दस्य तत्सदृशपरत्वमेव। यथा चोल एव भूपतिर्नान्य इत्युक्तेस्तत्सदृशभूपतिनिषेधपरत्वमेवमिहाप्यदृष्टत्वादिविशेषितनिरुपाधिकद्रष्टृत्वाश्रयस्य परमात्मनः सदृशं किमपि नास्तीत्यर्थः। यद्वा यथैतदक्षरमन्यैरदृष्टं सत्स्वव्यतिरिक्तसमस्ताधारभूतमेवमनेनाक्षरेणादृष्टमेतस्याक्षरस्याऽऽधारभूतमेतस्य द्रष्टृ नास्तीत्यर्थः। पूर्वव्याख्यायां समनिषेधोऽस्यां व्याख्यायामधिकनिषेधः फलति । न च 'नेह नानाऽस्ति इतिवन्नान्यदतोऽस्तीति वाक्यस्यापि ब्रह्मात्मकवस्तुनिषेधपरत्वोपपत्तौ समाभ्यधिकनिषेधतया व्याख्यानं किमर्थमिति वाच्यम् । तद्वदत्रैक्यविधिशेषत्वाभावेन समाभ्यधिकनिषेधपरत्वस्यैव युक्तत्वादुपसंहरति—

एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति ॥ ११ ॥

सा होवाच ब्राह्मणा भगवन्तस्तदेव बहु
मन्येध्वं यदस्मान्नमस्कारेण मुच्येध्वम् ।

हे भगवन्तो ब्राह्मणा यूयं तदेव बहु मन्येध्वं यदस्माद्याज्ञवल्क्यान्नमस्कारं कृत्वा मुच्येध्वमिति यन्मुक्ता भवतेति यावादित्यर्थः। न च कदाचिदस्य पराजयः शङ्कनीयः । नमस्कारं कृत्वाऽस्मान्मुक्ता भवतेत्यर्थः ।

नवै जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेतेति ।

युष्माकं मध्य इमं याज्ञवल्क्यं कश्चिदपि ब्रह्मवादं प्रति जेता नास्तीत्यर्थः ।

ततो ह वाचक्नव्युपरराम ॥ १२ ॥

इति बृहदारण्यकोपनिषदि तृतीयाध्यायस्याष्टमं ब्राह्मणम् ॥ ५ ॥

इदं च ब्राह्मणं समन्वयाध्याये तृतीयपादे चिन्तितम् । 'एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति' इत्यक्षरशब्दितं प्रधानमेव । 'अक्षरात्परतः परः' [मु० २ । १ । २] इत्यादावक्षरशब्दस्य प्रधाने प्रयोगः, अस्थूलत्वादिनिषेधानां च स्थूलत्वादिप्रसक्तिमत्यचेतने सामञ्जस्यात । 'कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्च' इत्याकाशाधारत्वप्रश्नस्याऽऽकाशोपादानतया तदाधारभूतप्रधानविषयत्वौचित्याच्चेत्येवं प्राप्त उच्यते—'अक्षरमम्बरान्तधृतेः' [ब्र० सू० १ । ३ । १०] अक्षरं परं ब्रह्माम्बरान्तधृतेः । अम्बरस्याऽऽकाशस्यान्तः पारभूतं प्रधानं तद्धारकत्वादित्यर्थः । अयं भावः—'कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्च' [बृ० ३ । ८ । ७] इत्यत्राऽऽकाशो न वायुप्रकृतिभूताकाशोऽपि त्वव्याकृताकाशः 'यदूर्ध्वं दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षत आकाश एव तदोतं च प्रोतं च' [बृ० ३ । ८ । ७] इति कालत्रयवर्तिविकाराधारतयोच्यमानत्वस्य भूताकाशेऽसंभवेनाव्याकृताकाश एव संभवात्तस्याप्याधारतया निर्दिश्यमानमक्षरं परमेव ब्रह्म भवितुमर्हति । ननु जीवस्याचेतनाधारत्वसंभवाज्जीव एवाक्षरः किं न स्यादित्यत्रोत्तरम्—'सा च प्रशासनात् ।' [ब्र० सू० १ । ३ । ११] सा चाम्बरान्तधृतिः 'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' [बृ०३।८।९] इत्यादिना प्रशासनाधीनाऽत्र श्रूयते । प्रकृष्टं शासनं प्रशासनं शासनस्य प्रकर्षश्चासंकुचितसर्वविषयत्वम् । ततश्चासंकुचितचिदचिच्छासनं परमात्मधर्मः । 'अन्यभावव्यावृत्तेश्च ।' [ब्र० सू० १ । ३ । १२] तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्ट्रित्यादिनोपदिश्यमानैरितरादृष्टत्वे सति सर्वद्रष्टृत्वादिरूपैर्धर्मैः परमात्मान्यप्रकृतिजीवव्यावृत्तेश्च परमात्मैवेति

स्थितम् । तथा गुणोपसंहारपादेऽपि 'एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वम् ।' इति निर्दिष्टा अक्षरब्रह्मसंबन्धिनोऽस्थूलत्वादयः प्रपञ्चप्रत्यनीकतारूपाः सर्वकामत्वादिवत्सर्वासु परविद्यासु नोपसंहर्तव्या उपसंहारे प्रमाणाभावात् । ननु स्वरूपनिरूपकाणां सत्यत्वादिज्ञानत्वादिधर्माणां सर्वविद्योपसंहारस्य 'आनन्दादयः प्रधानस्य' [ब्र० सू० ३ । ३ । ११] इत्यधिकरणसिद्धत्वात्तद्वदेवास्थूलत्वादिकं किं न स्यादिति चेन्न । सत्यत्वादिमन्तरेण ब्रह्मस्वरूपस्यैव प्रत्येतुमशक्यतया सत्यत्वादेः सर्वविद्योपसंहारेऽप्यस्थूलत्वादीनामभावरूपाणां लब्धरूपे कचित्किंचित्तादृगेव निषिध्यत इति न्यायेन ब्रह्मप्रतीत्यनन्तरभाविप्रतीतिकानां ब्रह्मस्वरूपप्रतीत्युपयोगित्वाभावेन सर्वविद्योपसंहारे प्रमाणाभावादिति प्राप्त उच्यते—'अक्षरधियां त्ववरोधः' संग्रहणं कर्तव्यम् । कुतः—सामान्यतद्भावाभ्याम् ।' [ब्र० सू० ३ । ३ । ३३] सर्वेषूपासनेषूपास्यस्याक्षरब्रह्मणः समानत्वादस्थूलत्वादीनां ब्रह्मप्रतिपत्तावन्तर्भावाच्चेत्यर्थः । यथा सत्यत्वादिकमन्तरेण न ब्रह्मस्वरूपं प्रतिपत्तुं शक्यं तथाऽस्थूलत्वादिकमन्तरेण जीवव्यावृत्तं ब्रह्मस्वरूपं सत्यज्ञानादिवाक्यैर्न प्रतिपत्तुं शक्यम् । सत्यत्वादेः प्रत्यगात्मसाधारण्येन प्रत्यगात्मव्यावृत्तत्वाभावात् । स्थूलत्वादिहेयानर्हत्वं तु न जीवसाधारणम् । ततश्चास्थूलत्वादीनां निषेधरूपतया सत्यादिवाक्यजन्यब्रह्मप्रतीत्युपजीवित्वेऽपि स्वेतरसमस्तव्यावृत्तब्रह्मस्वरूपप्रतीतेरस्थूलत्वादिकमन्तरेण संभवादस्थूलत्वादिकं सकलपरविद्योपसंहार्यमेव । 'इयदामननात्' [ब्र० सू० ३ । ३ । ३४] आभिमुख्येन मननमामननं ध्यानमिति यावत् । ध्यानाद्धेतोर्ध्यानार्थमिदमेवापेक्षितं न सर्वकर्मत्वसर्वकामत्वादिकमपि तेन विनाऽपीतरव्यावृत्तेर्ब्रह्मस्वरूपस्य प्रत्येतुं शक्यतया न सर्वकर्मत्वादेः सर्वपरविद्योपसंहारोऽपि तु यत्र प्रकरण आम्नातं तत्रैव व्यवतिष्ठते । अस्थूलत्वादिकं तु सामर्थ्यरूपलिङ्गवशात्सर्वविद्यानुयायि । अत एव हि 'संभृतिद्युव्याप्त्यपि चातः' [ब्र० सू० ३ । ३ । २३] इत्यधिकरणे व्याप्त्यादेः सामर्थ्यवशादल्पायतनविद्यासु न निवेश इत्युक्तम् । तत्र हि 'ब्रह्म जेष्ठा वीर्या संभृतानि ब्रह्माग्रे ज्येष्टं दिवमाततान' 'ब्रह्म भूतानां प्रथमो हि जज्ञे तेनार्हति ब्रह्मणा स्पर्धितुं कः' इति राणायनीयानां खिलेषु मन्त्रः श्रूयते । अस्य मन्त्रस्यायमर्थः—ब्रह्म ब्रह्मणेत्यर्थः । व्यत्ययश्छान्दसः । ज्येष्ठा जेष्ठानि । शेः

शेश्छन्दसीति लोपे नलोपे च रूपम् । वीर्याणि संभृतानि धृतानि ब्रह्मणा बहूनि श्रेष्ठानि वीर्याणि धृतानीत्यर्थः । ब्रह्माग्रे ज्येष्ठं दिवमाततान तच्च ज्येष्ठं ब्रह्माग्र इन्द्रादिजन्मनः प्रागेव दिवं स्वर्गमाततान व्याप्तवत् । किं च ब्रह्म देवानां हि प्रथमो हि जज्ञे देवानामुत्पत्तेः प्रागपि विद्यमानमित्यर्थः । 'तेनार्हति ब्रह्मणा स्पर्धितुं कः' तादृशेन ब्रह्मणा कः स्पर्धितुं क्षमत इत्यर्थः । अत्र परिच्छेदातीते ब्रह्मणि व्यापकत्वादिकथनस्य स्वरूपोपदेशार्थत्वाभावेनोपासनार्थत्वस्य सिद्धतया स्वप्रकरण उपासनाविध्यश्रवणेनाऽऽरभ्याधीतस्य द्युव्यापनादेः प्रकरणान्तरश्रुतविद्यार्थत्वे वक्तव्ये नियामकाभावादस्थूलत्वादिवत्सत्यत्वादिवच्च सर्वविद्यार्थत्वे प्राप्त उच्यते—'संभृतिद्युव्याप्त्यपि चातः' [ब्र०सू०३।३।२३] संभृतिद्युव्याप्तीति समाहारद्वंद्वत्वादेकवद्भावः संभरणं द्युव्यापनं चातः स्थानवशाद्व्यवतिष्ठते । अल्पस्थानासु दहरशाण्डिल्यादिविद्यासु अल्पत्वद्युव्यापकत्वयोर्विरोधाल्लिङ्गवशादल्पायतनानवरुद्धविद्यास्वेव व्यवतिष्ठते । न चैवमल्पायतनासु दहरशाण्डिल्यादिविद्यासु आनन्त्यस्याप्युपसंहारासंभवेन सत्यज्ञानत्वानन्दत्वादेः सर्वविद्यानुपायित्वस्याऽऽनन्दादयः प्रधानस्येत्यधिकरणसिद्धस्य विरोधः स्यादिति वाच्यम् । स्वाभाविकानन्त्यस्यौपाधिकाल्पायतनस्य चानुसंधाने विरोधाभावात् । इह च द्युपरिच्छिन्नत्वरूपद्युव्यापकत्वस्य च हृदयाद्यल्पायतनावच्छिन्नत्वस्य चौपाधिकतया परस्य विरुद्धौपाधिकपरिमाणद्वयानुसंधानविरोधादिति हि तत्र स्थितम् । प्रकृतमनुसरामः ॥ १२ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां तृतीयाध्यायस्याष्टमं ब्राह्मणम् ॥ ८ ॥

अथ हैनं विदग्धः शाकल्यः पप्रच्छ ।

शकलस्यापत्यं शाकल्यः । विदग्धः समर्थंमन्य इति यावत् ।

कति देवा याज्ञवल्क्येति ।

किंसंख्याका देवा इत्यर्थः ।

स हैतयैवं निविदा प्रतिपेदे ।

स याज्ञवल्क्य एतया वक्ष्यमाणयेव निविदा देवतासंख्यां प्रतिपेदे प्रत्यपादयदुक्तवानिति यावत् ।

तदेव व्याकरोति—

यावन्तो वैश्वदेवस्य निविद्युच्यन्ते ।

वैश्वदेवस्य शस्त्रस्य निविदि निविन्नाम वैश्वदेवशस्त्रे शस्यमानदेवता-संख्यावाचकपदयुक्तमन्त्रविशेषः । तस्यां निविदि यावन्तो देवाः श्रूयन्ते तावन्तो देवा इत्यर्थः ।

कियन्तस्तत्रोच्यन्त इत्यत्राऽऽह—

त्रयश्च त्री च शता ।

त्रयश्च त्रीणि शतानीत्यर्थः । 'सुपां सुलुक्०' इत्यादिना पूर्वसवर्णादेशः । त्र्यधिका त्रिशतीत्यर्थः ।

त्रयश्च त्री च सहस्रेति ।

त्र्यधिका त्रिसहस्रीति यावत् ।

उक्तमङ्गी करोति—

ओमिति होवाच ।

विदग्ध इति शेषः । भवत्वेवं स्थूलदृशा, सूक्ष्मदृष्ट्या तु पृच्छति—

कत्येव देवा याज्ञवल्क्येति ।

किंसंख्याका देवा इत्यर्थः ।

उत्तरम्—

त्रयस्त्रिंशदिति ।

अङ्गी करोति—

ओमिति होवाच ।

पुनरपि सूक्ष्मदृष्ट्या पृच्छति—

कत्येव देवा याज्ञवल्क्येति ।

उत्तरमाह—

षडिति ।

अभ्युपगच्छति—

ओमिति होवाच ।

एवमुत्तरत्रापि द्रष्टव्यम् ।

कत्येव देवा याज्ञवल्क्येति त्रय इत्योमिति होवाच
कत्येव देवा याज्ञवल्क्येति द्वावित्योमिति होवाच
कत्येव देवा याज्ञवल्क्येत्यध्यर्ध इत्योमिति होवाच
कत्येव देवा याज्ञवल्क्येत्येक इत्योमिति होवाच ।

एवं देवतासंकोचविकाशविषयां संख्यां पृष्ट्वा संख्येयस्वरूपं पृच्छति–

कतमे च ते त्रयश्च त्री च शता
त्रयश्च त्री च सहस्रेति ॥ १ ॥

स होवाच महिमान एवैषामेते त्रयस्त्रिꣳशत्त्वेव देवा इति ।

त्रयस्त्रिंशतो देवानामेते त्रिशताधिकत्रिसहस्रभेदा महिमान एवंगुणभूता इत्यर्थः । तथैव व्यासार्यैः 'विरोधः कर्मणि' [ब्र० सू० १।३।२७] इति सूत्र उक्तम् । तस्मात्त्रयस्त्रिंशदेव देवा इति ।

पृच्छति–

कतमे ते त्रयस्त्रिꣳशदिति ।

उत्तरम्—

अष्टौ वसव एकादश रुद्रा द्वादशाऽऽदित्यास्त एक-
त्रिꣳशदिन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिꣳशाविति॥ २ ॥

त्रयस्त्रिंशतः पूरणावित्यर्थः ॥ २ ॥

पृच्छति—

कतमे वसव इति ।

अष्टौ वसव इत्युक्ता वसवः क इत्यर्थः ।

उत्तरम्—

अग्निश्च पृथिवी च वायुश्चान्तरिक्षं चाऽऽदित्यश्च
द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वसव एतेषु
हीदं वसु सर्वꣳ हितमिति तस्माद्वसव इति ॥ ३ ॥

यस्मादग्न्यादिषु सर्वं वसुशब्दवाच्यं धनं हितमिति तस्माद्वसव इत्युच्यन्त इत्यर्थः । अग्निपृथिव्यादिशब्दास्तत्तदभिमानिदेवतापरा इति द्रष्टव्यम् ॥ ३ ॥

कतमे रुद्रा इति दशमे पुरुषे प्राणा आत्मैकादशः ।

ज्ञानकर्मेन्द्रियाणि दश पुरुषस्थानि दशमे दशेम इत्यर्थः । दशेमे पुरुष इति पाठे स्पष्टोऽर्थः । एकादशं मनः ।

ते यदाऽस्माच्छरीरान्मर्त्यादुत्क्रामन्त्यथ रोद-
यन्ति तद्यद्रोदयन्ति तस्माद्रुद्रा इति ॥ ४ ॥

मरणधर्मकाच्छरीरादुत्क्रामन्तः प्राणा म्रियमाणं पुरुषं रोदयन्तीति रुद्रा इत्यर्थः ।

कतम आदित्या इति द्वादश वै मासाः संवत्सर-
स्यैत आदित्या एते हीदꣳ सर्वमाददाना यन्ति ते
यदिदꣳ सर्वमाददाना यन्ति तस्मादादित्या इति॥५॥

ते हि मासा इदमुत्पत्तिमतां जीवितमाददाना अपहरन्तो यन्ति तस्मादादित्या इत्यर्थः ॥ ५ ॥

कतम इन्द्रः कतमः प्रजापतिरिति स्तनयित्नुरेवेन्द्रो
यज्ञः प्रजापतिरिति कतमः स्तनयित्नुरित्यशनि-
रिति कतमो यज्ञ इति पशव इति ॥ ६ ॥

यज्ञसाधनत्वात्पशव एव यज्ञ इत्युच्यते ॥ ६ ॥

कतमे षडित्यग्निश्च पृथिवी च वायुश्चान्तरिक्षं चाऽऽदि-
त्यश्च द्यौश्चैते षडेते हीदꣳ सर्वꣳ षडिति ॥ ७ ॥

इदं सर्वमेते षडेवेत्यर्थः ॥ ७ ॥

कतमे ते त्रयो देवा इतीम एव त्रयो
लोका एषु हीमे सर्वे देवा इति ।

सर्वदेवाश्रयत्वात्त्रय एव लोका देवा इत्यर्थः ।

कतमौ तौ द्वौ देवावित्यन्नं चैव प्राणश्चेति
कतमोऽध्यर्ध इति योऽयं पवत इति ॥ ८ ॥
तदाहुर्यदयमेक इवैव पवतेऽथ कथमध्यर्ध इति ।

यद्यस्मादयं वायुरेक एव पवते तत्कथमध्यर्ध इति शङ्कायामाहुरित्यर्थः । उत्तरम्—

यस्मिन्निदꣳ सर्वमध्यार्ध्नोत्तेनाध्यर्ध इति ।

ऋधु वृद्धौ । अधिकवृद्धिं यस्मिन्निदं प्राप्तं तेनाध्यर्ध इति उच्यत इत्यर्थः ।

कतम एको देव इति प्राण इति ।

ननु प्राणः पवमानपर्यायः स चाध्यर्ध इति कथमुक्त इत्यत्राऽऽह—

स ब्रह्म त्यदित्याचक्षते ॥ ९ ॥

प्राणशब्देन तु ब्रह्मैवोच्यत इत्यर्थः । ततश्च ब्रह्मणो महिमानः सर्वे देवा इति पर्यवसितोऽर्थः ॥ ९ ॥

पृथिव्येव यस्याऽऽयतनमग्निर्लोको मनो-
ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः
परायणꣳस वै वेदिता स्यात् । याज्ञवल्क्य ।

आयतनमाधारः शरीरमिति यावत् । लोक्यतेऽनेनेति लोको दर्शन-साधनमित्यर्थः । अग्निना पश्यति । मनोज्योतिः । मन एव ज्योतिः संकल्पविकल्पादिकार्यकारि यस्य स मनोज्योतिः । पृथिव्यायतनकत्वे-नाग्निदर्शनकत्वेन मनसा संकल्पयितृत्वेन धातव्य इति प्रश्नस्य फलि-तार्थः । ईदृशः परमात्मा पृथिव्यायतनत्वादिना ज्ञातव्य इति यो ज्ञाता स एव ज्ञाता याज्ञवल्क्य नान्य इत्यर्थः ।

एवमुक्तो याज्ञवल्क्य आह—

वेद वा अहं त्वं पुरुषꣳ सर्वस्याऽऽत्मनः परायणं
यमात्थ य एवायꣳ शारीरः पुरुषः स एषः ।

वैशब्द एवार्थः । अहं सर्वस्याऽऽत्मनः परायणं पृथिव्याद्यायतनत्वा-दिनोपास्यं यं त्वं वदसि तमहं जानाम्येव । कोऽसावित्यत्राऽऽह—य एवायं शारीरः पुरुष इति । शारीरो जीवस्तदन्तर्यामीति यावत् । यद्वा

शारीरो जगच्छरीरकः । ततश्च जगच्छरीरकत्वविशिष्टः सर्वात्मपरायणभूतः पुरुषशब्दितः परमात्मा पृथिव्यायतनत्वादिना ध्यातव्यः । एवं तस्योत्तरमुक्त्वाऽस्मिन्विषये ज्ञेयं विशेषणान्तरं स्वयं पृच्छति—

वदैव शाकल्य तस्य का देवतेति ।

तस्य पृथिव्यायतनत्ववेदितुरुपास्या देवता का किंसंज्ञादिविशिष्टा ध्यातव्येत्यर्थः ।

उत्तरमाह—

अमृतमिति होवाच ॥ १० ॥

अमृतमितिसंज्ञादिविशिष्टा ध्यातव्येत्यर्थः । 'स त आत्माऽन्तर्याम्यमृतः' इत्यन्तर्यामिणो वेदनादिति द्रष्टव्यम् । यद्वा वदैव शाकल्य वदैव पृच्छैव यत्प्रष्टव्यं तत्सर्वं पृच्छेत्यर्थः । तस्य का देवतेति शाकल्यप्रश्नः । एवमुत्तरत्रापि द्रष्टव्यम् ॥ १० ॥

काम एव यस्याऽऽयतनꣳ हृदयं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं सर्वस्याऽऽत्मनः परायणं यमात्थ य एवायं काममयः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति स्त्रिय इति होवाच ॥ ११ ॥

स्त्रीशरीरकतया ध्यातव्येत्यर्थः ॥ ११ ॥

रूपाण्येव यस्याऽऽयतनं चक्षुर्लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणं स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं सर्वस्याऽऽत्मनः परायणं यमात्थ य एवासावादित्ये पुरुषः स एष वदैव शाकल्य तस्य का देवतेति सत्यमिति होवाच ॥ १२ ॥

'तद्यत्सत्यमसौ स आदित्यो य एष एव तस्मिन्मण्डले पुरुषः' इति श्रुतेरिति भावः ॥ १२ ॥

आकाश एव यस्याऽऽयतनꣳ श्रोत्रं लोको मनो-
ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः
परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद
वा अहं तं पुरुषꣳ सर्वस्याऽऽत्मनः परायणं
यमात्थ य एवायं श्रौत्रः प्रातिश्रुत्कः पुरुषः ।

श्रौत्रः श्रोत्रानुभूयमानः । प्रातिश्रुत्कः प्रतिध्वनिविशिष्टः पुरुषः श्रोत्रानुभूयमानत्वं च परमात्मनः प्रतिध्वनिद्वारा द्रष्टव्यम् ।

स एष वेदेव शाकल्य तस्य का
देवतेति दिश इति होवाच॥१३॥

तम एव यस्याऽऽयतनꣳ हृदयं लोको मनोज्योतिर्यो
वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणꣳ स वै
वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरु-
षꣳ सर्वस्याऽऽत्मनः परायणं यमात्थ यमेवायं
छायामयः पुरुषः स एष वेदेव शाकल्य
तस्य का देवतेति मृत्युरिति होवाच॥१४॥

बालाक्यजातशत्रुसंवादे 'छायापुरुषे मृत्युरिति वा अहमेतमुपासे' इति दर्शनादिति भावः ॥ १४ ॥

रूपाण्येव यस्याऽऽयतनं चक्षुर्लोको मनोज्योतिर्यो
वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणꣳ स
वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं
तं पुरुषꣳ सर्वस्याऽऽत्मनः परायणम् ।

पूर्वमादित्यपुरुषे रूपसामान्यमुक्तमिह तु तद्विशेष इति भिदा ।

यमात्थ य एवायमादर्शे पुरुषः स एष वेदैव शाकल्य
तस्य का देवतेत्यसुरिति होवाच ॥ १५ ॥

बालाकिब्राह्मणे प्रातिश्रुत्कपुरुषेऽसुत्वमुक्तमिह त्वादर्शपुरुषेऽसुत्वं तत्राऽऽदर्शपुरुषे रोचिष्णुत्वमुक्तं विधाभेदसंभवादिति द्रष्टव्यम् । इयां-

स्तु विशेषः—बालाकिब्राह्मणे ब्रह्मलिङ्गत्वाभावात्तत्रत्यपुरुषशब्दो न ब्रह्मपर्यन्त इह तु सर्वात्मपरायणत्वादिरूपब्रह्मलिङ्गाद्ब्रह्मपर्यन्त इति विवेकः । केचित्तु बालाकिब्राह्मण इव पुरुषशब्दानां ब्रह्मपर्यन्तत्वमपि नाभ्युपगच्छन्ति[इति] उभयथाऽपि न विरोधः ॥ १५ ॥

आप एव यस्याऽऽयतनꣳ हृदयं लोको मनोज्यो-
तिर्यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणꣳ
स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं
पुरुषꣳ सर्वस्याऽऽत्मनः परायणं यमात्थ य एवा-
यमप्सु पुरुषः स एष वदेव शाकल्य तस्य
का देवतेति वरुण इति होवाच ॥ १६ ॥

रेत एव यस्याऽऽयतनꣳ हृदयं लोको मनोज्यो-
तिर्यो वै तं पुरुषं विद्यात्सर्वस्याऽऽत्मनः परायणꣳ
स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं
पुरुषꣳ सर्वस्याऽऽत्मनः परायणं यमात्थ य
एवायं पुत्रमयः पुरुषः स एष वदेव शाकल्य तस्य
का देवतेति प्रजापतिरिति होवाच ॥ १७ ॥

उक्ताष्टपुरुषेषु मनोज्योतिष्ट्वं सर्वत्रानुगतम् । आयतनानां लोकानां धर्माणां च भेदः ॥ १७ ॥

एवं प्रतिवादकुपितयाज्ञवल्क्य आह—

शाकल्येति होवाच याज्ञवल्क्यस्त्वाꣳ स्विदिमे
ब्राह्मणा अङ्गारावक्षयणमक्रता३ इति ॥ १८ ॥

स्विदिति वितर्के । इमे नूनं ब्राह्मणाः स्वयं भीताः सन्तोऽङ्गारावक्षय-णमङ्गारा अवक्षीयन्ते गृह्यन्ते येन पात्रेण तदङ्गारावक्षयणं तन्नूनं त्वां कृतवन्तो ब्राह्मणाः । त्वं तु न बुध्यस आत्मानं मया दह्यमानमित्यभि-प्रायः ॥ १८ ॥

याज्ञवल्क्येति होवाच शाकल्यो यदिदं कुरुप-
ञ्चालानां ब्राह्मणानत्यवादीः किं ब्रह्म विद्वा-
निति दिशो वेद सदेवाः सप्रतिष्ठा इति
यद्दिशो वेत्थ सदेवाः सप्रतिष्ठाः ॥ १९ ॥

अत्यवादीरित्युक्तवानसि स्वयं भीतास्त्वामङ्गारावक्षयणं कृतवन्त इति किं ब्रह्म विद्वानेवमधिक्षिपसि ब्राह्मणानहं दिशस्तदधिष्ठातृदेवताश्च तत्प्रतिष्ठाश्चेत्येवंप्रकारेण जाने ॥ १९ ॥

त्वमप्यहमिव दिशो देवतास्तत्प्रतिष्ठाश्च यदि वेत्सि तर्हि पृच्छामि–

किंदेवतोऽस्यां प्राच्यां दिश्यसीति ।

प्राच्यां दिशि किंदेवतस्त्वमसि का देवता यस्य स किंदेवतः । प्राग्दिगधिष्ठातृत्वेन कां देवतामुपास्स इत्यर्थः ।

उत्तरमाह—

आदित्यदेवत इति ।

आदित्यो देवता यस्य स आदित्यदेवतः । प्राच्यां दिश्यधिष्ठातृत्वेनाऽऽदित्यमहमुपासे ।

स आदित्यः कस्मिन्प्रतिष्ठित इति चक्षु-
षीति कस्मिन्नु चक्षुः प्रतिष्ठितमिति ।

उत्तरम्—

रूपेष्विति ।

तत्रोपपत्तिमाह—

चक्षुषा हि रूपाणि पश्यति ।

यस्माच्चक्षुषा रूपाणि पश्यति अतश्चक्षुः स्वविषये प्रतिष्ठितम् ।

कस्मिन्नु रूपाणि प्रतिष्ठितानीति ।

उत्तरम्—

हृदय इति होवाच ।

तत्रोपपत्तिमाह—

हृदयेन हि रूपाणि जानाति हृदये
ह्येव रूपाणि प्रतिष्ठितानि भवन्ति ।

अन्तःकरण एव वासनात्मना प्रतिष्ठितानि भवन्तीत्यर्थः ।

उक्तमङ्गीकृत्यान्यत्पृच्छति—

इत्येवमेवैतद्याज्ञवल्क्य ॥ २० ॥
किंदेवतोऽस्यां दक्षिणायां दिश्यसीति ।

पूर्ववदर्थः । स्याडभावश्छान्दसः । उत्तरमाह—

यमदेवत इति स यमः कस्मिन्प्रतिष्ठित इति यज्ञ इति कस्मिन्नु यज्ञः प्रतिष्ठित इति दक्षिणायामिति कस्मिन्नु दक्षिणा प्रतिष्ठितेति श्रद्धायामिति यदा ह्येव श्रद्धत्तेऽथ दक्षिणां ददाति श्रद्धायाꣳ ह्येव दक्षिणा प्रतिष्ठितेति कस्मिन्नु श्रद्धा प्रतिष्ठितेति हृदय इति होवाच हृदयेन हि श्रद्धां जानाति हृदये ह्येव श्रद्धा प्रतिष्ठिता भवतीत्येवमेवैतद्याज्ञवल्क्य ॥ २१ ॥

किंदेवतोऽस्यां प्रतीच्यां दिश्यसीति वरुणदेवत इति स वरुणः कस्मिन्प्रतिष्ठित इत्यप्स्विति कस्मिन्न्वापः प्रतिष्ठिता इति रेतसीति कस्मिन्रेतः प्रतिष्ठितमिति हृदय इति ।

तत्रोपपत्तिमाह—

तस्मादपि प्रतिरूपं जातमाहुर्हृदयादिव सृप्तो हृदयादिव निर्मित इति हृदये ह्येव रेतः प्रतिष्ठितं भवति ।

यस्माज्जातं पितुः प्रतिरूपं पितृसदृशसंस्थानं पुत्रं पितुर्हृदयान्निर्गत इव वर्तते हृदयान्निर्मित इव वर्तते यं कुमारमित्याहुः ।

इत्येवमेवैतद्याज्ञवल्क्य ॥ २२ ॥

किंदेवतोऽस्यामुदीच्यां दिश्यसीति सोमदेवत इति स सोमः कस्मिन्प्रतिष्ठित इति दीक्षायामिति कस्मिन्दीक्षा प्रतिष्ठितेति सत्य इति तस्मादपि दीक्षितमाहुः सत्यं वदेति सत्ये ह्येव दीक्षा प्रतिष्ठितेति कस्मिन्नु सत्यं प्रतिष्ठितमिति हृदय इति होवाच हृदयेन हि सत्यं जानाति हृदये ह्येव सत्यं प्रतिष्ठितं भवतीत्येवमेवैतद्याज्ञवल्क्य ॥ २३ ॥

किंदेवतोऽस्यां ध्रुवायां दिश्यसीति ।

स्वर्लोकापेक्षया भूमेर्ध्रुवत्वाद्भूमिरूपाऽधोदिग्ध्रुवेत्युच्यते ।

अग्निदेवत इति सोऽग्निः कस्मिन्प्रतिष्ठित इति वाचीति कस्मिन्नु वाक्प्रतिष्ठितेति हृदय इति ।

एवं सर्वदिग्देवतानां प्रतिष्ठाभूतं हृदयं क्व प्रतिष्ठितमिति पृच्छति—

कस्मिन्नु हृदयं प्रतिष्ठितमिति ॥ २४ ॥

अहल्लिकेति होवाच याज्ञवल्क्यः ।

अहल्लिक इति शाकल्यस्य नामान्तरमिति केचित् । अहल्लिकः पण्ढः कोपादेव शाकल्यं ब्रूत इति केचित् ।

यत्रैतदन्यत्रास्मन्मन्यासै ।

अस्मदस्माच्छरीरादित्यर्थः । यद्वाऽस्मच्छब्दः पञ्चमीबहुवचनान्तो द्रष्टव्यः । अस्मदस्मत्त इत्यर्थः । अस्माच्छरीरादन्यत्र यत्र क्वाप्येतद्धृदयं प्रतिष्ठितमिति किल मन्यसे ।

तद्ध्येतदन्यत्रास्मत्स्याच्छ्वानो वैनदद्युर्वयांसि वैनद्विमथ्नीरन्निति ॥ २५ ॥

यदि अस्माच्छरीराद्धृदयमन्यत्र गच्छेत्तदेदं शरीरं श्वानो भक्षयेयुः पक्षिणो वा लोडयेयुः । तस्मान्मय्येव हृदयं प्रतिष्ठितमित्यर्थः ॥ २५ ॥

कस्मिन्नु त्वं चाऽऽत्मा प्रतिष्ठितौ स्थ इति ।

हृदयप्रतिष्ठाधारभूतस्त्वं चाऽऽत्मा चाऽऽत्मशब्देनात्र हृदयमुच्यते । स्थ इति अस्तेर्मध्यमपुरुषद्विवचनम् ।

उत्तरम्—

प्राण इति ।

प्राणाधीनप्रतिष्ठत्वाज्जीवमनसोरिति भावः । एवमुत्तरत्रापि द्रष्टव्यम् ।

कस्मिन्नु प्राणः प्रतिष्ठित इत्यपान इति कस्मिन्न्वपानः प्रतिष्ठित इति व्यान इति कस्मिन्नु व्यानः प्रतिष्ठित इत्युदान इति कस्मिन्नूदानः प्रतिष्ठित इति समान इति ।

एवं प्रश्नप्रतिवचनपरम्परायां प्राप्तायां तूष्णींभूते शाकल्ये समानप्रतिष्ठाधारप्रश्नाभावात्तमसौ न वेत्तीति निश्चित्य समानप्रतिष्ठाधारं स्वयं पृच्छति—

स एष नेति नेत्यात्मा ।

स एष समानप्रतिष्ठाधारभूतः । 'अथात आदेशो नेति नेति' [बृ० २ । ३ । ६] निर्दिष्टोऽयमात्मा स एष समानप्रतिष्ठाधारभूत इत्यर्थः ।

अगृह्यो न हि गृह्यते ।

इन्द्रियग्रहणायोग्यत्वादिन्द्रियेण न गृह्यते ।

अशीर्यो न हि शीर्यते ।

विशरणयोग्यावयवशून्यत्वान्न शीर्यते ।

असङ्गो न हि सज्जते ।

निर्लेपत्वात्पापफलं नानुभवतीत्यर्थः ।

असितो न व्यथते न रिष्यति ।

षिञ् बन्धने । कर्मबन्धशून्यत्वादेव सर्वदेहान्तरार्तोऽपि न शोचति न हिंस्यते वेत्यर्थः । एतादृशं समानप्रतिष्ठाधारभूत मनसि निधाय तं शाकल्यो न वेत्तीति निश्चित्य पृच्छति—

एतान्यष्टावायतनान्यष्टौ लोका अष्टौ देवा
अष्टौ पुरुषाः स यस्तान्पुरुषान्निरुह्य प्रत्यु-

ह्यात्यक्रामत्तं त्वौपनिषदं पुरुषं पृच्छामि तं
चेन्मे न विवक्ष्यसि मूर्धा ते व्यपतिष्यतीति ।

यानि प्रागुक्तानि पृथिव्यादीन्यष्टावायतनान्यान्या अष्टौ लोका अमृताद्या अष्टौ देवाः शरीराद्या अष्टौ पुरुषाः स य एतान्पुरुषान्निरुह्य प्रत्युह्यात्यक्रामत् । अत्र पुरुषानित्युपलक्षणम् । आयतनलोकादीन्यपि [इति] द्रष्टव्यम् । एतान्निरुह्य प्रत्युह्य सम्यङ्निर्धारणार्थो निरूहः प्रत्यूहः । आयतनदेवलोकपुरुषान्प्रति व्यक्तितर्केण तत्तत्स्वरूपं निर्धार्य तान्सर्वान्योऽत्यक्रामद्यः पुरुषः प्रत्यक्रामत्सकलकार्यवर्गविलक्षणत्वेन निश्चित[वान्] इत्यर्थः । यद्यप्यतिक्रमणकर्तृत्वमौपनिषदात्मगतं निरूहप्रत्यूहकर्तृत्वं तु पुरुषगतं तथाऽपि ण्यर्थगर्भतया य ऊहयित्वाऽत्यक्रामदित्युक्तौ न विरोध इति द्रष्टव्यम् । ऊहविषयस्य परमात्मन ऊहयितृत्वसंभवात् । अतिक्रमणं नामेदं वा परमितिसंशयविषये ह्यतिक्रमणं त[स्य] च परमात्मकर्तृत्वं संभवतीति द्रष्टव्यम् । 'तं त्वौपनिषदं पुरुषं पृच्छामि तं चेन्मे न वक्ष्यसि' तं सर्वविलक्षणमौपनिषदमुपनिषदेकगम्यं त्वां पृच्छामि तं चेन्मे न वक्ष्यसि मूर्धा ते व्यपतिष्यतीति शशापेत्यर्थः । सूत्रितं च भगवता बादरायणेन—'शास्त्रयोनित्वात् ।' [ब्र० सू० १ । १ । ३] इति । तत्र ह्यधिकरणेऽङ्कुरादिकं सकर्तृकं कार्यत्वादित्यनुमानसिद्धेश्वरानुवादितया न वेदान्तवाक्यं तत्र प्रमाणम् । अतो वेदान्तन्यायग्रन्थनात्मकं मीमांसाशास्त्रमनारम्भणीयम् । नचेश्वरमनुमानसिद्धमनूद्य वेदान्तैर्जगदुपादानादिकं बोध्यतामतः शास्त्रमारभ्यतामिति वाच्यम् । कार्यत्वस्योपादानभिन्नकर्तृकत्वेन व्याप्ततयाऽभिन्ननिमित्तोपादानत्वप्रतिपादकवेदान्तवाक्यस्य धर्मिग्राहकानुमानजातीयनिमित्तोपादानभेदग्राह्यनुमानबाधितत्वान्न वेदान्तवाक्यं ब्रह्मणि प्रमाणमिति प्राप्त उच्यते— 'शास्त्रयोनित्वात् ।' [ब्र० सू० १ । १ । ३] शास्त्रं योनिः प्रमाणम् । शास्त्रं योनिः प्रमाणं यस्य । शास्त्रयोनित्वाच्छास्त्रैकसमधिगम्यत्वाद्वेदान्तानां प्रामाण्यमस्तीत्यर्थः । कार्यत्वेन हेतुना सकर्तृकत्वसाधने तेनैव हेतुना गुणत्रयवश्यकर्तृकत्वशरीरजन्यत्वादेरपि प्रसङ्गात्प्रासादादिविपुलकार्यस्यानेककर्तृकत्वदर्शनेन क्षित्यादिकार्यस्यापि तथात्वप्रसङ्गाच्चेश्वरस्य नित्यकृत्यभ्युपगमे तद्द्वारा हेतुभूतयोर्ज्ञानेच्छयोरीश्वरेऽसिद्धिप्रसङ्गेन ज्ञानेच्छाप्रयत्नलक्षणगुणत्रयाश्रयेश्वरासिद्धिप्रसङ्गात् । अतः शास्त्रैकसमधिगम्येश्वरोपादानत्वप्रतिपादकवेदान्तभागस्य नानुपपत्तिः । अत

एव सांख्यपक्षस्याप्रतिष्ठिततर्कमूलत्वेन यथाऽभावत्वमेवं कणभक्षाक्षपादक्षपणकबौद्धपक्षाणां परमाणुकारणत्वपक्षपातिनां शुष्कतर्कमूलत्वाद्वैदिकपरिग्रहशून्यत्वाच्चानादरणीयत्वमिति स्मृतिपादे 'एतेन शिष्टापरिग्रहा अपि व्याख्याताः ' [ब्र० सू० २ । १ । १२] इत्यधिकरणे निर्णीतम् । शिष्टाः परिशिष्टास्ते च तेऽपरिग्रहाश्च शिष्टापरिग्रहाः । अवशिष्टा वैदिकपरिग्रहशून्याः कणभुगादिपक्षा एतेन सांख्यपक्षदूषणेनैव दुष्टत्वेन व्याख्याता इति सूत्रार्थः । तथा तर्कपादे परमाणुकारणवादो दूषितः । तत्र हि कारणपक्षस्य युक्तियुक्ततयाऽऽदरणीयत्वमस्तीति पूर्वपक्षे प्राप्त उच्यते—' महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् । ' [ब्र० सू० २ । २ । ११] पारिमाण्डल्यपरिमाणाश्रयणेन परस्परयुक्तपरमाणुद्वयेनाणु ह्रस्वं द्व्यणुकमुत्पद्यते । परस्परसंयुक्तेनाणुह्रस्वद्व्यणुकत्रयेण महद्दीर्घं त्र्यणुकमुत्पद्यत इत्यसमञ्जसप्रक्रियावादितराऽपि तत्प्रक्रियाऽसमञ्जसैव । किं तत्रासामञ्जस्यमिति चेत्—निष्प्रदेशे परमाणौ प्रादेशिकसंयोगासंभवात्संयोगस्याव्याप्यवृत्तित्वनियमात्परस्परसंयुक्तप्रदेशाभावे ततोऽधिकपरिमाणकार्यानुत्पत्तिप्रसङ्गात् । ' उभयथाऽपि न कर्मातस्तदभावः ' [ब्र० सू० २ । २ । १२] परिनिष्पाद्यं कर्मादृष्टकारितमिति हि तैरभ्युपगम्यते । तत्र न परमाणुसमवेतमदृष्टं क्रियाहेतुः । अचेतनादृष्टानाधारत्वात् । नाप्यात्मगतं परमाणुक्रियाहेतुः । व्यधिकरणत्वात् । अतोऽदृष्टकारिताद्यकर्मणा परमाणुद्वयसंयोग इति तत्प्रक्रिया न युक्ता । ' समवायाभ्युपगमाच्च साम्यादनवस्थितेः । ' [ब्र० सू० २ । २ । १३] जातिगुणादिविशिष्टप्रतीतिनिर्वाहकतया समवायाभ्युपगमे तन्तुषु पटः समवेत इति समवायविशिष्टप्रतीतिनिर्वाहकतासाम्येन संबन्धान्तरस्याप्यावश्यकत्वात्तत्रापि संबन्धान्तराभ्युपगमेऽनवस्था च स्यात् । 'नित्यमेव च भावात् । ' [ब्र० सू० २ । २ । १४] समवायलक्षणसंबन्धस्य नित्यं सत्त्वात्संबन्धिनोरपि नित्यसत्त्वावश्यंभावेन जगतो नित्यत्वमेव स्यात् । ' रूपादिमत्त्वाच्च विपर्ययो दर्शनात् । ' [ब्र० सू० २ । २ । १५] रूपादिमत्त्वाच्च परमाणोस्त्वदभिमतनित्यत्वनिरवयवत्वादिव्यतिरेकः प्रसज्येत लोके रूपादिमतामनित्यत्वादिदर्शनात् । नन्वेतद्दोषशान्तये रूपादिशून्या एव परमाणवः सन्तु तत्राऽऽह—' उभयथा च दोषात् ' [ब्र० सू० २ । २ । १६] । कारणगुणपूर्वकत्वात्त्वन्मते कार्यगुणानां द्व्यणुकादीनामपि रूपादिशून्यत्वप्रसङ्गः । ' अपरिग्रहाच्चात्यन्त-

मनपेक्षा ' [ब्र० सू०२ । २ । १७] वैदिकपरिग्रहशून्यत्वाच्च तत्पक्षस्य निःश्रेयसार्थिभिस्तत्पक्षेऽनपेक्षैव कार्येति स्थितम् । ते ह्यर्धवैनाशिका इति हि शिष्टगोष्ठीप्रसिद्धिः । जाठराग्निना पच्यमानानां भुक्तपीताहारौषधरसद्रव्यरूपाणामवयवानां प्रतिक्षणमुपचयापचयवैषम्यादवयविशरीरमपि प्रतिक्षणमुपचयापचयवदन्यद्भवति । यद्यपि शरीरस्य प्रतिकलमुपचयापचयदर्शनं नास्ति तथाऽपि वर्षधारानिपातैस्तटाकजलस्येव घटीयन्त्रोत्क्षेपणैः कूपजलस्येव चान्ते तद्दर्शनाद्यौक्तिकं प्रतिक्षणं किंचित्किंचिदुपचयज्ञानमस्त्येव चन्द्रतारकादीनां मुहूर्तादिकालव्यवधानेन बहुदेशान्तरप्राप्तिदर्शनात्प्रतिक्षणं स्वल्पदेशान्तरप्राप्तिज्ञानवदित्यभ्युपगच्छन्ति प्रतिक्षणमवश्यंभाविभिः खननपूरणादिभिर्भूगोलकस्य नदीजलसंसर्गस्य शीकरोत्पतनैः समुद्रस्य चोपचयापचयवतः क्षणिकत्वमभ्युपगच्छन्ति अतस्तेऽर्धवैनाशिकाः । बौद्धास्तु सर्वस्य प्रपञ्चस्य क्षणिकत्वमभ्युपगच्छन्तः सर्ववैनाशिका इति हि वैनाशिकानां व्यवहारः । अतो वैनाशिकत्वपरमाणुकारणवादित्वसाम्यादेव काणादमतप्रतिक्षेपानन्तरं बौद्धमतं प्रतिक्षिप्तं तर्कपादे ' समुदाय उभयहेतुकेऽपि तदप्राप्तिः ' [ब्र० सू० २ । २ । १८] इत्यादिना । तत्र हि खरस्नेहोष्णेरणस्वभावैः परमाणुभिः पृथिव्यादिभूतलक्षणः संघात उत्पद्यते । पृथिव्यादिभिश्च भूतैः शरीरेन्द्रियविषयसंघातलक्षणः समुदाय उत्पद्यत इति हि तेषां प्रक्रिया । तत्राणुहेतुके पृथिव्यादिभूतात्मकसमुदाये भूतहेतुके च शरीरेन्द्रियविलक्षणभौतिकसमुदाये च सति जगदात्मसमुदायोत्पत्तिर्नोपपद्यते सर्वेषां क्षणिकत्वाभ्युपगमेन यावत्संघातभावापत्त्यवस्थासंभवात् । इतरेतरप्रत्ययत्वादुपपन्न(द्यत) मि(इ)ति चेन्न ' । ' उत्पत्तिमात्रनिमित्तत्वात् ' [ब्र० सू० २ । २ । १९] । यद्यपि सर्वे पदार्थाः क्षणिकास्तथाऽप्यविद्यादीनामितरेतरकारणत्वादुपपद्यते लोकयात्रा । ते चाविद्यादयोऽविद्यासंस्कारो विज्ञानं नाम रूपं षडायतनं स्पर्शो वेदना तृष्णोपादानं भवो जातिर्जरा मरणं शोकः परिदेवना दुःखं दुर्मनस्तेत्येवंजातीयका इतरेतरहेतुकाः सौगते समयेऽभ्युपगम्यन्ते । अविद्या क्षणिककार्यदुःखशून्येषु स्थायिनित्यसुखवस्तुबुद्धिः । ततो रागद्वेषमोहधर्माधर्मसंस्काराः । संस्कारवशाज्जीवस्य भीताशयद्रव्ये वृत्तिलाभो विज्ञानम् । विज्ञानसंसर्गाद्गर्भद्रव्यस्य कललपेश्याद्याकारेणाभिव्यक्तिर्नाम रूपम् । तदभिव्यक्तिक्रमेण षडिन्द्रिया-

यतनशरीरनिष्पत्तिः षडायतनम् । निवृत्तशरीरेन्द्रियस्य गर्भगतविषये-न्द्रियसंसर्गजं ज्ञानं स्पर्शः । तन्निमित्तसुखदुःखे वेदना । स्वदुःखप्राप्तिप-रिहारार्था विषयोपादानेच्छा तृष्णा । तया विषयेषु प्रवृत्तिरुपादानम् । ततः क्रमेण गर्भान्निष्क्रमणं भवः । निर्गतस्य मनुष्यत्वादिजात्यभिमानो जातिः । क्रमभाविनी जरामरणे प्रसिद्धे । म्रियमाणस्य पुत्रकलत्राद्य-भिषङ्गादन्तर्दाहः शोकः । तदुत्थः प्रलापः परिदेवना मरणक्लेशो दुःखम् । मानसं दुःखं दौर्मनस्यम् । एतेषामितरेतरहेतुत्वस्यानुभवसिद्धत्वादुपप-द्यते लोकयात्रेति चेन्न । 'संघातभावानिमित्तत्वात्' । अस्थिरेषु स्थिर-त्वबुद्धिरूपाविद्याश्रयस्य कस्यचित्स्थिरस्याभावेनाविद्यया रागोत्पत्तेरसं-भवेन संघातहेत्वभावस्तदवस्थ एव । 'उत्तरोत्पादे च पूर्वनिरोधात्' [ब्र० सू० २ । २ । २०] । बौद्धमते वस्तुतः कालो नास्ति उदयन्नेव स्वरसभ-ङ्गुरो घटादिः क्षणपरिकल्पनमात्रनिमित्तं भवति स च घटादिः स्वोदयवि-नाशपरिकल्पितक्षणवत्त्वात्क्षणिकोऽपि भवति । वस्तुतः स्वव्यतिरिक्त-क्षणाभावात्स्वयमेव क्षणो भवतीति हि तेषां प्रक्रिया । ततश्च पूर्वघट-क्षणस्योत्तरक्षणोत्पत्तिकालेऽसतस्तद्धेतुत्वं न संभवति । असतोऽपि हेतु-त्वेऽतिप्रसङ्गात् । असत्यपि कारणे कार्यस्योत्पत्तावधिपतिसहकार्या-लम्बनसमनन्तरप्रत्ययाश्चत्वारश्चित्तचैत्तोत्पत्तिहेतव इति बौद्धानां प्रति-ज्ञाया उपरोधप्रसङ्गः । अधिपतिरिन्द्रियं तद्विज्ञानस्य रूपादिषु पञ्चसु एकैकमात्रविषयत्वनियामकम् । नियामकश्च लोकेऽधिपतिरुच्यते । सह-कारि आलोकादिकम् । आलम्बनं घटादिर्विषयः । समनन्तरप्रत्ययः पूर्वज्ञानम् । एतैश्चतुर्विधैर्हेतुभिश्चित्तशब्दितस्य ज्ञानस्य चैत्तशब्दितानां चित्ताभिन्नसुखादीनां चोत्पत्तिरिति हि तेषां प्रतिज्ञा सा प्रतिज्ञा हीयेत । यदि पूर्वक्षणवर्तित्वं विषयस्य न स्यात्तदा कारणत्वं हीयेतोत्तरक्षणवर्ति-त्वाभावे च वर्तमानत्वग्राहिप्रत्यक्षविषयत्वं न स्यादतः क्षणद्वयवर्तित्वम-भ्युपेतव्यमिति क्षणिकत्वविरोधः । यद्येतद्दोषपरिजिहीर्षया कारणघटक्ष-णस्यापि कार्यघटक्षणोत्पत्तिदशायां सत्त्वमभ्युपगम्यते तदा घटक्षणद्व-ययौगपद्यप्रसङ्ग इत्यर्थः । 'प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छे-दात्' [ब्र० सू० २ । २ । २२] । बौद्धः सर्वस्य वस्तुनो निरन्वयो विनाशः । स च द्विविधः । स्थूलः सूक्ष्मश्च । मुद्गरपाताद्यनन्तरं सर्वै-रुपलभ्यमानो घटादीनां विनाशः स्थूलः प्रतिसंख्यानिरोध इत्युच्यते । प्रतिसंख्याविषयसत्त्वप्रतिकूला तदसत्त्वग्राहिणी लौकिकानां बुद्धिस्त-द्विषयो निरोध इत्यवयवार्थान्वयात्तद्विपरीतो निरोधोऽप्रतिसंख्यानिरोधः

सूक्ष्मः। लौकिकोपलब्ध्ययोग्यो बौद्धैर्युक्त्या साध्यमानः प्रतिक्षणविनाशस्तयोरुभयोरप्राप्तिरसंभवः। कुतः। अविच्छेदात्। पिण्डघटकपालादिरूपेण स्थितस्य द्रव्यस्य स्वरूपविच्छेदाभावात्। न च द्रव्यानुवृत्तौ विनष्टो घट इत्यादिप्रतीतेर्निर्विषयत्वापत्तिः। अवस्थान्तरापत्तेर्विषयत्वसंभवात्। 'उभयथा च दोषात्।' [ब्र०सू०२। २। २३] बौद्धाः किलैवं वर्णयन्ति—प्रतिसंख्यानिरोधोऽप्रतिसंख्यानिरोध आकाशं चेत्येतत्त्रितयं वस्तु निरूपाख्यं तुच्छमन्यत्तु क्षणिकमुत्पाद्यमिति मन्यन्ते। तत्र पूर्वोत्पन्नस्य घटक्षणस्य तदानीमेव निरुद्धत्वप्राप्त्या तुच्छान्निरोधादेव कार्यघटक्षणस्योत्पत्तिरिति यदभ्युपगम्यते तत्र तुच्छादुत्पत्त्यसंभवस्तावदेको दोषः, तुच्छादुत्पत्त्यभ्युपगमे हि तुच्छस्य निर्विशेषत्वेन कारणविशेषकृतः कार्यविशेष इति व्यवस्थाया अभावाद्घटक्षणानन्तरं सर्वजगदुत्पत्तिः स्यात्। तथा तुच्छादुत्पद्यमानं कार्यमपि तुच्छमेवोत्पद्येत न तु सद्रूपं कारणानुसारित्वात्कार्यस्येत्यपरो दोष इत्यर्थः। 'आकाशे चाविशेषात्।' [ब्र० सू० २। २। २४] घटोऽयं पटोऽयमिति प्रत्यक्षप्रतीतिवत्कूपोऽसौ रन्ध्रमेतत्खग इह पततीत्यादिप्रत्यक्षस्याविशेषेणाऽऽकाशं तुच्छं घटादिकं तु क्षणिकं तुच्छमित्यत्र प्रमाणाभावात्। न चेह श्येनः पततीत्यादिप्रतीतेरालोक एव विषयोऽस्त्विति वाच्यम्। इहाऽऽलोक इहान्धकार इत्यालोकान्धकाराधारत्वेन प्रतीतस्याऽऽलोकरूपत्वाभावात्। 'अनुस्मृतेश्च।' [ब्र० सू० २। २। २५] तदेवेदमिति प्रत्यभिज्ञावशात्स्थिरस्यैवाभ्युपगन्तव्यत्वेन क्षणिकत्वासंभवादित्यर्थः। 'नासतोऽदृष्टत्वात्।' [ब्र० सू० २। २। २६] यदुच्यते सौत्रान्तिकैः—ज्ञानगतैर्नीलाद्याकारैर्बाह्यार्थगतास्तेऽनुमीयन्ते। यद्यपि नीलादिज्ञानमपरोक्षतयाऽनुभूयत इन्द्रियव्यापारान्वयव्यतिरेकानुविधायि च भवति तथाऽपि यदिन्द्रियसंनिकृष्टेन येनार्थेन यज्ज्ञानं जायते न तज्ज्ञानं तद्विषयकं किं तु स्वयमप्यर्थवन्नीलाद्याकारं भवति। तज्ज्ञानस्य प्रज्ञा(का)श[क]तया स्वात्मानं विषयीकुर्वत्स्वगतं नीलाद्याकारमपि विषयी करोति। अतो न नीलादिज्ञानस्यापरोक्षानुभवविरोधः। न वेन्द्रियव्यापारानुविधानविरोधः। नीलाद्यर्थिनो बहिः प्रवृत्तिस्तु नापरोक्षज्ञानात्। किं तु तदनन्तरभाविन आनुमानिकज्ञानात्। यथा वायुनिषेवणार्थिनां शाखाचलनं दृष्ट्वा वृक्षमूले प्रवृत्तिर्न चाक्षुषशाखाचलनज्ञानात्। किं तु तल्लिङ्गवाय्वनुमानादिति तन्न संभवति। क्षणिकस्य विषयस्यापरोक्षज्ञानकालेऽसतोऽपरोक्षज्ञानहेतुत्वादर्शनात्। सत एव

जपाकुसुमादेः स्फटिकादौ स्वाकारार्पणहेतुत्वेऽपि असतस्तदृदर्शनेनासतो विषयस्याज्ञाने स्वाकारार्पणाक्षमत्वात् । 'उदासीनानामपि चैवं सिद्धिः ।' [ब्र० सू० २ । २ । २६] तत्कालेऽसत एवोत्पादकत्व उदासीनानामनुद्युञ्जानानां पुरुषाणामुद्युञ्जानपुरुषवत्सर्वकार्यसिद्धिः स्यात् । उद्युञ्जानानुद्युञ्जानयोस्तत्कालासत्त्वाविशेषादिति स्थितम् । तथा सर्वज्ञपशुपतिप्रणीतत्वात्पशुपतिमतमादरणीयमिति पूर्वपक्षे प्राप्त उच्यते—'पत्युरसामञ्जस्यात् ।' [ब्र० सू० २ । २ । ३७] पत्युः पशुपतेर्मतमनादरणीयं वेदविरुद्धमुद्रिकापट्कधारणसुराकुम्भस्थापनशवभस्मस्नानादिधर्माणां निमित्तमात्रेश्वरस्य चाभ्युपगमेन तन्मतस्यासमञ्जसत्वात् । 'अधिष्ठानानुपपत्तेश्च' [ब्र० सू० २ । २ । ३९] अवैदिकस्य तदभिमताशरीरेश्वरस्य प्रधानाद्यधिष्ठातृत्वानुपपत्तेश्च । 'करणवच्चेन्न भोगादिभ्यः' [ब्र० सू० २ । २ । ४०] यथा करणकलेवराधिष्ठाने करणकलेवरान्तरनैरपेक्ष्यमेवं प्रधानाद्यधिष्ठानेऽपि शरीरनैरपेक्ष्यमस्त्विति चेन्न । तर्हि तद्वदेव सुखदुःखभोगादयः प्रादुःष्युः 'अन्तवत्त्वमसर्वज्ञता वा ।' [ब्र० सू० २ २ । ४१] वाशब्दश्चार्थः । तद्वदेव पुण्यापुण्यकर्मवश्यत्वादेरपि प्रसक्त्योत्पादविनाशवत्त्वज्ञानसंकोचादेरपि प्रसङ्गः । अतो निमित्तोपादानभेदवादि पाशुपतमतमनादरणीयमिति स्थितम् । निमित्तोपादानभेदवादादेव हैरण्यगर्भमतमनादरणीयमित्येतेन योगः प्रत्युक्त इति स्थितम् । क्षणिकत्वपक्षोक्तदोषोऽर्धवैनाशिकमतेऽपि समान इति तन्मतं सर्वथा नाऽऽदर्तव्यमिति स्थितम् । प्रकृतमनुसरामः ।

तꣳ ह न मेने शाकल्यः ।

औपनिषदात्मानं शाकल्यो नाज्ञासीदित्यर्थः ।

तस्य ह मूर्धा विपपातापि हास्य परिमोषिणोऽस्थीन्यपजह्रुरन्यन्मन्यमानाः ।

शापवशान्मूर्धा पपात । तस्य कोपाग्निना शरीरं च दग्धमभवत्संस्कारार्थं शिष्यैर्गृहान्नीयमानान्यस्थीन्यपि अन्यद्धनं मन्यमानाः परिमोषिणस्तस्करा अपहृतवन्तः । यद्वा परिमोषिणो मुषितशरीरस्य नष्टशरीरस्येति यावत् । तस्यास्थीन्येवमन्यन्मन्यमाना और्ध्वदैहिकक्रियार्थं तत्पुत्राद्या अपहृतवन्त इत्यर्थः ॥ २६ ॥

अथ होवाच ब्राह्मणा भगवन्तो यो वः काम-
यते स मा पृच्छतु सर्वे वा मा पृच्छत यो वः
कामयते तं वः पृच्छामि सर्वान्वा वः पृच्छामीति ।

हे पूजावन्तो ब्राह्मणा युष्माकं मध्ये यः प्रष्टुकामः स पृच्छतु सर्वे वा मा मां पृच्छत यो वः कामयते तं वः पृच्छामि सर्वान्वा वः पृच्छामीति । अथवा युष्माकं मध्ये यः प्रत्युत्तरं दित्सति तमहं पृच्छामि मिलितान्वा सर्वान्पृच्छामीति याज्ञवल्क्य उक्तवानित्यर्थः ।

ते ह ब्राह्मणा न दधृषुः ॥ २७ ॥

ते ब्राह्मणा जल्पकथायां न प्रगल्भा बभूवुः ॥ २७ ॥

तान्हैतैः श्लोकैः पप्रच्छ—

यथा वृक्षो वनस्पतिस्तथैव पुरुषोऽमृषा ।

यथा वनस्पतिः फलपुष्पोपेतो वृक्षस्तादृश एव पुरुषः । अमृषा सत्यमित्यर्थः । वानस्पत्यः फलैः पुष्पैरिति निघण्टुः । तत्साधर्म्यमेवाऽऽह—

तस्य लोमानि पर्णानि त्वगस्योत्पाटिका बहिः ।

अस्य पुरुषाख्यवृक्षस्य लोमान्येव पर्णानि अस्य पुरुषस्य या त्वग्बहिर्भूतोत्पाटिका वृक्षानुपमर्देनैवोत्पाट्यत इत्युत्पाटिका । चिञ्चादेरिव बहिस्त्वग्रुधिरवारकाच्चर्मणो या बहिर्भूता सा बहिस्त्वक् ॥ १ ॥

त्वच एवास्य रुधिरं प्रस्यन्दि त्वच उत्पटः ।

उत्क्रम्य पटतीत्युत्पटः क्षीरादिसारः ।

तस्मात्तदातृण्णात्प्रैति रसो वृक्षादिवाऽऽहतात् ॥ २ ॥

आतृण्णात् । तृदि हिंसायाम् । आतृण्णाच्छिन्नात् । तस्मात्पुरुषरूपाद्वृक्षाद्रस इव रुधिरं निर्गच्छतीत्यर्थः ॥ २ ॥

माꣳसान्यस्य शकराणि ।

अस्य पुरुषस्य मांसानि शकराणीव शकलानीवेत्यर्थः ।

किनाटꣳ स्नाव ।

स्नावेत्येतन्नान्तं नपुंसकं शिरेति यावत् । वृक्षस्य किनाटं नाम दार्वस्थिभागादुपगतवल्कः ।

तत्स्थिरम् ।

वृक्षस्य स्थिरं वल्कान्तर्गतास्थिरांशः ।

अस्थीन्यन्तरतो दारूणि मज्जा मज्जोपमा कृता ॥ ३ ॥

अस्य पुरुषस्यास्थीनि अन्तरतो दारूणि या मज्जा साऽस्य पुरुषस्य मज्जोपमा कृता भवति । तथा च वृक्षमज्जास्थाने पुरुषस्य प्रसिद्धमज्जा भवतीत्यर्थः ॥ ३ ॥

यद्वृक्षो वृक्णो रोहति मूलान्नवतरः पुनः ।

एवं वृक्षस्य च शरीरस्य च साम्ये सत्यपि वृक्षो वृक्णः सन्भिन्नः सन्मूलान्नवतरः पुनः प्ररोहति ।

मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥ ४ ॥

रेतस इति मा वोचत जीवतस्तत्प्रजायते ।

रेतस एव मूलात्पुनः प्ररोहतीति मा वोचत कुतो जीवत एव तद्रेतः प्रजायतेऽयं तु मृत इति नात्र रेतो मूलं शङ्क्यम् । न हि वृक्षस्य भिन्नावशिष्टमूलमिवास्य रेतोमयं स्वमूलमवशिष्यते यतः पुनः प्ररोहतीति कल्प्येत ।

धानारुह इव वृक्षोऽञ्जसा प्रेत्य संभवः ॥ ५ ॥

किं च वृक्षो धानारुहो भवति धाना बीजं धानाभ्यो रोहतीति स तथोक्तः । बीजरुहोऽपि वृक्षो भवति न केवलं काण्डरुहः । इवशब्दोऽप्यर्थः । वृक्षोऽञ्जसा साक्षात्प्रेत्य मृत्वा धानातोऽपि संभवेत् ।

यत्समूलमावृहेयुर्वृक्षं न पुनराभवेत् ।

यदि मूलेन धानया वा सहोत्पाटयेयुस्तदा न पुनरागत्य भवेत् । अतो मूलं बीजं च वृक्षस्य रोहकारणमित्यर्थः ।

मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥ ६ ॥

अतो हेतोः पृच्छामि कस्मात्प्ररोहति ॥ ६ ॥

ननु यस्तु मृत्युहतः स हत एवान्य एव कश्चिज्जायतेऽतो वृक्णस्य पुनर्जन्महेतुप्रश्नोऽनुपपन्न इत्याह—

जात एव न जायते को न्वेनं जनयेत्पुनः ।

यदि नष्टस्य पुनर्जननं न स्यात्तर्हि कृतहान्यकृताभ्यागमप्रसङ्गः । अतो मृतस्य पुनर्जननं सिद्धम् । अतो वः पृच्छामि को न्वेनं पुनर्जनयेदिति । जगतोऽतो मूलं किमिति प्रश्नार्थः । अतो जगतो मूलं ब्राह्मणैर्न ज्ञातम् । अतो याज्ञवल्क्येन ब्राह्मणा जिताः । समाप्ताऽऽख्यायिका ।

यज्जगतो मूलं याज्ञवल्क्येन पृष्टं तच्छ्रुतिः स्वयमेवाऽऽह—

विज्ञानमानन्दं ब्रह्म रातिर्दातुः परा-
यणं तिष्ठमानस्य तद्विद इति ॥ ७ ॥

इति बृहदारण्यकोपनिषदि तृतीयाध्याये
नवमं ब्राह्मणम् ॥ ९ ॥

इति बृहदारण्यकोपनिषदि तृतीयोऽध्यायः ॥ ३ ॥

रातिः षष्ठ्यर्थे प्रथमा धनस्येत्यर्थः । धनस्य दातुः कर्मकृतो यजमानस्य परायणं परमा गतिः । तिष्ठमानस्य ब्रह्मसंस्थस्य तद्विदो ब्रह्मविदः परायणं परं प्राप्यं विज्ञानानन्दरूपं ब्रह्मेत्यर्थः ॥ ७ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां तृतीयाध्यायस्य
नवमं ब्राह्मणम् ॥ ९ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां तृतीयोऽध्यायः ॥ ३ ॥

ॐ जनको ह वैदेह आसांचक्रे ।

दर्शनकामेभ्यो दर्शनं दातुं वैदेहो जनकः समायामासांचक्रे स्थित इत्यर्थः ।

अथ याज्ञवल्क्य आवव्राज ।

अस्मिन्नवसरे याज्ञवल्क्य आगतः ।

तꣳ होवाच याज्ञवल्क्य किमर्थ-
मचारीः पशूनिच्छन्नण्वन्तानिति ।

किमर्थमागतोऽसि किं पुनरपि पशूनिच्छन्नाहोस्विदण्वन्तानिति । अन्तो निश्चयः । सूक्ष्मस्य वस्तुनः प्रत्यगात्मादेरन्तान्निश्चयान्कर्तुमित्यर्थः ।

उभयमेव सम्राडिति होवाच ॥ १ ॥

सम्राट्सार्वभौमः ॥ १ ॥

यत्ते कश्चिदब्रवीत्तच्छृणवामेति ।

यत्ते तुभ्यं कश्चिदाचार्योऽब्रवीदनेकाचार्यसेवी हि भवांस्तच्छृणवाम श्रुत्वोपदेष्टव्यांशमुपदेक्ष्यामीति भावः ।

जनक आह—

अब्रवीन्मे जित्वा शैलिनिर्वाग्वै ब्रह्मेति ।

नामतो जित्वा शिलिनस्यापत्यं शैलिनिः । वागेव ब्रह्मेति ब्रह्मप्रतीकतया वागुपास्येति स उक्तवानित्यर्थः ।

इतर आह—

यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा त-
च्छैलिनिरब्रवीद्वाग्वै ब्रह्मेत्यवदतो हि किꣳ
स्यादित्यब्रवीत्तु ते तस्याऽऽयतनं प्रतिष्ठाम् ।

माता यस्य विद्यतेऽनुशासनकर्तृकतया स मातृमान् । पिता यस्य तथा विद्यते स पितृमान् । आचार्यो यस्य तथा विद्यते स आचार्यवान् । उपनयनात्प्राङ्मातापितरावनुशिष्टः । ऊर्ध्वमाचार्योऽनुशास्ति । मात्रा पित्राऽऽचार्येणानुशिष्टो यथाऽब्रवीत्तथा शैलिनिरुक्तवान् । वाग्वै ब्रह्मेति सम्यगुक्तवानित्यर्थः । तत्रोपपत्तिमाह—अवदतो हि किꣳ स्यादिति । न हि मूकस्यैहिकमामुष्मिकं वा किंचित्सिध्येत्तस्माद्युक्तमुक्तं वाग्वै ब्रह्मेति । परं तु तस्याऽऽयतनं प्रतिष्ठां किमब्रवीत् । आयतनं शरीरम् । प्रतिष्ठा त्रिष्वपि कालेष्वाश्रयः । एतद्द्वयमपि शैलिनिः किमुक्तवानित्यर्थः ।

जनक आह—

न मेऽब्रवीदिति ।

इतर आह—

एकपाद्वा एतत्सम्राडिति ।

एकः पादो यस्य तदेकपात् । एतद्ब्रह्म वाग्रूपं ब्रह्मोपास्यमानमपि त्रिभिः पादैः शून्यं न फलाय भवतीत्यर्थः ।

स वै नो ब्रूहि याज्ञवल्क्य ।

स त्वं विद्वान्नोऽस्मभ्यं ब्रूहि ।

स चाऽऽह—

वागेवाऽऽयतनमाकाशः प्रतिष्ठा प्रज्ञेत्येतदुपासीत ।

वागधिष्ठात्र्यां देवतायामध्यस्यमानस्य ब्रह्मणो वागेवाऽऽयतनं शरीरमव्याकृत आकाशः प्रतिष्ठा परमव्योम वा प्रतिष्ठा कालत्रयेऽप्याश्रयः । एतद्ब्रह्म प्रज्ञेत्युपासीत ।

पृच्छति—

का प्रज्ञता याज्ञवल्क्येति ।

अयमभिप्रायः—यथा प्रतिष्ठांशो वाचोऽभिन्न एवं प्रज्ञाऽपि वाचोऽभिन्नेति प्रश्नः ।

प्रज्ञाऽपि वाचोऽभिन्नेत्युत्तरमाह—

वागेव सम्राडिति होवाच । वाचा वै सम्राड् बन्धुः प्रज्ञायते ।

अयं बन्धुरिति वाचैव हि प्रज्ञायते ।

ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्टꣳ हुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतानि वाचैव सम्राट्प्रज्ञायन्ते वाग्वै सम्राट्परमं ब्रह्म ।

इष्टं यागनिमित्तं धर्मजातम् । हुतं होमनिमित्तं धर्मजातम् । आशितमन्नदाननिमित्तकम् । पायितं पानीयदाननिमित्तकम् । एतत्सर्वं वाचैव प्रज्ञायते । अतो वाग्देवतायां ब्रह्मोपासनं कर्तव्यमित्यर्थः ।

तदुपासनायाः फलमाह—

नैनं वाग्जहाति सर्वाण्येनं भूतान्यभिरक्षन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते ।

एनं ब्रह्मविदमधीता ब्रह्मविद्या न जहाति । विद्याया विस्मरणं नास्तीति यावत् । यथा वत्साय गावोऽभिरक्षन्ति एवं बलिदानादिभिः सर्वाणि भूतान्यभिरक्षन्ति स्निह्यन्तीत्यर्थः । देवो भूत्वोपास्यमानवागधिष्ठातृदेवो भूत्वा देवतासायुज्यं प्राप्येति यावत् । देवानप्येति । आजानसिद्धदेवतान्तर्गतो भवतीत्यर्थः ।

हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः ।

हस्तितुल्य ऋषभो यस्मिन्गोसहस्रे तत्तथा । ऋषभयुक्तं गोसहस्रमुपदिष्टविद्याया दक्षिणात्वेन ददामीति जनक उक्तवानित्यर्थः ।

स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ २ ॥

शिष्यं सम्यगननुशिष्य ततः किंचिदपि द्रव्यं न हरेतेति पिताऽमन्यत बोधितवानिति यावत् । अतः सम्यगनुशिष्य हरिष्यामि न ततः प्रागित्यर्थः । एवमुत्तरत्रापि ॥ २ ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्म उदङ्कः शौल्बायनः ।

नामत उदङ्कः शुल्बस्यापत्यं शौल्बायनः । नडादित्वात्फक् ।

प्राणो वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा शौल्बायनोऽब्रवीत्प्राणो वै ब्रह्मेत्यप्राणतो हि किꣳ स्यादित्यब्रवीत्तु ते तस्याऽऽयतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य प्राण एवाऽऽयतनमाकाशः प्रतिष्ठा प्रियमित्येतदुपासीत का प्रियता याज्ञवल्क्य प्राण एव सम्राडिति होवाच ।

पूर्ववदर्थः ।

प्राणस्य प्रियत्वमेवोपपादयति—

प्राणस्य वै सम्राट्कामायायाज्यं याजयत्यप्रतिगृ-
ह्यस्य प्रतिगृह्णात्यपि तत्र वधाशङ्कं भवति
यां दिशमेति प्राणस्य वै सम्राट्कामाय प्राणो
वै सम्राट्परमं ब्रह्म नैनं प्राणो जहाति सर्वा-
ण्येनं भूतान्यभिरक्षन्ति देवो भूत्वा देवानप्येति य
एवं विद्वानेतदुपास्ते हस्त्यृषभं सहस्रं ददामीति
होवाच जनको ह वैदेहः स होवाच याज्ञवल्क्यः
पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ३ ॥

प्राणाशयाऽयाज्यमपि याजयति अप्रतिगृह्यमपि प्रतिगृह्णाति । अप्रति-
गृह्यमित्यत्र प्रत्यपिभ्यां ग्रहेश्छन्दसीति क्यप् । यत्र वधाशङ्कं भवति
वधस्याऽऽशङ्का यस्माच्चौरव्याघ्रादि तद्यत्र वर्तते तत्रापि प्राणस्य
कामाय याति ततः प्राणस्य प्रियत्वात्स एव परं ब्रह्मेत्यर्थः ॥ ३ ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे बर्कुर्वार्ष्ण-
श्चक्षुर्वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रू-
यात्तथा तद्वार्ष्णोऽब्रवीच्चक्षुर्वै ब्रह्मेत्यपश्यतो हि किं
स्यादित्यब्रवीत्तु ते तस्याऽऽयतनं प्रतिष्ठां न मेऽब्र-
वीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञ-
वल्क्य चक्षुरेवाऽऽयतनमाकाशः प्रतिष्ठा सत्यमित्ये-
तदुपासीत का सत्यता याज्ञवल्क्य चक्षुरेव सम्रा-
डिति होवाच चक्षुषा वै सम्राट्पश्यन्तमाहुरद्राक्षी-
रिति स आहाद्राक्षमिति तत्सत्यं भवति चक्षुर्वै
सम्राट् परमं ब्रह्म नैनं चक्षुर्जहाति सर्वाण्येनं
भूतान्यभिरक्षन्ति देवो भूत्वा देवानप्येति य एवं
विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच

जनको ह वैदेहः स होवाच याज्ञवल्क्यः
पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ४ ॥

नामतो बर्कुः । वृष्णस्यापत्यं वार्ष्णः । चक्षुषा दृष्टे यथा सत्यत्वाध्यवसायस्तथा मानान्तरावगते न भवतीत्यर्थः । शिष्टं स्पष्टम् ॥ ४ ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्य-
ब्रवीन्मे गर्दभीविपीतो भारद्वाजः ।

गोत्रतो भारद्वाजः । नाम्ना गर्दभीविपीत इत्यर्थः ।

श्रोत्रं वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूया-
त्तथा तद्भारद्वाजोऽब्रवीच्छ्रोत्रं वै ब्रह्मेत्यशृण्वतो हि
किꣳ स्यादित्यब्रवीत्तु ते तस्याऽऽयतनं प्रतिष्ठां न
मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि
याज्ञवल्क्य श्रोत्रमेवाऽऽयतनमाकाशः प्रतिष्ठाऽनन्त
इत्येतदुपासीत काऽनन्तता याज्ञवल्क्य दिश एव
सम्राडिति होवाच तस्माद्वै सम्राडपि यां कां
च दिशं गच्छति नैवास्या अन्तं गच्छत्य-
नन्ता हि दिशो दिशो वै सम्राट्श्रोत्रꣳ श्रोत्रं
वै सम्राट्परमं ब्रह्म नैनꣳ श्रोत्रं जहाति सर्वाण्येनं
भूतान्यभिरक्षन्ति देवो भूत्वा देवानप्येति य एवं
विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति
होवाच जनको ह वैदेहः स होवाच याज्ञवल्क्यः
पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ५ ॥

'दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्' इति श्रुतेर्दिक्श्रोत्रयोरैक्यमित्यर्थः ॥ ५ ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे सत्यकामो
जाबालो मनो वै ब्रह्मेति यथा मातृमान्पितृमाना-

चार्यवान्ब्रूयात्तथा जाबालोऽब्रवीन्मनो वै ब्रह्मेत्यमनसो हि किंꣳ स्यादित्यब्रवीत्तु ते तस्याऽऽयतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति होवाच स नो ब्रूहि याज्ञवल्क्य मन एवाऽऽयतनमाकाशः प्रतिष्ठाऽऽनन्द इत्येतदुपासीत काऽऽनन्दता याज्ञवल्क्य मन एव सम्राडिति होवाच मनसा वै सम्राट्स्त्रियमभिहार्यते तस्यां प्रतिरूपः पुत्रो जायते स आनन्दो मनो वै सम्राट्परमं ब्रह्म नैनं मनो जहाति सर्वाणि भूतान्यभिरक्षन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको ह वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ६ ॥

स्त्रियमभि स्त्रियं प्रति मनसा हार्यते स्त्रीसंभोगो मनआयत्त इति भावः । प्रतिरूपस्तुल्य इत्यर्थः । आनन्दहेतुत्वान्मनस आनन्दत्वमिति भावः । शिष्टं स्पष्टम् ॥ ६ ॥

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे विदग्धः शाकल्यो हृदयं वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तच्छाकल्योऽब्रवीद्धृदयं वै ब्रह्मेत्यहृदयस्य हि किंꣳ स्यादित्यब्रवीत्तु ते तस्याऽऽयतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य हृदयमेवाऽऽयतनमाकाशः प्रतिष्ठा स्थितिरित्येतदुपासीत का स्थितता याज्ञवल्क्य हृदयमेव सम्राडिति होवाच हृदयं वै सम्राट् सर्वेषां भूतानामायतनꣳ हृदयं वै सर्वेषां भूतानां प्रतिष्ठा हृदये ह्येव सम्राट्सर्वाणि भूतानि प्रतिष्ठि-

तानि भवन्ति हृदयं वै सम्राट्परमं ब्रह्म नैनं हृदयं जहाति सर्वाण्येनं भूतान्यभिरक्षन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥

इति बृहदारण्यकोपनिषदि चतुर्थाध्याये
प्रथमं ब्राह्मणम् ॥ १ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां चतुर्थाध्याये
प्रथमं ब्राह्मणम् ॥ १ ॥

जनको ह वैदेहः कूर्चादुपावसर्पन्नुवाच ।

जनकस्तु याज्ञवल्क्यस्य ज्ञानवैशद्यं दृष्ट्वा कूर्चादासनविशेषादुत्थाय ल्यब्लोपे पञ्चमी उपावसर्पन्नुपावसीदन्नाचार्यमुवाच ।

नमस्तेऽस्तु याज्ञवल्क्यानु मा शाधीति ।

हे याज्ञवल्क्य तुभ्यं नमोऽस्तु शिष्यं मामनुशाधीति ।

स होवाच यथा वै सम्राण्महान्तमध्वानमेष्यन्रथं वा नावं वा समाददीतैवमेवैताभिरुपनिषद्भिः समाहितात्माऽसि ।

हे सम्राड्यथा महान्तं भौमं सामुद्रं वाऽध्वानमेष्यन्रथं वा नावं वा समाददीतैवं तत्तदाचार्योपदिष्टाभिर्देवताभिरुपनिषद्भिरत्यन्तं समाहितात्माऽसि संपन्नपरलोकसाधनोऽसि ।

एवं वृन्दारक आढ्यः सन्नधीतवेद उक्तोपनिषत्क इतो विमुच्यमानः क्व गमिष्यसीति ।

वृन्दारको राजत्वेन पूज्यमानो धनाढ्यश्च गुरुभिरुक्तोपनिषत्कश्चासीत्येवं सर्वपुरुषार्थसंपत्तिमांस्त्वमितोऽस्माच्छरीराद्विमुच्यमान उत्क्रामन्कस्मिन्मार्गे गमिष्यसीति ।

एवं ब्रह्मविद् उत्क्रामतो गतौ पृष्टायामितर आह—

नाहं तद्भगवन्वेद यत्र गमिष्यामीति ।

याज्ञवल्क्य आह—

अथ वै तेऽहं तद्वक्ष्यामि यत्र गमिष्यसीति ।

यस्मिन्वर्त्मनि गमिष्यसि तद्वक्ष्यामीत्यर्थः ।

इतर आह—

ब्रवीतु मे भगवानिति ॥ १ ॥

यद्यनुजिघृक्षाऽस्तीति शेषः । अत्रोपकोसलविद्यावद्गतिप्रश्नो गन्तव्यब्रह्मणोऽप्युपलक्षकः । अत एव तद्वदत्रापि द्वयोरप्युत्तरप्रतिवचनमुपपद्यत इति द्रष्टव्यम् ॥ १ ॥

इन्धो ह वै नामैष योऽयं दक्षिणेऽक्षन्पुरुषस्तं वा
एतमिन्धꣳ सन्तमिन्द्र इत्याचक्षते परोक्षेणैव
परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः ॥ २ ॥

योऽयं दक्षिणाक्षिस्थः स इन्धो नामेन्धति प्रसिद्ध इत्यर्थः । एवमिन्धं सन्तमिन्द्र इति परोक्षेण वदन्ति । देवा हि गोपनीयमर्थं पर्यायोक्तेन वदन्ति न तु स्पष्टतया यस्माद्धि देवाः प्रत्यक्षेण ग्रहणे द्विषन्ति पर्यायात्मग्रहणे प्रीतिमन्तोऽत इन्द्र इति वदन्तीत्यर्थः । 'य एष एतस्मिन्मण्डले पुरुषः' 'यश्चायं दक्षिणेऽक्षन्' इति दक्षिणाक्षिस्थितस्याऽऽदित्यान्तरवस्थितस्य चैक्यश्रवणादादित्यान्तरवस्थितस्य पुण्डरीकाक्षत्वादिन्द्रं निश्चिक्युः । परमे व्योमन्' 'इन्द्रो मायाभिः' इत्यादिषु परमपुरुषस्येन्द्रशब्दवाच्यत्वप्रसिद्धेश्च नारायण एवात्र दक्षिणाक्षिस्थितपुरुष इति द्रष्टव्यम् ।

अथैतद्वामेऽक्षणि पुरुषरूपमेषाऽस्य पत्नी विराट् ।

पुरुषरूपं मनुष्याकारमित्यर्थः । इन्द्रस्य पत्नी विराड्वामाक्षिस्था मनुष्याकारा तत्पत्नी साक्षाल्लक्ष्मीरेव । तैत्तिरीयके विराड्बृहती श्रीरसीन्द्रपत्नी धर्मपत्नीतीन्द्रपत्न्याः श्रीशब्दवाच्यत्वावगमात् ।

तयोरेष संस्तावो य एषोऽन्तर्हृदय आकाशः ।

तयोर्दंपत्योरेष वक्ष्यमाणः संस्ताव एकान्तसंभोगभूमी (मिः ।)

अधिकरणे घञ् । एष हृदयकमलमध्य आकाश इत्यर्थः । एतत्सर्वं ज्योतिरधिकरणे व्यासार्यैरुक्तम् ।

अथैनयोरेतदन्नम् ।

भोग्यं प्रसादस्थानीयम् ।

य एषोऽन्तर्हृदये लोहितपिण्डः ।

कमलकर्णिकाकारो मांसपिण्डः ।

अथैनयोरेतत्प्रावरणं यदेतदन्तर्हृदये जालकमिव ।

अनयोर्दंपत्योरेतदेव प्रावरणं यद्धृदयो लूताजालवद्वक्ष्यमाणहितनामकनाडीनिचयसंपन्नं जालकं तदेव पट्टवस्त्रमनयोरित्यर्थः ।

अथैनयोरेषा स्मृतिः संचरणी यैषा हृदयादूर्ध्वा नाड्युच्चरति ।

एतस्माद्धृदयादूर्ध्ववर्तिनी या नाड्युच्चरति यैषा ब्रह्मलोकसौधगतदंपतिप्राप्तिहेतुभूता संचरणी सृतिर्निरवग्रहमार्ग इत्यर्थः ।

यथा केशः सहस्रधा भिन्न एवमस्यैता हिता नाम नाड्योऽन्तर्हृदये प्रतिष्ठिता भवन्त्येताभिर्वा एतदास्रवति।

हृदयान्तःप्रतिष्ठितकेशसहस्रशोऽतिसूक्ष्महितनामकनाडीभिरेतज्जीवजातमास्रवति । आ समन्तात्स्रवति संसरति एतद्भूतजातमास्रवति संसरतीत्यर्थः ।

तस्मादेष प्रविविक्ताहारतर इवैव भवत्यस्माच्छारीरादात्मनः॥३॥

यस्माद्धेतोर्दक्षिणाक्षिस्थः पुरुषो विग्रहगुणादिभिर्दीप्यमानतयेन्धो भवति तस्मादेवास्माच्छरीरभूताज्जीवात्मनो दक्षिणाक्षिस्थ एष पुरुषः प्रविविक्ताहारतर इवैव भवति । अतिप्रकृष्टान्नवदमृतवदिति यावत् । तद्भोग्यो भवतीत्यर्थः । अत्रैषा सृतिः संचरणीत्युक्त्या गमनमार्ग उक्तो भवति ॥ ३ ॥

दक्षिणाक्षिस्थस्य प्रकृतस्य पुरुषोत्तमस्य प्रकारान्तरेणापि शरीरगतजीववैलक्षण्यं द्रढयति—

तस्य प्राची दिक्प्राञ्चः प्राणा दक्षिणा दिग्दक्षिणे प्राणाः प्रतीची दिक्प्रत्यञ्चः प्राणा उदीची दिगु-

दञ्चः प्राणा ऊर्ध्वा दिगूर्ध्वाः प्राणा अवाची दिग-
वाञ्चः प्राणाः सर्वा दिशः सर्वे प्राणाः ।

जीवस्तु सर्वासु दिक्षु प्राणेन्द्रियप्रचुरः प्राणेन्द्रियोपकरणीति यावत् ।

एवं जीवस्य रूपमुक्त्वैतद्वैलक्षण्यमाह—

स एष नेति नेतीत्यात्माऽगृह्यो न हि गृह्य-
तेऽशीर्यो न हि शीर्यतेऽसङ्गो न हि सज्ज-
तेऽसितो न व्यथते न रिष्यत्यभयं वै
जनक प्राप्तोऽसीति होवाच याज्ञवल्क्यः ।

स एष दक्षिणाक्षिस्थितः पुरुष इन्द्रियाद्यग्राह्यत्वविशरणशून्यत्वनिर्लेपत्वशोकमृत्युरहितत्ववान्नेति नेतीति श्रुतिष्वितरविलक्षणत्वेन निर्दिष्ट आत्मेत्यर्थः । तादृशमुपास्स्वाभयं परमात्मानं प्राप्तोऽसि प्राप्तवानसि उपासनोपकरणवत्त्वात् । प्राप्तोऽसीति ‘ आशंसायां भूतवच्च ’ [पा० सू० ३ । ३ । १३२] इति क्तप्रत्ययः । इति याज्ञवल्क्यो जनकमुवाचेत्यर्थः ।

स होवाच जनको ह वैदेहोऽभयं त्वा गच्छ-
ताद्याज्ञवल्क्य यो नो भगवन्नभयं वेदयसे
नमस्तेऽस्त्विमे विदेहा अयमहमस्मि ॥ ४ ॥

इति बृहदारण्यकोपनिषदि चतुर्थाध्याये द्वितीयं
ब्राह्मणम् ॥ २ ॥

हे याज्ञवल्क्य त्वदुक्तमभयमागच्छतात् । आशिषि तातङ् । ब्रह्मप्राप्तिर्भूयादित्यर्थः । यस्त्वं नोऽभयं वेदयसेऽभयं लम्भयसे तादृशाय परमात्मप्रापकाय तुभ्यं नमोऽस्तु इमे विदेहा दक्षिणात्वेन समर्पितास्तद्देशाधिपतिरहमपि दासोऽस्मीत्यर्थः ॥ ४ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां चतुर्थाध्यायस्य
द्वितीयं ब्राह्मणम् ॥ २ ॥

जनकꣳ ह वैदेहं याज्ञवल्क्यो जगाम ।

योगक्षेमार्थमीश्वरमभिगच्छेदिति स्मृत्यनुसारेण कदाचिज्जनकसमीपं याज्ञवल्क्यो गतः ।

स मेऽनेन वदिष्य इति ।

याज्ञवल्क्यो गच्छन्नेव मेने चिन्तितवान्किंचिदप्यध्यात्मविषये न वक्ष्यामीति ।

एवं कृतसंकल्पोऽपि याज्ञवल्क्यो जनकेन पृष्टं सर्वं वक्तुमुपचक्रम इत्याख्यायिकामाचष्टे—

अथ ह यज्जनकश्च वैदेहो याज्ञवल्क्यश्चाग्निहोत्रे समूदाते ।

अग्निहोत्रविषये संवादं कृतवन्तावित्यर्थः ।

तस्मै ह याज्ञवल्क्यो वरं ददौ ।

जनकस्य कर्मविषयकं विज्ञानवैशद्यमुपलभ्य परितुष्टो याज्ञवल्क्यस्तस्मै वरं ददौ ।

स ह कामप्रश्नमेव वव्रे ।

स जनकोऽपेक्षितांशप्रश्नमेव वरं कृतवान् ।

तꣳ हास्मै ददौ ।

तं च वरं याज्ञवल्क्यस्तस्मै ददौ ।

तꣳ ह सम्राडेव पूर्वः पप्रच्छ ॥ १ ॥

तेन वरप्रदानसामर्थ्येनानाचिख्यासुमपि याज्ञवल्क्यं तूष्णीं स्थितमपि सम्राडेव जनकः पूर्वः पप्रच्छ ॥ १ ॥

याज्ञवल्क्य किंज्योतिरयं पुरुष इति ।

किंज्योतिरिति बहुव्रीहिः । अस्य पुरुषस्याऽऽसनगमनकर्मनिवृत्त्यादिसाधनभूतं ज्योतिः किमिति प्रश्नार्थः ।

उत्तरमाह—

आदित्यज्योतिः सम्राडिति होवाच ।

अयं पुरुष आदित्यज्योतिरिति होवाच । आदित्यो ज्योतिर्यस्य स तथोक्तः ।

आदित्येनैवायं ज्योतिषाऽऽस्ते पल्य-
यते कर्म कुरुते विपल्येतीति ।

'उपसर्गस्यायतौ' [पा० सू० ८।२।१९] इति लत्वम् । इतस्ततो गमनं करोति लौकिकं वैदिकं वा कर्म कुरुते यथायथं विपल्येति । प्रतिनिवर्त्याऽऽगच्छतीति यावत् ।

उक्तमङ्गीकृत्यान्यत्पृच्छति—

एवमेवैतद्याज्ञवल्क्य ॥ २ ॥

अस्तमित आदित्ये याज्ञवल्क्य किंज्योतिरेवायं पुरुष इति चन्द्रमा एवास्य ज्योतिर्भवतीति चन्द्रमसैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेव याज्ञवल्क्य ॥ ३ ॥

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्त-
मिते किंज्योतिरेवायं पुरुष इत्यग्निरेवास्य ज्यो-
तिर्भवतीत्यग्निनैवायं ज्योतिषाऽऽस्ते पल्ययते
कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ ४ ॥

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्त-
मिते शान्तेऽग्नौ किंज्योतिरेवायं पुरुष इति
वागेवास्य ज्योतिर्भवतीति वाचैवायं ज्योति-
षाऽऽस्ते पल्ययते कर्म कुरुते विपल्येतीति ।

अत्र वागित्यनेन शब्द उच्यते ।

वाचो ज्योतिष्ट्वमुपपादयति—

तस्माद्वै सम्राडपि यत्र स्वः पाणिर्न विनिर्ज्ञायतेऽथ यत्र
वागुच्चरत्युपैव तत्र न्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ ५ ॥

यस्मिन्मेघान्धकारान्तरितायां तमिस्रायामात्मीयोऽपि पाणिर्न विज्ञायतेऽथापि तस्मिन्काले यत्र देवदत्तस्य वा यज्ञदत्तस्य वाऽहमत्र तिष्ठा-

मीति शब्दो निर्गच्छति तत्र तदाऽत्रासौ वर्तत इति ज्ञात्वोपन्येत्येव समीपे नितरामेति गच्छतीत्यर्थः । ततश्च शब्दद्वारा श्रोत्रं प्रकाशकं भवतीत्यर्थः ॥ ५ ॥

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्य-
स्तमिते शान्तेऽग्नौ शान्तायां वाचि किंज्यो-
तिरेवायं पुरुष इत्यात्मैवास्य ज्योतिर्भवत्या-
त्मनैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म
कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य[1] ॥ ६ ॥

स्वप्ने बाह्येन्द्रियाणामुपरतत्वादादित्यादिप्रकाशाभावाच्चाऽऽत्मैव स्थितिगमनादिहेतुभूतः प्रकाशको भवतीत्यर्थः ॥ ६ ॥

आत्मैवास्य ज्योतिरित्यत्राऽऽत्मज्योतिःशब्दाभ्यां निर्दिश्यमानं पुरुषस्वरूपं किमिति पृच्छति—

कमत आत्मेति ।

हृत्कमलमध्यगतप्राणशब्दितेन्द्रियमध्यगो विज्ञानधर्मक इत्युत्तरमाह—

योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः ।

अत्र विज्ञानमय इति प्राचुर्यार्थमयटाऽऽत्मनो ज्ञानव्यतिरेक उक्तः । प्राणेष्विति सप्तमीनिर्देशादिन्द्रियव्यतिरेकोऽपि सिद्धः । अत्र ज्योतिःशब्दादात्मनो विज्ञानमयत्वोक्त्या धर्मभूतज्ञानद्वारा भासकत्वमादित्यादीनामिव प्रभाद्वारा ज्योतिष्ट्वमिति भावः ।

स समानः सन्नुभौ लोकावनुसं-
चरति ध्यायतीव लेलायतीव ।

परमात्मायत्तकर्तृत्वोऽपि जीवः ' अहंकारविमूढात्मा कर्ताऽहमिति मन्यते ' [गी० ३ । २७] इत्युक्तरीत्या समानः सन्स्वातन्त्र्याभिमानयुक्तः सन्गोपुरधारीव ध्यायतीव लेलायतीव स्वतन्त्रः कर्तेवोभौ लोकौ संचरतीत्यर्थः । लेलायति चरतीवेत्यनेन कर्तृत्वं परमात्मायत्तमौपाधिकं

१ एवमेवैतद्याज्ञवल्क्य इति अत्रत्यमुद्रितपुस्तके नास्ति ।

चेत्यपि विदर्शितम् । न चात्र ध्यायतीव लेलायतीवेतीवशब्दप्रयोगात्कर्तृत्वमात्मनो नास्तीत्यभ्युपगन्तव्यमिति वाच्यम् । 'कर्ता शास्त्रार्थवत्त्वात्' । इत्यधिकरणे सांख्याभिमतमकर्तृत्वमात्मनः पूर्वपक्षीकृत्य कर्तृत्वस्य परैः सिद्धान्तितत्वात् । वस्तुस्थितौ चिन्त्यमानायामचेतनत्वात्कूटस्थत्वाच्च नान्तःकरणस्य वाचि(ऽऽत्म)नो वा कर्तृत्वमित्यभ्युपगमस्य परस्परावेशेन परस्परधर्माध्यास इत्यभ्युपगमस्य परेषां सांख्यानां च सांख्येन (साम्येन) सांख्यपक्षात्परपक्षे वैषम्याभावेन कर्ता शास्त्रार्थवत्त्वादित्यधिकरणविरोधस्य परपक्षे दुर्निरसत्वात् । दृश्यते त्वग्र्यया बुद्ध्या' 'मनसा तु विशुद्धेन ध्यायन्तो मनसैव तम् । इति करणत्वेन प्रतिपन्नस्य मनसः कर्तृत्वम् । 'यो वेदेदं जिघ्राणीति स आत्मा' [छा० ८ । १२ । ४] एष हि द्रष्टा श्रोता कर्ता बोद्धा विज्ञानात्मा पुरुषः' [प्र० ६ । ९] 'विज्ञातारमरे केन विजानीयात्' [बृ० २ । ४ । १४] 'जानात्येवायं पुरुषः' इति कर्तृत्वेन प्रतिपन्नस्याकर्तृत्वमित्युक्तेरयुक्तत्वाद्विज्ञानशब्दिताया बुद्धेः कर्तृत्वे करणान्तराभ्युपगमप्रसङ्गात्प्रकृतिविवेकलक्षणसमाधौ प्रकृतेः कर्तृत्वासंभवेन आत्मन एव कर्तृत्वमास्थेयमिति शक्तिविपर्ययात्' । समाध्यभावाच्च [ब्र० सू० २ । ३ । ३८ । ३९] इति सूत्रयोः स्वयमेवोक्तत्वाच्च । कर्तृत्वादिबन्धस्याऽऽत्मगतत्वाभावे बन्धमोक्षयोर्वैयधिकरण्यप्रसङ्गात् । न च कर्तृत्वाद्यनर्थाश्रयान्तःकरणतादात्म्याध्यासाधिष्ठानभावलक्षणो वा 'अविद्यास्तमयो मोक्षः सा संसार उदाहृतः' इत्युक्तरीत्या तदध्यासहेत्वविद्यालक्षणबन्धो वाऽऽत्मगतः संभवतीति वाच्यम् । तदधीनत्वादर्थवत्' [ब्र० सू० १ । ४ । ३] इति सूत्रेऽविद्यात्मिका हि सा बीजशक्तिरव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुषुप्तिर्यस्यां स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवाः । तदेतदव्यक्तं क्वचिदाकाशशब्दनिर्दिष्टम् । 'एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च' [बृ० ३ । ८ । ११] इति श्रुतेः । क्वचिदक्षरशब्दोदितम् । 'अक्षरात्परतः परः' [मु०२।१।२] इति श्रुतेः । क्वचिन्मायेति निर्दिष्टं मायां तु प्रकृतिं विद्यात् [श्वे० ४ । १०] इति मन्त्रवर्णात् । इति शांकरभाष्ये परमेश्वराश्रिताया एवाविद्यायाः प्रतिपादनेन तन्मते जीवचैतन्ये संसारासंभवात् । न च वाचस्पतिना परमेश्वराश्रयेत्यत्र परमेश्वरं विषयत्वेनाऽऽश्रयतीति परमेश्वराश्रया परमेश्वरविषयेत्यर्थः । विद्यास्वरूपस्य परमात्मनोऽविद्याश्रयत्वासंभवात् । यस्यां स्वरूपप्रतिबोधरहिताः शेरत

इत्यत्रापि यस्यामविद्यायां सत्यां शेरते जीवा इत्येवार्थः । अतो जीवाश्रया एवाविद्याः । न चाविद्योपाधिभेदाधीनो जीवभेदो जीवभेदाधीनोऽविद्योपाधिभेद इति परस्पराश्रयादुभयासिद्धिरिति सांप्रतम् । बीजाङ्कुरन्यायेनानादित्वादुभयसिद्धिरिति अविद्यानां जीवाश्रितत्वमेव समर्थितमिति वाच्यम् । न च तस्या जीवाश्रयत्वं जीवशब्दवाच्यस्य कल्पितत्वादाविद्यकत्वाज्जीवशब्दवाच्यस्य जीवशब्दलक्षण्य(क्ष्यस्य)ब्रह्माव्यतिरेकेण ब्रह्माश्रयपक्षस्यैवाऽऽश्रितत्वादित्यानन्दगिरिप्रभृतिभिस्तस्य दूषिततयाऽऽश्रयत्वाभागिनी निर्विशेषचितिरेव केवला पूर्वसिद्धतमसो हि पश्चिमो नाऽऽश्रयो भवति गोचर इत्युक्तरीत्या चिन्मात्रस्यैव विद्याश्रयत्वेन जीवस्य बन्धाश्रयत्वासंभवात् । न च बन्धो मोक्षश्च न जीवाश्रितोऽपि तु ब्रह्माश्रित एवातः संभवत्येव बन्धमोक्षयोः सामानाधिकरण्यमिति वाच्यम् । अस्मिन्पक्षे मुमुक्षा नाम चिन्मात्राश्रितान्तःकरणतादात्म्याध्यासाधिष्ठानभावापादकाविद्यानिवृत्तिकामना वाच्या । तत्र चाविद्यैक्यपक्ष एकमुक्तौ सर्वमुक्तिप्रसङ्गः स्यात् । न च कस्यापि मुक्तिर्नास्तीति शक्यं वक्तुम् ।

शुकस्तु मारुताच्छीघ्रां गतिं कृत्वाऽन्तरिक्षगाम् ।
दर्शयित्वा प्रभावं स्वं सर्वभूतगतोऽभवत् ॥

'तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे' 'तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्' [बृ० १ । ४ । १०] इत्यादिप्रमाणविरोधप्रसङ्गात् । अविद्यानानात्वेऽभ्युपगन्तव्ये तत्र च चिन्मात्राश्रितसर्वाविद्याया एकविद्यानिवर्त्यत्व एकमुक्तौ सर्वमुक्तिप्रसङ्गदोषतादवस्थ्यात् । एकविद्यानिवृत्तिमात्राभ्युपगमे चाविद्यान्तराश्रयत्वस्य चिन्मात्रे पूर्वमिव स्थितत्वेनान्तःकरणतादात्म्याध्यासाधिष्ठानभावलक्षणसंसारानिवृत्तेस्तदवस्थत्वात् । नन्वहमिति भासमानेऽविद्यान्तःकरणोपाधिभेदभिन्ने चिदंशेऽविद्यानिवृत्तिरुद्देश्येति चेन्न । अविद्याया अन्तःकरणस्य वा दर्पणादिवत्प्रतिबिम्बेनोपाधित्वं संभवति । दर्पणाद्युपाधिप्रतिहतनायनरश्मिग्रा(गृ)ह्यमाणस्य बिम्बस्यैव प्रतिबिम्बतया चक्षुषाऽगृह्यमाणस्य चिदंशस्य प्रतिबिम्बत्वासंभवेन घटादिवदवच्छेदकतयोपाधित्वे वक्तव्येऽन्तःकरणस्य संचरत उपाधित्वेऽवच्छेद्यचैतन्यप्रदेशस्य भिन्नतया कृतहानाकृता-

भ्यागमप्रसङ्गेन व्यापिन्या एवाविद्याया अवच्छेदकतयोपाधित्वे वक्तव्ये सर्वस्याप्यविद्यान्तर्गताचित्प्रदेशस्य सर्वजीवाविद्यावृतत्वेनैकस्य ब्रह्मविद्ययैकाविद्यानाशेऽप्यविद्यान्तरायत्तसंसारतादवस्थ्यात् । अविद्यावच्छिन्नविकारप्रदेशेऽनवच्छिन्नस्य ब्रह्मणोऽवस्थानासंभवेन ब्रह्मणो विकारान्तरावस्थानप्रतिपादकान्तर्यामिब्राह्मणानां तस्य प्रसङ्गाच्च । अन्तर्यामिब्राह्मणस्य जीवविषयत्वाभावस्यान्तर्याम्यधिकरणसिद्धत्वात् । न हि घटानवच्छिन्नाकाशस्य घटान्तरवस्थितिः संभवति । 'अत्र ब्रह्म समश्नुते' इति तन्मतेऽत्रैव ब्रह्मभावावेदकश्रुतिव्याकोपश्च । अविद्यावच्छिन्नदेशेऽनवच्छिन्नब्रह्मभावासंभवात् । विकारान्तरवस्थितस्य गीताचार्यस्य कृष्णस्य जीवत्वमेव स्यात् । ततश्च चिदाश्रितसर्वाविद्यानिवृत्तिकामनारूपमुमुक्षाया असंभवादेकाविद्यानिवृत्तिमात्रेण संसारस्यानपायान्मुमुक्षोर्ब्रह्मविचारादिकं वा तादृशविवेकशालिता न स्यात् । अत एव न प्रतिबिम्बो नाप्यवच्छेदो जीवोऽपि तु कौन्तेयस्यैव राधेयत्ववद्ब्रह्मण एवाविकृतस्याविद्यया जीवभाव इति पक्षोऽपि व्युदस्तः । तथा सति नित्यमुक्तिश्रुतेर्निर्विषयत्वप्रसङ्गात् । पारमार्थिकशोकाभावाभिप्राया नित्यमुक्तत्वश्रुतिश्चेन्मोक्षे शोकाभावश्रुतेरपि पारमार्थिकशोकाभावविषयत्वप्रसङ्गात् । 'तद्यो यो देवानां प्रत्यबुद्धत स एव तदभवदित्यादीनां शुकादिमुक्तत्वप्रतिपादकानां ब्रह्मणो जगत्कर्तृत्वसार्वज्ञ्यनिरवद्यत्वावेदकानामप्रामाण्यप्रसङ्गात् । विवादगोचरापन्नं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकमिति ज्ञानस्याज्ञानसमानाधिकरणत्वस्य विवरणे प्रतिपादितत्वाज्जडस्याज्ञानाश्रयत्वे भ्रान्तिसम्यग्ज्ञानयोरपि तदाश्रयत्वप्रसङ्ग इति विवरणकृतोक्तत्वाच्च ज्ञात्राश्रितमेवाज्ञानं तदधीनमपि कर्तृत्वादिकमपि तथैव ततश्चाज्ञानस्य शुद्धजीवाश्रितत्वात्कर्तृत्वादिकमप्यज्ञानाश्रयशुद्धजीवाश्रितमेवेति सिद्धम् । ततश्च ध्यायतीवेतीवशब्दप्रयोगे परतन्त्रप्रभौ प्रभुरिवेत्युक्तिवत्परतन्त्रकर्तृत्वाश्रयत्वादिकशब्दप्रयोग उपपद्यत इत्येवाऽऽस्थेयम् । प्रकृतमनुसरामः—

स हि स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्यो रूपाणि ॥ ७ ॥

स हि जीवः स्वप्नावस्थो भूत्वा स्वप्ने व्याघ्रादिशरीरगो भूत्वेत्यर्थः । इमं लोकं परिदृश्यमानं जाग्रत्प्रपञ्चं मृत्योः संसारस्य रूपाणि दुःखरूपाणीति यावत् । तादृशानि मानुषादीनि शरीराणि अतिक्रामति न

पश्यतीति यावत् । ततश्च स्वप्ने जाग्रद्दशावर्तिदेहानुपलम्भाद्देहान्तरपरिग्रहदर्शनाच्च देहव्यतिरेकः प्रदर्शितो भवतीति द्रष्टव्यम् ॥ ७ ॥

एवं देहेन्द्रियमनःप्राणधीव्यतिरिक्तस्याऽऽत्मनः पाप्मसंबन्धोऽप्यौपाधिक एवेत्याह—

स वा अयं पुरुषो जायमानः शरीरमभि-
संपद्यमानः पाप्मभिः सꣳसृज्यते स उत्क्राम-
न्म्रियमाणः पाप्मनो विजहाति ॥ ८ ॥

आत्मनो नित्यस्य जायमानत्वाभावादाह—शरीरमभिसंपद्यमानः । शरीरमभिसंगच्छमानः शरीरसंबन्ध एव जननमिति भावः । संपद्यमान एव सर्वपाप्मभिः संसृज्यत इति शरीरसंबन्धोपाधिकः पापसंबन्धः स उत्क्रामन्म्रियमाणः पाप्मनो विजहाति । नित्यस्य म्रियमाणत्वाभावादाह—उत्क्रामन्निति । अत्रोत्क्रमणं च चरमोत्क्रमणं विवक्षितम् । पाप्मनो विजहातीति सर्वपापविधूननश्रवणादिति द्रष्टव्यम् ॥ ८ ॥

ननु स्वप्नो भूत्वेमं लोकमतिक्रामतीति शरीरव्यतिरेकप्रदर्शनमयुक्तम् । एतल्लोकपरलोकयोरेव शरीरपरिग्रहस्थानत्वात्स्वप्नस्यातथात्वादित्याशङ्कयाऽऽह—

तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने
भवत इदं च परलोकस्थानं च ।

अयं च परश्च लोक इति स्थानद्वयमतथाभूतम् ।

संध्यं तृतीयꣳ स्वप्नस्थानम् ।

संधौ भवं संध्यम् । स्वप्नरूपस्थानं तु स्थानद्वयानुभवयोग्यत्वात्संध्यं तृतीयं स्थानं भवति । जाग्रत्पुरुषस्त्विममेव लोकं पश्यति स्वप्नावस्थस्तु कदाचिदिमं लोकं पश्यति कदाचित्परलोकं स्वर्गनरकादिकं पश्यति । अतः स्थानद्वयदर्शनयोग्या विलक्षणेयं स्वप्नावस्थेत्यर्थः ।

अमुमेवार्थं प्रपञ्चयति—

तस्मिन्संध्ये स्थाने तिष्ठन्नेते उभे स्थाने
पश्यतीदं च परलोकस्थानं च ।

नन्वेतद्देहपरित्यागानन्तरभाविनः परलोकस्थानदर्शनस्य कथं स्वप्नावस्थपुरुषदृश्यत्वमित्यत्राऽऽह—

अथ यथाक्रमोऽयं परलोकस्थाने भवति तमाक्रममाक्रम्योभयान्पाप्मन आनन्दांश्च पश्यति ।

आक्रामत्यनेनेत्याक्रम आश्रयः पुण्यपापरूपः । यादृक्पुण्यपापरूपाक्रमविशिष्टः सन्परलोके सुखदुःखे अनुभवति । एवमेव पुण्यपापफललक्षणमाक्रममाक्रम्य स्वप्ने प्रतिकूलाननुकूलांश्चोभयविधान्पदार्थान्पश्यति । ततश्च स्वप्ने परिदृश्यमानमेतद्देहातिरिक्तदेहभोग्यं पुण्यपापार्जितं परलोकस्थानमेवेत्यर्थः ।

ननु स्वप्ने परलोकवत्पुण्यपापादिवशेन पदार्थसृष्टावात्मनः स्वप्ने स्वयंज्योतिष्ट्वं कुतोऽभ्युपगन्तव्यमिन्द्रियाणां प्रकाशकानां सर्वदा सत्त्वादित्याशङ्क्याऽऽह—

स यत्र प्रस्वपित्यस्य लोकस्य सर्वावतो
मात्रामपादाय स्वयं विहत्य स्वयं निर्माय
स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं
पुरुषः स्वयंज्योतिर्भवति ॥ ९ ॥

यदाऽयं स्वप्नमनुभवति तदा सर्वावतः सर्वतो भोग्यभोगोपकरणादिसर्वयुक्तस्य जगतो मात्रां मीयतेऽनेनेति मात्रा प्रकाशकेन्द्रियवर्गस्तमपादाय स्वयमेव तमिन्द्रियवर्गं विहत्य निश्चेष्टतामापाद्य निर्व्यापारं कारयित्वा स्वयं निर्माय । जीवस्य स्वप्नपदार्थनिर्मातृत्वमदृष्टद्वारा द्रष्टव्यम् । परैरपि तथोक्तत्वात् । प्रस्वपिति निद्रातीत्यर्थः । अत्रास्यां स्वप्नदशायां पुरुषः स्वयंज्योतिर्भवतीत्यर्थः । यद्यपि स्वप्नपदार्थमानं धर्मभूतज्ञानेनैव नाऽऽत्मज्योतिषाऽथाप्यादित्यादिप्रकाशकान्तरस्थानाभिषिक्त आत्मैवेति भावः । यद्यपि स्वप्नेऽप्यादित्यादिज्योतिःसृष्ट्यभ्युपगमान्न प्रकाशकान्तरव्यतिरेको वक्तुं शक्यस्तथाऽपि लोकप्रसिद्ध्यादिज्योतिरन्तराभावमुपेत्यैतदुक्तमिति द्रष्टव्यम् ॥ ९ ॥

नन्वात्मज्योतिषैवाऽऽस्ते कर्म कुरुत इत्यादिकं नोपपद्यत आसनगमनादिक्रियाया असत्त्वादित्याशङ्क्याऽऽह—

न तत्र रथा न रथयोगा न पन्थानो
भवन्त्यथ रथान्रथयोगान्पथः सृजते ।

युज्यन्त इति योगाः । रथयोगा अश्वादयः । रथाश्च मार्गाश्च

जाग्रद्दशानुभवयोग्ये न सन्ति तथाऽपि तत्तत्पुरुषकालमात्रानुभाव्यानर्थान्परमात्मा सृजते ।

न तत्राऽऽनन्दा मुदः प्रमुदो भवन्त्यथाऽऽनन्दान्मुदः प्रमुदः सृजते ।

अनुकूलदर्शनजन्या प्रीतिरानन्दः । स्वकीयत्वबुद्धिजा प्रीतिर्मुत् । विनियोगजा प्रीतिः प्रमुत् ।

न तत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्त्यथ वेशान्तान्पुष्करिणीः स्रवन्तीः सृजते स हि कर्ता ॥ १० ॥

वेशान्ताः पल्वलानि । वेशान्ता इति दीर्घश्छान्दसः । पुष्करिण्यो वाप्यः । स्रवन्त्यो नद्यः । पुष्करिणीः स्रवन्तीश्च सृजत इत्यर्थः । स्रवन्त्यः सृजत इति 'वा छन्दसीति पूर्वसवर्णदीर्घाभावः । ननु स्वप्नदृग्यस्मिन्देशे यदा रथं पश्यति तदानीं तत्र स्थितोऽन्यस्तं न पश्यति स्वप्नदृगपि बोधनानन्तरं तत्र गतस्तं न पश्यति तत्र तस्यान्यत्र नयनचिह्नानि वा नाशचिह्नानि वा नोपलभ्यन्तेऽतः कथमीदृशी स्वप्नार्थसृष्टिरुपपद्यतामित्यत्राऽऽह—स हि वा कर्तेति । सकलप्रपञ्चनाटकसूत्रधारः सर्वेश्वरः खलु तत्र कर्ता स किं वा कर्तुं न शक्नुयादिति हिशब्दाभिप्रायः।न च स हीत्यनेन स यत्र प्रस्वपितीति प्राक्प्रस्तुतो जीव एव परामृश्यतामिति वाच्यम् । संध्याधिकरणे तस्य निरस्तत्वात् । तथा हि—'संध्ये सृष्टिराह हि' [ब्र० सू० ३।२ । १] न तत्र रथा न रथयोगा इतिवाक्ये संध्ये स्वप्नस्थाने जीवकर्तृकैव सृष्टिराम्नायते।स हि कर्तेति स्वप्नदृशं प्राक्प्रस्तुतजीवमेव स इति शब्देन परामृश्य कर्तृत्वं श्रुतिराह । 'निर्मातारं चैके पुत्रादयश्च' [ब्र० सू० ३ । २ । २] एके शाखिनः 'य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः' [कठ० ५ । ८] इति कामानां निर्मातारं जीवमामनन्ति । अत्र कामशब्देन काम्यमानाः पुत्रादयो वर्ण्यन्ते पूर्वत्र हि 'सर्वान्कामांश्छन्दतः प्रार्थयस्व' 'शतायुषः पुत्रपौत्रान्वृणीष्व' [कठ० १ । २३] इति पुत्रादयो हि कामा अतो जीव एवात्र कर्तृत्वेनाभिधीयते । ननु जीवस्य कथमीदृशं सृष्टिसामर्थ्यमिति वाच्यम् । प्रजापतिवाक्ये जीवस्यापि सत्यसंकल्पत्वादेराम्नानात् । न च तत्संसारदशायां तिरोहितमिति वाच्यम् । मुक्ताविव स्वप्नदशायामाविर्भावसंभवादिति

द्वाभ्यां सूत्राभ्यां पूर्वपक्षे प्राप्त उच्यते–'मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्' [ब्र० सू० ३ । २ । ३] तुशब्दः पक्षं व्यावर्तयति। मायाशब्दो ह्याश्चर्यत्वं प्रवृत्तिनिमित्तीकृत्य भगवत्संकल्पवाची माया वयुनं ज्ञानमिति निघण्टुपाठात्। मायाशब्दो ज्ञानरूपसंकल्पवचनः। मायामात्रं भगवत्संकल्पमात्रसृष्टं न तु जीवसृष्टमित्यर्थः । तत्र हेतुः कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादिति । जीवस्य सत्यसंकल्पत्वादिब्रह्मरूपस्य प्रजापतिवाक्योदितस्य संसारदशायां सर्वात्मनाऽनभिव्यक्तत्वान्न तस्य कर्तृत्वसंभावनाऽपि । स हि कर्तेति हिशब्देन प्रसिद्धस्यैव कर्तृतया निर्देशात्। स्वप्नदृश एव कर्तृत्वे स्वाहितचोरव्याघ्रादेः सृष्टिर्नोपपद्यते । इमांश्च स्वाप्नान्पदार्थानसाक्षमितिप्रतिसंधानप्रसङ्गाच्च । 'कामं कामं पुरुषो निर्मिमाणः' [कठ० ५।८] इत्यत्र 'तदेव शुक्रं तद्ब्रह्म' इत्युक्त्या वचनस्य ब्रह्मविषयत्वाच्च न जीवस्य स्रष्टृत्वम्। ननु स्वाभाविकस्यापहतपाप्मत्वादेः सत्यसंकल्पत्वपर्यन्तस्यानभिव्यक्तिः किंनिबन्धनेत्यत्राऽऽह—'पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ' [ब्र० सू० ३ । २ । ५] पराभिध्यानात्परमात्मसंकल्पात्तत्तिरोहितं भवति। तत्संकल्पादेव ह्यस्य जीवस्य बन्धो मोक्षश्च। 'यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते । अथ सोऽभयं गतो भवति । यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते। अथ तस्य भयं भवति' [तै० २। ७। १] 'एष ह्येवाऽऽनन्दयाति' [तै० २।७।१] इति श्रवणात्। 'देहयोगाद्वा सोऽपि' [ब्र० सू० ३ । २ । ६] सोऽपि तिरोभावः सृष्टिकाले देहयोगद्वारेण वा भवति। प्रलयकाले सूक्ष्माचिच्छक्तियोगद्वारेण वा भवतीत्यर्थः । 'सूचकश्च हि श्रुतेराचक्षते च तद्विदः' [ब्र० सू० ३ । २ । ४] स्वप्नार्थो हि शुभाशुभसूचकः—

"यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति ।
समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने" ॥

[छा० ५ । २ । ९] 'स्वप्ने पुरुषं कृष्णं कृष्णदन्तं च पश्यति स एनं हन्ति' [ऐ० आर० ३। २।४। १७]इति श्रुतेः। आचक्षते च स्वप्नाध्यायविदः। तथा च यदीयं स्वप्नसृष्टिर्जीवकर्तृका तर्हि शुभसूचकानेव सृष्ट्वा पश्येन्नाशुभसूचकानतो न जीवकर्तृकेयं सृष्टिरित्युभयलिङ्गपादे स्थितम् । यदत्र परैरुच्यते—स्वप्नसृष्टेः सत्यत्वे रथादिसृष्टिवदादित्यादेरपि सृष्ट्यभ्युपगमे जाग्रद्दशावत्स्वप्नेऽपि ज्योतिरन्तरसत्त्वात्स्वप्रका-

शत्वस्य दुर्विज्ञेयता स्यादतः स्वप्नदृष्टानां सत्यत्वं प्रकरणविरुद्धमिति । तदसत् । परमते मनसः प्रकाशस्य सत्त्वेन स्वप्ने स्वयंज्योतिष्ट्वसाधनमसंगतं स्यात् । तस्माल्लोकप्रसिद्धादित्याद्यभावेऽपि स्वीयज्ञानेन भासकत्वात्स्वयंज्योतिष्ट्वमस्तीत्यत्रैव श्रुतेस्तात्पर्यमिति सिद्धम् ॥ १० ॥

प्रकृतमनुसरामः—

तदेते श्लोका भवन्ति ।

तत्सुप्तमधिकृत्यैते वक्ष्यमाणाः श्लोकाः प्रवृत्ताः ।

स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तान-
भिचाकशीति शुक्रमादाय पुनरैति स्था-
नꣳ हिरण्मयः पुरुष एकहꣳसः ॥ ११ ॥

स्वप्नेनेतीत्थंभावे तृतीया । स्वप्नेनोपलक्षितः शारीरं शरीरमभिप्रहत्य निश्चेष्टतामापाद्यासुप्तोऽलुप्तप्रकाश एव सन्सुप्तान्प्राणानभितश्चाकशीति । काश गतिशासनयोरित्यस्माद्यङ्लुगन्तम् । पर्यटतीत्यर्थः । शुक्रं ज्योतिष्मत्प्रकाशं मनआदीन्द्रियवर्गमादाय स्वप्नान्ते पुनः स्वस्थानमैति । हिरण्मयः प्रकाशमयः । एकहंसः । एक एव हन्ति गच्छतीत्येकहंसः ॥ ११ ॥

प्राणेन रक्षन्नवरं कुलायं बहिष्कुलायादमृतश्चरित्वा ।
स ईयतेऽमृतो यत्र कामꣳ हिरण्मयः पुरुष एकहꣳसः ॥ १२ ॥

अवरं निकृष्टं स्थूलं शरीरं प्राणेन पञ्चवृत्तिप्राणेन रक्षन्प्राणस्यापि स्वप्ने जीवेन सह निर्गमे सद्यो मरणमेव स्यात् । अतः प्राणेन शरीरं रक्षन्कुलायाज्जाग्रच्छरीराद्बहिर्निर्गत्य यत्र कामं काम्यत इति कामं यत्र भोग्यं तत्र सर्वत्र चरित्वाऽमृतोऽमरणधर्मा हिरण्मय एकहंसः पुरुषः पुनरपि स्वस्थानमीयते गच्छतीत्यर्थः । यद्वा यत्र कामं तत्रेयते गच्छतीत्यर्थः ॥ १२ ॥

स्वप्नान्त उच्चावचमीयमानो रूपाणि देवः कुरुते बहूनि ।
उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवापि भयानि पश्यन् ॥ १३ ॥

स्वप्नान्ते स्वप्नमध्य इत्यर्थः । अन्तशब्दो मध्यवचनः । उच्चावचं पुण्यपापलक्षणमुत्कृष्टापकृष्टं संगच्छमानो देवो जीव इत्यर्थः । बहूनि

देवादीनि रूपाणि भजत इत्यर्थः । उतापीवे[ति संघातोऽ]त्यर्थः । स्त्रीभिः सह मोदमान इव जक्षदिव जक्षणं भक्षणं हसनं वा। जक्ष भक्ष-हसनयोरिति हि धातुः । भयानि बिभेत्येभ्य इति भयानि व्याघ्रादीनि पश्यन्निवाभिभवतीत्यर्थः ॥ १३ ॥

आराममस्य पश्यन्ति न तं पश्यति कश्चनेति ।

अस्य जीवस्याऽऽराममुपकरणभूतमुद्यानादिकं देहेन्द्रियादिकं च सर्वेऽपि पश्यन्ति तं देहेन्द्रियादिविविक्तमन्तर्बहिः संचरन्तमपि न पश्य-तीति लोकं प्रत्यनुक्रोशं दर्शयति श्रुतिः । इति मन्त्रसमाप्तौ ।

लोकप्रसिद्धिरपि तथेत्याह—

तं नाऽऽयतं बोधयेदित्याहुः । दुर्भिषज्य्ँ
हास्मै भवति यमेष न प्रतिपद्यते ।

यत एव स्वप्नेन्द्रियाण्युपहृत्य जीवो बहिर्निर्गच्छति अत आयतं गाढसुप्तम् । यम उपरमे । निद्रा । अनुदात्तोपदेशेत्यनुनासिकलोपः । तं न बोधयेदित्याहुश्चिकित्सकाः । तदा तत्र दोषं पश्यन्ति । दुर्भिषज्यं हास्मै भवति यमेष न प्रतिपद्यते । बहिर्निर्गत आत्मा यमिन्द्रियदेशं[न] प्रतिपद्यते कदाचिद्यत्यासेनेन्द्रियाणीन्द्रियदेशे प्रवेशयेत् । तत्राऽऽन्ध्य-बाधिर्यादिदोषप्राप्तौ दुर्भिषज्यं दुःखेन भिषज्यकर्मास्मै दोषाय भवति । अयं दोषो दुर्विचिकित्स्य एव स्यादित्यर्थः ।

अथो खल्वाहुर्जागरितदेश एवास्यैष इति
यानि ह्येव जाग्रत्पश्यति तानि सुप्त इति ।

अथो खल्वित्यन्य आहुः । किमिति जागरितदेशे जाग्रत्स्थान एवा-स्यैष स्वप्न इति न स्थानान्तरमिति। तत्र च हेतुमाहुः—यान्येव हस्त्या-दीनि जाग्रत्पश्यति तानि सुप्तोऽपि पश्यतीति । अत्र मतान्तरत्वेनोप-न्यासस्यायं भावः—उपरतेष्विन्द्रियेषु हि स्वप्नान्पश्यति न तत्र जाग-रितदेशस्यावकाशोऽस्ति अतस्तृतीयस्थानमेव स्वप्नस्थानमिति । केचित्तु अथो खल्वित्यादिग्रन्थोऽपि पूर्वोक्तार्थोपपादक एव न मतान्तरम् । जागरितशब्दादीपदसमाप्तौ देश्यप्रत्यये छान्दसो यलोपः । जागरि-तादीषन्न्यूनमित्यर्थः । दिनान्तरान(नु)भवायोग्यत्वमीषन्न्यूनत्वम् । उक्त

एवार्थ उपपत्त्या समर्थ्यते—यानि ह्येव जाग्रत्पश्यति तानि सुप्त इति। यानि स्रक्चन्दनवनितान्नपानादीनि जाग्रद्दशायां पश्यति तादृशान्ये-वार्थक्रियाकारीणि स्वप्ने पश्यति । अतः स्वप्नार्थाः सृष्टा एव । तस्मा-दिहपरलोकव्यतिरिक्तस्थानान्तरमेव स्वप्नस्थानमित्याहुः ।

उक्तं स्वयंज्योतिष्ट्वमुपसंहरति—

अत्रायं पुरुषः स्वयंज्योतिर्भवति ।

जनक आह—

सोऽहं भगवते सहस्रं ददामि ।

प्राप्तस्वयंज्योतिष्ट्वविद्यानिष्क्रयत्वेन सहस्रं गत्वां(वां) दक्षिणात्वेन ददामि ।

अत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥ १४ ॥

अतःपरमपि संसारविमोक्षायैव साधनं ब्रूहि नान्यत्किंचिदपेक्षित-मिति भावः ॥ १४ ॥

स वा एष एतस्मिन्संप्रसादे रत्वा चरित्वा
दृष्ट्वैव पुण्यं च पापं च पुनः
प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नायैव ।

संप्रसीदत्यस्मिन्निति संप्रसादः । जागरिते देहेन्द्रियादिव्यापारशत-संनिपातजन्यं कालुष्यमस्ति तेभ्यो विप्रमुक्तः स्वप्न ईषत्प्रसीदति अतः संप्रसादशब्देन स्वप्नस्थानमुच्यते। यद्यपि संप्रसादशब्दः सुषुप्तौ मुख्योऽ-थापि स्वप्नस्य प्राक्प्रस्तुतत्वात्तस्यैवैतस्मिन्संप्रसाद इति एतच्छब्दस-मानाधिकरणसंप्रसादशब्देन परामर्शो युक्तः। तस्मिन्निगमिषिते सतीति शेषः । रत्वा रमेरनिदूत्वादनुदात्तोपदेशेत्यनुनासिकलोपः । रत्वा क्रीडित्वा । चरित्वा भक्षयित्वा विहृत्य वा । चर गतिभक्षणयोरिति हि धातुः । ‘ दृष्ट्वैव पुण्यं च पापं च ’ । पुण्यपापफलमनुभूय प्रतिन्यायं यथान्यायं यथागतम् । अयनमायो निर्गमनमित्यर्थः । प्रतियोनि योनि-शब्दः स्थानवाची स्थानं प्रत्याद्रवति आगच्छति स्वप्नानुभवायेत्यर्थः ।

स यत्तत्र किंचित्पश्यति ।

तत्र जाग्रद्दशायां स यत्किंचिन्मनुष्यव्याघ्रशरीरादिकमात्मीयत्वेन पश्यति ।

अनन्वागतस्तेन भवति ।

तेनाननुसृतो भवति । तत्संबन्धरहितो भवतीत्यर्थः ।

तत्र हेतुमाह—

असङ्गो ह्ययं पुरुष इति ।

कर्माविद्योपाधिकेन शरीरेन्द्रियसंघातादिनाऽसङ्गस्वभावत्वादित्यर्थः । यदि केनचित्सङ्गः स्वभावसिद्धः स्यात् । तदैव हि तस्य सर्वदा तदनुवृत्तिः स्यात् । अतोऽसङ्गस्वभावत्वाज्जाग्रद्दशादृष्टपदार्थाननुवृत्तिर्युज्यत इति भावः ।

उक्तमङ्गी करोति—

एवमेवैतद्याज्ञवल्क्य सोऽहं भगवते सहस्रं
ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥१५॥

पूर्ववदर्थः ॥ १५ ॥

स वा एष एतस्मिन्स्वप्नान्ते रत्वा चरित्वा
दृष्ट्वैव पुण्यं च पापं च पुनः प्रति-
न्यायं प्रतियोन्याद्रवति बुद्धान्तायैव ।

स्वप्नान्ते स्वप्नस्थान इत्यर्थः । अन्तशब्दः स्थानवचनः । अन्तः समाप्तौ स्थाने च निर्णयेऽभ्यन्तरेऽपि चेति नैघण्टुकाः । बुद्धान्तः । बुद्धं बोधः । भावे निष्ठा । अन्तशब्दः स्थानवचनः । स्थिरबोधस्थानाय जाग्रत्स्थानायेति यावत् ।

स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्य-
सङ्गो ह्ययं पुरुष इत्येवमेवैतद्याज्ञवल्क्य सोऽहं भगवते
सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥१६॥

स वा एष एतस्मिन्बुद्धान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नान्तायैव ॥ १७ ॥

एवं त्रिभिः खण्डैर्जागरितात्स्वप्नान्तं स्वप्नान्ताद्बुद्धान्तं बुद्धान्तात्स्वप्नान्तं यातीत्यारोहावरोहसंचारप्रदर्शनेन संसारचक्रप्रवृत्तिर्दर्शिता ॥ १७ ॥

अथैतस्यैव पुरुषस्योभयत्र संचारे दृष्टान्तः—

तद्यथा महामत्स्य उभे कूले अनुसंचरति पूर्वं चापरं चैवमेवायं पुरुष एतावुभावन्तावनुसंचरति स्वप्नान्तं च बुद्धान्तं च ॥ १८ ॥

स्पष्टोऽर्थः ॥ १८ ॥

एवं स्थानद्वयसंचारं प्रदर्श्य सुषुप्तिदशां प्रकाशयति—

तद्यथाऽस्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः संहत्य पक्षौ संलयायैव ध्रियत एवमेवायं पुरुष एतस्मा अन्ताय धावति यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति ॥ १९ ॥

यथाऽऽकाशे श्येनो वा गरुडो वा विशेषेण परितः पतनं कृत्वा श्रान्तः सन्पक्षौ संहत्य समीचीननीडायैव ध्रियतेऽवतिष्ठते । धृङ् अवस्थान इति हि धातुः । एवमेवायं पुरुषो बुद्धान्तस्वप्नान्तसंचरणश्रान्तो यत्र स्थाने सुषुप्तो न कामाद्युपहतः स्वप्नांश्चान्यान्पदार्थांश्च न पश्यति तादृशस्थानाय धावतीत्यर्थः ॥ १९ ॥

ननु क्वचित्स्वप्नादिदर्शनं क्वचित्तदभाव इत्यत्र किं विनिगमकमित्याशङ्कायां स्थानवैषम्यकृतमित्याह—

ता वा अस्यैता हिता नाम नाड्यो यथा केशः सहस्रधा भिन्नस्तावताऽणिम्ना तिष्ठन्ति शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य लोहितस्य पूर्णा अथ यत्रैनं घ्नन्तीव जिनन्तीव हस्तीव विच्छाययति गर्तमिव पतति ।

यत्र स्थितमेनं केचन घ्नन्तीव केचन जिनन्तीव गजो विद्रावयतीव

गर्तमिव पतनमिव भाति । ताः केशसहस्रांशसूक्ष्मा नान्य(म)रूपान्नरसपूर्णा हिता(त)नामिका नाड्यो भवन्तीत्यर्थः ।

यदेव जाग्रद्भयं पश्यति तदत्राविद्यया मन्यते ।

यद्यज्जाग्रद्दशायां भयसाधनं पश्यति तत्सर्वमासु नाडीष्वविद्यया कर्मवशान्मन्यते प्रत्येतीत्यर्थः । हितनामकस्वप्नवहनाडीस्थितस्य कर्मसंबन्धसत्त्वाद्भीषणस्वाप्नपदार्थप्रतिभानं संभवतीति भावः ।

अथ यत्र देव इव राजेवाहमेवेदꣳ सर्वोऽस्मीति मन्यते सोऽस्य परमो लोकः॥ २० ॥

स यथा कुमारो वा महाराजो वा महाब्राह्मणो वा अतिघ्नीमानन्दस्य गत्वा शयीतैवमेवैष एतच्छेते [बृ० २ । १ । १९] इति बालाकिब्राह्मणोक्तिरीत्या यत्र स्थाने स्थितस्य देववद्राजवच्चाऽऽनन्दानुभवः स्वव्यतिरिक्तानुकूलप्रतिकूलवस्त्वनुपलम्भः सोऽस्य जीवस्य परमो लोको मुख्याश्रयः परमात्मेति भावः ॥ २० ॥

तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माभयꣳ रूपम् ।

तदेतदस्यातिच्छन्दा । छन्दशब्द इच्छावाची । अतिच्छन्दाऽतिच्छन्दमभिलाषातिगं पापप्रतिभटमभयं प्रियं प्राप्यं रूपं परमात्मैवेत्यर्थः । ततः किमित्यत्राऽऽह—

तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किंचन वेद नाऽऽन्तरमेवमेवायं पुरुषः प्राज्ञेनाऽऽत्मना संपरिष्वक्तो न बाह्यं किंचन वेद नाऽऽन्तरम् ।

यथा प्रियस्त्रीपरिष्वक्तस्याऽऽन्तरदुःखादि पदार्थज्ञानं वा नास्ति । एवं प्रियेण प्राज्ञेन परमात्मना परिष्वक्तस्य बाह्याभ्यन्तरज्ञानाभाव उपपद्यते । अत्र च संपरिष्वङ्गो नाम तत्र लय एव । स्वाप्ययसूत्रे स्वमपीतो भवतीतिवाक्यसमानार्थतयैतद्वाक्यस्योदाहृतत्वात् । अथवा जाग्रत्स्वप्नभोगप्रदकर्मसंबन्धविरोधिपरिष्वङ्गः संबन्धविशेषः सुषुप्तिमात्रकालवर्तीति द्रष्टव्यम् ।

तद्वा अस्यैतदाप्तकाममात्मकाममकामꣳ रूपꣳ शोकान्तरम् ॥ २१ ॥

तदेव प्राज्ञात्मलक्षणमवाप्तसमस्तकाममात्मव्यतिरिक्तकामनाशून्यं

शोकान्तरं शोकबाह्यम् । अन्तरशब्दो बहिर्योगवचनः । प्राप्यं रूप्य-मित्यर्थः ॥ २१ ॥

अत्र पिताऽपिता भवति माताऽमाता ।

अत्र परमात्मनि सुषुप्तिस्थाने लीनस्य पित्रादयो न सन्ति । तद्रू-पस्य शरीरसंबन्धघटककर्मसंबन्धशून्यतयाऽशरीरस्य जनकाभावेन पित्रा-देरभावादिति भावः ।

लोका अलोकाः ।

तस्याऽऽश्रयशून्यत्वादिति भावः ।

देवा अदेवाः ।

अनुग्राहकशून्यत्वादिति भावः ।

वेदा अवेदाः ।

अननुशासनीयस्वरूपत्वादिति भावः ।

अत्र स्तेनोऽस्तेनो भवति भ्रूणहाऽभ्रू-
णहा चाण्डालोऽचाण्डालः पौल्कसोऽपौ-
ल्कसः श्रमणोऽश्रमणस्तापसोऽतापसः ।

परिशुद्धात्मस्वरूपे स्तैन्यादिकर्तृत्वासंभवादिति भावः ।
तत्र हेतुमाह—

अनन्वागतं पुण्येनानन्वागतं पापेन ।

शरीरसंबन्धघटकपुण्यपापासंस्पर्शादिति भावः ।

ननु चरमदेहवियोगानन्तरभावित्वात्सर्वकर्मप्रणाशस्य कथं सुषुप्तौ कर्मसंबन्धाभाव इत्याशङ्क्याऽऽह—

तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य भवति॥ २२ ॥

मनस्तापरूपफलाभावात् । विद्यमानानामपि कर्मणां फलप्रदाना-भिमुख्याभावात्कर्मणामसंबन्धप्रायत्वाच्छरीरसंबन्धाभावेन तदनुबन्धि-मातापित्रादयो न सन्तीत्यर्थः ॥ २२ ॥

ज्ञातृस्वरूपस्य सुप्तस्याऽऽत्मनो बाह्याभ्यन्तरज्ञानाभावः किंनिबन्धन इत्याशङ्क्याऽऽह—

यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति न हि
द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात्। न तु
तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्॥२३॥

बाह्याभ्यन्तरं न पश्येदिति यावत्। तत्पश्यत एव बाह्याभ्यन्तरादर्शनं ज्ञातुर्धर्मभूतस्य ज्ञानस्य नित्यत्वाज्ज्ञानस्वरूपाभावनिबन्धनो बाह्याभ्यन्तरद्वितीयज्ञानाभावो न भवति। अपि तु ततोऽविभक्तस्य प्राज्ञात्मनः पृथक्सिद्धस्यान्यस्य वस्तुनोऽभावादेवानुकूलप्रतिकूलपदार्थादर्शनमित्यर्थः। न च पृथक्सिद्धपदार्थाभावस्य जाग्रत्स्वप्नयोरपि समत्वात्तत्रैव सुप्तावपि पृथक्सिद्धपदार्थानुभवोऽस्तीति शङ्क्यम्। तत्र कर्मरूपदोषवशात्पृथक्सिद्धपदार्थोपलम्भसंभवात्सुप्तौ कर्मसंबन्धाभावात्। न चापृथक्सिद्धतया ब्रह्मात्मकत्वेनैव विषयाणामुपलम्भोऽस्त्विति शङ्क्यम्। 'एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढाः' [छा०८। ३। २] इतिच्छान्दोग्योक्तरीत्याऽनृतशब्दितकर्मविशेषतिरोहिततया ब्रह्मण उपलम्भासंभवेन ब्रह्मात्मकतयाऽप्युपलम्भासंभवात्। ब्रह्मात्मकत्वाब्रह्मात्मकत्वोभयबहिर्भूतस्य पदार्थस्याभावादिति भावः॥ २३॥

यद्वै तन्न जिघ्रति जिघ्रन्वै तन्न जिघ्रति न हि
घ्रातुर्घ्रातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु
तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यज्जिघ्रेत्॥२४॥
यद्वै तन्न रसयते रसयन्वै तन्न रसयते न हि रस-
यितू रसयतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु
तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्रसयेत्॥ २५॥
यद्वै तन्न वदति वदन्वै तन्न वदति न हि वक्तुर्व-
क्तेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वि-
तीयमस्ति ततोऽन्यद्विभक्तं यद्वदेत्॥ २६॥
यद्वै तन्न शृणोति शृण्वन्वै तन्न शृणोति न हि
श्रोतुः श्रुतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्-
द्वितीयमस्ति ततोऽन्यद्विभक्तं यच्छृणुयात्॥२७॥

यद्वै तन्न मनुते मन्वानो वै तन्न मनुते न हि
मन्तुर्मतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु
तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यन्मन्वीत॥२८॥
यद्वै तन्न स्पृशति स्पृशन्वै तन्न स्पृशति न हि
स्प्रष्टुः स्पृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु
तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्स्पृशेत् ॥ २९ ॥
यद्वै तन्न विजानाति विजानन्वै तन्न विजानाति न हि
विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु त-
द्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्विजानीयात्॥३०॥

स्वप्नस्थानादौ नैवमित्याह—

यत्र वा अन्यदिव स्यात्तत्रान्योऽन्यत्पश्ये-
दन्योऽन्यज्जिघ्रेदन्योऽन्यद्रसयेदन्योऽन्यद्वदे-
दन्योऽन्यच्छृणुयादन्योऽन्यन्मन्वीतान्योऽ-
न्यत्स्पृशेदन्योऽन्यद्विजानीयात् ॥ ३१ ॥

यत्र स्थाने स्थितस्याल्पमपि पृथक्सिद्धं स्यादिन्द्रियादिकं च करणं स्यात्तदा किंचिद्दृश्यं केनचित्करणेन कश्चित्पश्येदपि । इह तु पृथक्सिद्धदृश्यपदार्थाभावात्कर्मसंबन्धोपरमे सकारणभूतेन्द्रियसंबन्धाभावाच्च नान्यवस्तुदर्शनमिति भावः ॥ ३१ ॥

सलिल एको द्रष्टाऽद्वैतो भवत्येष ब्रह्मलोकः
सम्राडिति हैनमनुशशास याज्ञवल्क्यः ।

यथा जले जलं प्रक्षिप्तमेकं भवति एवं सलिलवत्स्वच्छस्वभावे परमात्मनि लीनोऽयं द्रष्टा जीवः प्राज्ञात्मपरिष्वङ्गेनैकीभूतः सन्नद्वैतो भवति । देवादिलक्षणभेदकाकारशून्यो भवतीत्येष सुषुप्त्याधार एव परमात्मा हे सम्राडिति याज्ञवल्क्योऽनुशिष्टवानित्यर्थः ।

ननु कथं सुषुप्त्याधारस्य ब्रह्मलोकत्वम् । ब्रह्मलोको हि परमगतित्वाद्विना श्रूयते तत्राऽऽह—

एषाऽस्य परमा गतिः ।

जीवस्यार्चिरादिगत्या प्राप्या गतिरेषैव ।

एषाऽस्य परमा संपत् ।

तत्त्वज्ञानादिना प्राप्याऽपि एषैव ।

एषोऽस्य परमो लोकः ।

शाश्वतं भोगस्थानमप्येष एव ।

एषोऽस्य परमानन्दः ।

निरतिशयानुकूलोऽप्यस्यायमेवेत्यर्थः ।

ननु स्वर्गादिषु भोग्येष्वनुकूलेषु जाग्रत्सु कथमेतस्य परमानन्दत्व-मित्यत्राऽऽह—

एतस्यैवाऽऽनन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ॥ ३२ ॥

स्वर्गादिवैषयिकसुखानुभवितारः सर्वेऽप्येतदानन्दसहस्रांशानुभवितार इत्यर्थः ॥ ३२ ॥

तस्य परमानन्दत्वमेव प्रपञ्चयति—

स यो मनुष्याणाꣳ राद्धः समृद्धो भवत्यन्येषामधिपतिः सर्वैर्मानुष्यकैर्भोगैः संपन्नतमः स मनुष्याणां परम आनन्दः ।

राध साध संसिद्धाविति हि धातुः । सिद्धोपायसिद्धः । युवत्वादि-गुणैः समृद्धः । अन्येषां च मनुष्याणामधिपतिः । सर्वमानुषभोगसंपन्नः । स उत्तमलक्षण आनन्दः । मनुष्याणां मध्ये श्रेष्ठ आनन्दः । अत्र समृद्धत्वादिगुणानामनुकूलतया वेदनीयत्वादानन्दवत्त्वमस्तीति द्रष्टव्यम् ।

अथ ते ये शतं मनुष्याणामानन्दाः स एकः पितॄणां जितलोकानामानन्दः ।

शतगुणिता मनुष्याणामानन्दाः श्राद्धादिकर्मभिः पितॄंस्तोषयित्वा जितपितृलोका ये पितरस्तेषामेकानन्द इत्यर्थः ।

पुस्तकान्तरे त इति पाठो न ।

अथ ते ये शतं पितृणां जितलोकानामानन्दाः स एको गन्धर्वलोक आनन्दोऽथ ते ये शतं गन्धर्वलोक आनन्दाः स एकः कर्मदेवानामानन्दः ।

कर्मदेवानामित्यस्यार्थमाह—

ये कर्मणा देवत्वमभिसंपद्यन्ते ।

देवत्वं हि द्विविधं कर्मसिद्धमाजानसिद्धम् । कल्पादावेव यत्सिद्धं तदाजानसिद्धम् । तदितरत्कर्मसिद्धम् । यद्वा त्रयस्त्रिंशद्देवतासायुज्यं कर्मदेवत्वम् । त्रयस्त्रिंशद्देवतात्मत्वमाजानसिद्धमिति विवेको द्रष्टव्यः ।

अथ ते ये शतं कर्मदेवानामानन्दाः स एक आजानदेवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः ।

श्रोत्रियः श्रुतवेदान्तः । अत एवावृजिनोऽपापः । अत एवाकामहतः । उपासनानिवृत्तसमस्त इत्यर्थः । मुक्त इति यावत् । यद्यपि मुक्तानन्दाजानदेवानन्दयोर्मेरुसर्षपवत्तारतम्यमस्ति तथाऽप्यन्यूनत्वे तात्पर्यम् ।

अथ ते ये शतमाजानदेवानामानन्दाः स एकः प्रजापतिलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथ ते ये शतं प्रजापतिलोक आनन्दाः स एको ब्रह्मलोक आनन्दः ।

अत्र प्रजापतिशब्दश्चतुर्मुखपरः । तैत्तिरीयके समानप्रकरणे प्रजापतेरानन्द इत्येकवचनान्तप्रजापतिशब्दश्रवणात् । दक्षादिप्रजापतिपरत्वे बहुवचनान्ततापसङ्गेन तत्रत्यप्रजापतिशब्दस्य चतुर्मुखपरतया तदैकार्थ्येनात्रत्यप्रजापतिशब्दस्यापि तत्परत्वात् । ततश्चतुर्मुखानन्दशतगुणितो ब्रह्मलोकलक्षण आनन्दः । न च ते ये शतं स एक इति निर्देशाद्ब्रह्मानन्दस्य परिच्छिन्नत्वं शङ्कनीयम् । आधिक्यमात्रे वाक्यतात्पर्यात् । यथा क्षिप्तेषुरिव सर्पतीति वाक्यं सूर्यगतिमान्द्यनिवृत्तिपरम् । सूर्यस्य निमेषमात्रे च बहुयोजनलङ्घित्वस्य प्रमाणसिद्धत्वात् । एवमस्यापि वाक्यस्य चतुर्मुखानन्दापेक्षयाऽऽधिक्यमात्रमवगम्यते । यद्वा—

रोमकूपेष्वनन्तेषु ब्रह्माण्डानि भ्रमन्ति ते ।
अण्डानां तु सहस्राणां सहस्राण्ययुतानि च ॥
ईदृशानां तथा तत्र कोटिकोट्ययुतानि च ।
गङ्गायां सि[क]ता धारा यथा वर्षति वासवे ॥
शक्या गणयितुं लोके न व्यतीताः पितामहाः ।

इत्यादिभिरण्डानां तत्र तत्र चतुर्मुखानां चासंख्येयत्वावगमान्नियम्यान्नियन्तुः शतगुणितानन्दत्वे कथिते चतुर्मुखेभ्योऽप्यसंख्याकेभ्यः शतगुणानन्दतयाऽवगतस्य भगवतोऽपरिच्छिन्नानन्दत्वमर्थसिद्धमिति द्रष्टव्यम् । आनन्दमयाधिकरणादावेवमेव व्यासार्यैर्वर्णितम् ।

यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथैष एव परमानन्द एष ब्रह्मलोकः सम्राडिति होवाच याज्ञवल्क्यः सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति ।

पूर्ववदर्थः ।

अत्र ह याज्ञवल्क्यो बिभयांचकार मेधावी राजा सर्वेभ्यो माऽन्तेभ्य उदरौत्सीदिति ॥ ३३ ॥

अयं राजाऽतीव मेधावी मां सर्वेभ्यः प्रश्नेभ्य उदरौत्सीदुपरोधं कृतवान् । सर्वान्प्रश्नान्मामसौ प्रष्टुमुपक्रान्त इतः परं न त्यक्ष(प्रक्ष्य)तीति बिभेति स्मेत्यर्थः ॥ ३३ ॥

जाग्रद्देशादुत्क्रमणं विवक्षुः स्वप्नान्तेऽवस्थापितस्य जीवस्य बुद्धान्तसंचरणं दर्शयति—

स वा एष एतस्मिन्स्वप्नान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव ॥ ३४ ॥

पूर्ववदर्थः ॥ ३४ ॥

तद्यथाऽनः सुसमाहितमुत्सर्जद्यायादेवमेवायꣳ शारीर आत्मा प्राज्ञेनाऽऽत्मनाऽन्वारूढ उत्सर्जन्याति ।

यथाऽनः शकटं सुतरां समाहितं यन्त्रोपकरणे संभाराक्रान्तं सत्पूर्व-

देशमुत्सृज्य याति एवमेव शकटस्थानीयो जीवः प्राज्ञेन परमात्मना सारथिस्थानीयेन संबन्धविशेषं प्राप्तः शरीरमुत्सृज्य यातीत्यर्थः ।

कदेत्यत्राऽऽह—

यत्रैतदूर्ध्वोच्छ्वासी भवति ॥ ३५ ॥

यदैतच्छरीरमूर्ध्वोच्छ्वासीत्यर्थः ॥ ३५ ॥

स यत्रायमणिमानं न्येति जरया
वोपतपता वाऽणिमानं निगच्छति ।

सोऽयं प्राकृतः शिरःपाण्यादिमान्पिण्डो यत्र यदाऽणिमानं कार्श्यं न्येति निर्गच्छति । तत्र हेतुमाह—जरया वोपतपता । स्वयमेव कालपक्वफलवज्जरया कार्श्यं गच्छति । उपतपतीत्युपतपञ्ज्वरादिरोगस्तेन वा । उपतप्यमानोऽग्निमान्द्येन भुक्तस्याजरणेऽन्नरसेनानुपचीयमानः सन्पिण्डः कार्श्यमापद्यते तत ऊर्ध्वोच्छ्वासी भवतीत्यर्थः ।

तद्यथाऽऽम्रं वोदुम्बरं वा पिप्पलं वा बन्धनात्प्रमुच्यत एवमेवायं पुरुष एभ्योऽङ्गेभ्यः संप्रमुच्य पुनः प्रतिन्यायं प्रतियोन्याद्रवति प्राणायैव ॥ ३६ ॥

आम्रफलं वोदुम्बरफलं वा पिप्पलफलं वा 'फले लुक्' [पा० सू० ४। ३ । १६३] इति विकारप्रत्ययस्य लुक् । वृन्तबन्धनात्कालवशजीर्णात्प्रमुच्यत एवमेवायं पुरुषः सप्राणकरणग्राम एतेभ्यः पाण्यादिभ्योऽङ्गेभ्यो मोक्षं प्राप्य यथापूर्वं ब्राह्मणादियोनिं प्रत्याद्रवति जीवनायेत्यर्थः ॥ ३६ ॥

तद्यथा राजानमायान्तमुग्राः प्रत्येनसः सूतग्रामण्योऽन्नैः पानैरावसथैः प्रतिकल्पन्तेऽयमायात्ययमागच्छतीत्येवꣳ हैवंविदꣳ सर्वाणि भूतानि प्रतिकल्पन्त इदं ब्रह्माऽऽयातीदमागच्छतीति ॥ ३७ ॥

यथाऽभिषिक्तं राजानमायान्तं श्रुत्वा राष्ट्रवर्तिनः सर्वेऽपि उग्रा जातिविशेषाः क्रूरकर्माणो वा प्रत्येनसः पापकर्मणि तस्करादिदण्डनादौ

नियुक्ताः सूता वर्णसंकरविशेषा ग्रामनेतारो ग्रामण्यः सूताश्च ग्रामण्यश्च सूतग्रामण्योऽन्नैर्विविधैर्भोग्यैः पानैः पेयविशेषैरावसथैः प्रासादादिभिश्चायं राजाऽऽयातीति अयमागच्छतीति ससंभ्रमं वदन्तः प्रतिकल्पन्ते प्रतीक्षन्ते। एवंविदम्। कर्मफलं हि प्रस्तुतं तदेवंशब्देन परामृश्यते। विच्छब्दस्तल्लब्धृपरः। सर्वाणि भूतानि एतद्भोगोपकरणभूतशरीरसाधनानि सर्वाणि भूतानि तत्तत्कर्मप्रयुक्तानि सन्ति कर्मफलोपभोगसाधनैः सहेदं ब्रह्म जीव आयातीति प्रतीक्षन्त इत्यर्थः। एतच्छरीरत्यागसमनन्तरमेव शरीरान्तरसद्भोग्यभोगस्थानभोगोपकरणानि परमात्मसंकल्पवशेन प्रतिपुरुषं समग्राणि भवन्तीत्यर्थः। यद्वा—उक्तसंसरणप्रकाराभिज्ञस्य सर्वभूतोपजीव्यत्वं फलमुच्यते॥ ३७॥

तद्यथा राजानं प्रयियासन्तमुग्राः प्रत्येनसः सूतग्रामण्योऽभिसमायन्त्येवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति यत्रैतदूर्ध्वोच्छ्वासी भवति॥ ३८॥

इति बृहदारण्यकोपनिषदि चतुर्थाध्यायस्य
तृतीयं ब्राह्मणम्॥ ३॥

ऊर्ध्वश्वासकाले सर्वे प्राणा आयान्तीत्यर्थः॥ ३८॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां चतुर्थाध्यायस्य
तृतीयं ज्योतिर्ब्राह्मणम्॥ ३॥

एभ्योऽङ्गेभ्यः संप्रमुच्येत्युक्तं संप्रमोक्षणं विस्तरेण वर्णयितुमारभते—

स यत्रायमात्माऽऽबल्यं न्येत्य संमोहमिव न्येत्यथैनमेते प्राणा अभिसमायन्ति।

योऽयमात्मा यत्र यस्मिन्काल आबल्यमबलस्य भाव आबल्यं बलराहित्यं न्येत्य नितरामेत्य प्राप्य संमोहमिव न्येति संमोहमिव प्रतिपद्यते। करणक्षोभान्मोहं प्रतिपद्यते। इवशब्दोऽल्पार्थे। मोहोपक्रमदशायामित्यर्थः। मोहो नाम मरणायार्धसंपत्तिः। उभयलिङ्गपादे जाग्रत्स्वप्नसुषु-

तिमरणानामन्यतमो मोह इति प्राप्त उच्यते—' मुग्धेऽर्धसंपत्तिः परिशेषात् ' [ब्र० सू० ३ । २ । १०] न तावन्मुग्धो जागरितावस्थो भवितुमर्हति । इन्द्रियैर्विषयानीक्षणात् । नापि स्वप्नान्पश्यति निःसंज्ञत्वात् । नापि मृतः प्राणोष्मणोर्भावात् । न सुषुप्तस्तद्वैलक्षण्यात् । सुप्तो हि प्रसन्नवदनो निमीलितनेत्रश्च । तस्मादर्धसंपत्तिरर्धमृतिरिति यावत् । मरणं हि सर्वप्राणवियोगः । सर्वप्राणवियोगोपक्रमकतिपयप्राणसंपत्तिर्मूर्छा । तत्रौषधादिवशात्कर्मशेषे च सति वाङ्मनसे प्रत्यागच्छतः । असति तस्मिन्प्राणोष्माणावप्यपगच्छतः । तस्मादर्धसंपत्तिर्मूर्छेति स्थितम् । अथैनं वागादयः प्राणा आत्मनः समीपमायान्तीत्यर्थः ।

स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति ।

स आत्मा तेजोमात्राः प्रकाशकांशा इत्यर्थः । इन्द्रियाणीति यावत् । ता एताः समभ्याददानः । समिति स्वप्नापेक्षया वैषम्यमुच्यते । अस्त्येव स्वप्नेऽप्यभ्यादानं न तु सम्यक् । सवासनमभ्यादायेत्यर्थः । हृदयमेव पुण्डरीकाकारमन्ववक्रामति अन्वागच्छति ।

स यत्रैष चाक्षुषः पुरुषः पराङ्पर्यावर्तते ।

चक्षुषि संनिहितश्चाक्षुष इति म्रियमाणो जीव उच्यते । स यदा रूपादिविषयपराङ्मुखः सन्हृदयदेशे पर्यावर्तत इत्यर्थः ।

अथारूपज्ञो भवति ॥ १ ॥

अथ तदुत्तरकालेऽयं मुमूर्षू रूपं न जानाति ॥ १ ॥

एकी भवति न पश्यतीत्याहुः ।

स्वापकाल इवेन्द्रियैः सहैकी भव[ति तदैनं न पश्य]तीति पार्श्वस्था आहुः ।

एकी भवति न जिघ्रतीत्याहुरेकी भवति न रसयत इत्याहुरेकी भवति न वदतीत्याहुरेकी भवति न शृणोतीत्याहुरेकी भवति न मनुत इत्याहुरेकी भवति न स्पृशतीत्याहुरेकी भवति न विजानातीत्याहुः ।

पूर्ववदर्थः ।

तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन
प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो
वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यः।

तस्य हैतस्य म्रियमाणस्य संबन्धि यद्धृदयं तस्याग्रं नाडीमुखं निर्गमनद्वारं प्रद्योतते संहृतकरणतेजःप्रज्वलितं सत्प्रदीप्तं भवति [त]त्प्रकाशितद्वारः सन्नेष आत्मा निष्क्रामति चक्षुरादिद्वारेभ्यः।

तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तꣳ सर्वे प्राणा अनूत्क्रामन्ति।

उत्क्रामन्तमध्यक्षं जीवं मुख्यप्राणोऽनूत्क्रामति तं मुख्यप्राणं तदधीना इतरे प्राणा अनूत्क्रामन्तीत्यर्थः।

सविज्ञानो भवति सविज्ञानमेवान्ववक्रामति।

तस्यां दशायामुत्क्रामञ्जीवो यं यं वाऽपि स्मरन्भावमित्युक्तन्यायेन प्राप्तव्ययोनिविषयकस्मृतिमान्भवतीत्यर्थः। तच्च ज्ञानं कर्माधीनं न तु पुरुषयत्नसाध्यम्। यं योगिनः प्राणवियोगकाले यत्नेन चित्तेन निवेशयन्तीतिस्मृत्युक्तरीत्या योगिनामेव हि ज्ञानं यत्नसाध्यमेवं सविज्ञानमेव पुरुषं प्राणवर्गोऽनुगच्छतीत्यर्थः।

तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च॥ २॥

तादृशं च पुरुषं विद्याकर्मपूर्ववासना अनुवर्तन्ते। न हि पूर्ववासनां विना कश्चित्कर्तुं भोक्तुं वा प्रभवति। न ह्यनभ्यस्ते विषये कौशलमिन्द्रियाणां भवति। पूर्वानुभववासनाप्रवृत्तानामिन्द्रियाणामिह जन्मन्यभ्यासमन्तरेणैव कासुचित्क्रियासु चित्रकर्मादिलक्षणा [सु] कौशलं दृश्यते केषांचिच्चात्यन्तसौकर्ययुक्तास्वपि क्रियासु अकौशलं दृश्यते तदेतत्सर्वं पूर्ववासनोद्भवानुद्भवनिमित्तकं तस्माद्विद्याकर्मपूर्ववासनालक्षणमेतत्त्रितयं शाकटिकसंभारस्थानीयं परलोकपाथेयमित्यर्थः॥ २॥

तद्यथा तृणजलायुका तृणस्यान्तं गत्वाऽन्यमाक्रममाक्रम्याऽऽत्मानमुपसꣳहरत्येवमेवाय-

मात्मेदꣳ शरीरं निहत्याविद्यां गमयित्वाऽ-
न्यमाक्रममाक्रम्याऽऽत्मानमुपसꣳहरति ॥३॥

यथा जलूका तृणस्याग्रभागं गत्वाऽन्यं तृणान्तरलक्षणमाक्रम्यत इत्याक्रम आश्रय इति यावत्। तमाश्रित्याऽऽत्मनोऽपरावयवमुपसंहरति । एवमेवायं संसारं जीवः प्राक्तनं शरीरं निहत्य तस्यैव विवरणमविद्यां गमयित्वा निःसंबोध्यतामापाद्यान्यं शरीरलक्षणमाक्रममाक्रम्य स्वात्मानं पूर्वस्माच्छरीरादुपसंहरति ॥ ३ ॥

ननु देहान्तरारम्भे प्रागुपात्तमेवोपादानं स्वीकृत्य तदेवोपमृद्य स्वर्णकारवद्देहान्तरं करोति आहोस्विदपूर्वमेवोपादानं द्रव्यं स्वी करोति तत्राऽऽह—

तद्यथा पेशस्कारी पेशसो मात्रामुपादाया-
न्यन्नवतरं कल्याणतरꣳ रूपं कुरुत एव-
मेवायमात्मेदꣳ शरीरं निहत्याविद्यां गम-
यित्वाऽन्यन्नवतरं कल्याणतरं रूपं कुरुते
पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं
वा ब्राह्मं वाऽन्येषां वा भूतानाम् ॥ ४ ॥

पेशः सुवर्णं तत्करोतीति पेशस्कारी सुवर्णकारः पेशसः सुवर्णस्य मात्रामेकदेशमुपादाय यथाऽन्यत्कल्याणतरं रूपं कुरुते । यद्वा पेशस्कारी कोशकारकृमिः स यथा पेशसः पट्टतन्तोर्मात्रामंशमुपादाय नवतरं कल्याणजालं कुरुत एवमेवायमात्मेदं शरीरं निहत्यान्यद्रूपं कुरुते । पित्र्यं वा गान्धर्वं वा । पित्र्यं पितृभ्यो हितं पितृलोकोपभोगयोग्यमित्यर्थः । तथा गान्धर्वं दैवं प्राजापत्यं ब्राह्मं गन्धर्वादिलोकोपभोगयोग्यमित्यर्थः । अन्येषां भूतानां संबन्धि शरीरं करोतीत्यर्थः । कर्तृत्वं चास्य कर्मद्वारकं द्रष्टव्यम् ॥ ४ ॥

स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राण-
मयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो
वायुमय आकाशमयस्तेजोमयोऽतेजोमयः कामम-

योऽकाममयः क्रोधमयोऽक्रोधमयो धर्ममयोऽधर्ममयः सर्वमयस्तद्यदेतदिदंमयोऽदोमय इति ।

वैशब्दोऽवधारणे । सोऽयं विज्ञानमय आत्मा ब्रह्मैव सन्नपहतपाप्मत्वादिब्रह्मरूपयुक्तोऽपि सन्मनोमयः । उपकरणोपकरणिलक्षणसंबन्धेन मनःप्रचुरो मनउपकरणक इति यावत् । एवं प्राणमय इत्यादावपि द्रष्टव्यम् । अतेजोमयस्तेजोव्यतिरिक्तमहदहंकारादिमयः । चतुर्विंशतितत्त्वमयत्वाच्छरीरस्येति द्रष्टव्यम् । अकाममयः कामव्यतिरिक्तसंकल्पश्रद्धामय इत्यर्थः । अक्रोधमयः । प्रीतिमयः । तद्यदेतदिति ब्रह्मापेक्षया नपुंसकलिङ्गनिर्देशः । इदंमयोऽदोमयः । एतल्लोकपरलोकमयः ।

यथाकारी यथाचारी तथा भवति ।

यथा कर्तुं यथा चर्तुं (चरितुं) शीलमस्य सोऽयं यथाकारी यथाचारी, अग्निहोत्रादिकं तु कर्म तद्योग्यतापादकं संध्यावन्दनादिकं त्वाचरणम् । एतत् 'चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः' [ब्र० सू० ३ । १ । ९] इतिसूत्रभाष्ये स्पष्टम् । तथा भवति । तत्फलयुक्तो भवतीत्यर्थः ।

तदेव प्रपञ्चयति—

साधुकारी साधुर्भवति पापकारी पापो भवति ।

सत्कर्मकारी ब्राह्मणादी रमणीयशरीरयुक्तो भवति पापकारी च चण्डालादिः कुत्सितशरीरयुक्तो भवति ।

साधुकारित्वपापकारित्वे अपि प्राक्तनपुण्यपापप्रयुक्ते इत्याह—

पुण्यः पुण्येन कर्मणा भवति पापः पापेन ।
अथो खल्वाहुः काममय एवायं पुरुष इति स
यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति
तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यते ॥५॥

अथोशब्दः पक्षान्तरपरिग्रहे । केचिद्बन्धमोक्षकुशलाः खल्वाहुः । यद्यपि पुण्यापुण्ये शरीरग्रहणकारणं तथाऽपि कामप्रयुक्तो हि पुरुषः पुण्यपापकर्मणी उपचिनोति । तथा च काम एवास्य संसारस्य मूलम् ।

तथा चोक्तमाथर्वणे—“ कामान्यः कामयते मन्यमानः स कामभिर्जायते तत्र तत्र ” इति । तस्मात्काममय एवायं पुरुषः । स यथाकामो भवति तत्क्रतुर्भवति । येन प्रकारेण क्रतुशब्दितोऽध्यवसाय उदेति तदनन्तरमध्यवसितं कर्म कुरुते यत्कर्म कुरुते तत्फलं च प्राप्नोतीत्यर्थः ॥ ५ ॥

तदेष श्लोको भवति ।

एतस्मिन्नर्थेऽयं श्लोकखण्डो भवतीत्यर्थः ।

तदेव सक्तः सह कर्मणैति
लिङ्गं मनो यत्र निषिक्तमस्य ।

लिङ्ग्यतेऽनेनेति लिङ्गं गमकं तादृशं मनो यत्र फले निषक्तं निविष्टं भवति तदेव तत्फलमेव तत्फलारम्भकं कर्मणा सह देहवियोगकालेऽपि सक्तः सन्नेति प्राप्नोति एष श्लोको भवतीत्यन्वयः ।

प्रकृतमनुसरति—

प्राप्यान्तं कर्मणस्तस्य यत्किंचेह
करोत्ययम् । तस्माल्लोकात्पुनरैत्यस्मै
लोकाय कर्मण इति नु कामयमानः ।

इह लोके फलमुद्दिश्य यत्किंचित्कर्म करोति तस्य कर्मणोऽन्तं भोगेनावसानं प्राप्य कृत्स्नफलं भुक्त्वेति यावत् । तस्माल्लोकादस्मै लोकाय पुनरैति । किमर्थमित्यत्राऽऽह–कर्मण इति । कर्म कर्तुमित्यर्थः । इति तु कामयमानः संसरतीत्यर्थः ।

एवमविद्वद्विषयं संसारं सप्रपञ्चमुपवर्ण्य विदुषस्तद्वैलक्षण्यं दर्शयति—

अथाकामयमानो योऽकामो निष्काम
आप्तकाम आत्मकामो न तस्य प्राणा
उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येति ॥ ६ ॥

अथशब्दोऽर्थान्तरपरिग्रहे । अकामयमानो वीतरागः । अत्रोच्यत इति शेषः । योऽकामः कामशून्यः । कथं कामशून्यतेत्यत्राऽऽह—निष्काम इति । निर्गताः कामा यस्मात्स तथोक्तः । पूर्वस्थितानां

कामानां निर्गतत्वादकामत्वमुपपद्यत इति भावः। आप्तः कामो येन स तथोक्तः। कथमाप्तकामत्वमित्यत्राऽऽह—आत्मकाम इति। आत्मैव कामो यस्य स तथोक्तः। आत्मव्यतिरिक्तस्य कामस्य वस्तुनोऽभावादात्मरूपकामस्य नित्यसिद्धत्वादाप्तकामत्वम्। अत एवाकामत्वं चेत्यर्थः। एतादृशं वस्तु ब्रह्मैव सन्ब्रह्माप्येतीति योजना। ब्रह्मैव सन्नाविर्भूतब्रह्मरूपः सन्परब्रह्मणि लीनो भवति। अतिपूर्वस्यैतेर्लयार्थकत्वात्। लयो नाम तद्विविक्ततया दर्शनाभावः। अपहतपाप्मत्वादिब्राह्मरूपसाधर्म्येण परब्रह्मविविक्ततया दर्शनायोग्यो भवतीत्यर्थः। नन्वेतन्न संभवति ब्राह्मरूपाविर्भावो हि परं ब्रह्मोपसन्नस्यैव भवति। 'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' इति श्रवणाद्देशविशेषविशिष्टब्रह्मप्राप्तिश्च देशविशेषेऽर्चिरादिगतिमन्तरेण न संभवति तद्गतिर्भूतसूक्ष्मप्राणादियुक्तस्यैव भवति तद्योगश्च कर्मा[धीनः]। विधूतकर्मणश्च देहेन्द्रियप्राणयोगासंभवेन देशविशेषविशिष्टब्रह्मप्राप्त्यसंभवाद्ब्रह्मरूपाविर्भावाभावेन ब्रह्मैव सन्ब्रह्माप्येतीति नोपपद्यत इत्याशङ्क्याऽऽह—न तस्य प्राणा उत्क्रामन्तीति। तस्मात्प्राणा नोत्क्रामन्तीत्यर्थः। नटस्य शृणोतीतिवदपादानलक्षणसंबन्धे षष्ठी। अत एव समानप्रकरणे माध्यंदिनशाखायां 'न तस्मात्प्राणा उत्क्रामन्ति' इति स्पष्टं पञ्चमी श्रूयते। इदं च वाक्यमुत्क्रान्तिपादे चिन्तितम्। तत्र हि 'अत्र ब्रह्म समश्नुते' इत्यत्रैव विदुषो ब्रह्मभावश्रवणान्नोत्क्रान्तिरिति प्राप्त उच्यते—'समाना चाऽऽसृत्युपक्रमादमृतत्वं चानुपोष्य।' [ब्र० सू० ४।२।७] आसृत्युपक्रमादागत्युपक्रमान्नाडीप्रवेशात्प्रागुत्क्रान्तिः समाना। 'शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका। तयोर्ध्वमायन्नमृतत्वमेति' [छा० ८।६।६। इति विदुषोऽपि नाडीविशेषोत्क्रमणश्रवणादुत्क्रान्तिरवर्जनीया। 'अथ मर्त्योऽमृतो भवतीत्यत्र ब्रह्म समश्नुते' इति विदुषोऽत्रैव श्रूयमाणं यदमृतत्वं तदनुपोष्य शरीरेन्द्रियसंबन्धमदग्ध्वैवोत्तरपूर्वाघयोरश्लेषविनाशरूपममृतत्वं तदुच्यते। अत्र ब्रह्म समश्नुत इति चोपासनकालब्रह्मानुभवाभिप्रायम्। 'तदाऽपीतेः संसारव्यपदेशात्।' [ब्र० सू० ४।२।८] अवश्यं च तदमृतत्वमदग्धदेहसंबन्धस्यैव वक्तव्यम्। आऽपीतेः संसारव्यपदेशात्। अपीतिरप्ययः। आब्रह्माप्ययं संसारो हि व्यपदिश्यते। 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये' इति। [छा०

६ । १४ । २] 'अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामि ।' [छा० ८ । १३ । १] इति व्यपदेशात् । 'सूक्ष्मं प्रमाणतश्च तथोपलब्धेः' [ब्र० सू० ४ । २ । ९] देवयानेन पथा गच्छतो विदुषस्तं प्रति ब्रूयात्सत्यं ब्रूयादिति चन्द्रमःसंवादस्य प्रमाणप्रतिपन्नत्वाच्च सूक्ष्मं शरीरमामोक्षमनुवर्तत इत्यभ्युपगन्तव्यम् । नह्य(ह्य)शरीरस्य चन्द्रमसा संवादः संभवति । 'नोपमर्देनातः ।' [ब्र० सू० ४ । २ । १०] अथ मर्त्योऽमृतो भवतीति श्रूयमाणममृतत्वं शरीरेन्द्रियसंबन्धानुपमर्देनैवोत्तरपूर्वाघाश्लेषविनाशरूपमङ्गीकर्तव्यम् । 'अस्यैव चोपपत्तेरेष ऊष्मा ।' [ब्र० सू० ४ । २ । ११] अस्य सूक्ष्मशरीरस्य क्वचिदुपसंहृतत्वादेव विदुषोऽपि म्रियमाणस्य क्वाचित्क ऊष्मोपलभ्यते । 'प्रतिषेधादिति चेन्न शारीरात् ।' [ब्र०सू०४।२।१२] 'स्पष्टो ह्येकेषाम् ।' [ब्र०सू०४।२।१३] 'योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति' इति विदुषो देहादुत्क्रान्तिः प्रतिषिद्धा । न चेदं शारीरापादानकोत्क्रमणनिषेधपरमिति वाच्यम् । 'यत्रायं पुरुषो म्रियत उदस्मात्प्राणाः क्रामन्त्याहो न' [बृ० ३।२।११] इति आर्तभागप्रश्ने 'नेति होवाच याज्ञवल्क्यः' [बृ० ३ । २ । ११] 'स उच्छ्वयत्याध्मायत्याध्मातो मृतः शेते' इति उच्छूनत्वादीनां शरीरधर्माणां प्रतिपादनेन शरीरापादानकोत्क्रमणप्रतिषेधस्य युक्तत्वात् । न हि शारीरस्योच्छूनत्वमाध्मातत्वं शयानत्वं वा युज्यते । अतः शरीरापादानकोत्क्रमणमेव निषिध्यत इति चेन्न । माध्यंदिनशाखायां न तस्मात्प्राणा उत्क्रामन्तीति स्पष्टतया शारीरापादानकोत्क्रान्तेर्निषेधात् । काण्वशाखायां न तस्य प्राणा इति षष्ठी नटस्य शृणोतीतिवदपादानलक्षणसंबन्धपरा । उदस्मात्प्राणा उत्क्रामन्त्याहो नेत्यार्तभागप्रश्ने विदुषोऽप्रस्तुतत्वेनाविद्वद्विषयत्वावश्यंभावो ह्यविदुषश्च शरीरादुत्क्रान्तेः प्रतिषेद्धुमशक्यतया तत्रापि शारीरकापादानकोत्क्रमणपरत्वस्यैव युक्तत्वात् । न च तस्य वाक्यशेषश्रुतमुच्छूनत्वादिकं न संभवतीति शङ्क्यम् । देहात्मनोरभेदोपचारेण देहधर्माणामुच्छूनत्वादीनामात्मन्यभिधानोपपत्तेः । शरीरापादानकोत्क्रान्तिप्रतिषेधवाचिनाऽपि 'आत्मकामो न तस्मात्प्राणा उत्क्रामन्तीति माध्यंदिनशाखावाक्येऽभेदोपचारस्याऽऽश्रयणीयत्वात् । न च प्राणानां शरीरादुत्क्रान्तेरप्रसक्ततया प्रतिषेधो न युक्त इति वाच्यम् । वृक्षादुड्डीयमानविहंगम-

सङ्कपवद्यथायथं गमनसंभवात् । अतो विद्वदविदुषोरुत्क्रान्तिः समानेति स्थितम् ॥ ६ ॥

प्रकृतमनुसरामः—

तदेष श्लोको भवति ।

तत्तत्र ब्रह्मविद्विषय एष श्लोकः प्रवृत्तो भवतीत्यर्थः ।

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति ॥

कामा दुर्विषयगोचरमनोरथा हृद्गता यदा शान्ता भवन्ति तदनन्तरमेवोपासको मर्त्योऽमृतो भवति विनष्टाश्लिष्टपूर्वोत्तराघो भवति । अत्र ब्रह्म समश्नुते । अत्रैवोपासनवेलायां ब्रह्मानुभवतीत्यर्थः ।

तद्यथाऽहिनिर्ल्वयनी वल्मीके मृता
प्रत्यस्ता शयीतैवमेवेदꣳ शरीरꣳ शेते ।

अहेर्निर्ल्वयनी सर्पस्य निर्मोकः सर्पेण वल्मीके प्रत्यस्ता विसृष्टा सर्वा(र्पा)संसक्ता निष्प्राणाऽपि दूरे पश्यतां सर्पवद्वभासमाना शयीतैवमेव ब्रह्मविदः शरीरमहंबुद्ध्यगोचरतया परित्यक्तमपि पश्यतां ब्रह्मविच्छरीरमिव भासमानं शेते ।

अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव ।

अप्य[य]दर्शनसमानाकारब्रह्मविद्यागमोत्तरकालममृतोऽपि मरणरहितोऽपि मरणात्प्रागशरीरकल्प एवेत्यर्थः । शरीरस्पर्शिपरपरिवादादिजनितविषादाद्यभावादिति भावः । प्राणो ब्रह्मैव । प्राणभृ(भृ)त्त्वेऽपि तदा (ता)त्त्विकब्रह्मानुभवसत्त्वात् । आविर्भूतब्रह्मरूप इवेत्यर्थः । तेज एव । अज्ञानलक्षणान्धकारप्रतिभट एवेत्यर्थः ।

एवं प्राप्तब्रह्मविद्यो जनक आह—

सोऽहं भगवते सहस्रं ददामीति होवाच जनको वैदेहः ॥७॥

स्पष्टोऽर्थः ।

तदेते श्लोका भवन्ति ।

तत्रास्मिन्विषये श्लोका भवन्ति ।

अणुः पन्था विततः पुराणो माँ स्पृष्टोऽ-
नुवित्तो मयैव । तेन धीरा अपियन्ति ब्रह्म-
विदः स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः ॥ ८ ॥

अणुर्दुर्विज्ञानो मानान्तरानधिगम्यः । विततो वेदान्तेषु विस्तरेण प्रतिपादितः । पुराणोऽनादिः । मां स्पृष्टः । मां प्राप्तः शताधिकनाडीद्वारा स्वदेहस्पर्शीत्यर्थः । मयैवानुवित्तो भोगदशायां मयैवानुभूतश्च योऽयं पन्था अर्चिरादिमार्गस्तेन मार्गेण धीराः प्रज्ञाशालिनो ब्रह्मविद इतोऽस्माद्देहाद्विमुक्ताः सर्वेभ्यो लोकेभ्य ऊर्ध्वं [स्वर्गं] भगवल्लोकमत्र स्वर्गशब्दः प्रकरणाद्भगवल्लोकपरः । अपियन्ति प्राप्नुवन्तीत्यर्थः ॥ ८ ॥

तस्मिञ्छुक्लमुत नीलमाहुः पिङ्गलं हरितं
लोहितं च । एष पन्था ब्रह्मणा ह्यानु-
वित्तस्तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्च ॥ ९ ॥

तस्मिन्नर्चिरादिके मार्गे शुक्लं नीलं पिङ्गलं हरितं लोहितमित्याहुः । 'असौ वा आदित्यः पिङ्गल एष शुक्ल एष नील एष पीत एष लोहितः' [छा० ८ । ६ । १] इति श्रुत्यन्तरात् । एष पन्था एषोऽर्चिरादिः पन्था ब्रह्मणाऽनुवित्तः संबद्धः । ब्रह्मपथ इति यावत् । तेन मार्गेण पुण्यकृद्ब्रह्मवित्पूर्वं पुण्यं कृत्वा तद्वशेन शुद्धान्तःकरणो ब्रह्मविच्च तैजसश्च तैजसस्तेजःसंबन्धी तेजउपासकः पञ्चाग्निविद्यानिष्ठ इति यावत् । 'तद्य इत्थं विदुः । ये चेमेऽरण्ये श्रद्धा तप इत्युपासते' [छा० ५ । १० । १] इति श्रुत्यन्तरे पञ्चाग्निविदां ब्रह्मविदां चार्चिरादिगतिश्रवणात् । यद्यपि पञ्चाग्निविद्याऽपि ब्रह्मात्मकप्रत्यगात्मविद्यात्वाद्ब्रह्मविद्यैवाथाविद्यान्तरवद्ब्रह्मविशेष्यकविद्यात्वाभावाद्ब्रह्मवित्तैजसश्चेति पृथगुक्तिरिति द्रष्टव्यम् ॥ ९ ॥

ब्रह्मवित्पुण्यकृदित्युक्तं कर्माङ्गकज्ञानस्य ब्रह्मप्राप्तिहेतुत्वं स्पष्टयति–

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते । ततो भूय
इव ते तमो य उ विद्यायाँ रताः ॥ १० ॥

ये केवलं स्वर्गादिफलोद्देशेन कर्मानुतिष्ठन्ति न तु ब्रह्मज्ञानार्थितया तेऽन्धं तमः प्रविशन्ति दुस्तरं संसारलक्षणमन्धकारं प्रतिपद्यन्त

इत्यर्थः । य उ विद्यायां रताः । उशब्दोऽवधारणे । नित्यनैमित्तिकं कर्म परित्यज्य विद्यायामेव यतन्ते ते 'मोहात्तस्य परित्यागस्तामसः परिकीर्तितः'। इत्युक्तरीत्या तामसत्यागवशात्संसारमेव प्रविशन्तीत्यर्थः । फललेशमप्यलब्ध्वा पतिता भवन्तीत्यर्थः । नानेन वचनेन ज्ञानकर्मणोः समुच्चय इति मन्तव्यम् । ज्ञानव्यतिरिक्तोपायनिषेधकवचनैर्ज्ञानस्य मोक्षोपायत्वप्रतिपादकवचनैः कर्मणां ज्ञानाङ्गत्वप्रतिपादकवचनैश्च भूयोभिर्विरोधप्रसङ्गात् ॥ १० ॥

अन्धे तमसि प्रवेशे किं भवतीत्यत्राऽऽह—

अनन्दा नाम ते लोका अन्धेन तमसाऽऽवृताः ।
तांस्ते प्रेत्याभिगच्छन्त्यविद्वांसोऽबुधो जनाः ॥११॥

अत्र बुध इति बुध्यतेः क्विबन्तस्य प्रथमाबहुवचनम् । अनन्दाः सुखलेशशून्या अन्धतमसाऽऽवृताः केचन लोकाः सन्ति ताँल्लोकान्मृत्वा गच्छन्ति ये ब्रह्मज्ञानहीना ये चाबुधाः प्रत्यगात्मविद्याशून्याः पञ्चाग्निविद्याशून्या इति यावत् । पूर्वं तयोरेव प्रस्तुतत्वादिति द्रष्टव्यम् ॥ ११ ॥

आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ।
किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् ॥ १२ ॥

यद्योऽयं पुरुषः स्वात्मानमेतादृशोऽहमस्मि देहेन्द्रियमनःप्राणधीविलक्षणो ब्रह्मात्मकोऽहमस्मीति विजानीयात्तदा देहेन्द्रियोपभोग्येषु लोकादिषु स्पृहाया अभावात्स्वबन्धुभूतभार्यापुत्रादेरप्यभावाच्च स्वस्य किं वा फलमिच्छन्वाऽनुबन्धिनः कस्याभीष्टाय वा शरीरमनुसंज्वरेत् । शरीरानुबन्धिफलमनुसृत्य कुतस्तप्येदित्यर्थः । अतोऽसौ कृतकृत्य एवेत्यर्थः ॥ १२ ॥

पुनरपि स्तौति—

यस्यानुवित्तः प्रतिबुद्ध आत्माऽस्मिन्संदेह्ये
गहने प्रविष्टः । स विश्वकृत्स हि सर्वस्य
कर्ता तस्य लोकः स उ लोक एव ॥१३॥

गहने विषयेऽस्मिन्ननर्थसंकटेऽस्मिन्देहे प्रविष्टः सन्मननाभ्यासेनावगतः प्रतिबुद्धो ध्यातश्चेत्यर्थः । स विश्वकृत्स एव लोककृदीश्वरवद्व्याप्य इति

यावत् । तत्र हेतुमाह—स हि सर्वस्य कर्ता तस्य लोकः स उ लोक एव । लोक आश्रयभूतः सर्वस्य कर्ता य ईश्वरस्तस्यापि स ब्रह्मविल्लोक एवाऽऽधार एव ज्ञानी त्वात्मैव मे मतम् [इति] भगवतैव गीतत्वात् । भगवतो ज्ञानिनं विनाऽऽत्मसत्ताया अभावादिति भावः । उशब्दः प्रसिद्धौ ॥ १३ ॥

इहैव सन्तोऽथ विद्मस्तद्वयं न चेदवेदिर्महती विनष्टिः ।

इहैव वर्तमाना वयं तद्ब्रह्म विद्मो जानीमः । वेदनं वेदिः । 'सर्वधातुभ्यः' इतीन्प्रत्ययः । नः स्वरार्थः । अवेदिरज्ञानं तदेव महती विनष्टिर्महाहानिरित्यर्थः ।

ज्ञानाज्ञानयोरेव महालाभमहानित्वं दर्शयति—

ये तद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापियन्ति ॥ १४ ॥

स्पष्टोऽर्थः ॥ १४ ॥

तज्ज्ञानस्य महाफलत्वमेवाऽऽह—

यदैतमनुपश्यत्यात्मानं देवमञ्जसा ।
ईशानं भूतभव्यस्य न ततो विजुगुप्सते ॥ १५ ॥

यदा भूतभव्येशितारं द्योतमानं सर्वभूतात्मानं ज्ञाक्पश्यति तदा सर्वस्याप्येकात्मकज्ञानात्सर्ववस्तुषु निन्दा न प्रवर्तत इत्यर्थः ॥ १५ ॥

यस्मादर्वाक्संवत्सरोऽहोभिः परिवर्तते ।

यस्माद्भूतभव्येशात्परमात्मनोऽर्वाक्तदन्यविषयेति यावत् । कालात्मा संवत्सरः स्वावयवैरहोभिः परिवर्तते परिच्छेदकत्वेन वर्तते । य आत्मा संवत्सरमासादिलक्षणकालपरिच्छेदातीत इत्यर्थः ।

तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम् ॥ १६ ॥

ज्योतिषां ज्योतिः प्रकाशकानां प्रकाशकममृतं कालापरिच्छिन्नम् । आयुः सर्वप्राणिप्राणनहेतुभूतं तं ह देवा उपासते । देवोपास्यत्वं तु तस्यैवेत्यर्थः । उक्तं च व्यासार्यैः 'ज्योतिषि भावाच्च' [ब्र० सू० १ । ३ । ३२] इति सूत्रे देवा एव ज्योतिरुपासते देवा ज्योतिरेवोपासत इति वाक्यभङ्गः स्यात् । तत्र न प्रथमकल्पो युज्यते मनुष्याणामनधिकारप्रसङ्गात् । तस्माज्ज्योतिरेवोपास्यमित्यर्थ इति ॥ १६ ॥

यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः। तमेव
मन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतम् ॥ १७ ॥

पञ्चजनसंज्ञाः पञ्चाऽऽकाशश्च यत्र प्रतिष्ठित इत्यर्थः। अत्राऽऽकाशशब्दो भूतान्तरस्याप्युपलक्षकः। पूर्वस्मिन्मन्त्रे ज्योतिषां ज्योतिरिति षष्ठ्यन्तज्योतिःशब्दस्यार्थनिर्णायकसापेक्षत्वात्पञ्चजनशब्दस्याप्यर्थनिर्णायकान्तरसापेक्षत्वात्पञ्चसंख्यान्वययोग्यानि ज्योतींषीन्द्रियाण्येवेत्यवसीयते। उक्तं च व्यासार्यैः—श्रुतपञ्चसंख्याविशेषितत्वात्पञ्चसंख्याज्योतिरन्तरप्रसिद्ध्यभावाच्च परिशेषेणेन्द्रियत्वावगम इति तमेवमन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतम्। तादृशमात्मानममृतं ब्रह्मेत्येवं विद्वानन्योऽप्यमृतो भवतीत्यर्थः ॥ १७ ॥

पञ्चजनशब्दनिर्दिष्टानि ज्योतींषि कानीत्यपेक्षायामाह—

प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य
श्रोत्रं मनसो ये मनो विदुः। ते
निचिक्युर्ब्रह्म पुराणमग्र्यम् ॥ १८ ॥

प्राणशब्देन स्पर्शेन्द्रियं गृह्यते वाय्वा(य्वा)प्यायितत्वात्। स्पर्शेन्द्रियस्य मुख्यप्राणस्य ज्योतिःशब्देन प्रदर्शनायोगात्। चक्षुष इति चक्षुरिन्द्रियं गृह्यते श्रोत्रस्येति श्रोत्रेन्द्रियं मनस इति मनो गृह्यते। समानप्रकरणे माध्यंदिनशाखायामन्नस्यान्नमिति पाठादनुक्तमन्यतो ग्राह्यमिति न्यायेन तदपि गृह्यते। सूत्रितं च 'ज्योतिषैकेषामसत्यन्ने' [ब्र० सू० १ । ४ । १३] इति। अन्नशब्देन चान्नसंबन्धिनोर्घ्राणरसनयोर्ग्रहणम्। अन्नेन घ्राणस्याऽऽप्यायितत्वलक्षणः संबन्धो रसनस्यान्नभक्षकतया संबन्ध इति द्वयोरपि ग्रहणम्। एतत्सर्वं भाष्यश्रुतप्रकाशिकयोः स्पष्टम्। एतादृशं ये जानन्ति ते पुराणमग्र्यं ब्रह्म परं ब्रह्म निश्चितवन्त इत्यर्थः। इदं च चिन्तितं समन्वयाध्याये चतुर्थपादे तत्र हि—'यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः' इति वाक्ये पञ्चत्वविशेषितया पञ्चसंख्यया पञ्चविंशतिसंख्याप्रतीतेः सांख्यस्मृतिसिद्धाब्रह्मात्मकपञ्चविंशतितत्त्वप्रतिपादकमेवेदं वाक्यमिति पूर्वपक्षे प्राप्त उच्यते—'न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च' [ब्र० सू० १। ४ ११] पञ्चविंशतिसंख्याप्रतीतिवशादपि न सांख्याभिमततत्त्वं प्रत्याशा

कार्या । नानाभावात् । नानात्वाद्भिन्नत्वादिति यावत् । सांख्याभिमता-ब्रह्मात्मकपञ्चविंशतितत्त्वेभ्यो यस्मिन्पञ्च पञ्चजना इति ब्रह्माधारकतया ब्रह्मात्मकत्वेन प्रतिपाद्यमानानां तत्त्वानां भिन्नत्वादित्यर्थः । अतिरेकाच्च । यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठित इति वाक्ये यस्मिन्नित्याधार-तया निर्दिष्टस्याऽऽत्मनश्चाऽऽकाशश्च प्रतिष्ठित इत्याकाशस्य च प्रतिपा-दनेन सप्तविंशतितत्त्वप्रतीतेश्च न सांख्यमतप्रत्यभिज्ञानम् । न संख्योपसं-ग्रहादपीत्यपिशब्दाद्वस्तुतः संख्योपसंग्रहोऽपि नास्ति पञ्चभिरारब्ध-समूहपञ्चकासंभवात् । न हि तन्त्रासिद्धतत्त्वेषु पञ्चसु पञ्चसु पञ्चत्वसं-ख्यानिर्देशनिमित्तं जात्यादिकमस्ति । न च पञ्चेन्द्रियाणि पञ्च महा-भूतानि पञ्च तन्मात्राणि अवशिष्टानि पञ्चेत्यवान्तरसंख्यानिवेशनिमि-त्तमस्त्येवेति वाच्यम् । आकाशस्य पृथङ्निर्देशेन पञ्चभिरारब्धमहाभूत-समूहासिद्धेः । अतः पञ्चजना इत्ययं समासो न समाहारविषयोऽपि तु 'दिक्संख्ये संज्ञायाम्' [पा० सू० २ । १ । ५०] इति संज्ञाविषयः । अन्यथा पञ्च पञ्च पूल्य इतिवत्पञ्च पञ्चजन्य इति स्यात् । ततश्च सप्त सप्तर्षयो मता इतिवत्पञ्च पञ्चजना इति निर्देश उपपद्यते । के पुनस्ते पञ्चजना इत्यत्राऽऽह—'प्राणादयो वाक्यशेषात्' [ब्र० सू० १ । ४ । १२] प्राणस्य प्राणमिति वाक्यशेषश्रुताः प्राणचक्षुःश्रोत्रान्नमनोरूपाः पञ्चार्था अवसीयन्ते । नन्वेवं काण्वानामन्नपाठाभावात्कथं पञ्च पञ्चजनप्रतीति-रित्यत्राऽऽह—'ज्योतिषैकेषामसत्यन्ने' [ब्र० सू० १ । ४ । १३] परेषां काण्वानां पाठेऽसत्यन्ने तं देवा ज्योतिषां ज्योतिरिति प्रक्रमश्रुतषष्ठ्यन्त-ज्योतिःशब्दादेव पञ्चजनशब्दितानीन्द्रियाणीत्यवसीयते । ज्योतिःशब्द-स्याप्यर्थनिर्णायकसापेक्षत्वात्पञ्चजनशब्दस्याप्यर्थनिर्णायकसापेक्षत्वात् । परस्पराकाङ्क्षावशेन पञ्चत्वसंख्यायुक्तानि प्रकाशतया ज्योतिःशब्दि-तानीन्द्रियाण्येवं पञ्चजना इति स्थितम् । प्रकृतमनुसरामः ॥ १८ ॥

तज्ज्ञाने साधनमाह—

मनसैवानुद्रष्टव्यम् ।

अनु पश्चाच्छ्रवणमननानन्तरमित्यर्थः । मनसैव द्रष्टव्यम् । दर्शनसमा-नाकारस्मृतिसंततिरूपध्यानं विशुद्धेन मनसा संपाद्यमित्यर्थः ।

नन्वेकस्याऽऽत्मनः पञ्चजनभूताकाशाद्याधारत्वं न संभवतीति मन्य-मानं प्रत्याह—

नेह नानाऽस्ति किंचन ।

इह द्रष्टव्ये ब्रह्मणि । नानाशब्दो भावप्रधानः । नानात्वमित्यर्थः । यस्मिन्पञ्च पञ्चजना इति मन्त्रनिष्ठ आत्मनि किंचन नानात्वं नास्ति भेदलेशोऽपि नास्तीत्यर्थः ।

मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥ १९ ॥

इवशब्दोऽल्पार्थः । निखिलप्रपञ्चाधारभूत आत्मनि अल्पमपि नानात्वं यः पश्यति स संसारात्संसारमाप्नोति । अत्यन्तं संसारमाप्नोतीत्यर्थः । अस्य वाक्यस्य परैरप्येवं व्याख्यातत्वान्नात्र वाक्ये प्रपञ्चमिथ्यात्वप्रतिपादनं प्रका(त्या)शा कार्या । विज्ञानमात्रास्तित्वनिरासिभिः 'नाभाव उपलब्धेः' [ब्र० सू० २ । २ । २८] । 'वैधर्म्याच्च न स्वप्नादिवत् ।' [ब्र०सू० २ । २ । २९] 'न भावोऽनुपलब्धेः' [ब्र० सू० २ । २ । ३०] । इति सूत्रैः सर्वशून्यत्वनिरासिना 'सर्वथाऽनुपपत्तेश्च' [ब्र० सू० २ । २ । ३२] इति सूत्रेण प्रपञ्चमिथ्यात्ववादस्य निरस्तत्वात् । तत्र हि विज्ञानमेव तत्त्वं नान्यत्परमाणुसमुदायरूपं तदारब्धावयविरूपं वा किंचिदस्ति परमाणूनामप्रामाणिकत्वात् । तेषां क्षणिकानां समुदायभावासंभवात् । निरवयवेषु परमाणुषु संयोगस्य व्याप्यवृत्तित्वाव्याप्यवृत्तित्वविकल्पदुःस्थत्वेनावयवेष्ववयविनः कृत्स्नदेशविकल्पदुःस्थत्वेन च परस्परं संयुक्तावयवतदाश्रितावयव्यसंभवाच्च बाह्यार्थानामान्तरविज्ञानसंबन्धानिरूपणेन तद्विषयत्वासंभवाच्च संबन्धं विना विषयत्वे सर्वविषयाणामेकस्मिन्नेव विज्ञानेऽवभासप्रसङ्गात् । न च बाह्यार्थाभावे नीलपीतादिज्ञानानां निरालम्बनत्वापातः । ज्ञानानामेव नीलपीताद्याकारत्वात् । नीलादिकं ज्ञानाभिन्नं ज्ञानोपलम्भव्याप्योपालम्भविषयत्वाज्ज्ञानवत । व्याप्यत्वस्याभेदेऽपि संभवेन दृष्टान्तासिद्धिः । न च नीलतज्ज्ञानयोरभेदेऽहमिदं जानामीतिक्रियाकर्मकर्तृभावेन भेदावभासविरोध इति वाच्यम् । तस्य द्विचन्द्रज्ञानवद्भ्रान्तत्वात् । तदाहुः—

सहोपलम्भनियमादभेदो नीलतद्धियोः ।
भेदस्तु भ्रान्तिविज्ञानैर्दृश्यतेन्दाविवाद्वये ॥ इति ॥
अविभागोऽपि बुद्ध्यात्माविपर्यासितदर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥ इति ।

ननु सर्वस्याप्यान्तरत्वे बाह्यत्वावभासः कथमिति चेन्न । उपरि स्थितानां नक्षत्रादीनामुच्चतां भूमिष्ठत्वावभासवद्बाह्यत्वावभासस्यापि भ्रमत्वात् । अपि च स्तम्भज्ञानं कुड्यज्ञानमित्येवंरूपस्य ज्ञानपातस्य ज्ञानगतविशेषमन्तरेणानुपपत्तेरवश्यं विषयसामान्यं ज्ञानस्याभ्युपगन्तव्यम् । ततश्चाङ्गीकृते ज्ञानगताकार आकारद्वयानुपलम्भादपार्थिका बहिरर्थकल्पना । स्वप्नादिवच्चेदं द्रष्टव्यम् । यथा स्वप्नमायामरीच्युदकगन्धर्वनगरादिप्रत्यया विनैव बाह्यार्थेन ग्राह्यग्राहकाकारा भवन्ति एवं जागरितप्रत्यया अपि प्रत्ययत्वाविशेषात् । कथं पुनरसति बाह्येऽर्थे प्रत्ययवैचित्र्यमुपपद्यत इति चेन्न । वासनावैचित्र्यस्यैव नियामकत्वात् । अनादौ हि संसारे बीजाङ्कुरवज्ज्ञानानां वासनानां चान्योन्यनिमित्तकत्वेन वैचित्र्यात् । तस्माद्भावो बाह्यार्थस्यैवं प्रत्यवस्थिते योगाचारे पठत्याचार्यः—'नाभाव उपलब्धेः' [ब्र० सू० २ । २ । २८] इति । न खल्वभावो बाह्यार्थस्य युक्तः कस्मादुपलब्धेः । उपलभ्यते हि प्रतिप्रत्ययं बाह्योऽर्थः स्तम्भकुड्यादिः । न चोपलभ्यमानस्यैवाभावो युक्तः । यथा हि कश्चिद्भुञ्जानो भुजिसाध्यां तृप्तिं चानुभवन्ब्रूयान्नाहं भुञ्जे न च तृप्यामीति तद्वदिन्द्रियसंनिकर्षेण स्वयमुपलभमान एव बाह्यमर्थं नाहमुपलभे न च सोऽस्तीति ब्रुवन्कथमुपादेयवचनः स्यात् । ननु नाहमेवं ब्रवीमि नैवार्थमुपलभ इति किं तूपलब्धिव्यतिरिक्तं नोपलभ इति ब्रवीमि । बाढमेवं ब्रवीषि निरङ्कुशत्वात्ते तुण्डस्य । न तु युक्त्युपेतं ब्रवीषि । यत उपलब्धिव्यतिरेकोऽपि बलादर्थस्याभ्युपगन्तव्य उपलब्धेरेव । न हि कश्चिदुपलब्धिमेव स्तम्भः कुड्यं चेत्युपलभते । उपलब्धिविषयत्वेनैव स्तम्भकुड्यादीन्सर्वे लौकिका उपलभन्ते । ननु बाह्यस्याप्यर्थस्यासंभव उक्तः । प्रमाणप्रवृत्त्यप्रवृत्तिपूर्वकौ हि संभवासंभवौ न तु संभवासंभवपूर्विके प्रमाणप्रवृत्त्यप्रवृत्ती । यद्धि प्रत्यक्षादीनामन्यतमेनापि प्रमाणेनोपलभ्यते तत्संभवति । यत्तु न केनचिदुपलभ्यते तन्न संभवति । इह तु यथास्वं सर्वैरेव प्रमाणैर्बाह्योऽर्थ उपलभ्यमानः कथं न संभवतीत्युच्यते । यदुक्तं स्वप्नादिप्रत्ययवज्जागरितप्रत्यया अपि विनैव बाह्यार्थेन भवेयुः प्रत्ययत्वाविशेषादिति तत्राऽऽह—'वैधर्म्याच्च न स्वप्नादिवत्' [ब्र० सू० २ । २ । २९] । न स्वप्नादिवज्जागरितप्रत्यया भवितुमर्हन्ति । कस्माद्वैधर्म्यात् । किं पुनर्वैधर्म्यं बाधाबाधौ । बाध्यते हि स्वप्नोपलब्धं वस्तु प्रबुद्धस्य । मिथ्यैव मयोपलब्धो महाजनसमागमः । नह्यस्ति महाजनसमागमो निद्राग्लानं तु मे मनो

बभूव तेनैषा भ्रान्तिरुद्बभूवेति। एवं मायादिष्वपि भवति यथायथं बाधः। नैवं जागरितोपलब्धं स्तम्भादिकं कस्यांचिदवस्थायां बाध्यते। तत्रैवं सति न शक्यते वक्तुं मिथ्याजागरितोपलब्धिरुपलब्धित्वात्स्वप्नोपलब्धिवदित्युभयोरन्तरं स्वयमनुभवता। न च स्वानुभवापलापः प्राज्ञमानिभिर्युक्तः कर्तुम्। तस्माद्विज्ञानव्यतिरिक्तो बाह्यार्थोऽबाधितोऽभ्युपगन्तव्य इति। एवं सूत्रं व्याकुर्वतां परेषां प्रपञ्चमिथ्यात्ववादः कथं संगतः स्यात्। मानान्तराप्राप्तजगत्कारणत्वादिब्रह्मधर्मप्रतिषेधे ब्रह्मकृतो न प्रतिषिध्येत ब्रह्मव्यतिरिक्तस्य स्वरूपतो निषेधेऽखण्डार्थवेदान्तवाक्यगतयोग्यताया अप्यसत्त्वेन तत्समसत्ताकस्य वाक्यस्यार्थभूतब्रह्मणोऽप्यसत्त्वापातात्। प्रपञ्चस्य शशशृङ्गादिवन्निःस्वरूपत्वापाताच्च। न च न स्वरूपेण निषेधं ब्रूमः। किंतु पारमार्थिकत्वाकारेणेति वाच्यम्। स्वरूपस्यानिषेधेऽबाध्यत्वलक्षणपारमार्थिकत्वस्यापि सत्त्वेन तस्यापि निषेधानर्हत्वात। ननु सत्त्वनिषेध एव स्वरूपनिषेधः। अतो नेह नानाऽस्तीति सत्त्वनिषेधात्स्वरूपमपि निषिद्धमेव। न च तस्य निःस्वरूपत्वे शून्यवादाविशेष इति वाच्यम्। ब्रह्मव्यतिरिक्तविषये शून्यवादाविशेषस्येष्टत्वादिति चेत्तर्हि नाभाव उपलब्धेरित्यधिकरणविरोधस्य दुर्निरासत्वात्। चैत्यं वन्देतेति वाक्याज्ज्योतिष्टोमेनेति वाक्यस्य वैषम्याभावापत्तेश्च। न चोभयोरसदर्थत्वाविशेषेऽपि ज्योतिष्टोमेनेति वाक्यार्थस्य बौद्धाभिमतसांवृत्तिकसत्यत्वस्थानाभिषिक्तव्यावहारिकसत्यत्वस्याभ्युपगतत्वाच्चैत्यवन्दनवाक्ये तस्याप्यभावाद्वैषम्यमिति वाच्यम्। नेह घटोऽस्तीति वाक्यऽपि लोकप्रसिद्धव्यावहारिकसत्त्वनिषेधवन्नेह नानाऽस्तीति वाक्येऽपि लोकप्रसिद्धसत्त्वस्यैव निषेद्धुं युक्ततया सत्त्वान्तरनिषेधस्यासंभवात्। इतरथा नेह नानाऽस्तीत्यस्याः श्रुतेरप्रसक्तप्रतिषेधतापातात्। उक्तं चाभयुक्तैः—

वेदोऽनृतो बुद्धकृतागमोऽनृतः प्रामाण्यमेतस्य च तस्य चानृतम्।
बोद्धाऽनृतो बुद्धिफले तथाऽनृते यूयं च बौद्धाश्च समानसंविदः॥

इति अलं प्रसक्तानुप्रसक्त्या॥ १९॥

प्रकृतमनुसरामः—

एकधैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम्।

अप्रमयमपरिच्छेद्यं सर्वभूतात्मभूतं ब्रह्मैकत्वेनैव द्रष्टव्यमित्यर्थः। व्यासार्यैस्तु एकधाऽनुद्रष्टव्यं केषांचित्स्वनिष्ठत्वं ब्रह्मान्यपरतन्त्रत्वं वा

न मन्तव्यमपि तु परमात्मपरम्भ्रतयैकरूपमेव द्रष्टव्यमित्यर्थ इत्युक्तम् । नेह नानाऽस्ति किंचनेत्यत्रापि अब्रह्मात्मकनानात्वं निषिध्यत इत्युक्तम् । तदप्यविरुद्धमेव । एकार्थपर्यवसायित्वाद्द्वयोरपीति द्रष्टव्यम् ।

विरजः पर आकाशादज आत्मा महान्ध्रुवः ॥ २० ॥

विरजो रागादिदोषरहितः । आकाशादपि परः कारणभूतः । ध्रुवः स्थिरोऽविनाशीत्यर्थः । अज उत्पत्तिरहितः । एवंभूतो महानात्मा ॥ २० ॥

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ।

तादृशमात्मानं धीरः प्रज्ञाशाली विज्ञाय श्रवणमननाभ्यां ज्ञात्वा प्रज्ञां निदिध्यासनं कुर्वीतेत्यर्थः। अत्र ब्राह्मणग्रहणं द्विजातेरुपलक्षणम् । यद्वा ब्रह्माधीत इति ब्राह्मणोऽधीतवद् इत्यर्थः ।

नानुध्यायाद्बहूञ्छब्दान्वाचो
विग्लापनꣳ हि तदिति॥२१॥

बहूञ्छब्दान्नानुध्यायान्न चिन्तयेदित्यर्थः । तद्वागनुध्यानादिकं वाचो विग्लापनं विग्लानिसाधनं श्रमजनकमित्यर्थः । इति मन्त्रसमाप्तौ॥२१॥

स वा एष महानज आत्मा योऽयं विज्ञानमयः
प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते ।

प्राङ्निर्दिष्टोऽज आत्मा महान्ध्रुव इति । योऽयं निर्दिष्ट आत्माऽयं कतम आत्मा । योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिरिति निर्दिष्टे जीवात्मनि शेते तदन्तर्यामितया वर्तत इत्यर्थः । अत एवोत्तरत्राऽऽत्मन्येवाऽऽत्मानं पश्यतीति वक्ष्यति । तत्र हृद्यन्तरित्यस्य व्याख्यानं य एषोऽन्तर्हृदय इति । ज्योतिरित्यस्य व्याख्यानमाकाश इति । ज्योतिराकाशशब्दयोः प्रकाशकत्वार्थकत्वेनैकार्थकत्वात् । अतश्चात्राऽऽकाशशब्दो जीवपर एव । ननु 'कामादीतरत्र तत्र चाऽऽयतनादिभ्यः' [ब्र० सू० ३ । ३ ३९] इत्यधिकरणे वाजसनयके तु आकाशे शयानस्य वशित्वादिश्रवणात्तस्य शयानस्य परमात्मत्वे सति तदाधाराभिधायिन आकाशशब्दितस्य तस्यान्ते सुषिरं सूक्ष्ममिति हृदयान्तर्गतस्य सुषिरशब्दवाच्यस्या-

वकाशस्याभिधायकत्वमवगम्यत इति भाष्ये श्रुतप्रकाशिकायां चाऽऽकाशशब्दस्य भूताकाशपरत्वं समर्थितमिव प्रतीयते। अतस्तद्विरुद्धमिदमिति चेन्मैवम्। दहरोऽस्मिन्नन्तराकाश इति च्छान्दोग्यगताकाशशब्दस्येव परमात्मपरत्वं नास्तीत्यत्र तात्पर्यात्। केचित्तु भाष्यानुरोधादन्तर्हृदये यो भूताकाशस्तत्र विज्ञानमयो महानात्मा शेत इत्येवार्थः। अस्मिन्प्रकरणे 'प्राज्ञेनाऽऽत्मना संपरिष्वक्तः' [बृ० ४ । ३ । २१] 'प्राज्ञेनाऽऽत्मनाऽन्वारूढः' [बृ० ४ । ३ । ३५] इति सुषुप्त्युत्क्रान्त्योर्जीवपरमात्मनोरभेदप्रतिपादनेन विज्ञानमयशब्दनिर्दिष्टस्य महतश्च परमात्मनो भेदासंभवाद्विज्ञानमयशब्देन तच्छरीरकः परमात्मैवाभिधीयते। 'महद्भूतमनन्तमपारं विज्ञानघन एव। एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति' इति मैत्रेहुः (मन्त्र आहुः)। केचित्तु योऽयं विज्ञानमय इत्यत्र कतम आत्मा योऽयं विज्ञानमय इति निर्दिष्टजीवस्य प्रत्यभिज्ञावशेन ग्रहणं न संभवति। तस्य महानज इति महत्त्वाद्यसंभवात्। अपि तु विज्ञानमय इति साक्षादेव परमात्मनो निर्देश इत्याहुः।

सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः।

सर्वस्य ब्रह्मरुद्रादेर्वशी सर्वो ह्यस्य वशे वर्तते। उक्तं चैतस्य वा अक्षरस्य प्रशासन इति। अतश्च प्रशासनेन धारकत्वलक्षणमात्मत्वमुक्तं भवति। सर्वस्येशान इत्यनेन नियन्तृत्वलक्षणमात्मत्वम्। सर्वस्याधिपतिरिति शेषित्वलक्षणमात्मत्वमुक्तमिति द्रष्टव्यम्। इदं छान्दोग्यदहरविद्याप्रतिपन्नसत्यकामत्वादीनामप्युपलक्षणम्। उक्तं च भाष्ये वशित्वादयश्च वाजसनयके श्रुताश्छान्दोग्यश्रुतस्य गुणाष्टकान्यतमभूतस्य सत्यसंकल्पत्वस्य विशेषा एवेति सत्यसंकल्पत्वसहचारिणां सत्यकामत्वादीनामपहतपाप्मत्वपर्यन्तानां सद्भावमवगमयन्ति।

स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान्।

साध्वसाधुकर्मकृतोत्कर्षापकर्षशून्य इत्यर्थः।

एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल
एष सेतुर्विधरण एषां लोकानामसंभेदाय।

सर्वेश्वरो नियन्ता। अधिपतिः शेषी। भूतपालो रक्षकः। एषां सर्वेषां लोकानामसांकर्याय धारकः सेतुरप्ययमेव। अनेनेश्वरेण सेतुनाऽ-

विधार्यमाणा हि लोका निर्मर्यादा भवेयुरिति भावः । अत्र ब्रह्मप्रकरणोपक्रमे 'आत्मैवेदमग्र आसीत्पुरुषविधः' इति देवताविशेषस्य नारायणस्यैव प्रस्तुतत्वात्तस्यैव सर्वेश्वरत्वादिकथनाद्देवतान्तराणां नात्रावकाश इति द्रष्टव्यम् । इदं च वाक्यं गुणोपसंहारपादे चिन्तितम् । 'य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी सर्वस्येशानः' इति आकाशशयनत्ववशित्वादिगुणविशिष्टतयोपास्यश्छान्दोग्यदहरविद्याप्रतिपादितापहतपाप्मत्वादिगुणाष्टकविशिष्टाकाशाद्भिन्नः । अतो रूपभेदाद्विद्याभेद इति पूर्वपक्षे प्राप्तेऽभिधीयते—'कामादीतरत्र तत्र चाऽऽयतनादिभ्यः' [ब्र० सू० ३ । ३ ३९] तत्र चेतरत्र च स्थलद्वयेऽपि सत्यकामादिविशिष्टं ब्रह्मैवोपास्यम् । हृदयायतनत्वसेतुत्वविधरणत्वादिभिर्विद्यैक्यप्रत्यभिज्ञानात् । वाजसनेयकश्रुतवशित्वादीनां छान्दोग्यश्रुतसत्यसंकल्पत्वविततिरूपतया रूपभेदाभावात् । 'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' [छा० ८ । ३ । ४] इति 'अभयं वै ब्रह्म भवति' [बृ० ४ । ४ । २५] इति चोभयत्रापि ब्रह्मप्राप्तिरूपफलसंयोगाविशेषाच्च । इयांस्तु विशेषः—छान्दोग्यदहराकाशे परमात्मधर्मसद्भावादाकाशशब्दितस्य परमात्मत्वं न भूताकाशत्वम् । वाजसनेयके तु आकाशे शयान एव परमात्मलिङ्गसद्भावाच्छयानस्यैव परमात्मत्वमाकाशस्य तु भूताकाशत्वमिति । ननु 'नेह नानाऽस्ति किंचन' 'एकधैवानुद्रष्टव्यम्' 'स वा एष नेति नेति' इत्यादिपूर्वोत्तरवाक्यैर्निर्गुणमेवेह ब्रह्म प्रतिपाद्यते । छान्दोग्ये तु सगुणमतो निर्गुणसगुणब्रह्मविद्ययोरैक्यासंभवाद्वाजसनेयकश्रुतमोक्षार्थनिर्गुणोपासने गुणानां लोप एवेत्याह—'आदरादलोपः' [ब्र० सू० ३ । ३ । ४०] वाजसनेयकेऽपि 'सर्वस्य वशी सर्वस्येशान एष सर्वेश्वर एष भूताधिपतिरेष भूतपालः' इति भूयो भूयो गुणोपदेशाद्गुणेष्वादरः प्रतीयते । अतो वाजसनेयकश्रुतदहरविद्याया अपि सगुणत्वादेव न गुणानां लोपः कार्यः । नेह नानेत्यादिनिषेधानामब्रह्मात्मकनानात्वनिषेधपरत्वेन विहितगुणनिषेधपरत्वाभावात् । ननु च्छान्दोग्ये 'य इहाऽऽत्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति' [छा०८।१।६] इति च्छान्दोग्यदहरविद्यायाः सर्वलोककामचारलक्षणसांसारिकफलसंबन्धः प्रतीयते । वाजसनेयके तु 'अभयं वै ब्रह्म भवति' इति मुक्तिफलकत्वमतो नानयोर्विद्ययोरैक्यमित्यत्राऽऽह—

'उपस्थितेऽतस्तद्वचनात्' [ब्र० सू० । ३ । ३ । ४१]। उपस्थिते ब्रह्मोपसंपन्ने प्रत्यगात्मनि अत उपसंपत्तेरेव हेतोः सर्वलोककामचारः श्रूयते। 'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः स तत्र पर्येति' [छा० ८ । १२ । ३] 'तस्य सर्वेषु लोकेषु कामचारो भवति' इति सर्वबन्धविनिर्मुक्तानुभाव्यफलतया हि सर्वलोककामचारः श्रूयते । अतश्छान्दोग्यगतदहरविद्याऽपि मुक्तिफलैवातो न विद्याभेद इति तत्र स्थितम् । वाजसनेयकगतहार्दविद्या निर्गुणविद्येति वदन्तः परे प्रत्युक्ताः। तथा हि सति च्छान्दोग्यसगुणहार्दविद्यैक्यसमर्थनस्य च परस्परगुणोपसंहारसमर्थनस्य चासंगतिप्रसङ्गात्। न च निर्गुणायामपि विद्यायां ब्रह्मस्तुत्यर्थमेव सगुणविद्यासंबन्धिगुणोपसंहारः संभवतीति वाच्यम्। निर्गुणस्योत्कृष्टस्य परब्रह्मणः सगुणत्वरूपापकर्षप्रतिपादनेन निन्दाया एव प्रतीयमानतया स्तुतेरप्रतीतेः। किं च लोके हि स्तुतिर्विधेयरुच्युत्पादनेन सप्रयोजना। न चात्र निर्गुणस्य तज्ज्ञानस्य वा विधेयत्वमस्ति प्रतिपाद्यते च निर्गुणे ब्रह्मणि सगुणत्वप्रतिपादनलक्षणस्तुतिश्च निर्गुणप्रतिपत्तिलक्षणशेषिविरुद्धा। अतः कामादीतरत्रेत्यधिकरणे परेषां विद्यैक्यगुणोपसंहाराभिलापनं यत्किंचिदेतदित्यास्तां तावत्। यच्चेदमुच्यते निर्गुणवाक्यसंनिधिपठितस्य सर्वस्य वशीत्यादिगुणगणसमर्पकवाक्यस्य निषेध्यानुवादकतयैकवाक्यत्वसंभवे वाक्यभेदेन गुणप्रापकता न युक्तेति तन्न। वशित्वादीनामन्यता[था] प्राप्तेः। श्रुतिप्राप्तस्य श्रुत्या [निषेधेऽ] हिंसावाक्यमग्नीषोमीयहिंसाया अग्रहणवाक्यं च षोडशिग्रहणस्यासद्वेत्यादिवाक्यं च ब्रह्मसत्ताया निषेधकं किं न स्यात्। किं च मृडमृदेत्यादिविधिर्न क्त्वा सेडिति निषेधस्यैव सगुणवाक्यमेव निर्गुणत्वानिषेधकं किं न स्यात्। न च जगत्कर्तृत्वाक्षिप्तसार्वज्ञ्यादिगुणनिषेधायानूद्यन्त इति वक्तुं शक्यम्। तथा हि सति जगदारोपाधिष्ठानत्वेन कुसमयसिद्धं ब्रह्मसत्त्वमसद्वा इदमग्र आसीदिति निषेद्धुं सत्यं ज्ञानमनन्तमित्यनूद्यते। ज्ञाननिवर्त्यत्वेन श्रुतेनाऽऽक्षिप्तं विश्वमिथ्यात्वं नेह नानाऽस्तीत्यनूद्यते 'विश्वं सत्यं मघवाना' इति वाक्येन प्रतिषेद्धुमिति किं न स्यात्। सत्यत्वं हि मिथ्यात्वप्रतिषेध एव। 'आत्मैवेदꣳ सर्वम्' इति वाक्यप्राप्तो जीवब्रह्माभेदस्तत्त्वमसीत्यनूद्यते द्वा सुपर्णेति निषेद्धुमिति किं न स्यात्। नेह नानाऽस्ति किंचनेति वाक्ये किंचनेत्यनेनैव निषेध्यसमर्पणस्य सिद्धतया निषेध्यसमर्पणाय

' एष सर्वेश्वरः ' इत्यादीनामनपेक्षितत्वात् । न हि न सुरां पिबेदित्यत्र निषेध्यसमर्पणाय सुरां पिबेदिति वाक्यमपेक्षितम् । वशित्वादीनां निषेधार्थमनुवादे स न साधुना कर्मणा भूयानिति निषिद्धानां कर्मकृतोत्कर्षादीनामिव ब्रह्मण्यस्य व्यावहारिकसत्त्वव्याप्यभावप्रसङ्गात् । यच्चेदमुच्यते सगुणनिर्गुणवाक्यविरोधे परत्वेन निर्गुणवाक्येनापच्छेदन्यायेन सगुणवाक्यं बाध्यत इति तदेतत्सकलजनविदितसामान्यविशेषन्यायानभिज्ञानात् ।

को हि मीमांसको ब्रूयाद्विरोधे शास्त्रयोर्मिथः ।
एकं प्रमाणमितरत्त्वप्रमाणं भवेदिति ॥

लोके हि सामान्यं विशेषेण सावकाशं निरवकाशेन नित्यं नैमित्तिकेन नैमित्तिकं काम्येनातिदिष्टमुपदिष्टेन बाध्यमानमपि स्वोचितसत्यवस्तुसमर्पणेन संभावनीयं दृष्टं न तु मिथ्याभूतवस्तुविषयकतया । ततश्च सगुणवाक्यस्य मिथ्याभूतविषयसमर्पणेन संभावनां कुर्वन्कथं नोपहास्यः । अतोऽत्रापच्छेदनयानवतारादुत्सर्गापवादनिषेधस्य विहितेतरगुणविषयत्वस्य वक्तव्यत्वात् । उपाध्यनुक्तिपूर्वकमुक्तानां गुणानां निरुपाधिकत्वस्य स्वतः प्राप्तत्वात् । स्वाभाविकी ज्ञानबलक्रिया चेति स्वाभाविकत्वश्रुतेः । नान्यो हेतुर्विद्यत ईशनायेतीश्वरत्वस्याहेतुकत्वश्रवणात् । सत्यः सोऽस्य महिमेति च सत्यकाम इति च तेषां गुणानां सत्यत्वस्यापि तत्प्रतिपादनात् । तेषां मानान्तराप्राप्तानां निषेधार्थमनुवाद इत्यस्यासंभवात् । क्वचिद्गुणानामुपास्यत्वश्रवणात्सत्यत्वे—

उत्तरस्मिंस्तापनीये शैब्यप्रश्नेऽथ काठके ।
माण्डूक्यादौ च सर्वत्र निर्गुणोपास्तिरीरिता ॥

इति परैरप्युपास्यत्वेनाभ्युपगतस्य निर्गुणस्यासत्त्वप्रसङ्गाच्च । यः सर्वज्ञः सर्वविदिति स्वरूपोपदेशपरवाक्येषूपासनाविध्यश्रवणेऽपि गुणानां श्रवणाच्च । ' तमेवं विद्वानमृत इह भवति ' इति सगुणज्ञानस्य मोक्षहेतुत्वश्रवणेन गुणानां सत्यत्वमवश्याभ्युपगन्तव्यम् । गुणनिषेधश्रुतयस्तु अध्यात्मशास्त्रप्रसिद्धत्वादिगुणनिषेधपरा इत्येवाभ्युपगन्तव्यम् । कस्मादुच्यते ब्रह्मेति बृहन्तो ह्यस्य गुणाः—

न हि तस्य गुणाः सर्वे वक्तुं मुनिगणैरपि ।
वक्तुं शक्या वियुक्तस्य सत्त्वाद्यैरखिलैर्गुणैः ॥
नान्तं गुणानां गच्छन्ति तेनानन्तोऽयमीरितः । इति ।
तवानन्तगुणस्यापि षडेव प्रथमे गुणाः ।

वर्षायुतैर्यस्य गुणा न शक्या वक्तुं समेतैरपि सर्वदेवैः ।
महात्मनः शङ्खचक्रासिपाणेर्विष्णोर्जिष्णोर्वसुदेवात्मजस्य ॥
चतुर्मुखायुर्यदि कोटिवक्त्रो भवेन्नरः क्वापि विशुद्धचेताः ।
न ते गुणानामयुतैकमंशं वदेन्न वा देववर प्रसीद ॥

यथा रत्नानि जलधेरसंख्येयानि पुत्रक ।
तथा गुणा ह्यनन्तस्य ह्यसंख्येया महात्मनः ॥
इषुक्षयान्निवर्तन्ते नान्तरिक्षक्षितिक्षयात् ।
मतिक्षयान्निवर्तन्ते न गोविन्दगुणक्षयात् ॥

समस्तकल्याणगुणात्मकोऽसौ स्वशक्तिलेशाद्धृतभूतसर्गः ।
इच्छागृहीताभिमतोरुदेहः संसाधिताशेषजगद्धितोऽसौ ॥
तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैकराशिः ।
परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे ॥

इत्यादिप्रमाणानामाञ्जस्यमेवमेके प्रपद्यन्ते । उक्तं च वरदाचार्यैः—
यद्ब्रह्मणो गुणशरीरविकारभेदकर्मादिगोचरविधिप्रतिषेधवाचः ।
अन्योन्यभिन्नविषया न विरोध[भाव]मर्हन्ति तन्नविधयः प्रतिषेधबाध्याः ॥ इति ।

अनयैव दिशाऽन्तर्यामिब्राह्मणादिषु 'य आत्मनि तिष्ठन्' इत्यादिवाक्यैर्जीवब्रह्मणोर्नियन्तृनियम्यभावलक्षणभेदस्य विहितत्वान्निषेधस्य तदितरविषयत्वस्यैव युक्तत्वात्समस्तहेयरहितस्य ब्रह्मणो हेयाश्रयजीवैक्यस्यायुक्तत्वात् । हेयस्यापारमार्थ्येऽपि तस्य निरसनीयतया हेयत्वस्यावर्जनीयत्वात् । तत्प्रतिभटतयोक्तस्य ब्रह्मणस्तत्संबन्धार्हवस्त्वैक्यासंभवात् । सवज्ञस्य ब्रह्मणः स्वसंकल्पेन स्वगतहेयस्य तद्विभ्रमस्य वाऽऽपादनायोगात् । असर्वज्ञत्वे सार्वज्ञ्यश्रुतिविरोधात्सर्वशक्तेः स्वगतहेयानिवारकत्वायोगात् । अशक्तत्व[स्य]सर्वशक्तित्वश्रुतिविरोधेनाभ्युपगमानर्हत्वात् । श्रुतिबलादेव विरुद्धयोरप्यविरोधाभ्युपगमे मीमांसानैरर्थक्यप्रसङ्गात् 'पृथगात्मानं प्रेरितारं च मत्वा' इति पृथग्ज्ञानस्य मोक्षहे-

तुत्वावेदनात् । यस्मात्क्षरमतीतोऽहमिति जीववैलक्षण्यज्ञानवतस्त्वसंमूढः स मर्त्येष्वित्यसंमूढत्वप्रतिपादनाज्जीवब्रह्मणोर्नियन्तृनियम्यभावलक्षण-भेदस्य मानान्तराप्राप्तत्वाद्विहितस्य निषेधायोगादुपासनार्थत्वाश्रयण-स्य 'अथ योऽन्यां देवतामुपास्ते ' इति वाक्यप्रतिपन्नैक्येऽपि संभवात् । ऐक्यस्य स्वरूपोपदेशवाक्यप्रतिपन्नवत्स्वरूपोपदेशपरान्तर्यामिब्राह्मण-प्रतिपाद्यत्वस्य नियन्तृनियम्यभावलक्षणभेदेऽपि सत्त्वात् । भेदनिषेधश्रु-तयस्तु पृथक्सिद्धत्वलक्षणब्रह्मात्मकभेदनिषेधपरा इत्येव व्यवस्थितिरि-त्यलं प्रसक्तानुप्रसक्त्या ।

प्रकृतमनुसरामः—

तमेतं वेदानुवचनेन ब्राह्मणा विविदि-
षन्ति यज्ञेन दानेन तपसाऽनाशकेन ।

ईदृशं परमात्मानं वेदाध्ययनेन यज्ञेन दानेनान[शन]लक्षणेन तपसा ज्ञातुमिच्छन्ति । आशोऽशनं भावे घञ् । अनाशोऽनशनं स्वार्थे कः । तच्चानशनं कामानशनात्मकं न तु सर्वात्मनाऽनशनं देहपा-तप्रसङ्गात् । यद्वा न विद्यत आशो यस्य तदनाशं स्वार्थे कप्रत्ययः । फलाभिसंधिरहितेनेति यावत् । अश्वेन जिगमिषति असिना जिघांसती-त्यादावश्वादेः सन्प्रत्ययप्रकृत्यर्थभूतगमनादिसाधनत्वप्रतिपादनदर्शनादि-हापि वेदनसाधनत्वमेव प्रतिपाद्यते । न तु विविदिषासाधनत्वम् । यद्यपि प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यादित्युत्सर्गस्तथाऽप्यश्वेन जिग-मिषतीत्यादौ सन्नन्तप्रयोगस्थले प्रकृत्यर्थप्राधान्यस्यैव व्युत्पत्तिसिद्धत्वा-दत्रापि प्रकृत्यर्थभूतवेदनसाधनत्वमेव वेदानुवचनादीनां तृतीयया प्रति-पाद्यत इति द्रष्टव्यम् । इदं च तृतीयाध्यायेऽङ्गपादे चिन्तितम् । तत्र हि—ऊर्ध्वरेतसो यज्ञाद्यभावात्तदङ्गिका विद्या न संभवतीति पूर्वपक्षे प्राप्ते 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति ' [बृ० ४ । ४ । २२] 'यदिच्छन्तो ब्रह्मचर्यं चरन्ति ।' ' ये चेमेऽरण्ये श्रद्धा तप इत्युपासते ' [छा० ५।१०।१] इत्यादिवाक्यैरूर्ध्वरेतःसु ब्रह्मविद्यायाः प्रमाप्रतिप-न्नत्वात्तेषु विद्याग्न्याधानलक्षणाग्नीन्धनपूर्वकाग्निहोत्राद्यनपेक्षेति । 'अत एव चाग्नीन्धनाद्यनपेक्षेति तत्र स्थितत्वाद् गृहस्थेष्वपि विद्याग्नीन्धनाद्यन-पेक्षैव । न च विविदिषावाक्याद्यज्ञादीनां तादर्थ्यप्रतीतिरिति वाच्यम् । तेन वाक्येन यज्ञादिकर्मणां विविदिषार्थत्वोपलम्भेऽपि विद्यार्थत्वाप्रती-

तेरिति पूर्वपक्षे प्राप्त उच्यते—'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' [ब्र० सू० ३ । ४ । २६] यथा गमनसाधभूतोऽश्वः परिकरबन्धसापेक्षस्तथा गृहस्थेषु विद्या यज्ञादिसर्वकर्मापेक्षैव । तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेनेति श्रुतेः। यथाऽश्वेन जिगमिषतीत्यादिसन्नन्तपदप्रयोगे प्रकृत्यर्थभूतगमनसाधनत्वप्रतीतिदर्शनेन यज्ञेन विविदिषन्तीत्यत्रापि यज्ञादौ वेदनत्वस्यैव प्रतीतिरिति स्थितम्। तथा तत्रैव पादे यावज्जीवमग्निहोत्रं जुहोतीति नित्यतया विहितानामग्निहोत्रादीनामनित्यकामनाविषयब्रह्मविद्यार्थत्वे नित्यानित्यसंयोगविरोधादाश्रमकर्मापेक्षया विद्यार्थानि कर्माणि भिन्नानि[इति]पूर्वपक्षे प्राप्ते 'यथैकस्यैव खादिरत्वस्य खादिरो यूपो भवति' 'खादिरं वीर्यकामस्य कुर्यात्' इति वचनद्वयेन क्रतौ फले च पृथग्विनियोगदर्शनात्क्रत्वर्थतया नित्यस्यापि खादिरत्वस्यानित्यकामाविषयवीर्यार्थत्वाद्विरोधवद्यावज्जीवमग्निहोत्रं जुहोतीति नित्यतयाऽग्निहोत्रादीनां विहितत्वादाश्रमकर्मत्वमप्यस्ति विविदिषावाक्येन विद्यासहकारितया विहितत्वाद्विद्यार्थत्वमप्यस्तीति स्थापितम्। 'विहितत्वाच्चाऽऽश्रमकर्मापि' [ब्र०सू० ३ । ४ । ३२] सहकारित्वेन च [ब्र० सू० ३ । ४ । ३३] इति सूत्राभ्याम्। ननु कुण्डपायिनामयने मासमग्निहोत्रं जुहोति [कात्या० श्रौ० २४ । ४ । २४] इति श्रुतं मासाग्निहोत्रं नैयमिकाग्निहोत्राद्भिद्यते । तथा च विविदिषावाक्येन विद्यार्थतया विधीयमानं नित्यादग्निहोत्रादेरन्यदेवास्तु तत्राऽऽह—'सर्वथाऽपि त एवोभयलिङ्गात्' [ब्र०सू० ३ । ४ । ३४] विद्यार्थत्व आश्रमार्थत्वेऽपि नैव यज्ञादयः प्रतिपत्तव्या उभयत्र यज्ञादिशब्दैः प्रत्यभिज्ञाप्यमानत्वरूपलिङ्गात्। यज्ञेनेत्यादिशब्दैः प्रसिद्धयज्ञादिविलक्षणयज्ञादिविधाने तस्य द्रव्यदेवताद्यभावेऽरूपत्वप्रसङ्गात्। तत्सद्भावे च देवतोद्देशेन द्रव्यत्यागत्वरूपयज्ञशब्दप्रवृत्तिनिमित्तसत्त्वेन यज्ञशब्दमुख्यार्थतया मासाग्निहोत्रवद्गौण्या वृत्त्या कर्मान्तरं विधीयत इति वक्तुमशक्यत्वान्न तन्न्याय इह प्रवर्तते। अतो यज्ञोऽध्ययनं दानमिति प्रथमं 'यज्ञानां जपयज्ञोऽस्मि' 'भोक्तारं यज्ञतपसाम्।' इत्यादिष्विव प्रसिद्धयज्ञफलत्वमेव युक्तम्। 'अनभिभवं च दर्शयति' [ब्र० सू० ३।४।३५] धर्मेण पापमपनुदतीत्यादिश्च । तानेव यज्ञादिधर्मान्निर्दिश्य तैर्विद्ययाऽनभिभवं पापकर्मभिरुत्पत्तिप्रतिबन्धाभावं दर्शयति । ततश्च प्रसिद्धस्यैवाग्निहोत्रादेर्धर्मस्य विद्योत्पत्तिप्रतिबन्धकपापापनोदहेतुत्वात्तस्यैव विद्याङ्गत्वमिति स्थितम्। तथा च तत्रैवानाश्रमिणां विधुरादीनामाश्रमधर्माभावात्तद-

ङ्गिका विद्या न संभवतीति पूर्वपक्षे प्राप्त उच्यते—'अन्तरा चापि तु तद्दृष्टेः' [ब्र० सू० ३ । ४ । ३६] तुशब्दः पक्षव्यावृत्त्यर्थः । चशब्दोऽवधारणे । आश्रमान्तरावर्तमानानामनाश्रमिणामिति यावत् । तेषामपि विद्यायामधिकारोऽस्त्येव । तादृशानामपि भीष्मरैक्वसंवर्तादीनां ब्रह्मविद्यादर्शनात् । यज्ञेन दानेन तपसाऽनाशकेनेत्याश्रमानियतदानतपआदिभिरपि विद्यानुग्रहस्य श्रुतत्वात् । 'अपि च स्मर्यते' [ब्र० सू० ३ । ४ । ३७] जप्येनापि हि संसिध्येद्ब्राह्मणो नात्र संशय इति हि स्मर्यते। संसिध्येज्जपाद्यनुगृहीतया विद्यया सिद्धो भवतीत्यर्थः । 'विशेषानुग्रहश्च' [ब्र० सू० ३।४।३८] 'तपसा ब्रह्मचर्येण श्रद्धया विद्ययाऽऽत्मानमन्विष्याऽऽदित्यमभिजयन्ते' [प्र० १ । १०] इति आश्रमानियततपआदिधर्मविशेषैरनुग्रहः श्रूयते । 'अतस्त्वितरज्ज्यायो लिङ्गाच्च' । [ब्र० सू० ३ । ४ । ३९] तुशब्दोऽवधारणे । अतोऽनाश्रमित्वादितरदाश्रमित्वमेव ज्यायः । अनाश्रमित्वमापद्विषयम् । शक्तस्य त्वाश्रमत्वमेवोपादेयम् । भूयोधर्मकाल्पधर्मकयोरतुल्यकारित्वाल्लिङ्गाच्च । लिङ्गं स्मृतिः । स्मर्यते हि—

अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः ।

इति । असति वैराग्ये दारालाभ आपत् । सति वैराग्ये संन्यासस्वीकारसंभवात् । न चाविरक्तस्य ब्रह्मविद्याधिकारः कथमुच्यत इति शङ्क्यम् । अग्निहोत्राद्यनुतिष्ठासया दारपरिग्रहरागसंभवेऽपि दारादिषु भोग्यतातिशयबुद्धिकृतरागाभावेन ब्रह्मविद्याधिकारसंभवात् । देहान्तरोपभोग्यब्रह्मव्यतिरिक्तफलाशाभावेन मुमुक्षौपयिकवैराग्यसंभवाच्च । एवमेव व्यासार्यैरुक्तत्वान्न दोष इत्थं स्थितम् ।

प्रकृतमनुसरामः—

एतमेव विदित्वा मुनिर्भवति ।

एतमेवाऽऽत्मानं विदित्वा मुनिर्मननशीलो योगी भवति । नान्य इत्यर्थः ।

एतमेव प्रव्राजिनो लोकमिच्छन्तः परिव्रजन्ति ।

लोक्यत इति लोकः । एतमेव लोकं परमात्मानमिच्छन्तः संन्यासिनः । संन्यस्यन्तीत्यर्थः । एतमेवेत्यवधारणाल्लोकान्तरेप्सोः पारिव्राज्ये

नाधिकार इति गम्यते । न हि गङ्गाद्वारं प्रेप्सुः काशीवासी पूर्वाभिमुखं याति ।

एतद्ध स्म वै तत्पूर्वे विद्वाꣳसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोक इति ।

एतादृशब्रह्मविदः पूर्वे प्रजां न कामयन्ते । किं प्रजया करिष्यामः । प्रजासाध्योऽयं लोकोऽप्यस्माकं परमात्मैव । एतल्लोकसाध्यस्य सुखानुभवस्य परमात्मानुभवाम्बुधिलवकणिकायमानत्वात् । एतादृशे परमात्मनि लब्ध एतल्लोकरूपफलसाधनभूतया प्रजया किं करिष्याम इति प्रजां पूर्वे न कामयन्त इत्यर्थः ।

ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते एषणे एव भवतः ।

इदं च कहोलब्राह्मणे व्याख्यातम् ।

स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गो न हि सज्जतेऽसितो न व्यथते न रिष्यति ।

एतदपि प्राग्व्याख्यातम् ।

एतमु हैवैते न तरत इत्यतः पापमकरवमित्यतः कल्याणमकरवमित्युभे ।

अतो देहयात्रादिलक्षणाद्धेतोः पापमकार्षं पुण्यमकार्षमिति द्वे चिन्ते एतं ब्रह्मविदं न तरतो न प्राप्नुत इत्यर्थः ।

तत्र हेतुमाह—

उ हैवैष एते तरति नैनं कृताकृते तपतः ॥ २२ ॥

यस्माद्धेतोरस्मिन्नेव लोके वसन्पुण्यं च पापं च तीर्णवान् । तत्र हेतुः— नैनं कृताकृते तपतः । एनं हि ब्रह्मविदं कृताकृते सुकृतदुष्कृते फलसंब-

न्धिनं कर्तुं न प्रभवतः । एवंविदि पापं कर्म न श्लिष्यत इत्यश्लेषश्रवणादिति भावः ॥ २२ ॥

तदेतदृचाऽभ्युक्तम् ।

तदेतत्पुण्यपापसंतरणमभिमुखीकृत्य ऋचोक्तमित्यर्थः ।

तामेव ऋचं पठति—

एष नित्यो महिमा ब्राह्मणस्य
न वर्धते कर्मणा नो कनीयान् ।
तस्यैव स्यात्पदवित्तं विदित्वा
न लिप्यते कर्मणा पापकेनेति ॥

ब्राह्मणस्य ब्रह्मविदो य एष महिमा स नित्यो ब्रह्मज्ञानानन्तरं यावदात्मभावितयाऽनुवर्तत इत्यर्थः । कोऽसौ महिमेत्यत्राऽऽह—न वर्धते कर्मणा नो कनीयान् । तस्यैव स्यात्पदवित् । तस्य ब्रह्मणः पदवित्पद्यत इति पदं स्वरूपं ब्रह्मस्वरूपविदिति यावत् । स पुण्यपापलक्षणकर्मकृतोत्कर्षापकर्षशून्यो भवति । एष महिमा ब्रह्मविद इत्यर्थः । महिमज्ञानफलमाह—तं विदित्वा न लिप्यते कर्मणा पापकेन । तं ब्रह्मविन्महिमानं विदित्वा पापकेन कर्मणा न लिप्यत इत्यर्थः ।

तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवाऽऽत्मानं पश्यति सर्वमात्मानं पश्यति ।

एवंविच्छास्त्रजन्यज्ञानवान् । शमः । अन्तरिन्द्रियनियमनरूपः । दमः । बहिरिन्द्रियनियमनरूपः । उपरतिः । निषिद्धकाम्यादिषु कर्मसूपरतिः । तितिक्षा । क्षमा । सुसमाहितः समाहितचित्त इत्यर्थः । एवंरूपः सन्नात्मनि जीवात्मनि आत्मानं परमात्मानं तदन्तर्यामिणं पश्यति पश्येदित्यर्थः । माध्यादिषु कोशेष्वात्मन्येवाऽऽत्मानं पश्येदिति पाठो दृश्यते । अतः पाठद्वैविध्यमत्र द्रष्टव्यम् । किं चाऽऽत्मानं परमात्मानं सर्वं सर्वशरीरकं च पश्येदित्यर्थः । इदं च वाक्यं तृतीयाध्यायेऽङ्गपादे चिन्तितम् । तत्र हि गृहस्थस्य बाह्याभ्यन्तरकर[ण]व्यापारः । तपःकर्मानुष्ठानस्याऽऽवश्यकत्वाच्छमादीनां च तद्विपरीतत्वान्नानुष्ठेयत्वमिति प्राप्त उच्यते—'शमदमाद्युपेतः स्यात्तथाऽपि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात्'

[ब्र०सू० ३ । ४ । २७] । गृहस्थस्य कर्मानुष्ठानावश्यकत्वेऽपि गृहस्थः शमदमाद्युपेतः स्यात् । शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवाऽऽत्मानं पश्यतीति विद्याङ्गतया विधानात् । अशान्त-चित्तस्य चित्तविक्षेपेण विद्यानिष्पत्त्यसंभवेन दृष्टार्थतयाऽनुष्ठेयत्वाच्च । न च कर्मणां शमादीनां च विरोधो भिन्नविषयत्वात् । विहितेषु करणव्यापारः । इतरेषु तदुपरमरूपशम इति । न च करणव्यापाररूपकर्मसु वर्तमानस्य वासनानुवृत्त्या शमादिकं न संभवतीति वाच्यम् । परमपुरुषाराधनकर्मणां वासनोच्छेद एव हेतुत्वादिति स्थितम् ।

प्रकृतमनुसरामः—

नैनं पाप्मा तरति सर्वं पाप्मानं तरति ।

एवं ब्रह्मविदं पाप्मा पुण्यपापलक्षणं कर्म न तरति न प्राप्नोति । अयं तु ब्रह्मवित्सर्वं पाप्मानं तरति सर्वपापातिगो भवतीत्यर्थः ।

नैनं पाप्मा तपति सर्वं पाप्मानं तपति ।

एनं ब्रह्मविदं पाप्मा न बाधते । अयमेव सर्वं पाप्मानं ज्ञानाग्निना दहतीत्यर्थः ।

विपापो विरजोऽविचिकित्सो ब्राह्मणो भवति ।

विपापः पापशून्यः । विरजो विरागः । अविचिकित्सः संशयशून्यः । भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशया इत्युक्तः । ब्राह्मणो ब्रह्मविद्भवतीत्यर्थः । अत्र ब्राह्मण इति पश्चान्निर्दिष्टस्यापि ब्राह्मणशब्दस्यौचित्यादुद्देश्यसमर्पकत्वमेव । ततश्च ब्राह्मणो विपापो विरजो भवतीत्यर्थः ।

एष ब्रह्मलोकः सम्राडिति[1] होवाच याज्ञवल्क्यः ।

हे सम्राडेष आत्मानं पश्येदिति द्रष्टव्यतयोक्तो यः स ब्रह्मलोको ब्रह्मैव लोको ब्रह्मलोकः ।

सोऽहं भगवते विदेहान्ददामि मां
चापि सह दास्यायेति ॥ २३ ॥

एवमनुशिष्टब्रह्मविद्यः स्वाराज्यं सर्वं ददामि राज्येन सहाऽऽत्मानमपि कैंकर्याय ददामीति जनक उवाचेत्यर्थः ॥ २३ ॥

---

१ सम्राडेनं प्रापितोऽसीति— आनन्दाश्रमस्थपुस्तके ।

एवं जनकयाज्ञवल्क्याख्यायिकायां व्याख्यात आत्मोपासकानामुपासनभेदेन भुक्तिमुक्तिप्रद इति श्रुतिराह—

स वा एष महानज आत्माऽन्नादो वसु-
दानो विन्दते वसु य एवं वेद ॥ २४ ॥

अन्नादोऽन्नादः । वसुदानो वसुप्रदः । अनेनाऽऽकारेण ब्रह्मोपासीनोऽन्नं वसु च लभते । इदं च तृतीयाध्याय उभयलिङ्गपादे चिन्तितम् । तत्र हि ऐहिकामुष्मिकं फलं कर्मण एव स्यात्तस्य फलसाधनत्वादिति पूर्वपक्षे प्राप्त उच्यते—'फलमत उपपत्तेः' [ब्र० सू० ३ । २ । ३८] कर्मभिराराधितात्तस्मादेव परमपुरुषात्फलं सर्वज्ञस्य सर्वशक्तेर्ब्रह्मणः सेवाराधितराजवत्फलप्रदत्वोपपत्तेः । 'श्रुतत्वाच्च' [ब्र० सू० १ । १ । ११] 'स वा एष महानज आत्माऽन्नादो वसुदानः' इति तस्यैव फलप्रदत्वस्य श्रुतत्वात् । पूर्वपक्षमाह—'धर्मं जैमिनिरत एव' [ब्र० सू० ३ । २ । ४०] यागदानाख्यं धर्मं जैमिनिः फलप्रदं मन्यते । अत एवोपपत्तेः शास्त्राच्च कृष्यादीनां फलसाधनत्ववद्यागादीनां विनश्वराणामप्यपूर्वद्वारेण फलसाधनोपपत्तेः । यजेत स्वर्गकाम इति विधिप्रत्ययेन प्रकृत्यर्थयागस्यैव फलसाधनत्वावगमात् । 'पूर्वं तु बादरायणो हेतुव्यपदेशात्' । [ब्र० सू० ३ । २ । ४१] बादरायणस्त्वाचार्यः पूर्वोक्तमेव परमात्मनः फलप्रदत्वं मन्यते । हेतुव्यपदेशात् । यज देवपूजायामिति प्रीतिहेतुत्ववाचिना पूजाशब्देन यागस्य देवताप्रीतिहेतुत्वव्यपदेशात् । 'स एवैनं भूतिं गमयति' इत्यादिकर्मविधिशेषवाक्येषु कर्माराधितदेवताया एव प्रीतिहेतुत्वावगमात् । अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चेति फलप्रदायित्वलक्षणप्रभुत्वस्य परमात्मन्येव स्मृतत्वात् । आशु विनश्यतः कर्मणो विधिवाक्यश्रुतकालान्तरभाविफलसाधनत्वनिर्वाहाय द्वारापेक्षायां वाक्यशेषप्रतिपन्नदेवताप्रीतिरूपद्वारपरित्यागेनाऽऽत्मसमवेतादृष्टपरिकल्पनस्यानुचितत्वात्कर्मप्रीतः परमात्मैव फलप्रद इति स्थितम् ॥ २४ ॥

प्रकृतमनुसरामः—

स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्माभयं वै ब्रह्माभयꣳ हि वै ब्रह्म भवति य एवं वेद ॥ २५ ॥

इति बृहदारण्यकोपनिषदि चतुर्थाध्याये
चतुर्थं ब्राह्मणम् ॥ ४ ॥

जरामरणशून्योऽसंसारी । अत एव भयशून्यः । एवं भूतोऽयमात्मा ब्रह्म निरतिशयं बृहत् । तत्र हेतुमाह—अभयं वै ब्रह्मेति । अमृतमभयमेतद्ब्रह्मेति निरुपाधिकाभयत्वाश्रयत्वस्य परब्रह्मत्वप्रसिद्धेरिति भावः । तज्ज्ञानस्य फलमाह—अभयं वै ब्रह्म भवति य एवं वेद । ब्रह्म भवति आविर्भूतब्रह्मरूपो भवतीत्यर्थः । शिष्टं स्पष्टम् ॥ २५ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां चतुर्थाध्यायस्य
चतुर्थं शारीरब्राह्मणम् ॥ ४ ॥

अथ मैत्रेयी ब्राह्मणम् ।

चतुर्थवदिहापि किंचित्पदविशेषमारभ्यते । ननु किमर्थोऽस्य पठितस्य मैत्रेयीब्राह्मणस्य पुनः पाठ उच्यते । पूर्वं याज्ञवल्क्यः प्रविव्रजिषायां मैत्रेय्या आत्मतत्त्वमुपदिश्य पारिव्राज्याय प्रक्रान्तः स्ववैराग्यमान्द्यं दृष्ट्वा किंचित्कालं धनार्जनं कृत्वा गृह एवानिषिद्धान्कामाननुभूय निष्पन्नदृढवैराग्यो गृहकृत्यव्यापृतचित्ततया विस्मृतात्मतत्त्वायै मैत्रेय्यै पुनरुपदेष्टुमारभत । अनया चाऽऽख्यायिकया वैराग्यमान्द्ये संन्यासेऽनधिकार इति प्रदर्शितं भवति । अत्र विशेषपदानि व्याकुर्मः । यद्वा मैत्रेयीब्राह्मणेनोक्तस्य ब्राह्मणस्यैकार्थत्वप्रदर्शनाय पुनरप्यारभतेति द्रष्टव्यम् ।

अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी कात्यायनी च तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव ।

ब्रह्मवादिनी ब्रह्मवदनशीला ।

स्त्रीप्रज्ञैव तर्हि कात्यायनी ।

तर्हि तस्मिन्काले कात्यायनी स्त्रीप्रज्ञैव स्त्रीणां योचिता गृहव्यापारविषया प्रज्ञा तादृशप्रज्ञावत्येव बभूव ।

अथ ह याज्ञवल्क्योऽन्यद्वृत्तमुपाकरिष्यन् ॥ १ ॥

गार्हस्थ्याद्विलक्षणं तुरीयाश्रममुपाश्रयिष्यन्नित्यर्थः ॥ १ ॥

मैत्रेयीति होवाच याज्ञवल्क्यः प्रव्रजिष्यन्वा अरेऽहमस्मात्स्थानादस्मि हन्त तेऽनया कात्यायन्याऽन्तं करवाणीति ॥२॥

सा होवाच मैत्रेयी यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्स्यां न्वहं तेनामृताऽऽहो३नेति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितꣳ स्यादमृतत्वस्य तु नाऽऽशास्ति वित्तेनेति ॥ ३ ॥

सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहीति ॥ ४ ॥

स होवाच याज्ञवल्क्यः प्रिया वै खलु नो भवति सती प्रियमवृधद्धन्त तर्हि भवत्येतद्व्याख्यास्यामि व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥ ५ ॥

हे भवति नः प्रिया सती प्रियमेवावृधद्वर्धितवती । अनुकूलभाषणादिति भावः । द्युतादित्वादङ् । द्युद्भ्यो लुङीति परस्मैपदम् । अतस्तुष्टोऽहं हे भवति अमृतत्वसाधनं जिज्ञासमानायै तुभ्यं व्याख्यास्यामि व्याचक्षाणस्य मे वाक्यं निदिध्यासस्व सावधानं शृण्वित्यर्थः ॥ ५ ॥

स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवति । न वा अरे जायायै कामाय जाया प्रिया भवति । न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्ति । न वा अरे वित्तस्य कामाय वित्तं प्रियं भवति । न वा अरे पशूनां कामाय पशवः प्रिया

भवन्ति । न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवति । न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवति । न वा अरे लोकानां कामाय लोकाः प्रिया भवन्ति । न वा अरे देवानां कामाय देवाः प्रिया भवन्ति । न वा अरे वेदानां कामाय वेदाः प्रिया भवन्ति । न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्ति । न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति । आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदꣳ सर्वं विदितम् ॥ ६ ॥

ब्रह्म तं परादाद्योऽन्यत्राऽऽत्मनो ब्रह्म वेद क्षत्रं तं परादाद्योऽन्यत्राऽऽत्मनः क्षत्रं वेद लोकास्तं परादुर्योऽन्यत्राऽऽत्मनो लोकान्वेद देवास्तं परादुर्योऽन्यत्राऽऽत्मनो देवान्वेद वेदास्तं परादुर्योऽन्यत्राऽऽत्मनो वेदान्वेद भूतानि तं परादुर्योऽन्यत्राऽऽत्मनो भूतानि वेद सर्वं तं परादाद्योऽन्यत्राऽऽत्मनः सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमे वेदा इमानि भूतानीदꣳ सर्वं यदयमात्मा ॥ ७ ॥

स यथा दुंदुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय दुंदुभेस्तु ग्रहणेन दुंदुभ्याघातस्य वा शब्दो गृहीतः ॥ ८ ॥

स यथा शङ्खस्य ध्मायमानस्य न बाह्याञ्छब्दाञ्शक्नुयाद्ग्रहणाय शङ्खस्य तु ग्रह-

णेन शङ्खध्मस्य वा शब्दो गृहीतः ॥ ९ ॥
स यथा वीणायै वाद्यमानायै न बाह्याञ्छ-
ब्दाञ्छक्नुयाद्ग्रहणाय वीणायै तु ग्रहणेन
वीणावादस्य वा शब्दो गृहीतः ॥ १० ॥

स यथाऽऽर्द्रैधाग्नेरभ्याहितस्य पृथग्धूमा विनि-
श्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निश्व-
सितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस
इतिहासपुराणं विद्या उपनिषदः श्लोकाः सूत्रा-
ण्यनुव्याख्यानानि व्याख्यानानीष्टꣳ हुतमाशितं
पायितमयं च लोकः परश्च लोकः सर्वाणि च
भूतान्यस्यैवैतानि सर्वाणि निश्वसितानि॥११॥

स यथा सर्वासामपाꣳ समुद्र एकायनमेवꣳ सर्वेषाꣳ
स्पर्शानां त्वगेकायनमेवꣳ सर्वेषाꣳ रसानां जिह्वै-
कायनमेवꣳ सर्वेषां गन्धानां नासिके एकायनमेवꣳ
सर्वेषाꣳ रूपाणां चक्षुरेकायनमेवꣳ सर्वेषाꣳ शब्दा-
नाꣳ श्रोत्रमेकायनमेवꣳ सर्वेषाꣳ संकल्पानां मन
एकायनमेवꣳ सर्वासां विद्यानाꣳ हृदयमेकायनमे-
वꣳ सर्वेषां कर्मणाꣳ हस्तावेकायनमेवꣳ सर्वेषामा-
नन्दानामुपस्थ एकायनमेवꣳ सर्वेषां विसर्गाणां
पायुरेकायनमेवꣳ सर्वेषामध्वनां पादावेकायनमे-
वꣳ सर्वेषां वेदानां वागेकायनम् ॥ १२ ॥

स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो
रसघन एवैवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः
कृत्स्नः प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय

तान्येवानुविनश्यति न प्रेत्य संज्ञाऽस्तीत्यरे
ब्रवीमीति होवाच याज्ञवल्क्यः ॥ १३ ॥

यथा सैन्धवघनो लवणखण्डोऽनन्तरोऽन्तरावयवव्यतिरिक्तोऽबाह्यो बाह्यावयवव्यतिरिक्तश्च सर्वोऽप्यवयवो यथा रसघनो भवति। अत्रान्तरो बाह्यश्च रसघन इति वक्तव्येऽन्तरत्वबाह्यत्वशून्यानां मध्यवर्तिनामपि ग्रहणं यथा स्यादिति अनन्तरोऽबाह्य इति व्यतिरेकमुखेण निर्देशः। एवं च सति निरवयवात्मसाधारण्यमपि फलितं भवतीति द्रष्टव्यम्। एवमेवायमात्मा सर्वत्र विज्ञानघनजीवशरीरक इत्यर्थः। जीवपरयोः स्वरूपैणैक्याभावाच्छरीरात्मभाव इदं सामानाधिकरण्यं द्रष्टव्यम् ॥ १३ ॥

अत्र वक्तव्यं चतुर्थाध्याय एवोक्तम्।

सा होवाच मैत्रेय्यत्रैव मा भगवान्मोहान्तमापीपत्[1]।

अत्रैव न प्रेत्य संज्ञाऽस्तीत्यस्मिन्नेवार्थे भगवान्मा मां मोहमध्यमापीपत्प्रापितवान्। पतेः(आपे)र्णौ चङ्।

न वा अहमिमं विजानामीति स होवाच
न वा अरेऽहं मोहं ब्रवीम्यविनाशी
वा अरेऽयमात्माऽनुच्छित्तिधर्मा ॥ १४ ॥

न विद्यत उच्छित्तिर्यस्य सोऽनुच्छित्तिः। अविनाशीति यावत्। अनुच्छित्तिर्धर्मो यस्य सोऽनुच्छित्तिधर्मा। एवं बहुव्रीहिगर्भो बहुव्रीहिः। तस्य ज्ञानलक्षणो धर्मोऽप्यविनाशीत्यर्थः। नतूच्छित्त्यभावोऽनुच्छित्तिः स धर्मो यस्येति बहुव्रीहिः। अविनाशीत्यनेन पौनरुक्त्यप्रसङ्गादिति द्रष्टव्यम् ॥ १४ ॥

यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर
इतरं जिघ्रति तदितर इतरꣳ रसयते तदितर इतर-
मभिवदति तदितर इतरꣳ शृणोति तदितर इतरं
मनुते तदितर इतरꣳ स्पृशति तदितर इतरं विजानाति
यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं
जिघ्रेत्तत्केन कमभिवदेत्तत्केन कꣳ शृणुयात्तत्केन

---

१ अत्रत्यमुद्रितपुस्तके—मापीपिपदिति दृश्यते।

कꣳ स्पृशेत्तत्केन कं विजानीयाद्येनेदꣳ सर्वं विजानाति तं केन विजानीयात्स नेति नेतीत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गो न हि सज्यतेऽसितो न व्यथते न रिष्यति विज्ञातारमरे केन विजानीयादित्युक्तानुशासनाऽसि मैत्रेय्येतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यो विजहार॥ १५॥

इति बृहदारण्यकोपनिषदि चतुर्थाध्यायस्य पञ्चमं ब्राह्मणम् ॥ ५ ॥

एतावदेव खल्वमृतार्थिभिर्ज्ञेयमित्यर्थः । कारणे कार्यवाचिशब्द उपचारात्प्रयुक्तः । एवमुक्त्वा याज्ञवल्क्यो यथाभिलषितं प्रव्रज्यां कृतवानित्यर्थः ॥ १५ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां चतुर्थाध्याये पञ्चमं ब्राह्मणम् ॥ ५ ॥

अथ वꣳशः पौतिमाष्यो गौपवनाद्गौपवनः पौतिमाष्यात्पौतिमाष्यो गौपवनाद्गौपवनः कौशिकात्कौशिकः कौण्डिन्यात्कौण्डिन्यः शाण्डिल्याच्छाण्डिल्यः कौशिकाच्च गौतमाच्च गौतमः ॥ १ ॥

आग्निवेश्यादाग्निवेश्यो गार्ग्याद्गार्ग्यो गार्ग्याद्गार्ग्यो गौतमाद्गौतमः सैतवात्सैतवः पाराशर्यायणात्पाराशर्यायणो गार्ग्यायणाद्गार्ग्यायण उद्दालकायनादुद्दालकायनो जाबालायनाज्जाबालायनो माध्यंदिनायनान्माध्यंदिनायनः सौकरायणात्सौकरायणः

काषायणात्काषायणः सायकायनात्सायकायनः कौशिकायनेः कौशिकायनिः ॥ २ ॥

घृतकौशिकाद्घृतकौशिकः पाराशर्यायणात्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्य आसुरायणाच्च यास्काच्चाऽऽसुरायणस्त्रैवणेस्त्रैवणिरौपचन्धनेरौपचन्धनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाज आत्रेयादात्रेयो माण्टेर्माण्टिर्गौतमाद्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमारहारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौण्डिन्याद्विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रवः पथः सौभरात्पन्थाः सौभरोऽयास्यादाङ्गिरसादयास्य आङ्गिरस आहूतेस्त्वाष्ट्रादाहूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणो दैवादथर्वा दैवो मृत्योः प्राध्वंसनान्मृत्युः प्राध्वंसनः प्रध्वंसनात्प्रध्वंसन एकर्षेरेकर्षिर्विप्रचित्तेर्विप्रचित्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनकात्सनकः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः ॥ ३ ॥

इति बृहदारण्यकोपनिषदि चतुर्थाध्याये
षष्ठं ब्राह्मणम् ॥ ६ ॥

इति बृहदारण्यकोपनिषदि चतुर्थाध्यायः समाप्तः ।

पूर्ववदेव वंशब्राह्मणम् । आचार्यवंशकीर्तनस्य मङ्गलत्वान्नात्र पौनरुक्त्यं शङ्कनीयम् ॥ १ ॥ २ ॥ ३ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां चतुर्थाध्याये
षष्ठं ब्राह्मणम् ॥ ६ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां चतुर्थोऽध्यायः ॥ ४ ॥

प्रणवोपासनं विधित्सन्प्रणवं परोक्षरूपेण स्तौति—

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

अदः परोक्षलोकः पररूपः । इदमयं च लोकः पूर्णं वेदं पूर्णमित्यर्थः। शब्दप्रभवत्वात्सर्वस्य लोकस्य स भूरिति व्याहरत्स भूमिमसृजतेति लोकानां व्याहृतिप्रभवत्वाम्नानात्कारणेन च कार्यस्य व्याप्तत्वात् । पूर्णात्पूर्णमुदच्यते । पूर्णात्पूर्यमाणाल्लोकात्पूर्णं पूरणकर्तृ उदच्यत उद्गतं भवति । अञ्चु गतिपूजनयोः । कर्मणि प्रत्ययः । उद्गतं भवति श्रेष्ठं भवतीत्यर्थः । तत्पूर्यमाणलोकापेक्षया पूरणकर्तृव्याहृतिरूपशब्द उत्कृष्ट इत्यर्थः । पूर्णस्य पूर्णमादाय पूर्णस्य लोकस्य पूर्णं पूरणकर्तृव्याहृतिरूपं वस्त्वादायोपसंहृत्य तस्यापि यत्पूर्णं पूरयितृ ओंकारात्मकं वस्तु परिशिष्यत इत्यर्थः । 'ओंकारेण सर्वा वाक्संतृण्णा' [छा०२ । २३ । ३] इति श्रुतेः । ओंकारस्य सर्वव्यापकत्वेन पूर्णत्वात्तदेव कारणं व्यावृत्त्यादिशब्देषु निर्दिष्टेषु परिशिष्यत इत्यर्थः । ओंकाराद्व्याहृतिर्भवति व्याहृत्या गायत्री भवतीति सर्वशब्दनिदानत्वात्तदेव परिशिष्यत इत्यर्थः ।

ओं खं ब्रह्म ।

ओंकार एव खमपरिच्छिन्नं ब्रह्म । ततश्चोंकारेऽपरिच्छिन्नब्रह्मोपासनं कर्तव्यमित्यर्थः ।

ॐ ब्रह्मेति ब्रह्मविशेषणीभूतस्य शब्दस्य स्वाभिमतमर्थमाह—

खं पुराणम् ।

इति । अनेन न वायुमानाकाश उच्यतेऽपि तु यत्पुराणं देशकालापरिच्छिन्नं ब्रह्म तदेव खसादृश्यात्खमित्युच्यते । खमपरिच्छिन्नमित्यर्थः ।

वायुरं खमिति ह स्माऽऽह कौरव्यायणीपुत्रः ।

कौरव्यायणीपुत्रस्तु वायुरं खं वायुमदम्बरमेव खशब्देनोच्यते । ततश्चाऽऽकाशशरीरकं ब्रह्म प्रणवेऽध्यास्योपास्यमित्याहेत्यर्थः । प्रणवे ब्रह्मोपास्यमित्यत्र न विवादः । तत्राध्यास्यमानं च ब्रह्मापरिच्छिन्नत्वेन गुणेनोपास्यमुत भूताकाशशरीरकत्वेनैवोपास्यमित्यत्रैव विवाद इति भावः ।

वेदोऽयं ब्राह्मणा विदुर्वेदैनेन यद्वेदितव्यम् ॥ १ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य प्रथमं ब्राह्मणम् ॥ १ ॥

यस्मादसौ वेदितैतेनोंकारेण यद्वेदितव्यं ज्ञातव्यं तत्सर्वं वेद जानाति तस्मादयमेव वेदो वेदयितृरूपयौगिकार्थस्य पुष्कलत्वादितरेषां तु वेदत्वममुख्यमिति ब्राह्मणा मन्यन्त इत्यर्थः ।

इति बृहदारण्यकोपनिषत्प्रकाशिकायां पञ्चमाध्यायस्य प्रथमं ब्राह्मणम् ॥ १ ॥

त्रयाः प्राजापत्याः प्रजापतौ पितरि ब्रह्मचर्यमूषुः ।

त्रयास्त्रिप्रकाराः । द्वित्रिभ्यां तयस्यायज्वेति त्रेः परस्य तयपोऽयजादेशः । प्राजापत्याः प्रजापतिपुत्राः । पितरि प्रजापतौ ब्रह्मचर्यमुषितवन्तः ।

ते क इत्यत्राऽऽह—

देवा मनुष्या असुरा उषित्वा ब्रह्मचर्यं
देवा ऊचुर्ब्रवीतु नो भवानिति ।

उपदेष्टव्यमिति शेषः ।

तेभ्यो हैतदक्षरमुवाच द इति व्यज्ञासिष्टा ३ ॥ इति ।

द इत्येतदक्षरमित्युक्त्वा किं यूयं व्यज्ञासिष्ट । मदभिप्रायं ज्ञातवन्तः किमिति पप्रच्छेत्यर्थः ।

व्यज्ञासिष्मेति होचुः ।

वयं ज्ञातवन्त इति प्रत्यूचुरित्यर्थः ।

कथमित्यत्राऽऽह—

दाम्यतेति न आत्थेति ।

नोऽस्मान्प्रति दान्ता भवतेति खलु वदसीत्यूचुरित्यर्थः । दमेः श्यनि शमादित्वाद्दीर्घः ।

ओमिति होवाच व्यज्ञासिष्टेति ॥ १ ॥

सत्यं व्यज्ञासिष्टेति प्रजापतिरुवाचेत्यर्थः । ननु कथं द इत्युच्चारणमात्रेण दाम्यतेति न आत्थेति देवाः प्रत्यपद्यन्त । उच्यते देवानामैश्वर्यशालितया भोगप्रावण्येन मदान्धत्वात्स्वदोषं जानतां दशब्दोच्चारणमात्रेण तत्प्रतिपत्तिः संभवतीति द्रष्टव्यम् ॥ १ ॥

अथ हैनं मनुष्या ऊचुर्ब्रवीतु नो भगवानिति तेभ्यो हैतदेवाक्षरमुवाच द इति व्यज्ञासिष्टा३ ॥ इति ।
व्यज्ञासिष्मेति होचुर्दत्तेति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति ॥ २ ॥

दत्तेति न आत्थेति दत्त दानं कुरुतेत्यर्थः । शिष्टं पूर्ववत् ॥ २ ॥

अथ हैनमसुरा ऊचुर्ब्रवीतु नो भगवानिति तेभ्यो हैतदेवाक्षरमुवाच इति व्यज्ञासिष्टा३ ॥ इति ।
व्यज्ञासिष्मेति होचुर्दयध्वमिति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति ॥ ४ ॥

दयध्वमिति न आत्थेति दयध्वं प्राणिषु दयां कुरुतेत्यर्थः ।

तदेतदेवैषा दैवी वागनुवदति स्तनयित्नुर्द द द इति दाम्यत दत्त दयध्वमिति ।

दान्ता भवत दानं कुरुत दयां कुरुतेति दमदानदयालक्षणं तदेतत्त्रितयं स्तनयित्नुर्मेघो द द द इति दकारत्रयोच्चारणेनानुवदति सैषा दैवी वाङ्नतु स्तनयित्नुशब्दमात्रम् ।

तदेतत्त्रयꣳ शिक्षेद्दमं दानं दयामिति ॥ ३ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य द्वितीयं ब्राह्मणम् ॥ २ ॥

तस्मादद्यापि दमदानदयालक्षणं धर्मत्रयं शिक्षेदुपादद्यात् । प्रजापतेरनुशासनमस्माभिः कर्तव्यमित्येवं मतिं कुर्यादित्यर्थः । तथाच स्मृतिः—

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥ इति ।

अस्य विधेः शेषः प्राचीनोऽर्थवादः ॥ ३ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां पञ्चमाध्यायस्य द्वितीयं ब्राह्मणम् ॥ २ ॥

एवं सर्वोपासनाङ्गभूतं दमदानदयालक्षणमर्थत्रयमुपदिश्य ब्रह्मोपासनाङ्गभूतं हृदयोपासनमाह—

एष प्रजापतिर्यद्धृदयमेतद्ब्रह्मैतत्सर्वम् ।

पूर्वं दमाद्यनुशासितृत्वेन प्रस्तुतो योऽयं योऽपि प्रजापतिः सोऽपि हृदयमेव तदेतद्ब्रह्म बृहत्सर्वं पञ्चमाध्यायोक्तरीत्या हृदयस्य सर्वत्वं द्रष्टव्यम् ।

एवं हृदयस्य प्रजापतित्वबृहत्त्वरूपविशेषणविशिष्टतयोपासनं विधायोपास्यहृदयशब्दनिर्वचनेन स्तौति—

तदेतत्त्र्यक्षरꣳ हृदयमिति हृ इत्येकमक्षरमभिहरन्त्यस्मै स्वाश्चान्ये च य एवं वेद ।

हृ इति हृञो(ञो) रूपम् । यस्माद्धृदयाय स्वाश्चेन्द्रियाणि चान्ये च विषयाः शब्दादयः स्वं स्वं कार्यमभिहरन्ति स्वकार्यं सर्वं तदधीनं कुर्वन्ति । तत्तज्ज्ञानस्य सर्वस्याप्यन्तःकरणाधीनत्वादिति भावः । अतो हृदयनाम्नो हृ इत्येतदक्षरमिति यो वेदास्मै विदुषे स्वाश्च ज्ञातयोऽन्ये च संबन्धिनो बलिमुपहरन्ति तत्क्रतुन्यायादिति भावः ।

द इत्येकमक्षरं ददत्यस्मै स्वाश्चान्ये च य एवं वेद ।

यस्माद्हृदयात्स्वा इन्द्रियाणि अन्ये च विषयाः स्वं स्वं वीर्यं ददति अतो दकारोऽस्मिन्नाम्नि निबद्ध इति यो वेद तस्यापि स्वकीया अन्ये च स्वं स्वं वीर्यं प्रयच्छन्तीत्यर्थः ।

यमित्येकमक्षरमेति स्वर्गं लोकं य एवं वेद ॥ १ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य
तृतीयं ब्राह्मणम् ॥ ३ ॥

इणो गत्यर्थस्य यमित्येतद्रूपमस्मिन्नाम्नि निबद्धमिति यो वेद स स्वर्गं लोकमेति । एवं नामाक्षरनिर्वचनज्ञानादपीदृशं विशिष्टं फलं लभ्यते किमुत तदुपासनयेति हृदयस्य स्तुतिः कृता भवति ।

इति बृहदारण्यकोपनिषत्प्रकाशिकायां पञ्चमाध्यायस्य
तृतीयं ब्राह्मणम् ॥ ३ ॥

हृदयस्य प्रजापतित्वेनोपासनामुक्त्वा सत्यत्वेनोपासनमाह—

तद्वै तदेतदेव तदास सत्यमेव ।

वैशब्दोऽवधारणे । तद्वै तदेव तत्तादृशं हृदयमेतदेव तदास । एतद्व-क्ष्यमाणं तदासेत्यर्थः । किं तदासेत्यत्राऽऽह—सत्यमेवेति । सच्च त्यच्च मूर्तामूर्तं च सत्यमव्याकृतपञ्चभूतात्मकं भवतीत्यर्थः ।

तदुपासनस्य फलम्—

स यो हैतन्महद्यक्षं प्रथमजं वेद सत्यं
ब्रह्मेति जयतीमाँल्लोकाञ्जित इन्न्वसावसत् ।

यः कश्चिदेतद्धृदयं महदत एव यक्षं पूज्यं प्रथमजं प्रथमजातं सर्व-स्मात्कार्यजातात्प्रथमजं सत्यमव्याकृतपञ्चभूतात्मकं बृहदिति यः कश्चिदेतद्धृदयं वेद स इमाँल्लोकाञ्जयति । जितो वशीकृत इन्नु इत्थ-मसौ शत्रुर्यथा ब्रह्मणा जितोऽसद्भवेदित्यर्थः ।

तस्यैतत्फलमिति पुनर्निगमयति—

य एवमेतन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति
सत्यꣳ ह्येव ब्रह्म सत्यꣳ ह्येव ब्रह्म ॥ ४ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य
चतुर्थं ब्राह्मणम् ॥ ४ ॥

य एवं महद्यक्षं प्रथमजमुपास्ते तच्छत्रावसत्त्वं युक्तमेव । यतोऽयं सत्योपासकोऽतस्तदुपासकस्य सत्त्वं तद्विरोधिनश्चासत्त्वं युक्तमेवेति भावः ॥ १ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां पञ्चमाध्यायस्य
चतुर्थं ब्राह्मणम् ॥ ४ ॥

सत्यस्य ब्रह्मणः स्तुत्यर्थं महद्यक्षं प्रथमजमित्युक्तं तत्कथं प्रथमजत्वमित्यत्राऽऽह—

आप एवेदमग्र आसुः ।

इदं व्याकृतं जगदग्रेऽण्डसृष्टेः प्रागाप एवाऽऽसुः । अव्याकृतपञ्चभूतात्मनाऽवर्ततेत्यर्थः ।

ता आपः सत्यमसृजन्त ।

पञ्चीकृतपञ्चभूतात्मकं कार्यमसृजन्तेत्यर्थः ।

सत्यं ब्रह्म ।

तच्च सत्यं ब्रह्म चतुर्मुखमसृजतेत्यर्थः ।

ब्रह्म प्रजापतिम् ।

दक्षादिप्रजापतिमसृजतेत्यर्थः ।

प्रजापतिर्देवान् ।

असृजतेति शेषः ।

ते देवाः सत्यमेवोपासते तदेतत्त्र्यक्षरꣳ सत्यमिति
स इत्येकमक्षरं तीत्येकमक्षरं यमित्येकमक्षरम् ।

अत्र तीतीकारानुबन्धो निर्देशार्थः ।

प्रथमोत्तमे अक्षरे सत्यम् ।

सकारयकारौ सत्यम् । मृत्युरूपाभावात् ।

मध्यतोऽनृतम् ।

मध्यतस्तकारस्त्वनृतम् । अनृतं हि मृत्युः । मृत्व्वनृतयोस्तकारसामान्यात् ।

तदेतदनृतमुभयतः सत्येन परिगृहीतꣳ सत्यभूयमेव भवति नैनं विद्वाꣳसमनृतꣳ हिनस्ति ॥ १ ॥

तदेतदनृतं मृत्युरूपमुभयतः सत्येन सकारयकारलक्षणेन परिगृहीतं संदष्टं सत्यबाहुल्यमेव भवति । एवं सत्यबाहुल्यं सर्वस्य मृत्योरनृतस्य किंचित्करत्वं च यो विद्वांस्तमेनं विद्वांसमनृतं प्रमादोत्थं कदाचिदपि न हिनस्तीत्यर्थः ॥ १ ॥

एवं सत्ये हृदयोपासनमुक्त्वा सत्यत्वेनाक्ष्यादित्यान्तर्वर्तिनो ब्रह्मणो निर्विकारत्वरूपसत्यत्वेन व्याहृतिशरीरकत्वेन चोपासनं दर्शयति—

तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषः ।

यत्प्रसिद्धं सत्यमसौ स आदित्यः । स क इत्यत्राऽऽह—य एष एतस्मिन्मण्डले पुरुष इति । 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते' [छा० १ । ६ । ६] य एषोऽन्तरक्षिणि पुरुषो दृश्यते [छा० १ । ७ । ५] इति श्रुतिप्रसिद्ध इत्यर्थः ।

तावेतावन्योन्यस्मिन्प्रतिष्ठितौ रश्मिभिरेषोऽस्मिन्प्रतिष्ठितः प्राणैरयममुष्मिन् ।

अधिदैवतमध्यात्मं चावस्थिता आदित्यचाक्षुषपुरुषौ परस्परोपकारकौ भवतः । रश्मिद्वाराऽऽदित्यपुरुषश्चाक्षुषस्य पुरुषस्योपकारकः । आदित्यरश्मिसंबन्धाभावे चाक्षुषस्य पुरुषस्य परमात्मनः स्वकार्यासमर्थत्वात् । चाक्षुषश्च पुरुषः प्राणद्वाराऽऽदित्यपुरुषस्योपकारकः । प्राणनाभाव आदित्यपुरुषस्य प्रकाशकत्वाभावात् ।

स यदोत्क्रमिष्यन्भवति शुद्धमेवैतन्मण्डलं
पश्यति नैनमेते रश्मयः प्रत्यायन्ति ॥२॥

एवं विद्वानुत्क्रान्तिवेलायां द्वारभूतमादित्यमण्डलं द्रष्टुं शक्नोति न सूर्यरश्मयश्चक्षुषः प्रतिघाताय भवन्ति । चक्षुरादित्यमण्डलस्थयोः परस्परोपकार्योपकारकभावज्ञानवैभवादिति भावः ॥ २ ॥

य एष एतस्मिन्मण्डले पुरुषस्तस्य भूरिति शिरः ।

आदित्यमण्डले वर्तमानस्य सत्यपुरुषस्य भूरिति व्याहृतिः शिर इत्यर्थः । तच्छिरस्कत्वेन ध्यानं कर्तव्यमिति भावः ।

तत्रोपपत्तिमाह—

एकꣳ शिर एकमेतदक्षरम् ।

एकत्वसंख्यासाम्यादिति भावः ।

भुव इति बाहू ।

तत्रोपपत्तिमाह—

द्वौ बाहू द्वे एते अक्षरे ।

द्वित्वसंख्यासामान्यादिति भावः ।

स्वरिति प्रतिष्ठा ।

प्रतिष्ठा पादावित्यर्थः ।

तत्रोपपत्तिमाह—

द्वे प्रतिष्ठे द्वे एते अक्षरे तस्योपनिषदहरिति ।

तस्याऽऽदित्यमण्डलान्तर्वर्तिनोऽहरित्युपनिषद्रहस्यनामेत्यर्थः । उक्तं च व्यासार्यैः—'संबन्धादेवमन्यत्रापि ' [ब्र० सू० ३ । ३ । २०] इत्यत्रोपनिषदौ रहस्यनामनी इत्यर्थ इति ।

अहरिति हन्तेर्जहातेश्च रूपसंभवमभिप्रेत्य तदनुसारेण फलमाह—

हन्ति पाप्मानं जहाति च य एवं वेद ॥ ३ ॥

योऽयं दक्षिणेऽक्षन्पुरुषस्तस्य भूरिति शिर एकꣳ शिर
एकमेतदक्षरं भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे

स्वरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे तस्योपनिषद-
हमिति हन्ति पाप्मानं जहाति च य एवं वेद ॥४॥
इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य पञ्चमं
ब्राह्मणम् ॥ ५ ॥

इदं चिन्तितं गुणोपसंहारपादे 'य एष एतस्मिन्मण्डले पुरुषः ' यश्चायं दक्षिणेऽक्षन्' इत्यादिनाऽक्ष्यन्तर्वर्तितया व्याहृतिशरीरकतयोपास्यत्वेनोपदिष्टस्य ब्रह्मणस्तस्योपनिषदहरित्यधिदैवतं तस्योपनिषदहमित्यध्यात्ममिति ये अहरित्यहमिति रहस्यनामनी उपदिष्टे ते किं स्थानविशेषनियते। ततश्चाहरिति नामाऽऽदित्यमण्डलस्थानविशिष्टस्यैवाहमिति च नामाक्षिस्थपुरुषस्यैवेति नियमोऽस्ति उत नेति चिन्तायां पूर्वपक्ष उच्यते—'संबन्धादेवमन्यत्रापि ' [ब्र०सू०३।३।२०] इति। यथा मनोमयत्वादिविशिष्टस्यैकत्वादुपास्यैक्येन विद्यैक्याच्छाण्डिल्यविद्यायां गुणोपसंहारः। एवमक्ष्यादित्यसंबन्धिनो ब्रह्मणः सत्यस्य व्याहृतिशरीरस्यैकत्वेन विद्यैक्यात्तत्संबन्धिनो नाम्नोरप्यनियमेन स्थानद्वयेऽप्युपसंहार इति पूर्वपक्षे प्राप्त उच्यते-'न वा विशेषात् ' [ब्र० सू० ३ । ३ । २१] ' य एष एतस्मिन्मण्डले पुरुषः ' । ' यश्चायं दक्षिणेऽक्षन्पुरुषः ' तावेतावन्योन्यस्मिन्प्रतिष्ठिताविति द्वित्वसंख्यया प्रधानोपास्यभेदप्रतीतेरादित्याक्षिस्थानभेदेन रूपभेदाच्च विद्याभेदान्न नाम्नोरव्यवस्था । ' दर्शयति च ' [ब्र० सू० ३ । ३ । ४] दर्शयति चाक्ष्यादित्याधारयोर्गुणानुपसंहारम्। 'तस्यैतस्य तदेव रूपं यदमुष्य रूपम् ' [छा० १ । ७ । ५] इत्यादिना रूपाद्यतिदेशेन यदि स्थानभेदेऽपि परस्पररूपप्राप्तिस्तर्ह्यतिदेशानर्थक्यमेव स्यात् । अत आदित्यस्थानविशिष्टस्यैवाहरिति नामाक्षिस्थानस्यैवाहं नामेति व्यवस्थेति स्थितम् । प्रकृतमनुसरामः ॥ ३ ॥ ४ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां पञ्चमाध्यायस्य
पञ्चमं ब्राह्मणम् ॥ ५ ॥

शाण्डिल्यमाह—

मनोमयोऽयं पुरुषो भाः सत्यम् ।

मनोमयो विशुद्धमनोग्राह्यः । भा भारूपः । समानप्रकरणे छान्दोग्ये 'मनोमयः प्राणशरीरो भारूपः' इति श्रवणात् । सत्यं निर्विकारं देहादिध्वंसेऽपि निर्विकार इति यावत् ।

तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा ।

हृदयान्तर्गतस्तदवच्छेदनिबन्धनस्वल्पपरिमाण इत्यर्थः ।

स एष सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किंच ॥ १ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य षष्ठं ब्राह्मणम् ॥ ६ ॥

प्रशासनेन धारक इत्यर्थः । अत्र नियन्तृत्वधारकत्वशेषित्वानि त्रीण्यप्युक्तानि । अत्र वशित्वादेर्माध्यंदिनशाखागतस्य च्छान्दोग्यशाण्डिल्यविद्यागतस्य सत्यसंकल्पवितितिरूपत्वाद्वेद्यरूपभेदाभावाद्विद्यैक्यमिति गुणोपसंहारपादे । एकस्यामेव वाजसनेयशाखायामग्निरहस्ये 'स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपं सत्यसंकल्पमाकाशमात्मानम्' । [शतप० १० । ६ । ३ । २] इति श्रुत्या शाण्डिल्यविद्या भिद्यते सत्यसंकल्पत्ववशित्वरूपगुणाभेदादिति पूर्वपक्षे प्राप्त उच्यते—'समान एवं चाभेदात् । [ब्र० सू० ३ । ३ । १९] उभयत्रापि मनोमयत्वादिके समाने सति वशित्वादेः सत्यसंकल्पत्ववितितिरूपत्वेन वशित्वसत्यसंकल्पत्वयोरभेदाद्रूपभेदाभावाद्विद्यैक्यमिति स्थितम् ॥ १ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां पञ्चमाध्यायस्य षष्ठं ब्राह्मणम् ॥ ६ ॥

विद्युद्ब्रह्मेत्याहुः ।

विद्युति ब्रह्मदृष्टिः कर्तव्येति केचिदाहुः ।

विद्युति ब्रह्मध्यानहेतुभूतं सादृश्यमाह—

विदानाद्विद्युत् ।

विदानान्मेघान्तःस्थितान्धकारखण्डनाद्विद्युत् । ब्रह्म चाज्ञानलक्षणतमःखण्डनमिति विद्युत्त्वमस्तीति भावः ।

वियत्येनं पाप्मनो य एवं वेद विद्युद्ब्रह्मेति विद्युद्ध्येव ब्रह्म ।

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य
सप्तमं ब्राह्मणम् ॥ ७ ॥

यो विद्युद्ब्रह्मेत्येवं वेदैनं पाप्मनो विद्यति एनं प्रति प्रतिकूलतया ये पाप्मानस्तान्सर्वान्विद्यति विशेषेण द्यति खण्डयति । दो अवखण्डन इति हि धातुः । तत्रोपपत्तिमाह—विद्युद्ध्येव ब्रह्मेति । ब्रह्मणो विद्युत्वात्खण्डकत्वादित्यर्थः ।

इति बृहदारण्यकोपनिषत्प्रकाशिकायां पञ्चमाध्यायस्य
सप्तमं ब्राह्मणम् ॥ ७ ॥

उपासनान्तरमाह—

वाचं धेनुमुपासीत ।

त्रयीलक्षणां वाचं धेनुरित्युपासीत ।

तस्याश्चत्वारः स्तनाः स्वाहाकारो वषट्कारो हन्तकारः स्वधाकारस्तस्यै द्वौ स्तनौ देवा उपजीवन्ति स्वाहाकारं च वषट्कारं च ।

स्वाहाकारेण वषट्कारेण वा देवेभ्यो हविष्प्रदानादिति भावः ।

हन्तकारं मनुष्याः ।

हन्तेति हि मनुष्येभ्योऽन्नं प्रयच्छन्तीति भावः ।

स्वधाकारं पितरः ।

स्वधाकारेण पितृभ्यः स्वधां प्रयच्छन्ति ।

तस्याः प्राण ऋषभः ।

प्राणेन हि वाक्प्रसूयते ।

मनो वत्सः ॥ १ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्या-
ष्टमं ब्राह्मणम् ॥ ८ ॥

मनसा हि प्रस्राव्यते । मनसा ह्यालोचिते विषये वाक्प्रवर्तते । तस्मा-न्मनो वत्सस्थानीयमिति भावः ।

इति बृहदारण्यकोपनिषत्प्रकाशिकायां पञ्चमाध्यायस्या-
ष्टमं ब्राह्मम् ॥ ८ ॥

अयमग्निर्वैश्वानरो योऽयमन्तःपुरुषे ।

कोऽसावित्यत्राऽऽह—

येनेदमन्नं पच्यते यदिदमद्यते ।

यदिदं भुज्यमानं येनाग्निना पच्यते स वैश्वानरोऽग्निरित्यर्थः ।

तस्यैष घोषो भवति यमेतत्कर्णावपिधाय शृणोति ।

तस्य वैश्वानराग्नेर्जाठरस्यैष घोषो भवति यं घोषमेतदिदानीं कर्णा-वपिधाय कर्णौ अङ्गुलिभ्यां पिधाय शृणोति ।

स यदोत्क्रमिष्यन्भवति नैनं घोषꣳ शृणोति ॥ १ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य
नवमं ब्राह्मणम् ॥ ९ ॥

तदानीं जाठराग्नेरभावादिति भावः । तादृशवैश्वानराग्नौ ब्रह्मदृष्टिः कर्तव्येत्यर्थः ।

इति बृहदारण्यकोपनिषत्प्रकाशिकायां पञ्चमाध्यायस्य
नवमं ब्राह्मणम् ॥ ९ ॥

उत्क्रान्तिप्रसङ्गाद्ब्रह्मविदो गतिमाह—

यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति
तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन
स ऊर्ध्वमाक्रमते स आदित्यमागच्छति ।

यदा ब्रह्मवित्पुरुषोऽस्माल्लोकात्प्रैति तदाऽर्चिर्दिनपूर्वपक्षषडुदङ्मासाब्दद्वारा वायुमागच्छति तस्मा आगताय ब्रह्मविदे स वायुर्विजिहीते । आत्मावयवान्विगमयति च्छिद्री करोति आत्मानमित्यर्थः । किंपरिमाणं छिद्रमित्याह यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमते । स आदित्यमागच्छति । रथचक्रमध्यवर्तिरन्ध्रं यत्परिमाणं तत्परिमाणं छिद्रं करोति तेन च्छिद्रेणोर्ध्वं गत्वाऽऽदित्यलोकमागच्छति । न च 'देवलोकादादित्यम्' [बृ० ६ । २ । १५] इति श्रुत्याऽस्ति विरोध इति वाच्यम् । योऽयं पवत एष देवानां गृहे' इति श्रुतेर्वायोरेवात्र देवलोकशब्दवाच्यत्वात् । सूत्रितं च—'वायुमब्दादविशेषविशेषाभ्याम्' [ब्र०सू० ४ । ३ । २] वायुं संवत्सरादूर्ध्वमाधिगच्छेत् । अविशेषविशेषाभ्यां सामान्यविशेषाभ्याम् । देवलोकशब्दो हि सामान्यशब्दो वायुशब्दो विशेषोऽतो वायुरेव देवलोक इति स्थितम् ।

तस्मै स तत्र विजिहीते यथा लम्बरस्य खं
तेन स ऊर्ध्वमाक्रमते स चन्द्रमसमागच्छति ।

आदित्यो ब्रह्मलोकं जिगमिषो मार्गनिरोधं कृत्वा स्थितोऽपि एवंविद् उपासकाय प्राप्ताय लम्बराख्यवाद्यविशेषच्छिद्रसदृशं छिद्रं करोति तेन स ऊर्ध्वमाक्रम्य चन्द्रमसमागच्छति ।

तस्मै स तत्र विजिहीते यथा दुंदुभेः खं तेन
स ऊर्ध्वमाक्रमते स ब्रह्मलोकमागच्छत्यशोकमहिमं तस्मिन्वसति शाश्वतीः समाः ॥ १ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य दशमं
ब्राह्मणम् ॥ १० ॥

———

सोऽपि चन्द्रमा दुंदुभिरन्ध्रसदृशं रन्ध्रं करोति तत्प्रमाणेन मार्गेणो-

र्वमाक्रम्य विद्युद्वरुणेन्द्रधातृलोकमतिक्रम्य शोकशून्यं हिमाद्याधिदैवि-कदुःखशून्यं ब्रह्मलोकं गत्वाऽनन्तान्संवत्सरांस्तत्रैव वसतीत्यर्थः ॥ १ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां पञ्चमाध्यायस्य
दशमं ब्राह्मणम् ॥ १० ॥

एतद्वै परमं तपो यद्व्याधितस्त-
प्यते परमꣳ हैव लोकं जयति ।

व्याधितो ज्वरादिपरिगृहीतः सन्यत्तप्यते तदेव परमं तप इत्येवं चिन्तयेत् । दुःखसामान्यात् । तस्यैवं चिन्तयतोऽपि विदुषोऽनिन्दितोऽविषीदतश्च कर्मक्षयहेतुस्तदेव तपो भवति । स एवं तेन विज्ञानेन तपसा दग्धकिल्बिषः परं हैव लोकं जयति ।

य एवं वेदैतद्वै परमं तपो यं प्रेतमरण्यꣳ
हरन्ति परमꣳ हैव लोकं जयति ।

य एवं वेद यं प्रेतं ग्रामादरण्यमृत्विजो हरन्ति तस्मिन्कर्मणि ग्रामादरण्यगमनत्वसामान्यात्परं तपो भवतीति तत्र परमतपस्त्वबुद्धिं जीवद्दशायां यः करोति स परमं लोकं जयति ।

य एवं वेदैतद्वै परमं तपो यं प्रेतमग्नावभ्यादधति
परꣳ हैव लोकं जयति य एवं वेद ॥ १ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्यैकादश
ब्राह्मणम् ॥ ११ ॥

अग्निप्रवेशसामान्याद्भविष्यत्प्रेतस्याग्नावभ्याधाने परमतपस्त्वबुद्धिं कुर्वतः परलोकप्राप्तिरित्यर्थः ॥ १ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां पञ्चमाध्यायस्यैकादशं
ब्राह्मणम् ॥ ११ ॥

अन्नं ब्रह्मेत्येक आहुस्तन्न तथा
पूयति वा अन्नमृते प्राणात् ।

केचिदन्नं ब्रह्मेत्याहुः । तन्न तथा युज्यते प्राणादृते तदन्नं पूयते पूतीभावमापद्यते तस्मान्नान्नं ब्रह्मेति ।

प्राणो ब्रह्मेत्येक आहुस्तन्न तथा
शुष्यति वै प्राण ऋतेऽन्नात् ।

केचित्प्राणो ब्रह्मेत्याहुः । तदपि न युक्तम् । अन्नाभावे प्राणस्य शोषणदर्शनात् ।

एते ह त्वेव देवते एकधाभूयं भूत्वा परमतां गच्छतः ।

तस्मादन्नप्राणरूपे देवते एकधाभूयं एकधाभावं गत्वा परमतां परमत्वं गच्छतः ।

तद्ध स्माऽऽह प्रातृदः पितरं किंस्विदेवैवं विदुषे साधु कुर्यां
किमेवास्मा असाधु कुर्यामिति ।

तदेवमध्यवस्य ह स्म प्रातृदो नाम पुत्रः पितरमाह किंस्विदेवैवं विदुषे साधु कुर्यामन्नप्राणा एकभूतौ ब्रह्मेति विदुषे मह्यं किं वा साधु कर्म कुर्यां किं वाऽसाधु कर्म कुर्याम् । कृतकृत्यस्य मे साध्वसाधुकर्मभ्यां किं भविष्यतीति भावः । अस्मा इति स्वात्मानमेव निर्दिशति देहादिविवेकज्ञापनाय । अस्मा इति कस्यचित्तच्छिद्रस्य तद्विदुषो निर्देशः ।

स ह स्माऽऽह पाणिना मा प्रातृद कस्त्वेन-
योरेकधाभूयं भूत्वा परमतां गच्छतीति ।

तमेवंवादिनं पुत्रं हस्तेन निवारयन्हे प्रातृद मैवं वोचः । कस्त्वेनयोरन्नप्राणयोरेकधाभूयं भूत्वा परमतां गच्छति न कश्चिदपि विद्वाननेन दर्शनेन परमतां गच्छति । तस्मान्नैवं वक्तुमर्हसि कृतकृत्योऽसाविति । यद्येवं ब्रवीतु भगवान्कथं परमतां गच्छतीति ।

तस्मा उ हैतदुवाच ।

एतद्वक्ष्यमाणमित्यर्थः ।

वीत्यन्नं वै व्यन्ने हीमानि सर्वाणि भूतानि विष्टानि ।

आश्रितानि अतोऽन्नं वीत्युच्यते ।

रमिति ।

प्राण उपास्यत इति शेषः ।

तदेवोपपादयति—

प्राणो वै रं प्राणे हीमानि सर्वाणि भूतानि रमन्ते ।

यस्मादिमानि सर्वाणि भूतानि प्राणे रमन्तेऽतः प्राण एव रमित्यर्थः ।

विरमितिगुणविशिष्टान्नप्राणोपासनस्य फलमाह—

सर्वाणि ह वा अस्मिन्भूतानि विशन्ति
सर्वाणि भूतानि रमन्ते य एवं वेद ॥ १ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य द्वादशं
ब्राह्मणम् ॥ १२ ॥

स्पष्टोऽर्थः ।

इति बृहदारण्यकोपनिषत्प्रकाशिकायां पञ्चमाध्यायस्य
द्वादशं ब्राह्मणम् ॥ १२ ॥

प्राणस्यैव ऋग्यजुःसामत्वेनोपासनमाह—

उक्थं प्राणो वा उक्थं प्राणो हीदꣳ सर्वमुत्थापयति ।

नह्यप्राणः कश्चिदुत्तिष्ठतीति भावः ।

उद्धास्मादुक्थविद्वीरस्तिष्ठति ।

अस्मादेवंविद उक्थप्राणविद्वीरः पुत्र उत्तिष्ठति ।

एवं दृष्टं फलमुक्त्वाऽदृष्टं फलमाह—

उक्थस्य सायुज्यꣳ सलोकतां
जयति य एवं वेद ॥ १ ॥

उक्तप्राणेन सायुज्यं सलोकतां प्राप्नोतीति भावः ॥ १ ॥

यजुः प्राणो वै यजुः प्राणे हीमानि सर्वाणि भूतानि
युज्यन्ते युज्यन्ते हास्मै सर्वाणि भूतानि श्रैष्ठ्याय ।

युज्यन्ते संनह्यन्त उद्युञ्जते ।

यजुषः सायुज्यꣳ सलोकतां जयति य एवं वेद ॥ २ ॥

शिष्टं स्पष्टम् ।

साम प्राणो वै साम प्राणे हीमानि सर्वाणि
भूतानि सम्यञ्चि सम्यञ्चि हास्मै सर्वाणि
भूतानि श्रैष्ठ्याय कल्पन्ते साम्नः सायुज्यꣳ
सलोकतां जयति य एवं वेद ॥ ३ ॥

सम्यञ्चि संगतानि भवन्ति श्रैष्ठ्याय सम्यञ्चि कल्पन्ते । नः श्रेष्ठो भवत्विति प्राणविदः श्रैष्ठ्याय संगतानि भवन्ति कल्पन्ते । शिष्टं स्पष्टम् ॥ ३ ॥

क्षत्रं प्राणो वै क्षत्रं प्राणो हि वै क्षत्रं त्रायते
हैनं प्राणः क्षणितोः प्र क्षत्रमत्रमाप्नोति क्षत्रस्य
सायुज्यꣳ सलोकतां जयति य एवं वेद ॥ ४ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्याये त्रयोदशं
ब्राह्मणम् ॥ १३ ॥

क्षत्रमिति प्राणमुपासीत । तत्रोपपत्तिः—प्राणो वै क्षत्रमिति । तत्र विवदमानं प्रत्याह—प्राणो ह वै क्षत्रमिति । प्राणस्य क्षत्रत्वप्रसिद्धेरिति भावः । तदुपपादयति—त्रायते हैनं प्राणः क्षणितोः । क्षणु हिंसाया-मित्यस्मात्सर्वधातुभ्य इतीन्क्षणिर्हिंसा तस्मात्पञ्चम्यर्थे तोसुन्प्रत्ययः । हिंसातस्त्रायते प्राण इत्यर्थः । शस्त्रादिहिंसायामपि प्राणसद्भावे पुनर्मां-सेन पूर्णं भवतीत्यर्थः । विद्यायाः फलमाह—क्षत्रमत्रमाप्नोति । न त्राय-तेऽन्येन केनचिदिति अत्रं प्राणस्तमत्रं क्षत्रत्वगुणविशिष्टं प्राप्नोतीत्यर्थः ।

क्षत्रस्य सायुज्यꣳ सलोकतां गच्छति क्षत्रप्राणस्य सायुज्यसालोक्ये गच्छतीत्यर्थः ।

इति बृहदारण्यकोपनिषत्प्रकाशिकायां पञ्चमाध्यायस्य
त्रयोदशं ब्राह्मणम् ॥ १३ ॥

एवं मनोहृदयाद्यनेकविशिष्टस्योपासनमुक्त्वा गायत्र्युपाधिविशिष्टस्योपासनामाह—

भूमिरन्तरिक्षं द्यौरित्यष्टावक्षराणि ।

अत्र दियोरिति यकारेण सहाष्टत्वं द्रष्टव्यम् ।

अष्टाक्षरꣳ ह वा एकं गायत्र्यै पदम् ।

गायत्र्या एकं पादमष्टाक्षरम् । एकैकशः पादोऽष्टाक्षर इत्यर्थः ।

एतदु हैवास्या एतत् ।

एतल्लोकत्रयात्मकमस्या गायत्र्या एतत्पदमेकं पदमित्यर्थः ।

लोकत्रयेण गायत्र्येकपदत्वज्ञानस्य फलमाह—

स यावदेषु त्रिषु लोकेषु तावद्ध जयति
योऽस्या एतदेवं पदं वेद ॥ १ ॥

एवमेतत्पदं यो वेद स त्रिषु लोकेषु यावज्जेतव्यं तावज्जयतीत्यर्थः । एवमुत्तरत्रापि ॥ १ ॥

ऋचो यजूꣳषि सामानीत्यष्टावक्षराण्यष्टाक्षरꣳ
ह वा एकं गायत्र्यै पदमेतदु हैवास्या एतत् ।

एतद्वेदत्रयात्मकमस्या गायत्र्या एकं पदमित्यर्थः ।

स यावतीयं त्रयी विद्या तावद्ध जयति
योऽस्या एतदेवं पदं वेद ॥ २ ॥

इयं त्रयी विद्या यावती वाक्फलप्रकाशिका तत्फलं सर्वं जयतीत्यर्थः । त्रयीप्रतिपाद्यं सर्वं फलमाप्नोतीति यावत् ॥ २ ॥

प्राणोऽपानो व्यान इत्यष्टावक्षराणि ।

अत्र वियान इति यकारेण सहाष्टाक्षरत्वं द्रष्टव्यम् ।

अष्टाक्षरꣳ ह वा एकं गायत्र्यै पदमेतदु
हैवास्या एतत्स यावदिदं प्राणि तावद्ध
जयति योऽस्या एतदेवं पदं वेद ।

प्राणिजातं सर्वं जयतीत्यर्थः ।

अथास्या एतदेव तुरीयं दर्शतं पदं परोरजा य एष तपति ।

अस्या गायत्र्या एतदेव तुरीयं पदम् । अत्र तुरीयदर्शतशब्दौ स्वयमेव व्याचष्टे—

यद्वै चतुर्थं तत्तुरीयं दर्शतं पदमिति ददृश इव ह्येषः ।

एष मण्डलान्तर्गतपुरुषो दृश्यत इव हि भासतेऽतो दर्शतं पदमित्यर्थः । परोरजा इत्येतद्व्याचष्टे—

परोरजा इति सर्वमु ह्येवैष रज उपर्युपरि तपति ।

सर्वं रजः सर्वमपि राजसं लोकमुपरि तपति । अत्यन्तमूर्ध्वं स्थित्वा तपतीत्यर्थः ।

एवꣳ हैव श्रिया यशसा तपति
योऽस्या एतदेवं पदं वेद ॥ ३ ॥

स श्रिया यशसा च दीप्यत इत्यर्थः ॥ ३ ॥

सैषा गायत्र्येतस्मिꣳस्तुरीये
दर्शते पदे परोरजसि प्रतिष्ठिता ।

एषा गायत्री तुरीये दर्शते पदे परोरजसि मण्डलपुरुषे प्रतिष्ठितेत्यर्थः ।

तद्वै तत्सत्ये प्रतिष्ठितं चक्षुर्वै सत्यं चक्षुर्हि वै सत्यम् ।

तत्रोपपत्तिः—

तस्माद्यदिदानीं द्वौ विवदमानावेयाताम् ।

एयातामागच्छेयातामित्यर्थः ।

अहमदर्शमहमश्रौषमिति य एवं ब्रूयाद-
हमदर्शमिति तस्मा एव श्रद्दध्याम ।

चक्षुषाऽहं दृष्टवानिति वचनादेव श्रद्धां कुर्वीमहीत्यर्थः ।

तद्वै तत्सत्यं बले प्रतिष्ठितं प्राणो वै बलं
तत्प्राणे प्रतिष्ठितं तस्मादाहुर्बलꣳ सत्यादो-
जीय इत्येवमु हैषा गायत्र्यध्यात्मं प्रतिष्ठिता ।

तत्प्राणे प्रतिष्ठितं तत्सत्यं प्राणे प्रतिष्ठितमित्यर्थः । बलं सत्यादोजीय इति । ओजीय ओजस्तरमित्यर्थः । लोके यस्मिन्यदाश्रितं भवति तस्मादाश्रिताद्‌आश्रयस्य बलवत्त्वमिति भावः । एवमु हैषा गायत्र्यध्यात्मं प्रतिष्ठिता । एवमुक्तप्रकारेणाध्यात्मं प्राणे गायत्री प्रतिष्ठितेत्यर्थः ।

गायत्रीनिर्वचनमाह—

सा हैषा गयाꣳस्तत्रे ।

त्रैङ्पालने । तस्माल्लिटि रूपं पालयति स्मेत्यर्थः ।

गयशब्दं व्याचष्टे—

प्राणा वै गयास्तत्प्राणाꣳस्तत्रे ।

तत्प्राणांस्तद्रूपान्प्राणानित्यर्थः ।

तद्यद्गयाꣳस्तत्रे तस्माद्गायत्री नाम स
यामेवामूꣳ सावित्रीमन्वाहैषैव सा ।

स आचार्यः पच्छोऽर्धर्चशः सर्वामिति प्रकारेण यां सावित्रीमन्वाह सा सावित्री प्राणान्नरकपतनादिभ्यस्त्रायत इत्यर्थः ।

स यस्मा अन्वाह तस्य प्राणाꣳस्त्रायते ॥ ४ ॥

यस्मै शिष्यायान्वाह तस्य प्राणान्नरकपतनादिभ्यस्त्रायत इत्यर्थः ॥४॥

ताꣳ हैतामेके सावित्रीमनुष्टुभमन्वा-
हुर्वागनुष्टुबेतद्वाचमनुब्रूम इति ।

केचनैतां सावित्रीमनुष्टुप्छन्दस्कामेवाऽऽहुः । तत्र हेतुः—वागनुष्टुबेतद्वाचमनुब्रूम इति । सावित्र्यनुवचने प्रवर्तमानाः प्रवर्त(द)न्ते वाक्चानुष्टुप्छन्दःप्रधानेति । अनुष्टुप्छन्दस्कैव सावित्र्युपदेष्टव्या । अतस्तुरीयेणाष्टाक्षरेण पादेन युक्ता सावित्र्युपदेष्टव्या । अतश्च द्वात्रिंशदक्षरतयाऽनुष्टुप्छन्दस्का सावित्र्युपपद्यते ।

---

१ अत्रत्यमुद्रितपुस्तके, दोगीय इति वर्तते ।

तद्दूषयति--

न तथा कुर्याद्गायत्रीमेव सावित्रीमनुब्रूयात् ।

गायत्रीमष्टाक्षरैस्त्रिभिः पादैर्युक्तां गायत्रीछन्दस्कामेव सावित्रीमनुब्रूयादित्यर्थः ।

यदि ह वा अप्येवंविद्बह्विव प्रतिगृह्णाति न हैव तद्गायत्र्या एकंचन पदं प्रति ॥ ५ ॥

एवं जानन्देहयात्रायै बहु प्रतिग्रहं करोति तत्प्रतिग्रहजातं गायत्र्या एकैकपदस्य न पर्याप्तं तेन न स्पर्धते । एवं पादविदः प्रतिग्रहे दोषाः शमं यान्तीत्यर्थः ॥ ५ ॥

स य इमाꣳस्त्रीँल्लोकान्पूर्णान्प्रतिगृह्णीयात्सोऽस्या एतत्प्रथमं पदमाप्नुयात् ।

य इमांस्त्रीँल्लोकान्धनपूर्णान्प्रतिगृह्णाति स गायत्रीप्रथमपादज्ञानफलमाप्तवान् । प्रथमपादज्ञानस्य लोकत्रयभोक्तृत्वं फलमित्यर्थः ।

अथ यावतीयं त्रयी विद्या यस्तावत्प्रतिगृह्णीयात्सोऽस्या एतद्द्वितीयं पादमाप्नुयात् ।

त्रयीप्रकाश्यसकलफलानुभवो द्वितीयपादज्ञानस्य फलमित्यर्थः ।

अथ यावदिदं प्राणि यस्तावत्प्रतिगृह्णीयात्सोऽस्या एतत्तृतीयं पदमाप्नुयात् ।

सर्वप्राणिशेषित्वं तृतीयपादज्ञानस्य फलमित्यर्थः ।

अथास्या एतदेव तुरीयं दर्शतं पदं परोरजा य एष तपति नैव केनचनाऽऽप्यं कुत उ एतावत्प्रतिगृह्णीयात् ॥ ६ ॥

तुरीयस्य पादस्य यत्फलं तत्केनचन केनापि नाऽऽप्यं न प्राप्तुं योग्यम् । कुत इत्यत्राऽऽह—कुत उ एतावत्प्रतिगृह्णीयात् । एतदनुरूपं कुतः प्राप्नुयादित्यर्थः । तस्मात्तस्यानन्तमेव फलं नान्यदित्यर्थः ।

तस्या उपस्थानं गायत्र्यस्येकपदी द्विपदी
त्रिपदी चतुष्पद्यपदसि न हिं पद्यसे ।

अस्या गायत्र्या उपस्थानमुच्यत इत्यर्थः । हे गायत्रि त्वं भूर्भुवः-स्वर्लक्षणेनैकेन पदेनैकपद्यासि । त्रयीलक्षणेन पदेन द्विपदी । प्राणादिना तृतीयेन पदेन त्रिपदी । तुरीयेण पदेन परोरजसा चतुष्पद्यसि । अपदसि । तदुपपादयति—न हि पद्यस इति । पद्यसे गम्यसे ज्ञायस इत्यर्थः । अपरिच्छिन्नमहिमत्वात्परिच्छिन्नतया ज्ञातुं न शक्यस इत्यर्थः । तुरीयं पादं नमस्यति—

नमस्ते तुरीयाय दर्शताय पदाय परोरजसेऽसावदो
मा प्रापदिति यं द्विष्यादसावस्मै कामो मा
समृद्धीति वा न हैवास्मै स काम ऋध्यते यस्मा
एवमुपतिष्ठतेऽहमदः प्रापमिति वा ॥ ७ ॥

यं द्विष्यादसौ शत्रुरदोऽस्मै शत्रवे यं शत्रुमुद्दिश्य गायत्रीमुपतिष्ठते तस्मै तस्य कामो न ऋद्धिमाप्नोति । इदं वाञ्छितं मा प्रापन्नैव प्राप्नोति । असौ कामोऽस्मै शत्रवे मा समृद्धी मा भूत् । व्रीह्यादित्वादिनिः । अहमदः श्रेयः प्रापं प्राप्तवानस्मीति य उपतिष्ठते तस्य तत्प्राप्नोतीत्यर्थः । एषं चैषां त्रयाणां मन्त्राणां विकल्पेन प्रयोग इति द्रष्टव्यम् ॥ ७ ॥

एतद्ध वै तज्जनको वैदेहो बुडिलमाश्वतराश्विमुवाच ।

एतद्गायत्रीविज्ञानं प्रस्तुत्य वैदेहो जनको नाम्ना बुडिलमश्वतराश्वस्यापत्यमाश्वतराश्विमुवाच ।

यन्नु भो तद्गायत्रीविदब्रूथाः ।

यद्गायत्रीविदस्मीत्यब्रूथास्तस्य वचसोऽननुरूपमिदमित्यर्थः । कुत इत्यत्राऽऽह—

अथ कथꣳ हस्तीभूतो वहसीति ।

हस्तीव प्रतिग्रहादिजन्यं पापं वहसि अथाप्यहं गायत्रीविदिति ब्रूषे वे(नै)तदनुरूपमित्यर्थः ।

स आह—

मुखꣳ ह्यस्याः सम्राण्न विदांचकारेति होवाच ।

हे सम्राड्गायत्रीं जानेऽपि तु तस्या मुखं न ज्ञातवानस्मि अतः पापं वहामीत्युक्तवान् ।

इतर आह—

तस्या अग्निरेव मुखं यदि ह वा अपि बह्विवा-
ग्नावभ्यादधाति सर्वमेवैतत्संदहत्येवꣳ हैवैवं-
विद्यद्यपि बह्विव पापं कुरुते सर्वमेव तत्सं-
साय शुद्धः पूतोऽमृतोऽजरः संभवति ॥ ८ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य
चतुर्दशं ब्राह्मणम् ॥ १४ ॥

गायत्र्या अग्निर्मुखं यदि बह्वपीन्धनमग्नौ प्रतिक्षिपति तत्सर्वं दहति एवमेवंविद्बह्वपि कृतं पापं संसाय षोऽन्तकर्मणि दग्ध्वेत्यर्थः । पूतो ब्रह्मविद्याप्रतिबन्धकपापरहितः संपन्नब्रह्मविद्यो जरामरणशून्यो भवतीत्यर्थः ॥ ८ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां पञ्चमाध्यायस्य
चतुर्दशं ब्राह्मणम् ॥ १४ ॥

अर्चिराद्यातिवाहिकानुप्रविष्टादित्यप्रार्थनामन्त्रः—

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।

सत्यस्य ब्रह्मणो मुखं द्वारं ब्रह्मगमनमार्गमिति यावत् । हिरण्मयेन पात्रेण तेजिष्ठेन तेजोमण्डलेन पिहितमावृतम् ।

तत्त्वं पूषन्नपावृणु ।

तद्द्वारं हे पूषन्निरावृतं कुरु ।

किमर्थमित्यत्राऽऽह—

सत्यधर्माय दृष्टये ।

सत्यं ब्रह्म धर्म आश्रयः साधनं यस्य तस्मै ब्रह्मैकनिष्ठाय ब्रह्मदर्शनार्थिने मह्यं दृष्टये ब्रह्मदर्शनायेत्यर्थः ।

पूषन्नेकर्षे यम सूर्य प्राजापत्य ।

हे पूषन् । एकश्चासावृषिश्चैकर्षिः । ऋषिर्द्रष्टा सवितुर्जगदेकचक्षुष्ट्वादिति भावः । यम यमयित सूर्य सुष्ठ्वीरयति रश्मीनिति सूर्य । प्राजापत्य प्रजापतेः पुत्र ।

व्यूह रश्मीन् समूह तेजः ।

तावकान्रश्मीन्व्यूहापगमय तेजः समूह संक्षिप ।

किमर्थमित्यत्राऽऽह—

यत्ते रूपं कल्याणतमं तत्ते पश्यामि ।

तेजसां संक्षेपाभावे तव रूपं दुर्दर्शमिति भावः ।

योऽसावसौ पुरुषः सोऽहमस्मि ।

आत्मा यादृग्रूपस्तादृग्रूपोऽहमस्मि । तादृग्रूपतया वेद्मि आत्मतत्त्वविदस्मीत्यर्थः।

वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम् ।

अर्चिरादिना गतस्य मे प्राणवायुर्वायौ लीयतां मृतं च शरीरं भस्मान्तं च भवतु । ततश्च देहेन्द्रियादिष्वात्माभिमानी नाहमस्मि तद्विलक्षणात्मज्ञानवानित्यर्थः ।

ॐ क्रतो स्मर कृतꣳ स्मर क्रतो स्मर कृतꣳ स्मर ।

ओमिति प्रणवप्रतिपाद्यस्याग्न्यादित्यस्य संबोधनम् । अधीगर्थदयेशां कर्मणीति कर्मणि षष्ठी । क्रतूपासनं मदनुष्ठितं स्मर तदङ्गतया कृतं कर्मापि स्मर । देहविलक्षणात्मज्ञानी कर्माङ्गकब्रह्मविद्यानिष्ठश्चातस्तत्स्वरूपं प्रदर्शय मुक्तिमार्गं च प्रयच्छेत्यर्थः ।

अर्चिरादिप्रथमपर्वाग्निप्रार्थनामन्त्रः—

अग्ने नय सुपथा राये अस्मा-
न्विश्वानि देव वयुनानि विद्वान् ।

हेऽग्ने सुपथा शोभनेनार्चिरादिमार्गेण राय ऐश्वर्याय स्वाराज्याय मोक्षायेति यावत् । अस्मान्नय प्रापय । हे देव द्योतमान विश्वानि

वयुनानि सर्वाणि ज्ञानानि विद्वान्भवसि । अतो मदीयमप्यात्मज्ञानं त्वं जानासीत्यर्थः ।

युयोध्यस्मज्जुहुराणमेनः ।

युयोधि अपनय । अस्मदस्मत्तः । जुहुराणं कुटिलम् । हुर्छा कौटिल्य इत्यस्मात्कानचि रूपम् । एनः पापम् ।

भूयिष्ठां ते नमउक्तिं विधेम ॥ १ ॥

इति बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य पञ्चदशं ब्राह्मणम् ॥ १५ ॥

इति बृहदारण्यकोपनिषदि पञ्चमोऽध्यायः ॥ ५ ॥

भूयसीं नमउक्तिं करवामेत्यर्थः ।

इति बृहदारण्यकोपनिषत्प्रकाशिकायां पञ्चमाध्यायस्य पञ्चदशं ब्राह्मणम् ॥ १५ ॥

इति बृहदारण्यकोपनिषदि पञ्चमोऽध्यायः ॥ ५ ॥

प्राणविषयकविद्या प्रसू(स्तू)यते—

यो ह वै ज्येष्ठं श्रेष्ठं च वेद ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति प्राणो वै ज्येष्ठश्च श्रेष्ठश्च ज्येष्ठश्च श्रेष्ठश्च स्वानां भवत्यपि च येषां बुभूषति य एवं वेद ॥ १ ॥

प्राणो हीन्द्रियाणां मध्ये ज्येष्ठः । प्राणव्यापारप्रवृत्त्यनन्तरभावित्वादिन्द्रियान्तरप्रवृत्तेरिति भावः । श्रेष्ठश्च वक्ष्यमाणरीत्येति भावः । एवं प्राणं यो वेद स स्वानां ज्येष्ठः श्रेष्ठो भवति । इतरेषां च येषां ज्येष्ठः श्रेष्ठो भवितुमिच्छति तेषामपि ज्येष्ठः श्रेष्ठो भवतीत्यर्थः ॥ १ ॥

यो ह वै वसिष्ठां वेद वसिष्ठः स्वानां भवति वाग्वै वसिष्ठा वसिष्ठः स्वानां भवत्यपि च येषां बुभूषति य एवं वेद ॥ २ ॥

अतिशयेन वसुमत्त्वं वसिष्ठत्वम् । वाग्मिन एव हि वसुमत्ता भवति । अतो वाचो वसिष्ठत्वम् । शिष्टं पूर्ववत् ॥ २ ॥

यो ह वै प्रतिष्ठां वेद प्रतितिष्ठति समे
प्रतितिष्ठति दुर्गे चक्षुर्वै प्रतिष्ठा चक्षुषा हि
समे च दुर्गे च प्रतितिष्ठति प्रतितिष्ठति समे
प्रतितिष्ठति दुर्गे य एवं वेद ॥ ३ ॥

चक्षुषः प्रतिष्ठात्वं नाम समविषमदेशप्रदर्शनद्वारा पुरुषप्रतिष्ठाहेतुत्वम् । शिष्टं पूर्ववत् ॥ ३ ॥

यो ह वै संपदं वेद सꣳ हास्मै पद्यते यं कामं कामयते श्रोत्रं वै संपच्छ्रोत्रे हीमे सर्वे वेदा अभिसंपन्नाः
सꣳहास्मै पद्यते यं कामं कामयते य एवं वेद ॥ ४ ॥

अस्मै स संपद्यते । श्रोत्रे सत्येव हि सर्वे वेदाः संपन्ना भवन्ति । तस्मात्संपन्नत्वगुणकं श्रोत्रं यो वेद तस्य काम्यमानः कामः संपद्यत इत्यर्थः ॥ ४ ॥

यो ह वा आयतनं वेदाऽऽयतनꣳ स्वानां भवत्यायतनं जनानां मनो वा आयतनमायतनꣳ स्वानां भवत्यायतनं जनानां य एवं वेद ।

इन्द्रियाणां मनोधीनप्रवृत्तिकत्वादिन्द्रियान्तरापेक्षया मनस आयतनत्वम् । अत एव जनानामप्यायतनत्वम् । शिष्टं स्पष्टम् ।

यो ह वै प्रजापतिं वेद प्रजायते ह प्रजया पशुभी रेतो वै
प्रजापतिः प्रजायते ह वै प्रजया पशुभिर्य एवं वेद ॥६॥

रेतःशब्देन प्रजननेन्द्रियं लक्ष्यते । तेन हि पुत्रपौत्रादिमत्तया प्रकृष्टतया जायते पुरुष इति प्रजापतिः ॥ ६ ॥

ते हेमे प्राणा अहꣳश्रेयसे विवदमाना
ब्रह्म जग्मुस्तद्धोचुः को नो वसिष्ठ इति

तद्धोवाच यस्मिन्व उत्क्रान्त इदꣳ शरीरं पापीयो मन्यते स वो वसिष्ठ इति ॥ ७ ॥

ते हेमे वागादयः प्राणा अहमर्थस्याऽऽत्मनः श्रेयसे विवदमाना चतुर्मुखं गत्वाऽस्माकं मध्ये कः श्रेयानिति तद्ब्रह्म प्रति होचुः । तच्च ब्रह्म प्रत्युवाच । युष्माकं मध्ये यस्मिन्नुत्क्रान्ते शरीरं पापिष्ठतरमिव जनो मन्यते स श्रेष्ठ इति प्रत्युवाचेत्यर्थः ॥ ७ ॥

वाग्घोच्चक्राम सा संवत्सरं प्रोष्याऽऽगत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथाऽकला अवदन्तो वाचा प्राणन्तः प्राणेन पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण विद्वाꣳसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह वाक् ॥८॥

तत्र प्रथमतः परीक्षार्थं वागुत्क्रान्ता सती संवत्सरं प्रवासं कृत्वा पुनरागत्य हे प्राणा मदृते मां विना जीवितुं कथमशकत कथं शक्ता इत्युवाच । ते होचुर्यथाऽकला मूका वाचाऽवदन्तोऽपि प्राणेन जीवन्तश्चक्षुरादिना दर्शनादिकं कुर्वन्त आसत एवं वयमपि अजीविष्म जीवितवन्त इति होचुः । ततः शरीरे वागिन्द्रियं प्रविवेश । एवमुत्तरत्रापि द्रष्टव्यम् ॥ ८ ॥

चक्षुर्होच्चक्राम तत्संवत्सरं प्रोष्याऽऽगत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथाऽन्धा अपश्यन्तश्चक्षुषा प्राणन्तः प्राणेन वदन्तो वाचा शृण्वन्तः श्रोत्रेण विद्वांसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह चक्षुः ॥९॥

श्रोत्रं होच्चक्राम तत्संवत्सरं प्रोष्याऽऽगत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा बधिरा अशृण्वन्तः श्रोत्रेण प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा विद्वाꣳसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह श्रोत्रम् ॥ १० ॥

मनो होच्चक्राम तत्संवत्सरं प्रोष्याऽऽगत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा मुग्धा अविद्वाꣳसो मनसा प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह मनः ॥ ११ ॥

रेतो होच्चक्राम तत्संवत्सरं प्रोष्याऽऽगत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा क्लीबा अप्रजायमाना रेतसा प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण विद्वाꣳसो मनसैवमजीविष्मेति प्रविवेश ह रेतः ॥ १२ ॥

अथ ह प्राण उत्क्रमिष्यन्यथा महासुहयः सैन्धवः पड्वीशशङ्कून्संवृहेदेवꣳ हैवेमान्प्राणान्संववर्ह ।

मुख्यः प्राण उत्क्रमिष्यन्सन्यथा लोके शोभनो हयः सिन्धुदेशप्रभवः परीक्षणायाश्वारोहेणाऽऽरूढः पड्वीशशङ्कून्पड्वीशाश्च ते शङ्कवश्च पादबन्धनशङ्कूनुत्खनेदेवं सर्वान्प्राणानुच्चखानोरवातवान् ।

ते होचुर्मा भगव उत्क्रमीर्न वै शक्ष्यामस्त्वदृते जीवितुमिति तस्यो मे बलिं कुरुतेति तथेति॥१३॥

ते प्राणा आगम्य हे भगवन्पूजार्ह मुख्यप्राण त्वमुत्क्रमणं मा कार्षीस्त्वां विना जीवितुं न शक्ष्याम इति होचुः । स प्रत्युवाच तस्यो मे श्रेष्ठस्य पूर्वं बलिं कुरुत करं प्रयच्छतेति । उशब्दोऽवधारणे । तथेत्येव तेऽपि प्रत्यूचुः ॥ १३ ॥

सा ह वागुवाच यद्वा अहं वसिष्ठाऽस्मि त्वं तद्वसिष्ठोऽसीति ।

यद्येन गुणेनाहं वसिष्ठाऽस्मि तत्तेन त्वमेव वसिष्ठोऽसि मद्वसिष्ठत्वं त्वदधीन[मिति]वागुवाचेत्यर्थः । वैशब्दोऽवधारणे । एवमुत्तरत्रापि द्रष्टव्यम् ।

यद्वा अहं प्रतिष्ठाऽस्मि त्वं तत्प्रतिष्ठोऽसीति चक्षु-
र्यद्वा अहꣳ संपदस्मि त्वं तत्संपदसीति श्रोत्रं
यद्वा अहमायतनमास्मि त्वं तदायतनमसीति
मनो यद्वा अहं प्रजापतिरस्मि त्वं तत्प्रजापति-
रसीति रेतस्तस्यो मे किमन्नं किं वास इति ।

एतादृशगुणविशिष्टस्य मेऽन्नं किं वस्त्रं किमिति मुख्यः प्राण इतरान्प्राणानपप्रच्छेत्यर्थः ।

ते होचुः—

यदिदं किं चाऽऽ श्वभ्य आ कृमिभ्य आ
कीटपतङ्गेभ्यस्तत्तेऽन्नमापो वास इति ।

श्वकृम्यादिपर्यन्तप्राणिजातस्य यदन्नं तत्सर्वं प्राणस्य तेऽन्नमापो वासः । सर्वप्राणिजातान्ने प्राणान्नत्वचिन्तनं कर्तव्यमप्सु च वासस्त्वचिन्तनं कर्तव्यमित्यर्थः । न तु सर्वभक्षणं कर्तव्यम् । अद्भिर्वाऽऽच्छादनं कार्यमिति वा तस्यासंभवादिति द्रष्टव्यम ।

सर्वप्राणिजातान्नेऽन्नत्वचिन्तनं स्तौति—

न ह वा अस्यानन्नं जग्धं भवति नानन्नं
प्रतिगृहीतं य एवमेतदन्नस्यान्नं वेद ।

सर्वप्राण्यन्ने प्राणान्नचिन्तनं कुर्वतो नाभक्ष्यं भक्षितं भवति अभक्ष्यभक्षणे न दोष इत्यर्थः । नानन्नं गजाश्वादिकं प्रतिगृहीतं भवति गजाश्वप्रतिग्रहादिना न दोष इति भावः । 'सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ' [ब्र० सू० ३ । ४ । २८] इति सर्वान्नानुमतेः प्राणात्ययविषयत्वसमर्थनादभक्ष्यभक्षणादौ दोषाभावप्रतिपादकमपि आपद्विषयमेव द्रष्टव्यम् ।

तद्विद्वाꣳसः श्रोत्रिया अशिष्यन्त आचामन्त्यशित्वाऽऽ-
चामन्त्येतमेव तदनमनग्नं कुर्वन्तो मन्यन्ते ॥ १४ ॥

इति बृहदारण्यकोपनिषदि षष्ठाध्यायस्य
प्रथमं ब्राह्मणम् ॥ १ ॥

———

यस्मादपां वासस्त्वमनुसंधातव्यं तस्माद्धेतोः श्रोत्रिया विद्वांस आचमनीयाभिरद्भिर्वासोभिरेतदन्नं प्राणमनग्नं कुर्वन्तो मन्यमाना अन्नात्पूर्वं पश्चाच्चाऽऽचामन्तीत्यर्थः । अत्रानग्नं कुर्वन्तो मन्यन्त इत्युक्त्या वासस्त्वचिन्तनमर्थसिद्धम् । वासःकार्यत्वादनग्नताया इति द्रष्टव्यम् । भाष्योदाहृतम् 'तस्मादेवंविदशिष्यन्नाचामेत्' इत्यादिवाक्यं माध्यंदिनशाखागतं द्रष्टव्यम् ॥ १४ ॥

इति बृहदारण्यकोपनिषत्प्रकाशिकायां षष्ठाध्यायस्य
प्रथमं ब्राह्मणम् ॥ १ ॥

प्रकृतिविविक्तजीवयाथात्म्यविषयां पञ्चाग्निविद्यां संसृतिवैराग्याय प्रस्तौति—

श्वेतकेतुर्ह वा आरुणेयः पञ्चालानां परिषदमाजगाम ।

नाम्ना श्वेतकेतुः । आरुणेरपत्यमारुणेयः । स पञ्चालानां देशानां परिषदं समाजं स्ववैदुष्यप्रकटनायाऽऽजगाम ।

स आजगाम जैवलिं प्रवाहणं परिचारयमाणम् ।

जीवलस्यापत्यं जैवलिः । तं प्रवाहणनामानं राजानं स्वभृत्यैरात्मनः परिचर [णं] कारयन्तमागच्छत् ।

तमुदीक्ष्याभ्युवाद कुमारा ३ इति स
भो ३ इति प्रतिशुश्रावानुशिष्टोऽ-
न्वसि पित्रेत्योमिति होवाच ॥१॥

स राजा तमुद्वीक्ष्य कुमारा ३ इत्यामन्त्रितवान् । आमन्त्रणे प्लुतिः। स भो ३ इति प्रतिशुश्राव । अथ राजा पित्रा विद्यामनुशिष्टोऽसीति पप्रच्छ । अनुशिष्टोऽस्मीतीतर उवाच ॥ १ ॥

वेत्थ यथेमाः प्रजाः प्रयत्यो विप्रतिपद्यन्ता ३ इति ।

प्रयत्यो म्रियमाणा इमाः प्रजा यथा येन प्रकारेण विशिष्टदेशं प्रतिपद्यन्ते प्रश्ने प्लुतिः । इति वेत्थ जानासि किमेवं गन्तव्यदेशप्रश्नः । एवं पृष्टः कुमारः—

नेति होवाच ।

अथ पुनः पृच्छति—

वेत्थो यथेमं लोकं पुनरापद्यन्ता३ इति ।

इमं लोकं येन प्रकारेण पुनरागच्छन्तीति ।

नेति हैवोवाच ।

इतर इति शेषः । पुनः पृच्छति—

वेत्थो यथाऽसौ लोक एवं बहुभिः पुनः
पुनः प्रयद्भिर्न संपूर्यता३ इति ।

असौ स्वर्लोकोऽनवरतमागच्छद्भिः पुरुषैः कुतो न संपूर्यते ।

नेति हैवोवाच ।

पुनः पृच्छति—

वेत्थो यावतिथ्यामाहुत्याᳫं हुतायामापः पुरुष-
वाचो भूत्वा समुत्थाय वदन्ती३ इति ।

यावतां पूरणी यावतिथी । 'तस्य पूरणे डट्' इति डटि 'वतोरिथुक्' इतीथुगागमः । यावत्संख्याकायामाहुत्यां हुतायामापः पुरुष इति वाग्यासां ताः पुरुषवाचः पुरुषशब्दवाच्या भूत्वा पुरुषाकारपरिणता भूत्वा समुत्थाय वदन्ति अभिलपनं कुर्वन्त आसत इत्यर्थः ।

नेति हैवोवाच ।

पुनः पृच्छति—

वेत्थो देवयानस्य वा पथः प्रतिपदं पितृयाणस्य वा ।

देवयानस्य वा पितृयाणस्य वा पथः प्रतिपदं किं वेत्थ । प्रतिपद्यतेऽनेनेति प्रतिपत् । प्रथमं पर्व ।

तदेव स्पष्टयति—

यत्कृत्वा देवयानं वा पन्थानं प्रतिपद्यते पितृयाणं वा ।

यत्कृत्वा यदुपक्रम्येत्यर्थः । देवयानपितृयाणव्यावर्तकाकारप्रश्नोऽयमिति द्रष्टव्यम् । भाष्ये छान्दोग्यपञ्चाग्निविद्याप्रश्नानुक्रमेण कर्मिणां गन्तव्यदेशं पुनरावृत्तिप्रकारं देवयानपितृयाणपथव्यावर्तनेऽमुष्य लोकस्य

प्राप्तारं च वेत्थेति पृष्ट्वा 'वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति पप्रच्छेति भाषितत्वादिहापि तन्मात्रपर्यवसानं युक्तम् ।

अपि न ऋषेर्वचः श्रुतम् ।

अस्मिन्देवयानपितृयाणविषय ऋषेर्मन्त्रस्य वचनं नोऽस्माकं श्रुतम् ।

कोऽयं मन्त्र इत्याह—

द्वे सृती अशृणवं पितृणामहं देवानामुत मर्त्यानां ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं चेति ।

द्वे सृती गती अशृणवमहं श्रुतवानस्मि पितृणां मनुष्याणां देवानां च । एजदगच्छत्प्राणिजातं ताभ्यां सृतीभ्यां समेति ब्रह्माण्डान्तर्गतं लोकजातं समेति मातापितृशून्यं भगवल्लोकं च समेतीत्यर्थः । पितृयाणेन पथाऽण्डान्तर्वर्तिलोकं समेति उत्तरेण पथा भगवल्लोकं समेतीत्यर्थः ।

एवं पृष्टः कुमार आह—

नाहमत एकंचन वेदेति होवाच ॥ २ ॥

एषां मध्ये न किंचिदपि वेदेत्युक्तवानित्यर्थः ॥ २ ॥

अथ हैनं वसत्योपमन्त्रयांचक्रे ।

एनं श्वेतकेतुं वसत्या हेतुनोपामन्त्रयत कुमारं वासं प्रार्थितवानित्यर्थः ।

अनादृत्य वसतिं कुमारः प्रदुद्राव ।

राजसमीपाच्छीघ्रं निर्जगामेत्यर्थः ।

स आजगाम पितरं तꣳ होवाचेति वाव किल नो भवान्पुराऽनुशिष्टानवोचदिति ।

पुरा समावर्तनकाले नोऽस्मान्प्रति भवाननुशिष्टान्सर्वविद्याविदो वाव किलावोचदुक्तवानिति ।

एवं सामर्षेण पुत्रेणोक्तः पिताऽऽह—

कथं सुमेध इति ।

नानुशिष्टोऽसीति शेषः ।

इतरोऽननुशासनं दर्शयति—

पञ्च मा प्रश्नान्राजन्यबन्धुरप्राक्षीत्ततो नैकंचन वेदेति ।

राजन्यबन्धू राजन्याभासः । राजन्यानां बन्धू राज्यन्यबन्धुः । स्वयं राजन्य एव सन्राजन्यानां बन्धुरिति निन्द्यते । स पञ्च प्रश्नान्मां पृष्टवान् । तत्र किमपि न वेद्मीति ।

पिता पृच्छति—

कतमे त इति ।

ते प्रश्नाः कीदृशा इत्यर्थः ।

पुत्र आह—

इम इति ह प्रतीकान्युदाजहार ॥ ३ ॥

इम इत्येवमेकदेशान्सूचितवानित्यर्थः ॥ ३ ॥

स होवाच तथा नस्त्वं तात जानीथा
यथा यदहं किंच वेद सर्वमहं तत्तुभ्यमवोचं
प्रेहि तु तत्र प्रतीत्य ब्रह्मचर्यं वत्स्याव इति ।

हे तातास्मांस्त्वं तथा जानीथा येन प्रकारेणाहं यत्किंच वेद तत्सर्वं तुभ्यमहमवोचमिति । ततश्च मयैते प्रश्ना नावगता इति मया नोक्तोऽतस्त्वं च प्रेहि आगच्छाऽऽवां राज्ञः समीपं प्रतीत्य गत्वा विद्यार्थं ब्रह्मचर्यं वत्स्याव इति ।

इतर उवाच—

भवानेव गच्छत्विति ।

नाहं तस्य मुखं निरीक्षितुमुत्सह इति भावः ।

स आजगाम गौतमो यत्र प्रवाहणस्य जैवलेरास ।

आसनमित्यर्थः ।

तस्मा आसनमाहृत्योदकमाहारयांचकार ।

तस्मै गौतमाय राजाऽऽसनं दत्त्वा पाद्यार्थमुदकं भृत्यैरानीतवानित्यर्थः ।

अथ हास्मा अर्घ्यं चकार ।

स्तुरात्कावषेयात्तुरः कावषेयः प्रजापतेः
प्रजापतिर्ब्रह्मणो ब्रह्म स्वयंभु ॥

स्वतः सर्वज्ञमित्यर्थः ।

ब्रह्मणे नमः ॥ ४ ॥

इति बृहदारण्यकोपनिषदि षष्ठाध्यायस्य
पञ्चमं ब्राह्मणम् ॥ ५ ॥

आचार्येभ्यो नमस्कृत्याथ वंशस्य कीर्तयेत्स्वधा पूर्वेषां भवति ते नायुर्दीर्घमश्नुत इत्युक्त्वाऽनुक्रमेद्वंशमा ब्रह्मणो नयेदिति आ ब्रह्मणो वंशपरम्पराकीर्तनस्य श्रेयोहेतुत्वं शास्त्रसिद्धमिहानुसंधेयम् ॥ ४ ॥

क्षेमाय यः करुणया क्षितिनिर्जराणां
भूमावजृम्भयत शास्त्रसुधामुदारः ।
वामागमाध्वगवदावदतूलवातो
रामानुजः स मुनिराद्रियतां मदुक्तिम् ॥

श्रीमत्ताताचार्यचरणारविन्दचञ्चरीकस्य वात्स्यानन्तार्यपादसेवासमधिगतशारीरकमीमांसाभाष्यहृदयस्य परकालमुनिसमधिगतपारमहंस्यस्य श्रीरङ्गरामानुजमुनेः कृतिषु बृहदारण्यकप्रकाशिका समाप्ता ॥